August 1915.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 212.

वैयाकरणसिद्धान्तलघुमञ्जूषा

महामहोपाध्याय-श्रीनागेशभट्टविरचिता ।

श्रीमद्दुर्बलाचार्य-बालम्भट्टाभ्यां विरचित-

कुञ्जिकाकलाह्वटीकाद्वयसंवलिता ।

गुरुवरपण्डितश्रीनित्यानन्दपर्वतीयानां शासनमवलम्बमानेन

शेण्डे इत्युपाह्वेन सीतारामशास्त्रिणा

संशोधिता ।

VAIYÂKARANA SIDDHÂNTA LAGHU MANJUSHÂ

BY

MAHAMAHOPADHYAYA ŚRÎ NÂGEŚA BHATTA,
With Two Commentaries, *i. e.* Kunjikâ of
Durbalâchârya and Kalâ of Bâlam Bhatta.
Edited by Pandit Parvatiya Nityananda Panta
with the assistance of Sitarama Sastri Shende.

FASCICULUS IV-४

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT BOOK-DEPOT. BENARES.

AGENTS:-

OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

BENARES.

Price Rupee one.

॥ श्रीः ॥

—:०:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—२१२

१ अस्यां चौखम्बा- संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तवको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था एवाऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।

३ काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्—मुद्राः ७ आनकाः ८

५ अन्यैर्देयं प्रतिस्तवकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्डे २
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०
(४) भाष्योपबृंहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) २
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः १
(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः(मीमांसा) २
(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः (मीमांसा) २
(८) ब्रह्मसूत्रभाष्यम्—बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्णः । (वेदान्तः) ६
(९) स्याद्वादमञ्जरीमल्लिषेणानिर्मिता सम्पूर्णा २
(१०) सिद्धित्रयम्—विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्णः(वेदान्तः) १
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) ५
(१२) विभक्त्यर्थनिर्णयो न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ६
(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् । सम्पूर्णम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

॥ श्रीगणेशायनमः ॥

—:०:—

वैयाकरणसिद्धान्तमञ्जूषा ।

नागेशभट्टविरचिता ।

दुर्बलाचार्यकृतकुञ्जिकाटीकया बालम्भट्टकृतकलाटीकया च सहिता ।

(मं०) नागेशभट्टविदुषा नत्वा साम्बं शिवं लघुः ॥
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥ १ ॥

वाक्यस्फोटस्यमुख्यत्वम्

तत्र वाक्यस्फोटो मुख्यः । लोके तस्यैवार्थबोधकत्वात् । तेनैवार्थसमाप्तेश्च । तदुक्तं न्यायभाष्यकृता पदसमूहो वाक्यमर्थसमाप्ताविति । अत्र पदं सुबन्तं तिङन्तं च । तेन तत्समूह इत्यर्थः । समाप्तावित्यस्य समर्थमिति शेषः ॥ १ ॥

(कुं० टी०) मञ्जूषाकुञ्जिकाशिल्पशाब्दब्रह्मसमुन्नयः ॥
दिश दिशेति दिश्यान्नः शर्म शाश्वतिकं परम् ॥ १ ॥

नागेश इति । भटतीति भट्टः । वाग्मी । भटपरिभाषणे तन् प्रत्ययः । मज्जतीति मञ्जूषा मस्जेनुम् चेत्यूषन् । इदमित्थम्भूतं चेत्येवं ज्ञायमानमर्थजातं सिद्धं, सिद्धस्य संस्थितिरित्थम्भावव्यवस्था सिद्धान्त इति वात्स्यायननः । परमपुरुषार्थापवर्गहेतुत्वाद्वादातमाह । तत्रेति । वैयाकरणसिद्धान्तेष्वित्यर्थः ।

मुख्य इति । वाक्यस्फोटात्मकशब्दब्रह्मज्ञानं व्याकरणस्य मुख्यं प्रयोजनमित्यर्थः । वाक्यस्फोटात्मकब्रह्मण एव तात्त्विकतया तद्व्यतिरिक्तवस्तुनोऽतात्त्विकत्वात् सिद्धान्तान्तरस्यामुख्यत्वम् । यद्यपि आभ्यन्तरः स्फोटो वाचकः, न च तस्य लोके प्रयोगोऽस्ति, तथापि तस्यैवेत्यस्य वाक्यस्यैवेत्यर्थः । एवञ्च तदभिव्यङ्ग्यस्य वाक्यस्फोटस्य सिद्धिः ।

ननु कथं द्वारमित्यादितो बोध इत्यत आह । तेनेति । तत्रापि वाक्यस्मरणद्वारैव बोधादिति भावः । अर्थसमाप्तिः । अर्थपर्यवसानम् । यद्यपि स्वमते द्वारमित्येकपदमपि वाक्यं तदेव चार्थबोधकमिति वक्ष्यते तथापि परमतरीत्येदम् । तदेव परमतमुपक्रमते । पदसमूह इति । यद्यपि एको निरवयवः स्फोटो वाक्यं प्रतिभाववाक्यार्थ इति सिद्धान्तः तथापि पदकल्पनयैव वाक्यव्युत्पादनादिदम् । तदुक्तं हरिणा ।

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः ।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यत इति ॥

एकतिङ् वाक्यमित्यादीनि तु अनुदात्तादिविधावेव परिभाषितानीति पदसमूह इत्युक्तम् । तदुक्तम् ।

निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितमिति ।

एतेन पश्य मृगो धावतीत्यादावव्याप्तिवारणाय एकतिङन्तार्थमुख्यविशेष्यकं वाक्यमिति व्याचक्षाणाः परास्ताः । पदशब्देन तद्योग्यताया ग्रहणादनुकरणे नाव्याप्तिः ।

ननु शक्तं पदमिति मते प्रकृत्यादिसमुदायस्यादिसमासार्थत्वापत्तिरत आह । अत्रेति । तथा च गौतमसूत्रम् ते विभक्त्यन्ताः पदामिति । सुबन्तसमुदायः त्वया भोक्तव्यमिति तिङन्तसमुदायः पचति भवतीति । अथ यत्र द्वारापिवारीत्यं

त्र पिधेहीति पदाध्याहारादपि बोधो न सम्भवति उच्चारित एव प्रत्यायक इति भाष्यादिति चेत् । तत्रैकस्यापि पदस्य वाक्यार्थे शक्तिरिति वक्ष्यते । एकदेशसादृश्याच्चु वाक्येषु वाक्यैकदेशा अपि प्रयुज्यन्त इति भाष्यम् । यत्र तु वह्न्यभिप्रायेण धूमवानिति प्रयुज्यते तत्र धूमसाहचर्याद्वह्नौ लक्षणैव । सत्यान्तु व्याप्त्यादिस्मृतावनुमितिरेव । यत्तु पदशब्द उपस्थितिपरः मौनिश्लोकादितो ऽपि बोधादिति तार्किकप्राञ्चः तदसत् । प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यशब्दः प्रमाणमिति चिन्तामणिलक्षणस्य प्रयोगहेतुभूतं यद्वाक्यार्थतत्त्वज्ञानं तज्जन्यतावच्छेदकावच्छिन्नस्य ग्रहणेन मौनिश्लोके ऽव्याप्त्यभावात् ॥ १ ॥

(कु० टी०) रामं वामघनश्यामं निकामं हृदयङ्गमम् ॥
कामं वन्दे जगद्धाम विश्रामं वचसां शमम् ॥ १ ॥
अमन्दगुणमन्दिरं विमतरत्नविद्याधरं
कलाधरकृतादरं कलितचित्तलक्ष्मीवरम् ॥
शिरो धृतनदीवरं शिवकरं रमोमावरं
नमामि दुरिताहरं गुरुवरं सनागेश्वरम् ॥ २ ॥
मञ्जूषास्थस्य मुक्तादेर्न लाभः कलया विना ॥
वैयाकरणसिद्धान्तज्ञानस्यापि यथा तथा ॥ ३ ॥
अतस्तदाख्यां विवृतिं मञ्जूषायाः प्रयत्नतः ॥
पायगुण्डो वैद्यनाथभट्टः कुर्वे स्वबुद्धये ॥ ४ ॥
कर्तुं न जाने रचनां समर्था
न चाप्यनन्तं सा बुधबोधनाय ॥
अहं प्रवृत्तो ऽस्मि तथापि तस्मिन्
विश्वप्रणोदः शरणं हृदिस्थाः ॥ ५ ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं स्वेष्टदेवतानमस्काररूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति । नागेश इति । स्वकीर्त्यनुवृत्त्यर्थं स्वनामोल्लेखो ऽयम् । तत्रापि तिङन्तकृदन्तवाच्यक्रियाकर्तृत्वेन प्राधान्या-

दादौ तदुत्कीर्तनम् । भट्टः चतुः शास्त्राभिज्ञः । स्पष्टश्चेदं वेणीसंवरण-व्याख्यायाम् । न केवलं यथाश्रुतशास्त्रचतुष्टयज्ञानमात्रं किन्तु ग्रन्थ-सन्दर्भरचनप्रयोजकोऽन्योऽपि गुणोऽस्तीत्याह । विद्वान् कल्पक इत्यर्थः । सदसद्विवेककरणैकधुरीण इति यावत् । एतेनान्यतरवैयर्थ्यमित्यपास्तम् । अत एव तद्रचने विद्वत्त्वचतुःशास्त्राभिज्ञत्वयोरेव मुख्यहेतुत्वे । नागेश इति स्वसंज्ञाया अहेतुत्वेन विशेष्यवाचकस्यापि तत्पदस्य पूर्वनिपातः । वस्तुतो विद्वत्त्वभट्टत्वयोरातिप्रसक्तत्वात्तन्निवारकत्वेन तस्य पूर्वनिपातः । यद्यपि तदप्यतिप्रसक्तं, तथापि त्रितयस्य नातिप्रसङ्गः । यद्यपि गुणक्रिययोः समभिव्याहारे जातिसंज्ञयोर्विशेष्यतैव, तथापि पूर्वयोः संज्ञाशब्दयोः समासं कृत्वा पुनः कर्मधारयः । तत्र च द्वयोर्यौगिकत्वामिति न दोष इति बोध्यम् । निर्गुणमूर्तेर्नतिप्रयोजकाकारवत्त्वाभावेन नत्यसम्भवादाह । साम्बं शिवमिति । तादृशं परमेश्वरं पितरं चेत्यर्थः । वोतो गुणवचनादित्यनेन स्त्रियां विकल्पेन ङीषोऽविधानपक्षे लघुरित्यपि तत्र साधुः । एवञ्च लिङ्गत्रयवत्त्वेऽपि बाधकाभावः । अनेन गुर्व्यप्येका मञ्जूषास्तीति सूचितम् । वैयाकरणानां पाणिन्यादीनां ये सिद्धान्तास्तेषां मञ्जूषेव मञ्जूषा । यथा सम्पुटकः सकलमणिमुक्तादीनां सङ्ग्राहकस्तथायमपि तदाख्यो ग्रन्थः सकलवैयाकरणसिद्धान्तसङ्ग्राहक इत्यर्थः । एतेन भूषणादिग्रन्थादेव वैयाकरणसिद्धान्तज्ञाने ऽयं ग्रन्थो व्यर्थ इत्यपास्तं तत्र सकलसिद्धान्ताभावात् । मञ्जूषात्वेनोल्लेखेनेदमपि सूचितं सकलसिद्धान्तानामत्र सत्त्वेऽपि न प्रकाशते या सत्ता किन्त्वावृतरूपेण, किञ्च सिद्धान्तानां मुक्तादितुल्यत्वेनावश्योपादेयतात्वाञ्चेति तथा च यथाश्रुतग्राहिणो न यस्य कस्य चिदत्राधिकारः किन्तु विलक्षणप्रेक्षावत इति बोध्यम् । एषा । बुद्धिस्था । एतेन स्वस्यैतत्करणे क्लेशाभावः ज्ञानपूर्वकमेवात्र लेखा नाज्ञानपूर्वक इति सूचितम् । विरच्यत इति । वर्तमानसामीप्ये वर्तमानवद्वेति लट् । यद्वा वर्तमाने एव लट् । प्रारब्धापरिसमाप्तत्वं वर्तमानत्वमित्यस्य वक्ष्यमाणत्वादित्यन्यत्र विस्तरः ।

असिद्धान्तत्वेनात्र प्रक्रियांशमात्रत्यागेऽपि स्फोटान्यसिद्धान्तानामप्यवास्तवत्वात् वस्तुतः स्फोटस्यैव वाचकत्वाद्वक्ष्यमाणविचारस्यावास्तवतां ध्वनयितुं व्याकरणशास्त्रतात्पर्यविषयभूतस-

कलतत्सिद्धान्तेषु प्रधानसिद्धान्तं तावदाह । तत्रेति । सकलसिद्धान्तानां मध्ये इत्यर्थः । वाक्यस्फोट इति । स्फुटति प्रकाशते ऽर्थोऽस्मादिति स्फोटः वाचक इति, तथा च वाक्यस्फोटो नाम वाक्यं वाचकमित्यर्थः । यद्यपि वर्णस्फोटः पदस्फोटो वाक्यस्फोटः अखण्डपदवाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं, तथापि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वं ध्वनयितुं तदुपादानम् । अत एवाह । मुख्य इति । अत एव तस्यादावुत्कीर्तनम् । तत्त्वमेव प्रतिपादयति । लोके इत्यादिना । तस्यैव । वाक्यस्फोटस्यैव । शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण प्रथमं तत्रैव शक्तिग्रहादिति भावः । ननु प्रविश पिण्डीमित्यादौ पदस्याप्यर्थबोधकत्वं लोके दृष्टमत आह । तेनैवेति । वाक्येनैवेत्यर्थः । अर्थसमाप्तेरिति । निराकाङ्क्षस्य वाक्यार्थस्य तत एव ज्ञानेन वाक्येनैव वाक्यार्थस्य पूर्णत्वादित्यर्थः । तथा च प्रविश पिण्डीमित्यादौ पदानामर्थबोधकत्वेऽपि न तस्य समाप्तिरिति भावः । एवं मुख्यवाक्यस्य स्फोटस्य पाणिन्यादिऋषिसम्मतत्वे ऽपि स्फोटविघटकाधुनिकनैयायिकाज्ञानं प्रकटयितुं प्रत्यन्तहेतौ तन्त्रान्तरसम्मतिमाह । तदुक्तमिति । भाष्यकृता । वात्स्यायनेन । यत्त्वत्र शक्तमर्थवत्पदशब्देन गृह्यते इति तन्न । वाक्यव्यवहारस्य लोकतन्त्रान्तरयोरसिद्धत्वात् । तादृशपदसमूहस्य केवलसुबन्तादौ तदेकदेशभूतप्रातिपदिकादौ चातिप्रसक्तत्वाच्च । अर्थसमाप्ताविति वाक्यशेषोपादानस्यानर्थक्यापत्तेश्च ।

तदेतत् ध्वनयन्नाह । अत्रेति । पदसमूह इत्यत्रेत्यर्थः । तेन । पदशब्देन सुबन्ततिङन्तयोर्ग्रहणेन । तत्समूह इति । सुबन्तसमूहः तिङन्तसमूहः सुबन्ततिङन्तसमूहश्चेत्यर्थः । तथा च सुप्तिङन्तचयो वाक्यमित्यमरैकवाक्यता सिद्धेति भावः । नन्वेवमपि स[illegible]यन्तमनन्वितमुक्तार्थासिद्धिश्चेत्यत आह । समाप्तावित्यस्येति । तथा च नेदं वाक्यलक्षणं किन्तु तादृशवाक्यमुद्दिश्य परिपूर्णार्थत्वं विधीयत इति नोक्तदोषद्वयम् । तदुक्तिफलं तु वाक्यस्फोटस्य मुख्यत्वबोधनमेव । यद्वा वाक्यभेदेनोभयमप्यत्रात एव क्लीबशेषपूरणमिति भावः ॥१॥

वाक्ये प्रकृतिप्रत्यययोः कल्पितत्वम्

तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवात्तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया प-

दानि प्रविभज्य पदे प्रकृतिप्रत्ययभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः। एतदेवाभिप्रेत्य विभाषा सुप इति सूत्रे कैयटः अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह शास्त्रे ऽर्थवत्ता परिकल्पनादित्याह।

तत्तदवयवतदर्थबोधनेन समुदायस्य समुदायार्थस्य च बोधने तात्पर्यमृषीणाम्। स्पष्टश्चेदमर्थवत्सूत्रे भाष्यकैयटयोः। श्रुतिवाक्यादीनां बलाबलविचारकल्पनार्थं च तत्कल्पनेति बोध्यम्॥ २॥

(कुं० टी० ननु वाक्यस्य निरवयवत्वात्पदप्रत्ययो भ्रम इति किं तद्व्युत्पादननेत्याशङ्क्याह। तत्रेति। शक्तिग्रह इव शब्दज्ञानमपि फलमित्याह। तदन्वाख्यानस्येति। वाक्यान्वाख्यानस्येत्यर्थः। कल्पनयेति। वाक्ये पदानि प्रकल्प्य पदे च प्रकृतिप्रत्ययभागं प्रकल्प्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थाः कल्पिता इत्यर्थः। यद्यपि अण्प्रत्ययाभावे ऽपि फिञादिनापि अपत्यबोधान्न व्यतिरेकसम्भवस्तथापि तर्हि प्रति तृणारणिमणीनां कारणत्वे इवात्र व्यतिरेकः। प्रकृत्यादिविभागस्य कल्पितत्वादन्वयव्यातिरेकयोः कल्पितत्वम्। एवं घटमानयेति वाक्ययोरखण्डत्वान्न तार्किकोक्तावापोद्वापसम्भवः। शास्त्रमात्रेति। एषा कल्पना प्रक्रियायामेवोपयुक्ता लोके वाक्यस्यैव बोधकत्वादित्यर्थः। एतदेवेति। शास्त्रविषयकत्वमेवेत्यर्थः। कैयट इति। सुब्ग्रहणं प्रातिपदिकान्मा भूदिति भाष्यमुपादाय सुबन्तस्यैव ईषदसमाप्तिवृत्तित्वेन प्रातिपदिकस्य तद्वृत्तित्वाभावात्कथं प्राप्तिरित्याशङ्क्येति भावः।

अन्वयेति। शास्त्रद्वारा कल्पिताभ्यामन्वयव्यतिरेकाभ्यां कल्पितार्थवत्त्वैव शास्त्रप्रक्रियोपयोगिनीति भावः।

ननु असत्यस्यावयवस्य तदर्थस्य च कल्पने ऋषीणामप्रमाण्यं स्यादत आह। तत्तदवयवेति। तत्तदवयवबोधनेन तत्समुदायो बोध्यते अवयवार्थबोधनेन च समुदायार्थो बोध्यत इत्यन्वयः। भाष्यकैयटयोरिति। तत्र हि पदार्थसंसर्गरूपे वाक्यार्थे वाक्यस्यैव शक्तिरस्ति साहश्यात्त्वन्वयव्यतिरेकौ कल्पितौ एवञ्च वाक्यस्य प्रातिपदिकत्वं प्राप्तं समासग्रहणकृतनियमेन निवर्त्यत इति स्पष्टम्। श्रुतिवाक्येति। ऐन्द्या गार्हपत्यमुपतिष्ठत इत्यत्र श्रुत्या गार्हपत्योपस्थानं लभ्यमानं प्रबलम्, इन्द्रोपस्थानं तु इन्द्रो देवता अस्या इति तद्धितानुसन्धानमूलकत्वाद्दुर्बलमित्यादि। बलाबलेति। क्रियाकारकभावसम्बन्धलक्षणो हि वाक्यार्थः प्रथमोपस्थितत्वात्प्रबलः। यदि तु वाक्यमखण्डमेवाखण्डमेवाखण्डार्थबोधकं स्यात्तदा लिङ्गादिलभ्यस्यार्थस्यासम्भवादुच्छेद एव स्यादिति भावः॥ २॥

(क॰टी॰) ननु वाक्यस्फोटस्य मुख्यत्वे व्याकरणशास्त्रानर्थक्यमत्र प्रकृतिप्रत्ययादितत्तदर्थानां प्रतिपादनेन तस्यान्वाख्यानाभावादत आह। तत्रेत्यादिना। वाक्ये अस्य च कल्पनया पदानि प्रविभज्येत्यत्रान्वयः। तत्र हेतुमाह। प्रतिवाक्यमिति। देशकालकर्तृभेदेन वाक्यानामानन्त्यादिति भावः। नन्वेवमपि तस्यैव लघूपायेनान्वाख्यानं तथैवेत्यत आह। तदन्वेति। यद्वा व्यवहाराद्यदा यस्य वाक्यस्य शक्तिग्रहस्तदा तच्छक्ततावच्छेदकसामान्यप्रत्यासत्त्या सर्वतद्वाक्योपस्थितौ तदवच्छिन्ने तत्र शक्तिग्रहसम्भवान्नानन्त्यप्रयुक्तदोषो व्यक्तिपक्षवदत आह। तदन्वेति। निखिलवाक्यान्वाख्यानस्येत्यर्थः। अशक्यत्वेप्युक्त एव हेतुः। तत्र च वक्ष्यमाणान्यलघुत्वविशिष्टोपायाभाव एव हेतुः। तावताप्यनिर्वाहादाह। पदे इति। वक्ष्यमाण-

फलसिद्ध्यर्थमाह । कल्पीति । तत्तदर्थविभागमिति । तस्य तस्येति कृतद्विर्वचनेन षष्ठीसमासे स सोऽर्थ विभाग इति कर्मधारये वा विभक्तिलुकि इदं साधु । स्पष्टश्चेदमर्थवत्सूत्रे शब्दरत्ने । एवमग्रे ऽपि बोध्यम् । नन्वेवं लोके ऽप्यवयवादवयवार्थप्रतीतिः कुतो नेत्यत आह । शास्त्रमात्रेति । शास्त्रकल्पितावन्वयव्यतिरेकौ तत्कल्पितार्थवत्ता च शास्त्रमात्रव्यवहारोपयोगिन्येवेति भावः । कल्पयन्तीति । अन्यथानुपपत्त्येति भावः । आचार्याः । पाणिन्यादयः । एवमग्रे ऽपि । एतदेवेति । यतः पदादिकल्पनमावश्यकमित्यादिपूर्वोक्तमेवेत्यर्थः । कैयट इति । अथ सुब्ग्रहणं किमर्थं सुबन्तादुत्पत्तिर्यथा स्यात्प्रातिपदिकान्मा भूदित्यत्रत्य इति भावे ऽपि सुबन्तस्यार्थलभ्यत्वेन प्रातिपदिकान्नैव भविष्यतीति प्रातिपदिकान्मा भूदित्यसङ्गतमत आह । अन्वयेति । शास्त्रकल्पितेत्यादिः । एवं प्रकृतीत्यस्यापि । इह । शास्त्रे । अर्थवत्तेति । तादृशतत्कल्पितार्थवत्ता च शास्त्रमात्रव्यवहारोपयोगिनीति इह शास्त्रे इत्यनेन सूचितम् । नन्वेवमपि व्याकरणशास्त्रानर्थक्यस्यापरिहृतत्वादर्थान्तरत्वं दुष्परिहरमत आह । तत्तदवयवेति । इदमपि पूर्ववत्साधुः । तत्तत्प्रकृतिप्रत्ययाद्यवयवेत्यर्थः । तत्तदर्थबोधनेनेति । इदमपि पूर्ववत्साधुः । तत्तत्प्रकृतिप्रत्ययाद्यर्थबोधनेनेत्यर्थः । तत्तद्विभागव्युत्पादनेनेति यावत् । तात्पर्यमिति । मुख्यतात्पर्यमित्यर्थः । तथा च नोक्तदोष इति भावः । तत्र तात्पर्यमानमाह । स्पष्टमिति । तत्र हि वाक्यस्यार्थवत्वात्संज्ञामापाद्य पदार्थाभावान्नेत्युक्त्वा तदन्यस्य तत्संसर्गरूपस्य वाक्यार्थस्य स नेह देवदत्तेत्यादिना प्रतिपादिता । कैयटेन चात एव वाक्यमेव मुख्यः शब्द इत्यादिना तत्समर्थितम् । ननूक्तफलार्थमवयवकल्पनमस्तु तत्तदर्थकल्पनं तु निष्फलमनुपयोगात्सङ्केतग्रहसिद्धिस्तूक्तैवात आह । श्रुतीति । श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षादिति जैमिन्युक्तेः । अत्र श्रुतिलिङ्गादीति वाच्ये एवमुक्तिर्वाक्यस्फोटप्रस्तावात् । तथा चादिपदस्य प्रत्येकं सम्बन्धाल्लिङ्गस्यापि सङ्ग्रहः। तत्कल्पनेति । अवयवतदर्थकल्पनेत्यर्थः । इदञ्चावयवमात्रकल्पनातो न सिद्ध्यतीति भावः ॥ २ ॥

वर्णस्फोटस्य प्रक्रियानिर्वाहकत्वम्

तत्र शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः । प्रकृतिप्रत्ययास्तत्तदर्थवाचका इति तदर्थः । उपस-

र्गनिपातधात्वादिविभागोऽप्येवमेव काल्पनिकः। तस्यैवान्वाख्यानस्य लाघवेन निर्वाहाय स्थानिनो लादय आदेशास्तिबादयश्च कल्पिता एव। तेषामर्था अपि कल्पिता एव। तत्र स्थानिनामर्था ऋषिभिः कण्ठत उक्ताः। आदेशानां च स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति न्यायेन ते। मुख्यं वाचकत्वं तु तथा कल्पनया बोधिते तत्समुदायरूपे पदे वाक्ये वा। लौकिकानां तत एव बोधात्॥

एतदेवाभिप्रेत्य भूवादिसूत्रे भाष्ये भाववचनो धातुरिति लक्षणे सति प्रत्ययं भाववचनत्वं भाववचनाच्च प्रत्यय इत्यन्योन्याश्रयमाशङ्क्यानाश्रित्य भाववचनत्वं प्रत्ययः नित्यत्वाच्छब्दानामित्युक्तम्। पारमार्थिकं नाश्रीयते कल्पितं त्वाश्रीयते एवेति कैयटः॥

एवञ्च स्थानिनां वाचकत्वमादेशानां वेत्यादिविचारो निष्फल एव कल्पितवाचकत्वस्योभयत्रापि सत्त्वात्। व्याकरणभेदेन स्थानिनां भेदेऽपि न क्षतिः लिपीनां भेद इवेति दिक्॥ ३॥

(कुं० टी०) ननु वाक्यस्फोटस्य मुख्यत्वे स्फोटान्तरस्योच्छेद इत्यत आह। तत्र शास्त्रेति। प्रक्रियते प्रत्ययात् पूर्वं क्रियत इति प्रकृतिरिति केचित् तन्न। बहुपटुरित्यत्राव्याप्तेः। प्रत्ययोद्देश्यतेति तु युक्तोऽर्थः। एवमेव शास्त्रप्रक्रियार्थमेव कल्पितः। लघोर्भावो लाघवमनायासेन प्रवृत्तिः। तत्साधने तूपचाराद्वृत्तिः। कण्ठत उक्ता इति। लः कर्मणि चेत्यादिना। न्यायेन ते इति। उक्तन्यायेनादेशाना-

मर्था उक्ता इत्यर्थः । तथा कल्पनयेति । अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययौ प्रकल्प्य तत्समुदायरूपे पदे इत्यर्थः ॥

लक्षणे इति । क्रियमाणे इति शेषः । सति प्रत्यये इति । उत्पन्ने हि प्रत्यये भाववचनत्वं गम्यते भाववचनाच्च प्रत्ययो भवतीत्यर्थः । शास्त्रव्यवहारात् प्राक् समुदाय एव नास्तीत्यन्वयव्यतिरेकलभ्यार्थवत्वविभागाभावात् भाववचनत्वस्याश्रित्येत्ययुक्तमत आशयं योजयति । पारमार्थिकमिति । व्यवहारगम्यं मुख्यं वाचकत्वं पदनिष्ठं वाक्यनिष्ठं वा तदत्र नाश्रीयत इति तदर्थः । कल्पितमिति । भाष्यकृतान्वयव्यतिरेकाभ्यां धातुरेव क्रियावाचीत्युक्तत्वात् प्रकृत्यादिनिष्ठमेव वाचकत्वमाश्रीयत्र इति भावः । ननु प्रत्ययाहितविभागस्य कल्पितत्वे को धातुरित्यादिश्रुतिविरोध इति चेत् सत्यम् । कल्पिताभिप्रायेणैव तथोक्तेः । कल्पनाया अपि व्यवहारनित्यतया नित्यत्वात् ॥

एवञ्चेति । मुख्यवाचकत्वस्य पदे एव सत्त्वात् व्याकरणभेदेन स्थानिनामनियतत्वान्न वाचकत्वमिति मतं निराकरोति । व्याकरणेति । लिपीनामिति । भिन्नानामपि लिपीनां बोधकत्ववदित्यर्थः ॥ ३ ॥

(क०टी०) एवं मुख्यं चरममुक्त्वा शास्त्रोपयोगित्वेन सर्वतोपकृष्टमाद्यमाह । तत्रेति । कल्पितपदतदेकदेशयोर्मध्ये इत्यर्थः । ननु वर्णस्फोट इत्यस्य वर्णा वाचका इत्यर्थः स्यात्स चायुक्तः, तेषामानर्थक्यस्य भाष्ये एव बहुशः स्पष्टत्वात् । किञ्चात्र पक्षे ऽर्थबोधानुकूलाशक्तिर्वर्णसमूहे एव पर्याप्ता न प्रत्येकं तथा सति प्रत्येकमर्थवत्त्वात्प्रातिपदिकत्वाद्यापत्तौ धनवनमित्यादौ नलोपाद्यापत्तेः । किञ्च प्रत्येकं शक्तिमत्त्वे प्रत्येकं वर्णादर्थबोधापत्तिः । किञ्च द्वितीयादिवर्णोच्चारणस्य वैयर्थ्यापत्तिः । न च प्रत्येकं वर्णैरर्थस्मरणमात्रं जन्यते चरमे-

ण पुनः स्पष्टं जन्यते प्रत्यक्ष इव स्मरणे ऽपि वैजात्याङ्गीकारादिति वाच्यम् । प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वाद्गुरुत्वाच्च । न च प्रत्येकावृत्तेः कथं समुदायवृत्तित्वं द्वित्वादिवदुपपत्तेरत आह । प्रकृतीति । तथा च वर्णपदं पदैकदेशपरमिति भावः । अवान्तरप्रसङ्गेनान्यदपि तथा आह । उपेति । एतेषां मिथो विभाग इत्यर्थः । अन्यथा निपातपदानर्थक्यापत्तिः । आदिना नामपरिग्रहः । एवमेत्र । प्रकृतिप्रत्ययादिवत् । ननु प्रकृतिप्रत्ययादिकल्पने ऽपि न लाघवेन तदन्वाख्यानं तदानन्त्येन तेषामप्यानन्त्यादत आह । तस्यैवेति । प्रतिवाक्यान्वाख्यानस्यैवेत्यर्थः । उक्तफलार्थमाह । तेषामिति । स्थानिनामादेशानां चेत्यर्थः । तत्र । स्थान्यादेशयोर्मध्ये । तं । अर्थाः । उपसंहरति । मुख्यमिति । यद्वा तत्र गमकं वक्तुमुक्तमेव पुनराह । मुख्यमिति । तथेति । प्रकृतिप्रत्ययादीत्यर्थः । तत्समुदेति । प्रकृत्यादिसमुदायेत्यर्थः । पदस्यापि तत्त्वादाह । वाक्ये इति । लौकिकानामिति । प्रियतद्धिता इति न्यायेन निर्देशः । यद्वा लोको व्यवहारस्तत्र स्थितानामित्यर्थः । तत एव । वाक्यादेव । गमकमत्राह । एतदेवेति । मुख्यवाचकत्वस्य तत्रैव सत्त्वमित्येवेत्यर्थः । सतीति । प्रत्यये सतीत्यन्वयः । केवलधातोरप्रयोगादिति भावः । नित्यत्वादिति । साधुत्वान्वाख्यानमात्रे शास्त्रव्यापारात्प्रागुक्तप्रणाडी सर्वापि सिद्धैवेति नान्योन्याश्रय इति भावः । ननु धातुसंज्ञार्थे भाववचनत्वस्याश्रितत्वादनाश्रितत्वंत्ययुक्तमत उक्तमेवाशयमाह । पारेति । तस्य व्यवहारेण समुदायवृत्तित्वादिति भावः । कल्पितान्त्विति । भाष्यकृता तत्रैव पूर्वमन्वयव्यतिरेकाभ्यां धातुरेव क्रियावाचीत्युक्तेरिति भावः । अन्येषामज्ञानं प्रकटयन्फलितमाह । एवञ्चेति । मुख्यवाचकत्वस्य तत्रैव सत्त्वे चेत्यर्थः । आदिना प्रकृतेरेवार्थो ऽथवा प्रत्ययस्य विकरणा अर्थवन्तो ऽथवा निरर्थका इत्यादिग्रहः । उभयत्र । स्थान्यादेशयोः । अन्यदप्याह । व्याकरणेति । स्थानिनाम् । तिङादीनाम् । क्वचित्कङचङादीनामुक्तेरिति भावः । न क्षतिरिति । यथा कल्पितवाचकत्वभ्रमात् लिपिषु इति तद्भेदे न दोषस्तथा कहमतवाचकत्वात्तेषां भेदे ऽपीति भावः । दिगिति । दिगर्थस्तु बृ-

त्तिषु एकार्थीभावः नामार्थयोः प्रकृतिप्रत्यययोरित्यादिकमपि कल्पितमिति ॥ ३ ॥

आप्तोपदेशरूप शब्दप्रामाण्यम् । तत्राप्तोपदेशरूपः शब्दः प्रमाणम् । आप्तो नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान् । रागादिवशादपि नान्यथावादी यः स इति चरके पतञ्जलिः ॥ ४ ॥

(कुं० टी०) प्रमाणमिति । अर्थान्तरवाचकस्य शब्दस्यार्थान्तरे प्रयोगे कृते श्रोतुः सत्यप्यर्थबोधे प्रमाजनकत्वरूपं प्रमाणत्वं नेति भावः । यत्तु मौनिश्लोकादितो ऽपि बोधात्पदज्ञानं करणं न तु पदमिति तन्न । आन्तरस्फोटस्य वाचकत्वस्वीकारेण तत्र लिपीनामेव स्फोटव्यञ्जकत्वात् । यत्तु पदार्थस्मृत्या अन्यथासिद्धत्वात्पदं न करणमिति तन्न । तत्र व्यापाराभावेन करणत्वासम्भवात् । परे तु पदार्थस्मरणमेव व्यापारः, अपौरुषेयस्य वेदस्य तु आप्तोक्तत्वाभावे ऽपि स्वत एवाप्तत्वम्, पौरुषेयत्वे तु आप्तप्रणीतत्वादेवाप्तत्वम् । लोके तु यथार्थप्रवृत्तिजनकवाक्यप्रयोक्तृत्वादाप्तत्वानुमानम् । वेदे तु प्रतिनियतलोकान्तरफलस्य ज्योतिष्टोमादेः संवादाभावात् स्वत एव प्रामाण्यमभ्युपेयम् । वस्तुतत्त्वेति । तत्त्वशब्दो ऽनारोपिते रूढः । रागादीति । रागश्चेष्टसाधनताज्ञानरूपसङ्कल्पनिमित्तः । आदिना द्वेषः । नान्यथावादीति । यः पुमान्नान्यथावादी स आप्त इत्यन्वयः । अर्थतत्त्वज्ञानमाप्तिः तया प्रतीत इत्याप्तः ॥ ४ ॥

(क०टी०) एवं वाक्यस्य शब्दस्य वाचकत्वमुक्त्वा तस्य प्रामाण्यमाह । तत्रेति । वाक्येष्वित्यर्थः । उपदेशपदे कर्मणि घञ् । यद्वा आप्तोपदेशेन वृद्धव्यवहारेणाप्तकर्तृककथनमात्रेण

रूप्यते गृह्यत इत्यर्थः। तत्राप्तलक्षणमाह। आप्त इति। अनुभवेन। अनेनांशिकनिश्चयव्यावृत्तिः। संशयव्यावृत्तये निश्चयेति। सरागादिनिरासाय रागादिति। आदिना मोहादि। अपिनाऽज्ञानसमुच्चयः। तथा च रागादिहीनत्वे सति कृत्स्नवस्तुनिश्चयवत्त्वं तत्त्वं फलितम्॥४॥

शब्दबोधे गृहीताया वृत्तेर्हेतुत्वम्। तत्रागृहीतवृत्तिकस्य शाब्दबोधादर्शनात् न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यत इति समर्थसूत्रभाष्याच्च, तद्धर्मावच्छिन्नविषयकशाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः। यद्यपि गुड इत्युक्ते ऽर्थप्रतीतिस्तद्गते मधुरत्वे गम्यते तथापि न तच्छब्दजप्रतीतिविषयः किन्तु मानान्तरजन्यप्रतीतिविषयः।

यत्र तु गुडो मधुर इति वाक्यार्थे गुड इत्येकदेशः प्रयुज्यते तत्रापि मधुराभिन्नो गुड इत्येव बोधो न तु मधुरत्वप्रकारको गुडविशेष्यकः। ध्वनितं चेदमनेन व्यञ्जनमिति सूत्रे भाष्ये॥५॥

(कुं०टी०) अगृहीतेति। अगृहीतवृत्तिकपुरुषस्यागृहीतवृत्तिकपदादर्थबोधादर्शनादित्यर्थः। धर्मांशे ऽपि शक्तिरस्तीत्याह। न हीति। मधुरत्वमिति। मधुरत्वप्रकारकबोधादर्शनादित्यर्थः। तद्धर्मावच्छिन्नेति। घटत्वावच्छिन्नविषयकवृत्तीत्यर्थः। ज्ञाने वृत्तिवैशिष्ट्यं सामानाधिकरण्येन। ज्ञानाधिकरणतात्वंविषयतया। तार्किका वृत्तिज्ञानपदज्ञानयोः पृथक् हेतुत्वमिच्छन्ति। अत्र तु लाघवाद्विशिष्टस्यैव हेतुत्वमुक्तम्। तत्रापि वृत्तिविषयकोद्बुद्धसंस्कारसमानाधिकरणवृत्त्याश्रयपदविषयकज्ञानस्य हेतुत्वे गौरवमतः सामानाधिकरण्यादीनां सम्बन्धकोटौ निवेशः। यस्य हि घटादिपदस्य वृत्तिर्ज्ञाता तत्र पदे

वृत्तिविषयकसंस्कारो ज्ञानं चेत्युभयमपि विषतयास्ति वृत्त्याश्रयपदविषयकं च तज्ज्ञानम् । यत्तु वृत्त्या पदजन्यपदार्थोपस्थितिः शाब्दबोधे कारणमिति तन्न । तादृशोपस्थितित्वस्य गुरुतरस्य कारणतावच्छेदकत्वापेक्षया स्वजन्यपदार्थोपस्थितिसम्बन्धेन पदज्ञानस्य हेतुत्वे लाघवात् । मानान्तरेति । मधुरत्वस्यानुमानादिनोपस्थितिरित्यर्थः । तार्किकास्तु ज्ञानलक्षणाजन्यं वदन्ति । आलङ्कारिकास्त्वत्र व्यञ्जनां वदन्ति । ननु मधुरत्वप्रकारकशक्तिग्रहाभावाद्गुड इत्येकदेशप्रयोगे कथं तादृशबोध इत्यत आह । यत्र त्विति । न त्विति । मधुरत्ववान् गुड इत्यन्वयो नेत्यर्थः । ध्वनितमिति । तत्र हि दध्योदन इत्यत्र दधिशब्देनैव दध्युपसिक्तप्रतीतिः गुड इत्यत्र मधुरत्वस्य प्रकारान्तरेण प्रतीतावपि न तस्य शाब्दवाच्यतेति स्पष्टम् । अथ गुडं भुङ्क्ते इत्यत्र गुडत्वस्येव मधुरत्वस्यापि प्रकारतया तत्प्रकारकशाब्दबोधवारणाय गुडत्वप्रकारकगुडविशेष्यकशाब्दबोधं प्रति तादृशशक्तिज्ञानत्वेन कारणतया आकाशः शब्दाश्रय इति वाक्याच्छाब्दबोधानापत्तिः, तत्राकाशत्वस्य शब्दाश्रयत्वस्य शब्दाश्रयत्वरूपतयावच्छेदकताया निरवच्छिन्नत्वादिति चेन्न । आकाशपदान्निर्विकल्पकोपस्थितेरेव स्वीकारेण तत्रेदृशहेतुत्वाकल्पनात् । आकाशत्वस्यापि जातित्वाच्च । एतेन निर्विकल्पकस्वीकारे आकाशं द्रव्यमित्यत्र भिन्नप्रकारकोपस्थित्यभावादभेदबोधानापत्तिरिति परास्तम् । यदपि आकाशस्यैकव्यक्तित्वेनानुगमकधर्मानपेक्षणेऽपि नियतोपस्थितये शब्दाश्रयत्वमाकाशपदशक्तमिति तन्न । शाब्दिकमते आकाशत्वादेरपि जातित्वात् । ननु घटघटत्वे इत्यादिनिर्विकल्पकस्य घटत्वादिप्रकारकत्वाभावात्कथं घटादिपदार्थज्ञानजन्यत्वमिति चेन्न ।

निर्विकल्पकस्यातीन्द्रियतया तस्य कार्यतावच्छेदकत्वानभ्युपगमात् ॥ ९ ॥

(क० टी०) ननु प्रमाणत्वं प्रमाकरणत्वं तच्च तादृशशब्दस्य चेत्सर्वस्य श्रोतुस्तर्हि ततो बोधापत्तिरत आह । तत्रेति । तादृशतच्छब्दश्रोतृणां मध्य इत्यर्थः । नन्वदर्शने मानाभावोऽत आह । न हीति । गम्यते । बुध्यते । इतीति । इत्यादीत्यर्थः । ननु वाक्यस्य वाक्यार्थे शक्तिस्वीकारे समभिव्याहारानन्त्येन गौरवमिति तन्त्रान्तरोक्तप्रकार एव सम्यगिति चेन्न । प्रामाणिकत्वात् । तवापि तावत्कार्यकारणभावावश्यकत्वाच्च । न च घटप्रकारकशाब्दबोधमात्रे घटार्थकपदोत्तरसार्थकप्रत्ययानिपातान्यतरजन्योपस्थितिर्हेतुः एवं कर्मत्वविशेष्यकशाब्दबोधमात्रे कर्मत्वार्थकाम्प्रत्ययप्रकृतिजन्योपस्थितिर्हेतुरिति सामान्यत एव कार्यकारणभावः । न च घटः कर्मत्वमित्यतो विपरीतव्युत्पन्नस्य तथाबोधाद्व्यभिचारः । घटबोधकपदोत्तरपदजन्यज्ञानत्वेन कर्मत्वबोधकपदप्राग्वर्तिपदजन्यज्ञानत्वेन च हेतुत्वाददोषात् । नचैवमपि घटादिलाक्षणिकघटितघटमानयेति वाक्यात्तथा बोधवारणाय घटबोधकत्वं घटबोधफलोपहितत्वं निवेश्यम् । एवञ्चान्योन्याश्रयात्तादृशकार्यकारणभावग्रहासम्भव इति वाच्यम् । तत्र घटस्य वृत्तिजन्योपस्थित्यभावादेव तथा बोधवारणेन स्वरूपयोग्यत्वनिवेशेऽपि क्षत्यभावादिति वाच्यम् । कर्मत्वं घटः अम् घट इत्येतादृशसमभिव्याहारव्युत्पन्नानां ततस्तथा बोधव्यभिचारात् । सद्व्युत्पन्नासद्व्युत्पन्नविभागोच्छेदापत्तेश्च । न च यादृशबोधे यत्समभिव्याहारः कारणं तादृशबोधे तत्कारणत्वज्ञानस्यापि कारणत्वान्न दोष इति वाच्यम् । सामान्यविधा तज्ज्ञानस्यापि सत्त्वात् । न च तद्व्युत्पत्तिविशिष्टशाब्दबोधे तत्तद्व्युत्पत्तिर्हेतुः । तद्धीजनकत्वज्ञानं च व्युत्पत्तिः । व्युत्पत्तिवैशिष्ट्यं च स्वाव्यवहितोत्तरोत्पत्तिकत्वस्वसामानाधिकरण्योभयसम्बन्धेनेति न दोष इति वाच्यम् । अनन्तकार्यकारणभावतादवस्थ्यात् । प्रत्ययत्वानिपातत्वाद्यभावात्ततस्तथा कार्यकारणभावाग्रहासम्भवाच्च ।

किञ्च सिद्धान्ते पदतदर्थादेः कल्पितत्वेन वस्तुतो ऽस-त्त्वेन भवदुक्तप्रकारस्य सर्वस्यापि दुर्वचत्वात् । न चास्तु वाक्ये तद्बोधकतयेच्छाविषयत्वादि परन्तु तस्य वृत्तित्वे ऽपि किं मानमिति वाच्यम् । विनिगमनाविरहस्य कार्यकारणभाव-लाघवस्य च तत्त्वसम्भवात् । वृत्तित्वं च सङ्केतविशेषसम्ब-न्धेन वृत्तिपदत्वमिति बोध्यम् । विस्तरस्त्वन्यत्र द्रष्टव्यः । तदेतद्धृदि निधायैव लघुभूतं कार्यकारणभावमाह । तद्धर्मे-ति । मन्मते ऽयमेक एव कार्यकारणभावः तव तु सांसर्गिक-विषयताशालितद्विषयकशाब्दबुद्धौ आकाङ्क्षाज्ञानकार्यकारणभाव अधिकः । वृत्तिज्ञानकार्यकारणभावे च प्रकारताविशेष्यतयो-र्विशिष्य निवेश इत्यपरं च गौरवम् । एतेन घटमित्यानुपूर्वी-ज्ञानजन्यघटाद्युपस्थितिविशिष्टायां कर्मताविशेष्यकघटाद्युपस्थि-तिविशिष्टायां कर्मताविशेष्यकघटाद्यन्वयबुद्धौ स्वप्रयोज्यघ-टाद्युपस्थितिसम्बन्धेन घटमित्यानुपूर्वीज्ञानत्वेन कारणत्वम् । एवं कलशमित्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितिविशिष्टायां कर्म-ताविशेष्यकघटाद्यन्वयबुद्धावपि तादृशोपस्थितिसम्बन्धेन क-लशमित्यानुपूर्वीज्ञानत्वेनेति रीत्या प्रत्येकमेवानुपूर्वीज्ञानस्य कारणत्वं वैशिष्ट्यं चैकक्षणावच्छेदेनैकावृत्तित्वमिति नव्यनैया-यिकोक्तमपास्तमिति भावः । उक्तभाष्योक्तावाशङ्कते । यद्य-पीति । तत्र प्रत्ययेणोपदेशादिना वा माधुर्यग्रहवतः सर्व-स्येति भावः । तत् । माधुर्यम् । तच्छब्देति । गुडशब्देने-त्यर्थः । मानान्तरेति । अनुमानेन व्यञ्जनया मनसा वेत्यर्थः । वाक्यैकदेशन्यायेनापि न तथेत्याह । यत्र त्विति । न त्विति । यदर्थे यत्प्रयोगस्तथार्थप्रतीतेरेव तदौचित्यमिति भावः । तत्र मानमाह । ध्वनितामिति । मनान्तरजन्यधी-विषयत्वं तथा ज्ञानं चेत्यर्थः । तत्र हि दध्योदनादौ कथं सामर्थ्यमिति शङ्कायां युक्तार्थसम्प्रत्ययाच्च सामर्थ्यं दध्ना युक्तार्थ-तासम्प्रतिपत्तेः । अन्यथा दधीत्युक्ते बहवोऽर्था गम्यन्ते इति लोपपक्षे ऽनवस्था स्यादित्युक्तम् । दध्नेति पदवाच्येन युक्तो यो ऽर्थ उपसेक-क्रियादिरूपस्तदर्थता तस्य प्रतीयते इत्यर्थः । वाक्यैकदेशन्यायेन दध्नेत्यस्यैव सो ऽर्थ इति तात्पर्यमिति भावः ॥ ५ ॥

विशेषणविशेष्यभावव्यत्यासेन गृहीतशक्तिकस्य पुंसो घटपदाद्घटत्वविशिष्टघटबोधवारणाय तद्धर्मावच्छिन्नेति । ज्ञाने वृत्तिवैशिष्ट्यं च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यस्वाश्रयपदविषयकत्वोभयसम्बन्धेन बोध्यम् ।

अतो नागृहीतवृत्तिकस्य बोधः नापि विस्मृतवृत्तिकस्य नापि तद्वाचकपदाज्ञानवतः नापि घटपदादाश्रयत्वेनोपस्थिताकाशस्य जनकतयोपस्थितचैत्रादेश्च बोधः । संस्काराजनकशक्तिग्रहसत्त्वे तेन शाब्दबोधजनने च न मानम् । संस्कारकल्पिका च वृत्तिस्मृतिरेव शाब्दबुद्धिरेव वेत्यन्यदेतत् ॥ ८ ॥

(कुं०टी०) व्यत्यासेनेति । घटत्वविशेष्यकशक्तिग्रहानन्तरं घटत्वप्रकारकशाब्दबोधवारणायेत्यर्थः । तद्धर्मावच्छिन्नेतीति । नन्वेवं तदादीनां बुद्धिस्थत्वावच्छिन्ने शक्तिग्रहात् तमानयेत्युक्ते बुद्धिस्थमानयेत्येव बोधः स्यान्न तु घटत्वादिविशेषरूपेण । अत एव वन्हिव्याप्यधूमवत्पर्वतं तच्छब्देन परामृश्य स वह्निमानिति वाक्यजन्यशाब्दबोधे परामर्शजन्यत्वेनानुमितिलक्षणातिव्याप्तिरुक्ता दीधिताविति चेदत्राहुः । सामान्यरूपेण शक्तावपि त्यदादितो विशेषरूपेणैवोपस्थितिः । उपस्थितिशक्तिग्रहयोः समानाकारकत्वप्रवादस्तु त्यदाद्यतिरिक्तविषय इति । घटत्वादिविशेष एव शक्यतावच्छेदकः । तदादीनां नानार्थत्वमिष्टमेवेत्यन्ये । स्वविषयकेति । वृत्तिविषयको य उद्बुद्धसंस्कारः तत्सामानाधिकरण्यं वृत्त्याश्रयपदविषयकत्वं चेत्यर्थः । अस्ति च घटपदार्थनिरूपितवृत्तिविषयकः उद्बुद्धसंस्कारः विषयतया घटपदज्ञानं च । अयम्भावः । घटादिपदस्य घटत्वा-

दिविशिष्टे शक्तिरित्यादिवृत्तिविशेष्यकज्ञानानन्तरं तत्समानाकार एव संस्कार उत्पद्यते तादृशसंस्कारविशिष्टं पदज्ञानं शाब्दबोधे हेतुः । नागृहीतवृत्तिकस्येति । वृत्तिविषयकसंस्काराभावात् पदान्तरविषयकवृत्तिसत्त्वे ऽपि पदान्तराच्छाब्दबोधवारणाय सामानाधिकरण्यनिवेशः । सामानाधिकरण्यं च विषयतयेव समवायेनापि बोध्यम् । नातश्चैत्रीयशक्तिग्रहानन्तरं मैत्रस्य शाब्दबोधः । विस्मृतवृत्तिकस्येति । बोध इत्यनेनान्वयः । उद्बुद्धसंस्काराभावादिति भावः । पदाज्ञानवत इति । तत्र विषयतया ज्ञानस्याभावात् । हस्तचेष्टादिनाप्यर्थवत्वात्तत्रातिव्याप्तिवारणाय पदशब्दप्रयोगः । तन्निरूपितवृत्त्याश्रयत्वनिवेशस्य फलमाह । आश्रयत्वेनेति । तथाच शब्दस्याकाशगुणात्वाद्घटादिशब्दादाकाशस्योपस्थितावपि आकाशत्वावच्छिन्ननिरूपितवृत्तेर्घटादिशब्दे ऽभावान्न तद्बोध इत्यर्थः ।

यद्यपि वृत्तिज्ञानस्य पदज्ञानस्य वा अभावे कारणसमुदायरूपसामग्रीविरहादेव न कार्योत्पत्तिः सम्भवति तथापि समुदायघटकसम्बन्धज्ञानार्थं सामानाधिरण्यनिवेशः । स्यादेतत् स्मृतिं प्रत्यनुभव एव कारणम् उपेक्षात्मकज्ञानात्तु संस्कारानुत्पत्त्यैवास्मरणसम्भवे किं संस्कारहेतुतया । अन्यथा भ्रमणाभावादेव घटादीनामनुत्पत्तौ दण्डादीनामपि हेतुतानापत्तेरिति चेन्न । उद्बोधकानां तत्तद्व्यक्तित्वेन हेतुत्वे गौरवाल्लाघवेन संस्कारस्यैव हेतुत्वकल्पनात् । व्यापारेण व्यापारिणो नान्यथासिद्धिरिति प्रवादस्तु निर्मूल एव । संस्कारशब्देनात्र वासनाविशेष उच्यते न तु स्मृतिजतकतया तार्किकप्रसिद्धः । शाब्दबोधस्य स्मृतिरूपताया निराकरिष्यमाणत्वात् । चैत्रादेश्चेति । अस्ति हि पदव्यञ्जकतया चैत्रादेरुपस्थितिः ।

ननु घटादिपदवृत्त्यनुभवाव्यवहितोत्तरं बोधानापत्तिः तत्पूर्वं संस्काराभावादत आह । संस्काराजनकेति । अनुभवस्य क्षणिकतया तत्रापि स्मरणादेव बोधादिति भावः । ननु उपेक्षात्मकशक्त्यनुभवानन्तरं संस्कारानुत्पत्त्या शाब्दबोधानापत्तिरत आह । तेनेति । ननु संस्कारस्यातीन्द्रियतया तत्सत्त्वे मानाभाव इत्यत आह । संस्कारकल्पिका चेति । स्मृतिरूपकार्येणैव कारणस्य संस्कारस्यानुमानात् । यद्यपि स्वरूपसदेव कारणं कार्यजनकं न ज्ञातं तथापि कल्पिकेत्यस्य हेतुत्वकाल्पिकेत्यर्थः । ननु संस्कारस्य फलनाश्यत्वात् वृत्तिस्मृतौ संस्कारस्य नष्टत्वात् शाब्दबोधानापत्तिरत आह । शाब्दबुद्धिरेव वेति। चरमफलस्यैव संस्कारनाशकत्वमिति भावः । नचैवं स्मरणानन्तरं पुनः स्मरणानापत्तिरिति वाच्यम् । तत्र स्मरणस्यैवसंस्कारजनकत्वात् । तदुक्तं दीधितौ जायते च पुनः पुनः स्मरणात् दृढतरः संस्कार इति ॥ ८ ॥

(क० टी०) तद्धर्मावच्छिन्नेति निवेशस्य फलमाह । विशेषणेति । एतत्प्रयोगोपपत्तिर्भावप्रकाशे स्पष्टा घटावच्छिन्नघटत्वे घटपदं शक्तमित्यादिरूपेणेत्यर्थः । तन्निवेशे तु समानप्रकारकत्वलाभान्न दोष इति भावः । ननु विषयितासम्बन्धेन वृत्तिविशिष्टज्ञानस्य हेतुत्वे विस्मृतवृत्तिकस्य तत्तद्वाचकपदाद्यज्ञानवतश्च शाब्दबोधापत्तिरत आह । ज्ञाने इति । उभयत्र स्वपदेन वृत्तिः । तथा च तदुभयसम्बन्धेन तादृशवृत्तिविशिष्टं ज्ञानं हेतुरिति सिद्धम् । पदेति । पदादीत्यर्थः । आदिना वाक्यम् । यद्वा पदशब्दो यौगिको वाक्यपर एव तथैव वाच्ये एवमुक्तेरस्य पदशास्त्रत्वसूचनाय मतान्तरसङ्ग्रहाय चेति बोध्यम् । तत्समुदितस्य फलमाह । अत इति । उक्तसमुदितस्य कारणत्वादित्यर्थः । तत्र वृत्तिज्ञानकारणत्वफलमाह । नागृहीतेति । स्वविषयकोद्बुद्धेत्यस्य फलमाह । नापि विस्मृतेति । केवलोद्बुद्धेत्यस्यापीदमेवफल-

म् । अन्यविषयकोद्बुद्धसंस्कारसामानाधिकरण्येनातिप्रसङ्गनिरासाय स्वविषयेति । स्वाश्रयपदेत्यस्य फलमाह । तद्वाचेति । यत्किञ्चित्पदविषयत्वमादायानतिप्रसङ्गाय स्वाश्रयेति । निरूपकत्वेन स्वाश्रयार्थमादायानतिप्रसङ्गाय पदेति । विशिष्टस्य कृत्यं तु तदेव । तद्धर्मावच्छिन्ननिरूपितेत्यस्य फलद्वयमाह । नापि घटपदादाश्रयेति । सिद्धान्ते शब्दस्य द्रव्यत्वेन समवायासम्भवादिति भावः । एतेन घटपदादुपस्थिताकाशादेः शाब्दविषयत्ववारणाय शाब्दबोधे वृत्तिग्रहजन्योपस्थितिर्हेतुः वृत्तित्वं शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलशब्दतदर्थसम्बन्धत्वमित्यपास्तमुक्तयुक्तेः । किञ्च तत्प्रकारकतद्विशेष्यकवत्संसर्गकबोधे तत्तत्समभिव्याहारज्ञानरूपाकाङ्क्षायास्तत्कारणत्वज्ञानस्य च कारणतायास्तार्किकादिसंमततया तयैवाकाशादिवारणसम्भवेन पदार्थोपस्थितिकार्यकारणभाववृत्तिजन्यत्वनिवेशस्य विफलत्वात् । किञ्च शक्तिग्रहांशे उद्बुद्धसंस्कारस्य तदुपस्थितिं विनापि बोधानुभवेन पदार्थोपस्थितेः कारणत्वे मानाभावात् । किञ्च पदार्थोपस्थितित्वापेक्षया पदार्थविषयकत्वेनैव लाघवात्कारणत्वौचित्यात् तादृशश्च शक्तिसंस्कार एवेति भावः ।

नन्वेवं यच्छक्तिग्रहात्संस्कारो नोत्पन्नस्तत्र स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यसम्बन्धेन वृत्तिवैशिष्ट्याभावाच्छाब्दबोधानापत्तिरतस्तद्ध्वनयन्नाह । संस्कारेति । ननु यत्र शक्तिग्रहः संशयात्मकस्तत्र संस्कारो नेति तत्सत्त्वमत आह । तेनेति । तादृशशक्तिग्रहेणेत्यर्थः । निश्चयस्यैव शब्दबुद्धिजनकत्वादिति भावः । यद्वा ननु शक्तिग्रहाव्यवहितोत्तरक्षणे शाब्दबोधो न स्यादत आह । तेनेति । ननु यजेत स्वर्गकाम इति श्रुत्या यागस्य करणत्वे बोधिते कालान्तरभाविस्वर्गं प्रत्याशुतरविनाशिनो यागस्य करणत्वानुपपत्तिः । संस्कारस्तत्र कल्प्यते तद्वत्प्रकृते किं कल्पकमत आह । संस्कारकल्पीति । ननु तत्र वृत्तिस्मृतावेव किं मानमत आह । शाब्देति । अन्यथानुपपद्यमानकार्येण कारणकल्पनादिति भावः ॥ ८ ॥

वृत्तेस्त्रैविध्यम मं० सा च वृत्तिस्त्रिधा । शक्तिर्लक्षणाव्यञ्जना

च। तत्र शक्तिः कः पदार्थ इति चेत्। अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारा इदं पदमिममर्थं बोधयतु इत्याकारा वेश्वरेच्छा।

तस्याश्च यद्यपि विषयत्वलक्षणः सम्बन्धः पदे ऽर्थे जन्यजनकभावे बोधे च तथापि तस्यां बोधनिष्ठजन्यतानिरूपकजनकतावत्त्वेन विषयो वाचकः तस्यां बोध विषयत्वेन विषयो वाच्य इति नातिप्रसङ्गः। यद्यपि प्रथमंशक्तिग्रहो वाक्ये एव तथापि अवापोद्वापाभ्यां शास्त्रकृत्कल्पिताभ्यां तत्तत्पदे शक्तिग्रह इति बोध्यम्। यद्वा तादृशबोधविषयको बोध एव सेति नैयायिकास्तन्न॥ ९॥

(कु० टी०) वृत्तिस्त्रिधेति। त्रिधेति धाप्रत्ययः प्रकारे। स च सामान्यस्य भेदको विशेषः। इह च वृत्तित्वं सामान्यं शक्तित्वादिर्विशेषः। तथा च विशेषत्रयवती वृत्तिरित्यर्थः। एतच्च स्वरूपकथनमात्रम्। शक्तिज्ञानलक्षणाज्ञानयोः कार्यकारणभावस्त्वेक एव। तथा हि शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताकज्ञानत्वेनशाब्दबोधं प्रति कारणता शक्तिसम्बन्धेन शक्यसम्बन्धेन वा पदप्रकारकज्ञाने शक्तेः संसर्गत्वात्। यत्तु शक्तिलक्षणान्यतरत्वं वृत्तित्वमिति तन्न। द्योतकानामसङ्ग्रहापत्तेः। तार्किकमतमनुवदति। अस्माच्छब्दादिति। ननु बोध्यत्वप्रकारकेश्वरेच्छायाः शक्तित्वे ऽर्थधर्मत्वापत्तिरित्यरुचेराह। इदमिति।

तस्याश्चेति। ईश्वरेच्छा पदे ऽर्थे जन्यजनकभावे चेति सर्वत्र शक्तिप्राप्तेत्यर्थः। यद्यपि मुख्यविशेष्यतार्थनिष्ठैव तथापि लोमवान् पशुपदाद्बोध्य इति शक्तिग्रहे मुख्यविशेष्य-

तारहितस्य लोभादेरपि बोधान्न तथोक्तम् । तस्यामिति । बोधजनकत्वेनेच्छाविषयो वाचक इत्यादिरर्थः । नातिप्रसङ्गः । न सम्बन्धादौ वाचकत्वापत्तिः । प्रथमशक्तिग्रह इति । बालानां वाक्यादेवार्थबोधात् । आवापः । पदान्तरप्रक्षेपः । उद्वापः । निष्काशनम् । घटमानय घटं नय इत्यादि । शास्त्रकृदिति । पदविभागस्य काल्पनिकत्वात् वस्तुतो घटमानय घटं नयेत्यादिवाक्यमखण्डमेवेति भावः । यद्यपि तार्किकमते नाखण्डं वाक्यं तथापि पदविभागेन कल्पित एवार्थविभागः । वाक्येनैवार्थसमाप्तिरिति प्रागेवोक्तत्वात् ।

ननु ईश्वरेच्छैव शक्तिरित्ययुक्तमीश्वरज्ञानकृत्योरपि विनिगमनाविरहेण शक्तिरूपत्वसम्भवादतस्तत्रेष्टापत्तिमाह । यद्वेति । सा शक्तिः । तन्नेति । घटमानयेत्यादिवाक्यं श्रुतवता प्रयोज्येनानीतं घटं पश्यन् बालो ऽनुमिमीते अयं घटानयनकार्यताज्ञानवान् घटविषयकचेष्टावत्त्वादिति । ततः कारणं विना कार्यानुत्पत्त्या अखण्डवाक्यस्य तत्कार्यकारणत्वमवधारयति । ततो वाक्यार्थयोः सम्बन्धाभावे बोधकत्वासम्भवात् कल्पनाया बोधजनकत्वज्ञानोत्तरकालभावित्वात् बोधजनकत्वस्य सम्बन्धत्वं कथमित्यर्थः । प्रथमतो हि बोधजनकत्वग्रहो भवति पश्चात् सम्बन्धः कल्प्यत इति भावः ॥ ९ ॥

(क० टी०) मतान्तरासामञ्जस्यसूचनाय तां विभजते । सा चेति । अनेन सङ्गतिः सूचिता । तत्र । तासु वृत्तिषु । शब्दात् । पदात् । बोद्धव्ये ण्यर्थान्तर्भावः । अर्थाविशेष्यकेच्छामुक्त्वा विनिगमनाविरहात्पदनिष्ठत्वाच्च शक्तेः पदविशेष्यिकामाह । इदं पदमिति । ईश्वरेच्छेति । शक्तिरित्यस्यानुषङ्गः । इयमेव तदीयसङ्केत इति व्यवह्रीयते नैयायिकैः । नन्वेवं वाच्यवाचकव्यवस्थानुपपत्तिः तस्याः सर्वत्राविशेषणं बोध्यम् । यथाश्रुते ऽतिप्र-

सङ्गस्तदवस्थ एव । नातीति । पदं न वाच्यमर्थो न वाचक इत्यादीत्यर्थः । एतेनेहाया अतिप्रसक्तत्वान्न तत्र शक्तित्वमित्यपास्तम् । ननु पदे शक्तिग्रहस्यैवाभावेन कथं पदघटिता सेत्याशयेन शङ्कते । यद्यपीति । आवापः । पदान्तरप्रक्षेपः । उद्धारो । विद्यमानपदत्यागः । तयोरवास्तवत्वादाह । शास्त्रकृदिति । विनिगमनाविरहादेवाह । यद्वेति । एतच्छब्दजन्यार्थबोधविषयकेश्वरज्ञानमेव शक्तिरित्यर्थः ॥ ९ ॥

नैयायिकाभिमत शक्तिखण्डनम्।

मं० प्रयोज्यप्रयोजकवृद्धव्यवहारं पश्यता बालेन प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञानमनुमाय ज्ञानस्य चोपस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वा असम्बद्धस्य कारणत्वानुपपत्तिज्ञानपूर्वकं कल्प्यमानस्य सम्बन्धस्य स्वयमनुपपद्यमानत्वेन गृहीतजनकत्वघटितस्य ग्रहीतुमशक्यत्वात् । एतेन बोधजनकत्वमेव पदपदार्थयोः सबन्ध इत्यपास्तम् । विनिगमनाविरहेणेच्छाबोधयोरुभयोः शक्तित्वकल्पने गौरवाच्च । किञ्चैवमिदमस्माद्भवत्वितीच्छाविषयत्वमेव जनकत्वं स्यादिति बहूपप्लवः । किञ्च प्रमाणानां जनकत्वतद्घटितसमूहातिरिक्तसबन्धेनैव प्रमेयसम्बद्धानां ज्ञानजनकत्वदर्शनेह तयोः सम्बन्धत्वानौचित्यम् ।

अन्यथा धूमाद्वन्हिज्ञानं जायतामितीच्छाविषयत्वमेव वा हेतुसाध्ययोः सम्बन्धः स्यादिति व्याप्त्युच्छेदः । किञ्चेच्छाया जनकत्वस्य वोभयवृत्तित्वाभावः । इच्छाविषयबोधीयविषयतायामिच्छाश्रयतानियामकत्वाभावात् । सम्बन्धो हि सम्बन्धिभ्यां भिन्न उभयाश्रित इति द्विष्ठः सम्बन्ध इति च विशिष्टबुद्धि-

नियामक इति चाभियुक्तव्यवहारात् । न हि तत्र विषय इच्छावानित्यादिव्यवहारो ऽस्ति । जनकता शक्तिरिति पक्षे बोधजनकतायाः पदे ऽर्थे च सत्त्वे ऽपि तयोः परस्परं सम्बन्धस्य दुरूपपादत्वात् । ज्ञाने विषयस्य कर्तुश्च कारणत्वे ऽपि तयोः परस्परं विशिष्टबुद्ध्यदर्शनात् । अर्थपदयोः सम्बन्धस्य दुरूपपादत्वात् ॥ १० ॥

(कुं० टी०) प्रयोज्यस्य प्रवृत्त्या । घटाद्यानयनेन । तस्य ज्ञानमिति । एतद्वाक्यार्थज्ञानं प्रयोज्यस्य जातमित्यनुमायेत्यर्थः । ज्ञानस्येति । प्रयोज्यनिष्ठज्ञानस्य तु तद्वाक्यमेव कारणं वाक्यवाक्यार्थयोश्चासम्बन्धे बोधकता न स्यादिति तयोः सम्बन्धः कल्प्यत इत्यर्थः । स्वयमनुपपद्यमानत्वेनेति । प्रथमतो ऽसम्भवादित्यर्थः । गृहीतेति । ज्ञातेत्यर्थः । बोधजनकत्वरूपसम्बन्धस्य ज्ञातुमशक्यत्वादिति यावत् । अपास्तमिति । बोधजनकत्वज्ञानानन्तरमेव सम्बन्धत्वकल्पनात् । किञ्च बोधकत्वस्यैव वाचकत्वे माधुर्यादिव्यञ्जके स्पर्शादिवर्णे ऽतिव्याप्तिः ।

विनिगमनाविरहेणेति । ईश्वरेच्छाया ईश्वरज्ञानस्य वा शक्तित्वमित्यत्र विनिगमनाविरह इत्यर्थः । किञ्चैवमिति । दण्डाद्घटो जायतामितीच्छाविषयत्वमेव दण्डादौ कारणत्वं स्यादित्यर्थः । तस्माद्दण्डादिनिष्ठा शक्तिः स्वरूपसती कार्योत्पादिका, शब्दनिष्ठा तु ज्ञातैव शाब्दबोधोपयोगिनीति वैलक्षण्यमावश्यकमिति भावः । किञ्च स्वर्गादिजनकत्वमेव यागादौ कारणत्वं वाच्यं, तथा च स्वर्गजनकत्वेन पूर्वं ग्रहाभावात् स्वर्गकामो यजेतिवाक्याच्छाब्दबोधानापत्तिः । बहूपप्लव इति। अन्यत्रापि कारणत्वस्यातिरिक्तस्य सिद्ध्यनापत्तिरित्यर्थः ।

तस्मादीश्वरेच्छाकरणत्वस्यैव नियामिकेति भावः । प्रमाणानामिति । संयोगादिसम्बन्धेन घटादिसम्बद्धानामेव चक्षुरादीनां घटादिबोधकत्वदर्शनादिहापि प्रमाणप्रमेययोः सम्बन्धान्तरमेवोचितम् जनकत्वस्य जनकत्वघटितस्य वा सम्बन्धत्वं नोचितमित्यर्थः ।

अन्यथा । जनकत्वादेः सम्बन्धत्वे सति । ज्ञायमाने । धूमे । धूम एव हेतुर्न तु धूमज्ञानमित्यभिप्रेत्य धूमादित्युक्तम् । व्याप्त्युच्छेद इति । व्याप्तिर्नाम साहचर्यनियमः तस्या हेतुत्वमुच्छिद्येतेत्यर्थः । तस्माज्जनकत्वघटितः सम्बन्धो नोचित इति भावः । इच्छाया जनकत्वस्य वेति । यो हि घटभूतलयोः संयोगवत्तदुभयास्मिन्नपि सम्बन्धिनि वर्तते स एव सम्बन्धो भवति जनकत्वादि तु पदमात्रवृत्तीत्युभयवृत्तित्वाभावान्न सम्बन्धत्वमित्यर्थः । इच्छाया उभयवृत्तित्वाभावमुपपादयति । इच्छेति । इच्छाविषयो यो बोधस्तदीयविषयताया इच्छाश्रयतानियामकत्वाभावादित्यर्थः । तत्र हि न पदं नापि पदार्थ इच्छाविषयः किन्तु बोध एव बोधविषयतयैव च इच्छाश्रयता वाच्या सा च न सम्भवति अयं शब्दः अयमर्थो वा इच्छावानिति प्रतीत्यभावादिति भावः ।

सम्बन्धत्वाभावं वक्तुं प्रथमतः सम्बन्धस्वरूपं दर्शयति । सम्बन्धो हीति । यद्यपि विशिष्टबुद्धिनियामकत्वं विशेष्यविशेषणयोरपि तथापि तयोरविशिष्टबुद्धावपि विषयत्वात्तद्व्युदासः । घटवद्भूतलमित्यादिविशिष्टबुद्धिवत्प्रकृते विशिष्टबुद्धिर्नास्तीत्याह । न हीति । तत्रेति । इच्छाविषयो यो बोधस्तदीयविषये इत्यर्थः । ननु शब्दवदर्थस्यापि शाब्दबोधे निमित्तत्वादस्तुभयत्र बोधजनकत्वाख्यः सम्बन्ध इत्यत आह ।

सत्त्वे ऽपीति । दुरुपपादत्वादिति । न हि दण्डचक्रयोरुभयोर्घटजनकत्वे ऽपि परस्परं सम्बन्धोस्तीत्यर्थः । सम्वन्धाभावादिति पाठे ऽप्ययमेवार्थः । एतदेवाह । ज्ञाने इति । अन्यथा विषयपुरुषयोरपि बोधहेतुत्वात् पुरुषविषययोः सम्बन्धे तयोर्विशिष्टबुद्ध्यापत्तिरित्यर्थः । ननु बोधजनकत्वस्याश्रयतया पदे निरूपकतया चार्थे ऽपि सत्त्वादस्तु सम्बन्धत्वमिति चेन्न । निरूपकतासम्बन्धस्य वृत्त्यनियामकत्वात् ॥ १० ॥

(क०टी०) प्रयोज्यस्येति । प्रयोजकवृद्धोच्चारितशब्दश्रवणानन्तरमित्यादिः । तस्य । प्रयोज्यस्य । शब्दमेव । प्रयोजकवृद्धोक्तशब्दमेव । असम्बद्धस्य शब्दस्येति शेषः । कल्प्येति । पदपदार्थयोरिति भावः । धस्य । भवदुक्तस्येति शेषः । स्वयमात्मनेत्यर्थकं गृहीतेत्यत्रान्वेति । घटितस्य । इच्छाज्ञानान्यतररूपस्य । आद्ये पञ्चम्या जनकत्वमुक्तम् । द्वितीये बोधयत्विति ण्यन्तस्य तद्विषयकबोधं जनयत्वित्यर्थेन तदुक्तम् । तथा च स्वसामानाधिकरण्येन तस्य तत्प्रतिबन्धकत्वेन तद्रूपकारणाभावेन दुष्करस्तद्ग्रह इति भावः । दीक्षितभूषणोक्तं मतं निराचष्टे । एतेनेति । उक्तदोषेणेत्यर्थः । सम्बन्धः । शक्तिपदवाच्यः । एतेन वैयाकरणमतत्वेन तदनूद्य नव्यनैयायिकोक्तं तत्खण्डनमपास्तम् । वैयाकरणभाष्यकारादीनां तन्मताभावात् । आद्ये दोषान्तरमाह । वृत्तीति । ननु ज्ञानेच्छाकृतीनामन्यत्र क्रमदर्शनेन प्राथम्यमेव ज्ञानस्य तत्त्वे विनिगमकम् । अत एवोत्तरपक्षत्वेन तदुक्तम् । यद्वा इच्छात्वस्याविवक्षणेन तस्यापि शक्तित्वमिष्टम् । किञ्चाधुनिकसङ्केतस्येच्छात्वदर्शनेन तस्या एव तत्त्वमत एव मुख्यपक्षत्वेन प्राक् तदुक्तिरत एवाह । किञ्चैवमिति । एतेन तदन्यत्वव्यावृत्तिरेतेन स च सङ्केतत्वाद्विषयत्वरूपो न तद्रूपः एतदाशयेनैव शक्तिः पदार्थान्तरमित्युक्तिर्नव्यानां विषयत्वस्य पदार्थान्तरत्वादिति नव्यनैयायिकोक्तमपास्तम । बहूपेति । सकलशास्त्रव्यवहारोच्छेद इत्यर्थः । एवं तयोः पदपदार्थसम्बन्धत्वमुरीकृत्य तद्ग्रहासम्भवादिरू-

पदोषजातमुक्त्वा तयोस्तत्सम्बन्धत्वमेवायुक्तमित्याह । किञ्च प्रमाणानामिति । प्रत्यक्षादीनामित्यर्थः । जनेति । जनकत्वं तद्घटितश्चेच्छारूपो ज्ञानरूपो वा सम्बन्धस्तदुभयान्येत्यर्थः । सम्बन्धेन । संयोगादिनैव । प्रमेयेति । घटादीत्यर्थः । इह । शब्दप्रमाणस्थले । तयोः । जनकत्वतद्घटितयोः । सम्बन्धत्वेति । तत्सम्बन्धत्वेत्यर्थः । विपक्षे दोषान्तरमाह । अन्यथेति । अतथाङ्गीकारे इत्यर्थः । इच्छाविषयेति । विषयतयेच्छा इत्यर्थः । एवं प्रागपि । द्वितीये आह । तद्बोधेति । उच्छेद इति । इष्टापत्तिस्तु तेन कर्तुमशक्येति भावः । इत्थं तयोः सम्बन्धत्वमभ्युपेत्योक्तम् वस्तुतस्तल्लक्षणानाक्रान्तत्वात्तत्त्वमेव तयोर्न सम्भवतीत्याह । किञ्चेच्छाया इति । तयोरुभयत्वाभावे हेतुमाह । विषयतायामिति । तत्सामान्ये इत्यर्थः । एवमग्रे ऽपि । ननु तयोराश्रयतानियामकत्वाभावे ऽपि सम्बन्धत्वे किं बाधकमत आह । सम्बन्धो हीति । हि यतः सम्बन्धस्तादृशस्तादृशस्तादृश इत्याभियुक्तव्यवहारस्तस्य तस्य तत्त्वेनेत्यर्थः । तत्र मध्यमव्यवहारो हरेः अन्यौ तु तान्त्रिकाणाम् । तथा च सम्बन्धिभिन्नत्वे सति उभयाश्रितत्वे सति विशिष्टबुद्धिनियामकत्वं सम्बन्धत्वम् । अस्ति च समवायादौ रूपवानित्यादिप्रतीतेः । तत्राद्येनाभेदस्य सम्बन्धत्वनिरासः । द्वितीयेन केवलजन्यत्वादेः । तृतीयेन वृत्त्यनियामकविषयत्वादेः । एवञ्च तयोरपि सम्बन्धत्वासम्भव इति भावः । ननु तयोस्तदनियामकत्वे एव किं मानमत आह । न हीति । तत्र तयोर्मध्ये । प्रकृताशयेनाह । इच्छेति । इच्छाया विषयो यो बोधस्तदीया या विषयता अर्थनिष्ठा तस्यामित्यर्थः । सत्यामिति शेषः । यद्वा तत्रेत्यस्यैव व्याख्या इच्छेति । अनेनैव हि सम्बन्धेनेच्छाविषयस्य वाच्यत्वमुक्तमिति भावः । आदिना विषयो ज्ञानवानित्यस्य परिग्रहः । ननु सामान्यतो जनकताया जन्याश्रयतानियामकत्वाभावेन तदसम्बन्धत्वे ऽपि पदार्थोभयवृत्तित्वेन तद्भिन्नत्वेन च पदार्थयोः सम्बन्धत्वं कुतो नेत्याह । बाधेति । सम्बन्धत्वस्य दुरुपेति । घटादिजनकत्वस्य दण्डादिसर्वनिष्ठत्वे ऽपि तस्य तेषां मिथो ऽसम्बन्धत्ववत् । नन्वत्र तस्या पदवृत्तित्वे मानाभावः, किञ्च तथा

सति तत्सम्बन्धमपि स्यादत आह । ज्ञाने इति । विषयस्यार्थस्य । कर्तुः । शब्दस्य । कर्तृविषययोः । सम्बन्धस्य । बोधजनकतारूपस्य । जनकत्वस्यापि न सम्बन्धत्वमिति तयोस्तत्वं दूरापास्तमेवेति भावः ॥ १० ॥

शक्तेः पदतदर्थान्तरसम्बन्धरूपत्वम् । तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया । तद्ग्राहकं चेतरेतराध्यासमूलं तादात्म्यम् । तच्च सङ्केतः । तस्यापि च पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति व्यवहारः तस्य सम्बन्धत्वाभावात् । भेदाभेदरूपस्य तस्य तत्त्वासम्भवात् । तद्घटकभेदस्याभेदस्य वा तत्त्वादर्शनात् । अभेदस्यापि तत्त्वं खण्डयिष्यते ॥ ११ ॥

(कुं०टी०)वाच्यवाचकेति । कारणतारूपाशक्तिः शब्दे प्रसिद्धैव अर्थे शक्तिर्वाच्यतारूपैव । अध्यासेति । अन्यस्मिन्नन्यधर्मावभासो ऽध्यासः तन्मूलकं तादात्म्यं न तु वास्तवमित्यर्थः । ननु सङ्केत एव तादात्म्यमिति व्याख्यास्तु सङ्केतग्रहानन्तरमेव तादात्म्याध्यासादिति चेन्न । देवदत्तो ऽयमिति तादात्म्यमेव सङ्केत इत्यर्थः । तस्यापीति । तादात्म्यस्यापीत्यर्थः । पदपदार्थयोरारोपिततादात्म्यस्य शक्तिग्राहकत्वात् शक्तित्वमपीति भावः । ननु तादात्म्यमेव शक्तिरस्तु किं भेदस्वीकारेणेत्यत आह । तस्येति । तादात्म्यस्येत्यर्थः । सम्बन्धत्वाभावमुपपादयति । भेदाभेदेति । वास्तविकभेदे सति आरोपिताभेद एव हि तादात्म्यं तस्य च सम्बन्धत्वं न सम्भवतीति भावः । अत्रैव हेतुमाह । तद्घटकस्येति । तादात्म्यघटकस्य भेदस्य अभेदस्य वा सम्बन्धत्वमन्यत्र न दृष्टमित्यर्थः । ननु भेदस्य सम्बन्धत्वाभावे ऽपि नीलो घट इत्यादावभेदस्य सम्बन्धत्वं दृष्टमत

आह। खण्डयिष्यत इति। सम्बन्धिभेदनियतत्वात् सम्बन्धस्येति भावः ॥ ११ ॥

(कु०टी०)तदाह। तस्मादिति। सम्बन्धान्तरम्। उक्तेच्छादिभिन्नम्। तद्ग्राहकमिति। वृद्धव्यवहारादिवदिदमपि तद्ग्राहकमित्यर्थः। इतरेतरेति बहुव्रीहिः। तदान्यपदार्थमाह। तच्चेति। तदात्म्यं चेत्यर्थः। सङ्केत इति। भेदाभेदरूपो द्विविधः सङ्केतः। नन्वेवं तार्किकाणां कथं शक्तिव्यवहारो ऽत आह। तस्यापीति। सङ्केतरूपतादात्म्यस्यापि चेत्यर्थः। पदनिष्ठोक्तरूपशक्तिग्राहकत्वात् भाक्तव्यवहार इति भावः। ननु मुख्य एव कुतोनेत्यत आह। तस्येति। सङ्केतस्येत्यर्थः। सम्बन्धत्वाभावादिति। तयोः सम्बन्धत्वाभावादित्यर्थः। तत्त्वमेव च शक्तिपदस्य मुख्यप्रवृत्तौ निमित्तमिति भावः। ननु तदेव कुतो नेत्यत आह। भेदेति। तस्य। तादात्म्यस्य। ननु तदपि कुतो नात आह। तद्घटकेति। तादात्म्यघटकेत्यर्थः। अदर्शनादिति। अन्यत्रेति शेषस्तथा च यद्यन्यत्र तथा स्यात्तर्हि अवयवान्यावयव्यभावेन तद्रूपतादात्म्यस्य तत्त्वेन तद्रूपस्य सङ्केतस्यापि तत्त्वान्मुख्य एव व्यवहारः स्यान्न च तथाभावः। ननु तद्घटकभेदस्य तत्त्वेन तत्त्वस्यान्यत्रादृष्टत्वे ऽप्यभेदस्य सम्बन्धत्वं नीलोत्पलादौ दृष्टमत आह। भेदेति। अपिरुक्तेच्छादेः संयोगस्य च समुच्चायकः। तत्त्वम्। सम्बन्धत्वम्। सुबर्थनिर्णय इति भावः ॥ ११ ॥

स्वोक्तौ पातञ्जलभाष्यसम्मतिः। तदुक्तं पातञ्जलभाष्ये सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको यो ऽयं शब्दः सो ऽर्थो यो ऽर्थः स शब्द इति। इतरेतराध्यासो रूप्यते ऽनेनेति करणे घञ्। स्मृत्यात्मक इत्यनेन ज्ञातस्यैव सङ्केतस्य शक्तिबोधकत्वं दर्शितम्। किञ्च पाणिन्यादिस्मार्तसङ्केतस्यैव वाचकतानियामकत्वं न त्वाधुनिकस्येत्यपि दर्शितम्। एवञ्चाधुनिकसङ्केतस्थले द्वादशे ऽह्नि क्रियमाणनामस्थले लक्षणा। तत्र घटगो-

विन्दादिगुणाद्यारोपेण तन्मूलकतत्प्रवृत्तिनिमित्तारोपेण च बोधः । सम्बन्धश्च स्वशक्तसङ्केताविषयत्वम् । एतदर्थमेव सङ्केतोपयोगः ।

अत एव तस्य भाव इति सूत्रे भाष्ये डित्थादिषु प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावाद्भावप्रत्ययान्तवृत्तिर्न प्राप्नोति डित्थत्वमित्याशङ्क्य प्राथमकल्पिकडित्थेन कृतां क्रियां गुणान् वा यः कश्चित् करोति स उच्यते डित्थत्वं ते एतत् एवं डित्था कुर्वन्ति ॥ १२ ॥

(कुं०टी०) नन्वस्यार्थस्यायं शब्दो वाचक इत्याकारकसङ्केते शब्दार्थयोस्तादात्म्यभङ्ग इत्यत आह । सङ्केतस्त्विवति । इतरेतराध्यासः । परस्परात्मकतारोपः । इतरेतराध्यासो रूप्यते ऽनेनेति करणे घञ् । इतरेतराध्यासग्राह्य इत्यर्थः । स्मृत्यात्मक इति । स्मृतौ आत्मा यस्येत्यर्थात् स्मृतिविषय इत्यर्थः । अत एव वक्ष्यति ज्ञानस्यैवेत्यादि । शक्तिबोधकत्वम् । शक्तिग्राहकत्वम् । स्मृतिपदस्यार्थान्तरमाह । किञ्चेति । त्रयी शब्दानां प्रवृत्तिरिति पक्षे संज्ञामात्रस्य व्युत्पन्नतया योगलभ्यक्रियास्तत्रारोप एव हि तत्र शक्तिरस्ति पाणिन्यादिस्मृतिप्रकाशितेश्वरसङ्केताभावात् इत्याह । एवञ्चेति । गोविन्देति । प्रसिद्धगोविन्दगुणारोपेणाधुनिकगोविन्दप्रयोग इत्यर्थः । आरोपहेतुं सम्बन्धं दर्शयति । स्वशक्तेति । गोविन्दे शक्तो यो गोविन्दस्तत्सङ्केतस्य विषय आधुनिकगोविन्दः । ननु गोविन्दादिपदानां लक्षणाश्रयणे सङ्केतानुपयोग इत्यत आह । एतदर्थमेवेति । उक्तसम्बन्धज्ञानार्थमेवेत्यर्थः ।

आरोपेण च संमतिं दर्शयति । अत एवेति । प्रत्ययार्थाभावादिति । यदृच्छाशब्दे पुरुषेच्छाया एव निमित्ततया-

र्थगतस्य कस्यचित् प्रवृत्तिनिमित्तस्यानपेक्षणात्त्वप्रत्ययो न प्राप्नोतीति भावः । भावप्रत्ययान्तेति । भावार्थकप्रत्ययान्तावृत्तिरित्यर्थः ॥ १२ ॥

(क० टी०) तस्य तन्मूलत्वे मानमाह । तदुक्तमिति । इतरेतरेति । सङ्केतकर्तुराहार्येतरेतराभेदारोपरूपो य इतरेतराध्यासस्तद्रूप इत्यर्थः । भेदारोपे बीजं त्वविभाग एव त्रयाणामपि बुद्धिधर्मत्वेन परस्परमविभागात् । अध्यासस्वरूपमाह । यो ऽयमिति । ओमित्येकाक्षरं ब्रह्मेत्यादिश्रुतिषु वृद्धिरादैजित्यादिव्याकरणे कम्बुग्रीवादिमान्घट इत्यादौ लोके अमरा निर्जरा देवा इत्यादौ कोशे च यो ऽयं शब्दः सो ऽर्थो यो ऽर्थः स शब्द इत्येवमितरेतराध्यासरूपस्यैव सङ्केतस्य दर्शनात् शब्दवाच्यत्वलक्षणायां प्रमाणाभावादिति भावः । एवं भूते एव सङ्केते मुख्ये सति कथं चिद्धेदं परिकल्प्यार्थस्यायं वाचक इति कदाचित्सङ्केतः यथोक्तः प्रगृह्यमिति पाणिनेरिति बोध्यम् । स्फुटीभविष्यति चेदं सर्वमनुपदमेव । अत्रेतरेत्यादिवातित्यन्तो ऽपपाठः तद्भाष्यादिविरोधात् । ज्ञातस्यैवेति । ज्ञानविषयस्यैवेत्यर्थः । तत्र स्मृत्यात्मकत्वं तूक्तरीत्यैव विषयविषयिणोरभेदात् । एवमग्रे ऽपि । कर्मणि वा । एवेन स्वरूपतो व्यावृत्तिः । अविशेषेण विनिगमनाविरहात्तस्यान्यदपि फलमाह । किञ्चेति । पाणिन्यादिप्रणीतस्मृतिबोधितसङ्केतेत्यर्थः । वाचकतेति । तस्य पदस्य एतावतां वर्णानामेवमानुपूर्वीकमिलनमस्यार्थस्य वाचकमिति प्रविभागरूपविषयव्यवस्थेत्यर्थः । एवव्यावर्त्यमाह । न त्विति । अनियतत्वादिति भावः । अपिरुक्तदर्शितसमुच्चायकः । आधुनिकेत्यनेनोभयसंग्रहे ऽपि स्पष्टार्थं भेदेन पाणिन्यादिस्मार्तेत्युभयव्यावर्त्यमाह । एवञ्चेति । तस्यैव तत्त्वानियामकत्वेचेत्यर्थः । तत्र स्मार्तेत्यनेनाद्यव्यावृत्तिः । पाणिन्यादीत्यनेनान्त्यस्य अन्त्यभिन्नो यस्य आर्थः । लक्षणा च न शुद्धा किन्तु गौणीत्याह । तत्रेति । उभयत्रेत्यर्थः । घटेति । मुख्यघटगोविन्दादिनिष्ठगुणादीत्यर्थः । आदिना क्रियापरिग्रहः । तन्मूलकेति । तदारोपमूलकघटत्वादिप्रवृत्तिनिमित्तेत्यर्थः । सापि

लक्षणातो नातिरिक्तेति सूचयितुमाह । सम्बन्धश्चेति । स्वेति घटाद्यर्थशक्तघटादिपदाधुनिकादिसङ्केतविषयत्वमित्यर्थः । नन्वेवमत्रोक्तसङ्केतानुपयोगः शक्त्यभावेन तद्ग्रहरूपफलाभावादत आह । एतदर्थमेवेति । उक्तरूपसम्बन्धार्थमेवेत्यर्थः । अत्रार्थे मानमाह । अत एवेति । उक्तरीत्या तत्र लक्षणाङ्गीकारादेवेत्यर्थः । डित्थादीति । संज्ञाशब्दविषये इत्यर्थः । उक्तमित्यत्रास्यान्वयः ॥ १२ ॥

प्राथमकाल्पिकश- क्तिग्रहसमर्थनम्। प्राथमकल्पिके तर्हि कथम् । यथा तस्य क्वाचित्कः प्रयोगस्तथा वृत्तिरपीत्युक्तम् । तत्र शब्दरूपस्यार्थे आरोपात् तत्प्रकारमाश्रित्य यथा शब्दप्रयोगस्तथा वृत्तिरपीत्यर्थ इति कैयटस्तत्पक्षे कथञ्चित्पदस्य न तथा स्वारस्यम् । अन्यत्रारोपस्यानुपयोगश्च इत्यन्ये व्याचक्षते व्यक्तावेव शक्तिस्तस्या एव च विषयताद्वयेन भानमिति शक्तिग्रहप्रयोगयोरूपपत्तिस्तथा त्वत्प्रत्ययस्यापीति । एवं रीतेरन्यत्र क्वाप्यदर्शनेनात्र पक्षे कथञ्चिदित्युक्तिरत्यन्तं समञ्जसेति बोध्यम् ।

अनादित्वात् संसारस्य ततो ऽपि पूर्वतनडित्थादिगुणाद्याश्रित्य प्रयोगादीति कश्चित् । तत्र तत्सङ्केतज्ञानादेव बोधः । शक्त्याद्यभावे ऽपीति तु न युक्तम् । वृत्त्यन्तरत्वापत्तेः । वृत्तिजन्योपस्थितिं विना शाब्दबोधविषयत्वासम्भवाच्च । द्वादशे ऽह्नि पिता नाम कुर्यादिति श्रुत्या स्मृत्या वा नामत्वेन नामधेये ऽपि तत्तद्रूपेणेश्वरेण सङ्केताकरणेन तत्रापि शक्तेर्दुरुपपादत्वात् । अत्र नामपदेन चाह्वानकरणीभूतो बोधकः शब्द उच्यते ॥ १३ ॥

(कुं० टी०) प्राथमकल्पिकेति । प्राथमकल्पिको मुख्यो यो डित्थस्तदीयां क्रियां गुणान् वा यः करोति स डित्थ इत्युच्यते

डित्था ईदृशीं क्रियां कुर्वन्ति सा च त्वयीतिं तव डित्थत्वमेतादृशक्रियारूपमित्यर्थः । एवञ्च डित्थसहचरितक्रियादर्शनात्तादृशक्रियागुणादिकमेव प्रवृत्तिनिमित्तमिति भावः। अत्रेदं तत्त्वम्। यस्य गुणस्य भावात् द्रव्ये शब्दाभिनिवेश इति भाष्यमते गुणो नाम भेदकः भेद्यश्च द्रव्यमित्येतदेव लक्षणमनुसरणीयम्। एवञ्च विशेष्यमात्रवाचकाद्विशेषणमात्रे गुणे भावप्रत्ययः। गोशब्दस्य जात्यवच्छिन्नद्रव्यवाचित्वे जातौ गोत्वमिति भावप्रत्ययः। जातिमात्रवाचित्वे तु तत्समानियते शब्दस्वरूपे भावप्रत्ययः। यद्धि स्वरूपेण परमुपरञ्जयति तद्विशेषणम्। एवञ्च स्वरूपेणार्थे प्रत्याययतः शब्दस्योपरञ्जकत्वात् स्वरूपमेव प्रवृत्तिनिमित्तं तद्रूपाध्यासेन चार्थप्रतीतिः। एवञ्च डित्थादिशब्दानामपि स्वरूप एव भावप्रत्ययः। स्वरूपाध्यासेन संज्ञाया संज्ञिप्रत्यायनात्तदेव प्रवृत्तिनिमित्तम्। तदेत्तत्वे डित्थत्वमित्यत्र तु क्रियागुणाध्यासादन्यत्र वृत्तौ डित्थत्वसहचरितयोः क्रियागुणयोर्भावप्रत्ययः। एवञ्च क्रियागुणयोरभेदाध्यासाभिप्रायं डित्थत्वमिति।

कथमिति। प्राथमिकडित्थे आरोपासम्भवाद्वृत्तिः कथमित्यर्थः। समाधत्ते। यथेति। क्काचित्क इति। विनयादित्वात्स्वार्थे ठक्। अवस्थाभेदात्तत्रापि जातिं कल्पयित्वा यथा तत्प्रकारको बोधस्तथा त्वप्रत्ययो पीत्यर्थः। आनन्त्यव्यभिचारयोरभावेन तत्र जातिकल्पने मानाभावान्निष्प्रकारक एव बोध उचित इत्यभिप्रायेणोक्तं कथञ्चिदिति। तत्रेति। अयं शब्द अस्मिन्नर्थे शक्तः, अस्मिन्नर्थे वृद्धैः प्रयुज्यमानत्वादित्यनुमानेन शक्तिग्रहे जायमाने धर्मितावच्छेदकस्यावश्यकत्वात् शब्दस्यार्थे आरोपाच्छब्दप्रकारको यथा बोधस्तथा

शब्दस्वरूपे प्रवृत्तिनिमित्ते त्वप्रत्यय इत्यर्थः । तत् । शब्दस्वरूपम् । प्रकारम् । प्रवृत्तिनिमित्तम् ।

तत्पक्षे इति । कैयटव्याख्याने इत्यर्थः । न स्वारस्यमिति । घटादिपदादपि शब्दप्रकारकबोधस्य दर्शनेनास्य प्रकारस्य सार्वत्रिकत्वात्कथञ्चित्पदस्य भाष्यस्थस्य स्वारस्यं न भवतीत्यर्थः । अन्यत्रेति । आधुनिकडित्थे ऽपि संज्ञास्वरूपे वाच्ये त्वप्रत्ययसम्भवात्प्राथमिकडित्थगतक्रियारोपेण प्रवृत्तिरिति भाष्यस्य निष्फलत्वापत्तिश्चेत्यर्थः । संज्ञाशब्दे शब्दस्वरूपस्यैव प्रवृत्तिनिमित्तत्वात्तत्रैव प्रत्यय इति व्याख्याने तु भाष्ये कथञ्चिच्छब्दप्रयोगो ऽसमञ्जस एव स्यात् । इत्यन्ये इति । इति पूर्वोक्तदोषाद्धेतोरन्ये भाष्यमन्यथा व्याचक्षते इत्यर्थः । विषयताद्वयेनेति । व्यक्तिरेवात्र डित्थशब्दार्थः तस्या एव प्रकारतया विशेष्यतया च भाने । तथा च प्रकारताविशिष्टा व्यक्तिस्त्वप्रत्ययार्थ इत्यर्थः । अस्यारीतेरन्यत्र दृष्टत्वाभावात् कथञ्चिदिति भाष्योक्तिः सङ्गतेति भावः ।

प्रयोगादीत्यादिना शक्तिग्रहभावप्रत्ययौ । अस्मदादीनां दुर्ग्रहत्वमत्रास्वरसः । तत्रेति । शक्त्याद्यभावे ऽपि बोध इत्यन्वयः । पदान्निर्विकल्पकशक्तिग्रहशाब्दबोधयोरभावात्तत्र शक्तिर्नास्तीति मतं निराकरोति । तत्तादिति । वृत्तित्वानभ्युपगमे तु दोषमाह । वृत्तिजन्येति । कथं तर्हि अनुकार्याणां बोध इति चेत्तस्य स्मरणात्मकत्वेन शाब्दबोधत्वाभावात्तथोपस्थितस्यापि पदार्थान्तरे ऽन्वयित्वं तु भूसत्तायामित्यादिनिर्देशादेव । ननु आधुनिकसंज्ञास्थले शक्त्यभावे ऽपि नामस्थले शक्तिरस्त्येव द्वादशे ऽहनीति वचनात्तथा च तत्र लक्षणेति प्रागुक्तमयुक्तमि-

त्याशङ्कामपाकरोति । द्वादशे ऽहनीति । तत्तद्रूपेणेति । चैत्रत्वादिनेत्यर्थः । अन्यथा नापभाषितवै इत्येवमपभ्रंशत्वेनोच्चारणादपभ्रंशे ऽतिव्याप्तेः । तस्मात्तत्तद्रूपेणेश्वरोच्चारितत्वमेव शक्तिमत्त्वनियामकं तच्च नामस्थले नास्तीति भावः । तत्रापीति । आधुनिकसंज्ञावन्नामस्थले ऽपीत्यर्थः । ईश्वरस्य सर्वज्ञत्वान्नामस्थले विशिष्याप्युच्चारणं कल्प्यते इत्यन्ये । ननु तत्र शक्तिसत्त्वे किं मानमस्य सुबन्तादौ प्रसिद्धत्वाद्वाचकशब्दमात्रग्रहणाद्वा अस्ति प्रकृत्यादिकल्पनया शक्तिरत आह । अत्रेति । बोधकः शब्द इति । तथा च शक्त्यभावे बोधो न स्यादिति भावः ॥१३॥

(क०टी०) प्राथमेति । एतत्कल्पप्राक्तनकल्पभवेनेत्यर्थः । करोति । अस्मिन्कल्पे । प्राथमकल्पिके तर्हीत्यादिग्रन्थस्य प्रकृतानुपयुक्तत्वे ऽपि विशेषं वक्तुमुक्त इति सूचयितुमाह । तत्रेति । कथं चित्क इति प्रतीके इत्यर्थः । आसङ्गात् । तादात्म्याध्यासात् । यथाशब्दस्येति । अन्यथा शब्दान्निर्विकल्पकाभावेन निर्धर्मितावच्छेदकशक्तिग्रहाभावेन च प्रयोग एव न स्यादित्यर्थः । जात्यतिरिक्तपदार्थे विशेष्यताप्रकारतयोः सावच्छिन्नत्वनियमादिति भावः । तं खण्डयति । तत्पक्षे इति । कैयटोक्तव्याख्यानपक्षे इत्यर्थः । तथा । अत्यन्तम् । नन्वध्याससापेक्षत्वादेव क्लिष्टत्वमत आह । अन्यत्रापीति । एतत्कल्पस्थडित्थादावपीत्यर्थः । इति हेतौ । अन्ये इति उक्तभाष्यमन्यथेत्यर्थः । तस्या एव च । व्यक्तेरेव । विषयतेति । प्रकारताविशेष्यताख्यविषयताद्वयेनेत्यर्थः । भाष्यस्थप्रयोगपदमुपलक्षणमित्याह । शक्तीति । इति व्याख्यानसमाप्तौ । एकदेशीयव्याख्यानमाह । अनादीति । गुणादीत्यादिना क्रियाप्रयोगादीत्यादिना त्वप्रत्ययादि[illegible] कश्चिदित्यनेन कथं चित्पदघटितोक्तभाष्यविरोधरूपा संसारस्य नानादित्वमित्याशयकप्राथमेत्यादिशङ्कासमाधानरूपसर्वभाष्यविरोधरूपान्यत्र प्रतिपादितप्रलये सत्त्वेनानादित्वं न तस्येत्येवं रूपा चारुचिः सूचिता । सङ्केतस्य ज्ञातस्यैवेत्युक्तस्य विशेषकथनायाप्रानुवादमाह । तत्रेति । आधुनिकसङ्केतस्थले इत्यर्थः । तत्तदर्थ-

निरूपितो यः सङ्केतसमवायः सङ्केतस्तज्ज्ञानादित्यर्थः । प्रयोगसाधुता प्राग्वत् । नन्वेवं मध्ये सम्बन्धरूपाशक्तिः किमर्थमत आह । शक्त्यादीति । आदिना लक्षणादिग्रहः । वृत्त्यन्तरेति । तुर्यवृत्तित्वे इत्यर्थः । सङ्केतस्येति भावः । ननु कार्यस्य तेनैव सिद्धे किमिति तस्य वृत्त्यन्तरत्वमत आह । वृत्तीति । पदार्थस्येति शेषः । घटादिपदादाश्रयत्वादिनोपस्थिताकाशादेः शाब्दविषयत्ववारणाय वृत्त्या पदजन्यपदार्थोपस्थितेस्तत्र कारणत्वाङ्गीकारादिति भावः । ननु सङ्केतज्ञानजन्यबोधे शक्तिजन्योपस्थितेरेव हेतुत्वमास्तां कृतं वृत्तित्वनिवेशेन । किञ्च द्वादशे ऽह्नि क्रियमाणनामस्थले स्मार्तसङ्केतस्य सर्वेनेश्वरसङ्केतसम्भवेन तद्वत्तस्यापि वाचकतानियामकत्वमेवेति किमर्थं तत्रापि लक्षणात आह । द्वादशे इति । श्रुतित्वेमानाभावादाह । स्मृत्येति । तत्तद्रूपेण विशेषरूपेणेश्वरकृतः सङ्केत इत्यस्यावोधनन । तत्रापि । द्वादशे ऽह्नि क्रियमाणनामस्थले ऽपि । अपिस्तदन्याधुनिकसङ्केतस्य लक्षस्य गङ्गायां घोष इत्यादेश्च समुच्चायकः । तथा चात्र सर्वत्र बोधार्थं तत्त्वेन निवेश आवश्यक इति भावः । ननु नामाख्यातेत्यादौ नामपदेन सुबन्तग्रहणवदत्रापि तथात्वे सर्ववर्णसाधारणसाध्वसाधुसाधारणशब्दग्रहणस्येष्टस्य न लाभो ऽत आह । अत्रेति । उक्तस्मृतिवाक्ये एवेत्यर्थः । आह्वानेति । यत उक्तसङ्केतज्ञानाल्लक्षणबोधक अत आह्वानकरणीभूत इत्यर्थः । तस्मादतिरिक्तोक्तरूपशक्तिरावश्यकेति सिद्धम् ॥ १३ ॥

कौस्तुभयुक्तिखण्डनम् । यत्तु पदपदार्थयोर्बोध्यबोधकभावनियामिका शक्तिरेव सम्बन्ध इति तन्न । शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात् । दीपगतप्रकाशकत्वशक्तावपि सम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात् । तदुक्तं हरिणा ।

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुण इति ।

उपकार इति । उपकार्योपकारकयोरुपकारस्वभा-

वः सम्बन्धो यत्रास्ति तत्र धर्मः शक्तिरूपः कार्यं दृ-
ष्ट्वानुमीयते असौ सम्बन्धः शक्तीनामपि कार्यजनने
उपकारकः गुणानामपि द्रव्याश्रितत्वनियामकः
सम्बन्ध इति तदर्थ इति हेलाराजः । सम्बन्धः पदे
वाक्ये च । तदाह न्यायभाष्यकारः समयज्ञानार्थं चेदं
पदलक्षणाया वाचो ऽन्वाख्यानं व्याकरणं वाक्यल-
क्षणया वाचो ऽर्थलक्षणमिति । अनेन हि पदेष्विव
वाक्येष्वपि ऐश्वरः सङ्केत इति स्पष्टमेवोक्तम् । वा-
क्यविषये समयग्राहकमाकाङ्क्षाद्यपि समयग्रहार्थमि-
त्यस्य साधूनामित्यादिः ॥ १४ ॥

(कुं०टी०) शक्तेःसम्बन्धो बोध्यबोधकनियामको भवति न
तु शक्तिरित्याह । शक्तेरपीति । घटजननशक्तेरसम्बन्धोस्तीत्यत
एव हि दण्डनिष्ठशक्तेर्घटजनकत्वमित्यर्थः । शक्तेस्तु पुनः श-
क्त्यन्तरं नास्त्यनवस्थापत्तेः । उपकार इति । यत्रोपकारस्व-
भावः सम्बन्धो ऽस्ति तत्र शक्त्याख्यो धर्मो ऽनुमीयते अ-
सम्बद्धानामुपकाराभावात् । न च शक्तिरेवसम्बन्धः शक्तीना-
मप्याधारपारतन्त्र्ये कार्यजनने च सम्बन्धस्यैव नियामकत्वात् ।
गुणानामपि च द्रव्याश्रितत्वनियामकः सम्बन्ध एवेति परतन्त्रा-
णामप्युपकारकत्वादित्यर्थः ।

उपकार्यो ऽर्थः । उपकारकः शब्दः । उपकारकतात्र पर-
स्परं द्वयोरपि । कार्यम् । उपकारम् । असौ सम्बन्ध उपका-
रकताख्यः । शक्तीनामपीति । सम्बन्धसत्त्वे एव शक्तेरपि
कार्यजनकत्वादित्यर्थः । अर्थलक्षणम् । अर्थप्रतिपादकं शास्त्र-
म् । अनेनेति । वाक्यलक्षणाया समयग्रहार्थमित्यनेन वाक्ये
ऽपि शक्तिसूचनार्थकत्वोक्तिरयुक्तेति भावः ॥ १४ ॥

(क०टी०) यत्त्वत्र कौस्तुभादावुक्तं घटबोधजननसामर्थ्यमेव घटादिपदानां शक्तिरिति तत्खण्डयति । यत्त्विति । शक्तिरेव सामर्थ्यं विशेषः । एवमग्रे ऽपि । तदभावे तदभावात्तस्यास्तन्नियामकत्वम् । एवेन वाच्यवाचकभावापरपर्यायशक्तिसम्बन्धनिरासः । अपिरुक्तसमुच्चायकः । सम्बन्धस्यैव । तदन्यसम्बन्धस्यैवेत्यर्थः । तत्र मानमाह । दीपेति । सम्बन्धे दीपवस्तुनोरित्यादिः । कत्वं दीपस्येत्यादिः । उपकारस्येति । कार्योत्पादनं स्वभावो यस्येत्यर्थः । शक्तिरूपः । सामर्थ्यरूपः । एवमग्रे ऽपि । कार्यम् । बोधम । शक्तिरित्यस्यार्थमाह । उपकारक इति । गुणानाम् । रूपादीनाम् । गुण इत्यस्यार्थमाह । तदाहेति । इदम् । व्याकरणम् । वाचः सङ्केतज्ञानार्थमन्वाख्याने करणे ल्युट् व्याकरणस्य मध्यमणिन्यायेनान्वयः । वाक्यरूपवाच अर्थलक्षणम् । करणे ल्युट् । अर्थबोधजनकमित्यर्थः । अनेन हीति । उक्तभाष्यग्रन्थेनेत्यर्थः । अस्य सूचितमित्यत्राप्यन्वयः । उक्तमिति । समयस्येत्यस्योभयत्रान्वयादिति भावः । तदभिप्रेत्य वाक्ये विषये न्यूनतां पूरयति । वाक्येति । अपिः व्याकरणसमुच्चायकः । वक्ष्यमाणरीत्या सङ्केतस्यापभ्रंशेष्वपि सत्त्वात्तज्ज्ञानस्य ताभ्यामसम्भवादाह । समयेति ॥ १४ ॥

वाक्यस्फोटे नैयायिकोक्तितिरस्कारः ।

एतेन पदार्थे सम्बन्धग्रहवन्त्यपि पदानि वाक्यार्थे सङ्गतिग्रहानपेक्षाण्येवेति वाक्यस्फोटो नैयायिकासम्मत इति परास्तम् । एतच्चोपरिष्टाद्वक्ष्यामः । पदस्यैवार्थबोधकमवयवार्थद्वारा व्याकरणमिति च सूचितम् । कः शब्दः को ऽर्थ इति प्रश्ने घट इत्ययं शब्दो घट इत्ययमर्थ इत्येकाकारोत्तरदर्शनात्तयोरध्याससिद्धिः । घट इत्याकारं ज्ञानमिति व्यवहाराच्छब्दज्ञानयोरपि सः । इति शब्दस्य शब्दस्वरूपपरता तात्पर्यग्राहकत्वात् । अत एव पदं श्रुतं पदार्थं श्रृणु अर्थं वदतीत्यादिव्यवहारः ।

शब्दार्थयोरितरेतराध्यासादेव वृद्धिरादैच् ओमित्येकाक्षरं ब्रह्मेति शक्तिग्राहकश्रुतिस्मृत्योः सामा-

नाधिकरण्येन प्रयोगः ॥ १५ ॥

(कुं०टी०) एतेनेति । पदार्थसम्बन्धग्रहसापेक्षाण्यपि पदानि न वाक्यानि वाक्यार्थसम्बन्धग्रहसापेक्षाणि आकाङ्क्षादिवशादशक्यस्यैव वाक्यार्थस्य प्रतीतेरित्यर्थः । परास्तमिति । पदद्वयघटिताकाङ्क्षादिभिर्वाक्यार्थबोधे वाक्यस्फोटस्य दुर्वारत्वात् । अवयवार्थद्वारा। प्रकृत्याद्यर्थद्वारा । सूचितमिति । पदलक्षणायाः समयग्राहकमित्यनेन पदस्य वाचकत्वं सूचितमन्वाख्यानत्वोक्त्या च प्रकृत्यादिकल्पना सूचिता । सः । अध्यासः । एतदेवोपपादयति । इति शब्दस्येति । इति शब्देन घटशब्दस्य परामर्शाच्छब्दज्ञानयोरभेद इत्यर्थः । साकारवादिनस्तु पदार्थमात्रस्य ज्ञानरूपतां वदन्ति । तन्मते आकारभेदादेवभेदः । अर्थं शृणु इति । शब्दस्यैव श्रावणत्वादर्थे आरोप एवेति भावः ।

ओमित्येकाक्षरमिति । ननु यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यो ऽध्यमृतात्सम्बभूवेति श्रुतौ यच्छन्दसामृषभ ओङ्कारः छन्दोभ्यः सम्बभूवेति उत्पत्तिश्रवणात्कथं ब्रह्मरूपत्वम् । सत्यम् । स बभूवेत्यस्य प्रत्यभात् इत्यर्थः ॥ १५ ॥
ज्ञानविषयः प्रभूत इत्यर्थः

(क०टी०) एतेन । उक्तभाष्येणेत्यर्थः । पदार्थे । पदार्थेषु । यद्वा वत्यन्पदार्थे । सङ्गतिः । सम्बन्धः । वाक्यवाक्यार्थयोः सम्बन्धरूपशक्तिमत्त्वं विनैव मिथः समभिव्याहारात्ततो वाक्यार्थबोध इति भावः । परास्तमिति । नैयायिकशिरोमणेर्भाष्यकारस्येष्टत्वादिति भावः । ननु तं विनैव निर्वाहस्याचार्यतद्ग्रन्थे कृतत्वात्कि[illegible] सो ऽत आह । एतच्चेति । तत्संमतमावश्यकत्वं च । उपरिष्टात् । शब्दनिरूपणे । ननु व्याकरणेन साक्षाद्वाक्यतदर्थयोरनुक्तत्वात्कथं तदत आह । पदेति । स तु तात्पर्यार्थः । अत एव तत्रान्वाख्यानमिति तत्रार्थलक्षणमिति चोक्तमिति भावः । अवयवेति । प्रकृतिप्रत्ययाद्यवयवार्थबोधेनेत्यर्थः । ननु भवतु सम्बन्धस्तत्र तथापि अध्यासे एव

मानाभावेन कथं तद्ग्रहो ऽत आह । क इति । तयोः । शब्दत-दर्थयोः । प्रसङ्गादाह । घट इति । अपिः शब्दार्थयोः समुच्चायकः । ननु शब्दार्थयोरिवार्थज्ञानयोरेवायं कुतो नात आह । इतीति । अर्थपरसमभिव्याहृतस्येति भावः । घट इत्ययमर्थ इत्यत्र न शब्दपरसमभिव्याहृत इति बोध्यम् । नन्वेवं त्रयाणामध्यासो भाष्योक्तो न सिद्ध इति चेन्न । तदभिन्नेति न्यायेन सिद्धेः । अध्यासं पोषयति । अत एवेति । तयोरध्यासादेवेत्यर्थः । अर्थं शृणु इत्यस्य शब्दपरत्ववारणायाह । पदं श्रुतमिति । अर्थम् । तच्छ्रवणानन्तरम् । एवं लोकतस्तत्पुष्टिं कृत्वा तत्राप्रामाणिकत्वशङ्काया अपि सम्भवात् श्रुत्यादितस्तत्पुष्टिं करोति । शब्दार्थैति । अभ्यर्हितत्वेन श्रुतेः पूर्वनिपातेन तदनुरोधेन कल्प्यमानबोधजनकवाक्ये ओमित्यस्य प्राथम्यमिति यथासंख्योपपत्तिः ॥ १५ ॥

तादात्म्यनिरूपणम् । तदात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः । तत्र भेदस्योद्भूतत्वविवक्षया अस्यार्थस्यायं वाचकः उञः प्रगृह्यम् तस्य वाचकः प्रणव इत्यादौ षष्ठी । अभेदस्य तत्त्वविवक्षया तु प्रथमा यथा उक्तेषु । अत एवार्थे शब्दधर्मत्वव्यवहारः । अत्यन्तभेदे ऽश्वपुरुषयोरिव तद्व्यवहाराभावात् । नाप्यत्यन्ताभेदे सः । घटे स्वधर्मत्वव्यवहाराभावात् ॥ १६ ॥

सम्बन्धशब्दे सम्बन्धो योग्यतां प्रतियोग्यता ।
समयाद्योग्यतासंविन्मातापुत्रादियोगवत् ॥
सति प्रत्ययहेतुत्वं सम्बन्धे उपपद्यते ।
शब्दस्यार्थे यतस्तस्मात्सम्बन्धो ऽस्तीति गम्यते इति ।

अस्यार्थः यथा चक्षुरादीनां रूपादिविषयज्ञानजनने अनादिः पुरुषयत्नानपेक्षा योग्यता तज्जनकतावच्छेदकधर्मवत्त्वरूपा तथा शब्दानामर्थे अनादिः स-

रन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ।
अयं कलाधराधेन पाठः । कुञ्जिकायान्तु

म्बन्ध एव योग्यता तद्बोधजनकतावच्छेदको धर्मः सम्बन्धशब्दे योग्यतां प्रति बोधजनकतावच्छेदकधर्मरूपयोग्यतानिरूपितो यस्तादात्म्यलक्षणः सम्बन्धः स एव योग्यता सा स्वाभाविक्येव। अनादिवृद्धव्यवहारपरम्परापरपर्यायास्मदादिसमयगृहीतोक्तेश्वरसमयान्निर्णीयते। यथा मातापुत्रयोर्जन्यजनकभावसम्बन्धस्य व्यवहारो निश्चायकस्तद्वत्। न तु जनकत्वमेव योग्यता एतज्जनने अयं योग्य इति व्यवहारात्तदाह। सतीति। यतः शब्दस्यार्थे सम्बन्धे सति तत्प्रत्ययहेतुत्वमुपपद्यते तस्मादित्यन्वयः।

अत एवैतदुपक्रमे।

ज्ञानं प्रयोक्तुरर्थस्य स्वरूपं च प्रतीयते।
शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः॥

इत्यादिना शब्दार्थज्ञानानामध्यासस्योपपादनं कृतम्। अत्र तेषामित्यस्यात इत्यादिः। अयं सास्नादिमानर्थो गौरित्यर्थको ऽयं गौरित्येवं लोकानां व्यवहारादुक्तं तादात्म्यं सम्बन्ध इत्यक्षरार्थः। एतेन तयोरभेदे घटादिशब्दैर्मधुधारणाद्यापत्तिः, अग्न्यादिशब्दोच्चारणे मुखदाहाद्यापत्तिः, अर्थे वर्णमालाद्यनुभवापत्तिश्चेति निरस्तम्। भेदाभेदोपपादनात्॥१६॥

(कुं० टी०) ननु शब्दार्थयोस्तादात्म्ये अग्निशब्दोच्चारणे मुखदाहापत्तिरस्यायं वाचक इति व्यवहारानापत्तिश्चेत्यत आह। तादात्म्यं चेति। तयोः। भेदाभेदयोः। तस्य वाचकः प्रणव इति। एतच्च पातञ्जलसूत्रम्। तस्येश्वरस्य प्रणव ओङ्कारो वाचक इत्यर्थः। उक्तेषु। ओमित्येकाक्षरमित्यादिषु। शब्दधर्मत्वेति।

श्रवणादीत्यर्थः ।

सम्बन्धशब्दे इति । अत्र वाच्यत्वं सप्तम्यर्थः । योग्यतां प्रतीत्यत्र लक्षणत्वसम्बन्धे कर्मप्रवचनीयता । तथा च सम्बन्धशब्दवाच्यः सम्बन्धो योग्यतैव । एतच्च योग्यतावशादेव निश्चीयते अयं शब्द एतदर्थयोग्य इति व्यवहारात् । योग्यतैव शब्दार्थयोः सम्बन्ध इत्यर्थः । अत एव च सम्बन्धशब्दो योग्यतालक्षणसम्बन्धयोग्यतयैव प्रतिपादयतीति हेलाराजो व्याख्यत् । नन्वेवं सङ्केतस्य नोपयोग इत्यत आह । समयादिति । वृद्धव्यवहारपरम्परापर्यायात्समयात्स्वाभाविक्येव योग्यता निश्चीयते । न हीयमस्य पुत्रस्य मातेति सामयिकः जन्यजनकभावः, वस्तुसिद्धस्यैव प्रतिपादनात् । सतीति । अर्थे नियते नियतप्रतीतिहेतुत्वं सम्बन्धे सत्येव युज्यते नान्यथेति यतः तस्मादर्थप्रत्यायनात्कार्यादस्तिसम्बधः शब्दार्थयोरित्यवसीयत इत्यर्थः । सम्बन्धबोधके शब्दे अस्य शब्दस्यास्मिन्नर्थे सम्बन्ध इति व्यवहारात् अयमर्थ एतद्योग्यतावानिति व्यवहाराद्योग्यतानिश्चय इत्यर्थ इति भूषणकृतः ।

अस्यार्थ इति । एतन्मते योग्यतां प्रति सम्बन्ध इत्यस्य योग्यतायाः सम्बन्ध इत्यर्थः । तथा च तादात्म्यसम्बन्धे योग्यतायाः यः सम्बन्धः स एव योग्यतेत्यर्थः । योग्यतानिरूपितस्तादात्म्यलक्षणः सम्बन्ध इति त्वपपाठः । तादात्म्यं हि योग्यताया आश्रयो न तु निरूपितम् । अस्मदादीति । वृद्धव्यवहारपरम्परापर्यायो यो ऽस्मदादिसमयस्तेन गृहीतो य ईश्वरसमयस्तेनानुमीयत इत्यर्थः । अत एव । शब्दार्थयोस्तात्म्यादेव । ज्ञानमिति । प्रयोगेणाभिव्यक्तैः शब्दैस्त्रितयमवगम्यते शब्दस्वरूपमर्थः प्रयोक्तुरभिप्रायश्च । न चैतदसति सम्बन्धनियमे

घटत इति वास्तवः सम्बन्धो न सामयिकः । समवस्थित इत्यस्य स्वभावत एव निरूढो न शास्त्रेण निवेशित इत्यर्थः । तत्रार्थशब्दयोः सम्बन्धो वाच्यवाचकभावः, प्रयोक्तृभिप्रायेण तु सह कार्यकारणभावः । तदाहुः वक्तृव्यापारविशेषो बुद्धौ यो ऽर्थः प्रकाशते तत्र शब्दानां नानार्थत्वानिबन्धनमिति । उक्तं तादात्म्यम् । अध्यस्तं तादात्म्यम् । भेदाभेदेति । वस्तुतो भेद एव आरोपितस्त्वभेद इत्यर्थः ॥ १६ ॥

(क०टी०)विशेषं वक्तुमुक्ताध्यासमूलकतादात्म्यत्वरूपं स्वरूपसतस्तस्यातत्त्वमाह । तादात्म्यं चेति । तथा च तादृशस्य भेदविशिष्टाभेदस्य तत्त्वं सिद्धम् । नन्वेवं तेजस्तिमिरयोरिव मिथः तयोर्विरोधो ऽत आह । अभेदेति । नन्वेवं कथं भेदेन व्यवहारो ऽत आह । तत्रेति । तयोर्मध्ये इत्यर्थः । उद्भूतत्वेति । तदभिभवपूर्वकतद्विवक्षयेत्यर्थः । तत्र लोकप्रयोगमाह । अस्यार्थेति । एतच्छास्त्रीयमाह । उत्रः प्रगृह्यमिति । योगसूत्रमाह । तस्येति । अनेन भेदरूपो ऽपि सङ्केतः सूचितः । तत्त्वविवक्षया तु । उद्भूतत्वविवक्षया तु । यथोक्तेषु । ओमित्येकाक्षरं ब्रह्म वृद्धिरादैजित्यादिषु । तत्रान्यदपि मानमाह । अत एवेति । उभयसत्त्वे ऽपि कदाचित्कस्य चित्तत्त्वविवक्षणादेवेत्यर्थः । शब्दधर्मत्वेति । अर्थः शब्दधर्म इति व्यवहार इत्यर्थः । एवमग्रे ऽपि । अत एवेत्यस्यार्थं सूचयन्विपक्षे बाधकमाह । अत्यन्तेति । व्यवहाराभावादिति दृष्टान्ते ऽपि तत्तद्धर्मत्वव्यवहाराभाववदत्रापि तद्व्यवहाराभावापत्तेरित्यर्थः । नन्वध्यासः कर्तुरस्मरणान्निर्मूलो ऽत आह । अयमिति । आदीति । सर्गाद्यकालिकव्यवहारेत्यर्थः । एवं चेश्वर एव मुख्य आदाविति भावः । तत्र मानमाह । एतच्चेति । तस्येश्वरकृतत्वं चेत्यर्थः । स्थित इति । तस्य वाचकः प्रणव इति सूत्रे तस्येश्वरस्य प्रणवो वाचक एवमेवेश्वरेण सङ्केतकरणं तस्य चेश्वरः प्रणवस्य वाच्य इति फलितमित्युक्त्वा किमस्य सङ्केतित्वात् न च स्वाभाविकं वाचकत्वं सङ्केतेन कृतं वाच्यवाचकत्वमपि दीपप्रकाशवदवस्थितमिति प्रश्नोत्तरमिदमुक्तम् । तत्रायं प्रश्नाशयः ईदृशः सङ्केतो

ऽयुक्तः वाचकत्वस्य सङ्केतत्वात् । न च स्वाभाविकं वाचकत्वं सङ्केतेन बोध्यते यत्र तन्नास्ति तत्र सङ्केतेनाव्यङ्ग्यत्वापत्तेः । अविद्यमानघटस्य दीपेनाव्यञ्जनात् । कृतसङ्केतस्तु वारणे करभशब्दस्तत्प्रतिपादको दृष्टः । तस्मात्सङ्केतकृत एव वाच्यवाचकभावः । शक्तिविशेषरूप ईश्वरस्य सङ्केतस्तु अनादिवासनासिद्धस्थितमेव तं प्रकाशयति । यथा विद्यमान एव पितापुत्रयोः सम्बन्धोऽयमस्य पितायमस्य पुत्र इति सङ्केतेनावद्योत्यते इति । यद्यपि पूर्वं शब्दार्थविषये ऽन्योन्याध्यासरूपः सङ्केत उक्तो भाष्यीयत्वेन तथापि राहोः शिर इति वदयमस्य वाचको ऽयमस्य वाच्य इत्यपि सङ्केत इत्येतद्भाष्यात्प्रतीयते । अनेन शब्दार्थयोर्भेदाभेदौ दर्शिताविति भावः । आदिनास्य सङ्ग्रहः । प्रलये ऽपि संस्कारवशात्सर्गोत्तरं पूर्ववत्तच्छक्तियुक्तानामाविर्भावात् वाच्यवाचकशक्त्यपेक्षः सङ्केत ईश्वरेणापि पूर्ववत्तथैव क्रियते इति न कदाचिदीश्वरसङ्केतभेदेनार्थभेदः प्रणवस्य व्यवहाररूपसंप्रतिपत्तिनित्यतया नित्यः शब्दार्थसम्बन्ध इति तान्त्रिकप्रतिज्ञेत्यस्य च सङ्ग्रहः । उक्ते ऽर्थे सम्मत्यन्तरमप्याह । हरिरपीति । अत्राद्यकारिका तज्जनकतैव शक्तिरित्यर्थे साधकत्वेन लिखिता दीक्षितैर्वैयाकरणमनोत्सञ्जने भूषणाकृतापि तथैव व्याख्याता तन्निरासायाह । अस्यार्थ इति । स्वविषयेष्वित्यत्र स्वरूपादिविषयो येषु ज्ञानेषु इति बहुव्रीहिः । जन्यजनकभावः सम्बन्धः जन्यस्याधिकरणत्वेन विवक्षायां सप्तमी । तदभिप्रेत्याह । रूपादीति । वस्तुतो ऽनादित्वाभावादाह । पुरुषेति । एवमग्रे ऽपि । धर्मवत्त्वेति । चक्षुषादिधर्मरूपा अर्थैः सहेति शेषः । तद्बोधेति । अर्थबोधेत्यर्थः । धर्मः । शब्दनिष्ठः । एवेन घोत्तरटत्वादेस्तत्त्वनिरासः । सम्बन्धशब्दे ऽर्शआद्यच् । योग्यतारूपसम्बन्धविशिष्टे योग्यतां प्रतीत्यभितः परित इति द्वितीया षष्ठ्यर्थे स च निरूप्यनिरूपकभावः तदभिप्रेत्याह । बोधेति । समयादित्यस्यार्थमाह । सा चेति । अनादित्वं वृद्धव्यवहारे प्राग्वत् । तत्पर्यायो यो ऽस्मदादिसमयस्तेन गृहीतो ऽपि उक्तः कथितो ऽध्यासादिरूप ईश्वरसमयस्तस्मादित्यर्थः । योग्यता संविदित्यस्यार्थमाह । निश्चीयत इति । अनेन प्रकृतार्थलाभः । एतेन सङ्केतातिरिक्तबोधजनकत्वरूपशक्तिग्रहोपायमाह । सम्बन्धेति । सम्ब-

न्धो विषयः । योग्यतां प्रति योग्यताशब्दं प्रति योग्यता विषय इति समयाद्व्यवहाराद्योग्यतासम्वित् शक्तिग्रहः घटपदमत्र योग्यमेतत्सम्बधीति व्यवहारात् सा ग्राह्येत्यर्थ इति भूषणोक्तमपास्तम् । तद्ध्वनयन्नाह । न त्विति । योग्यता धर्मरूपा सम्बन्धरूपे न हेतुरगृहीतशक्तिकादर्थबोधप्रसङ्गात् । नापि सामान्यतो ज्ञातः प्रमेयत्वादिना तज्ज्ञाने ऽपि बोधापत्तेः । नापि सङ्केतत्वेन तज्ज्ञानं हेतुः । गवादिपदेष्वीश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधेन व्यभिचारात् । न चार्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं हेतुः । ततो ऽपि लाघवेनार्थधीजनकत्वेनैव हेतुतायामस्मत्पक्षसिद्धेरिति भूषणोक्तमपास्तम् । पदानामनात्तसत्त्वादाह । यत इति । प्रत्यासत्तिलभ्यमाह । तत्प्रत्ययेति । अर्थज्ञानेत्यर्थः । शब्दस्येत्यादिः । ननु भूषणोक्त एवैतदर्थः कुतो नेत्यत आह । अत एवेति । तादृशशक्तिरूपसम्बन्धस्य स्वाभाविकस्येश्वरसङ्केतग्राह्यत्वादेवेत्यर्थः । एतदुपक्रमे । एतत्कारिकाभ्यः प्राक् । प्रयोक्तुरिति शेषे षष्ठी श्रोतुरिति शेषः । घट इत्ययं शब्दो घट इत्ययमर्थो घट इति ज्ञानमित्येवं प्रयोगकर्तृसम्बन्ध्युच्चारणविषयघटादिशब्दैः कृत्वा श्रोतुस्त्रितयभिन्नं प्रतीयत इत्यर्थः । स्वरूपशब्दस्वरूपं कृतमिति तस्य तदग्राहकत्वे तु तत्र तदुक्तिरसङ्गता स्यादनुपयोगादिति भावः । यथा श्रुते ऽनन्वयादाह । अत्रेति । हरिपद्ये । तथा च यत इति प्राक् शेषो बोध्यः । अत एव द्वितीया कारिका फलितार्थमाह । अयमिति । तदर्थमाह । सास्नादीति । अयं सास्नादिमानर्थो गौरित्यर्थो यस्य तादृशो यो ऽयं गौरिति व्यवहारस्तस्मादित्यर्थः । समस्तपाठः । उक्तम् । सङ्केतरूपम् । सम्बन्धः तद्ग्राहकत्वात्तत्त्वम् । तयोः । शब्दतदर्थयोः । एतेनेत्यस्यार्थमाह । भेदाभेदोनेति ॥ १६ ॥

बौद्धार्थप्रतिपादनम् । वस्तुतो बौद्ध एवार्थः शक्यः । पदमपि बौद्धं तयोरभेदः, न च बौद्धे दाहादिशक्तिमत्त्वमित्यग्रे निरूपयिष्यामः । अत एव पुरोवर्त्तिडित्थं पश्यतो नामजिज्ञासया को ऽयमित्युत्तरे सन्निहितदेशपिण्ड-

मुद्दिश्य डित्थशब्दविधेयताप्रतीतिः सङ्गच्छते । अस्यायमर्थो ऽस्यार्थस्येदं पदमित्यादौ षष्ठ्यनुपपत्त्या तयोः स्वाभाविकयोगाङ्गीकाराच्च । असम्बद्धानाङ्घटपटादीनामेव व्यवहाराभावात् । अस्यायं वाचक इत्यादिव्यवहारोऽप्येवमेव । अयं वाचक एतत्सम्बन्धीत्यादितदर्थात् ।

स्पष्टश्चेदमस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते योगः शब्दार्थयोरिति हरिकारिकाव्याख्यावसरे हेलाराजीये । समयः सङ्केत इति चाप्तोपदेशवृद्धव्यवहारपर्यायौ । अत एव न्यायभाष्यकृदादयः सामयिकः शब्दादर्थप्रत्यय इति सूत्रे कः पुनरयं समयः अस्य शब्दस्येदमर्थजातमभिधेयमिति अस्येदं नामधेयमित्यादिनियोगरूपः अस्माच्छब्दादयमर्थो बोद्धव्य इत्यादिनियोगश्चेत्याहुः । नियोगश्चाप्तोपदेश एव । सामयिकः शब्दादर्थप्रत्यय इति कणादसूत्रव्याख्यातृभिश्च नकुलदंष्ट्रास्पृष्टा वा काचिदौषधिः सा सर्पविषहन्त्रीत्याप्तोदेशस्यैव समयत्वमुक्तम् । अयमयमिति नियोगो ऽपि समय इति पातञ्जलाः । उक्त ईश्वरसङ्केत एव शक्तिरिति तु न युक्तम् । अयमेतच्छक्यो ऽत्रास्य शक्तिरित्यस्य सङ्केतस्यानापत्तेः । ईदृशसङ्केतस्य लोके दर्शनेन तादृशेश्वरसङ्केतस्याप्यनुमानात् शक्तिप्रकाशक एवेतिभावः ॥ १७ ॥

(कुं०टी०) बौद्ध एवेति । बुद्धिविषयावेवार्थशब्दौ वाच्यवाचकौ न तु वास्तवावित्यर्थः । अत एव । शब्दार्थयोरभेदादेव । भेद-

स्य वास्तविकत्वमुपपादयति। स्वाभाविकेति। योगः। सम्बन्धः। अत एव व्यतिरेकमाह। असम्बद्धानामिति।

योगः शब्दार्थयोरिति। एतदग्रे तत्त्वमप्यतो व्यपदिश्यत इति ग्रन्थः। अस्यार्थस्यायं वाचकः अस्यशब्दस्यायं वाच्य इति षष्ठ्यन्यथानुपपत्त्या अस्त्येव शब्दार्थयोः स्वाभाविकः सम्बन्धः। अत एव शब्दार्थयोस्तत्त्वं गौरयमित्यभेदेन व्यवह्रियत इत्यर्थः। वृद्धव्यवहारादिभिः सङ्केतग्रह इति परमतं निराकर्तुमुपक्रमते। पर्यायाविति। चतुर्णां पर्यायत्वे ऽपि तादृशव्यवहाराच्छक्तिग्रह इत्यर्थः। अर्थजातम्, अर्थ सामान्यं तेन व्यक्तिनिरासः। अज्ञातनामके पूर्वोक्तसङ्केतग्रहासम्भवादाह। अस्येदमिति। अयं चन्द्र इत्युपदेशे व्यवहारेण शक्तिग्रहासम्भवादयमपि नियोग इत्यर्थः। नियोगशब्दस्य विशेषावस्थापने प्रसिद्धत्वादाह। नियोगश्चेति।

ननु घटः शब्दवान् घटो ऽर्थ इति प्रत्ययाभावेन शब्दार्थयोः सम्बन्धाभावादनियमेनार्थप्रत्ययापत्तिरत आह। सामयिक इति। सङ्केताधीन इत्यर्थः। तेन शब्देभ्यो ऽनियमेनार्थप्रतीतिर्न भवतीति भावः। अयमयमितीति। सास्नादिमान् गौरित्याकारक इत्यर्थः। सङ्केतस्यानापत्तेरिति। अस्य पदस्यास्मिन्नर्थे शक्तिरित्याकारक सङ्केतो न स्यादित्यर्थः। यत्तूक्तं कुसुमाञ्जलौ।

गोमयाद्वृश्चिकोत्पत्तिर्मायावत्समयादय इति।

यथा वृश्चिकाद्गोमयाच्च वृश्चिकोत्पत्तिः सर्गादौ केवलादृष्टात्। इदानीं तु ब्राह्मणादब्राह्मणस्योत्पत्तिः। यथा मायावी मायामयं प्रयोज्यं कृत्वा घटमानयेत्यादिप्रयुज्य शक्तिं ग्राहयति तथेश्वरो ऽपि शरीरद्वयं कृत्वा शक्तिं ग्राहयतीति तद्दूषयति।

लोके दर्शनेनेति । भवति चेश्वरस्य तादृशः सङ्केतः लोके तादृशस्यैव सङ्केतस्य दर्शनात् । तस्मात्सङ्केतः शक्तिप्रकाशक एवेति भावः ॥ १७ ॥

(क०टी०) एवमभ्युपेत्य समाहितं वस्तुतो दोषशङ्कैव नेत्याशयेन सिद्धान्तमाह । वस्तुत इति । बौद्धमित्यस्य शक्तमिति शेषः । न चेति । हीत्यर्थः । कुतो नेति शङ्कायामाह । अग्रे इति । शब्दनिरूपणप्रकरणे इत्यर्थः । एतन्मतोपपत्तिरपि तत्रैव स्फुटीभविष्यति । तं दृढयति । अत एवेति । तयोर्भेदादेवेत्यर्थः । तत्राभेदेन प्रश्नोत्तरयोः सङ्गतिर्भेदेनोद्देश्यविधेयभावसङ्गतिः । प्रागुक्तस्वाभाविकत्वं प्रतिपादयन् तत्सत्त्वे मानान्तरं कथयन्प्रतीतिसङ्गतौ हेत्वन्तरमाह । कस्येति । इत्यादौ । व्यवहारे । अत एव तत्र हेतुमाह । समिति । ननु एतद्व्यवहाराद्वाच्यवाचकभावापरपर्यायशक्तिरूपसम्बन्धसिद्धिरेवास्तु इति न तादात्म्यलक्षणस्वाभाविकयोगसिद्धिरतस्तत्रैव गमकान्तरमाह । अस्येति । एवम् । स्वाभाविकयोगसाधनः अस्य पूर्वेणाभिन्नत्वमाशङ्क्याह । अयमिति । हरौ अस्यायमिति व्यवहारद्वयं योग इति तादात्म्यलक्षणः स्वाभाविकस्तयोरस्तीति प्रतीयत इत्यर्थः । ननु इतरशास्त्रे समयसङ्केतयोः पर्यात्वे ऽपि कथं हरि ग्रन्थे समयपदेन व्यवहारग्रहणमत आह । समेति । प्रत्येकं एतावुभावुभयपर्यायावित्यर्थः । तत्र तदीयमेव मानमाह । अत एवेति । पर्यायत्वादेवेत्यर्थः । सूत्रे गौतमसूत्रे । नियोगरूपमित्यादि यत् स समय इत्यनुषङ्गादिनान्वयः । एवं वृद्धव्यवहारस्य तत्त्वमुक्त्वेश्वरव्यवहारस्य तत्त्वमाह । अस्मादिति । नन्वेवमप्युपदेशस्य तत्त्वालाभादाह । नियोग इति । अत एव तत्र सम्वादार्थं वैशेषिकसम्मतिमप्याह । समिति । चोऽप्यर्थे । अयमिति । प्रागुक्तेतरेतराध्यासाकारः । अस्याप्युपदेशत्वादाह । नियोगो ऽपीति । अपिर्भेदघटितोक्तनियोगसमुच्चायकः । उक्त ईश्वरेति । अस्मादित्यादिनोक्त ईश्वरसङ्केत इत्यर्थः । एतेन सिद्धान्तव्यावृत्तिः । शक्तिरिति । मुख्यशक्तिरित्यर्थः । इत्यस्येति । अस्मदादिसम्बन्धिनः सङ्केतस्याभावापत्तेरित्यर्थः । इतः स्पष्टतया तस्याः भेदेन ततः प्रतीतेरिति भावः । ननु निर्मूलत्वादिष्टापत्तिर

त आह। ईदृशेति। भेदघटितेत्यर्थः। एवमग्रेऽपि। तथा च तयोर्भेदः प्रागुक्तः सिद्धः। एतेनाभेदरूपसङ्केतस्य प्रागुक्तस्य तादृशतत्त्ववतः भेदरूपस्यापि तस्य तादृशत्वमित्यपि सूचितम्। तथा च द्विविधतत्सङ्केतस्य प्रागुक्तं भाक्तं सिद्धं तत्त्वमिति भावः॥ १७॥

ईश्वरसङ्केतो न शक्तिरित्यत्र वाचस्पत्यसम्वादः। अत एव न्यायवाचस्पत्ये उक्तं सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षात् कृतः सङ्केतः तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्सङ्केत इति। तथा योगवाचस्पत्ये उक्तं सर्वे च शब्दाः सर्वार्थाभिधानसमर्था इति सर्वैरथैः सर्वेषां शब्दानां सम्बन्धः ईश्वरसङ्केतस्तु प्रकाशकः। अत एव नित्यः शब्दार्थसम्बन्ध इति तान्त्रिका इति। सर्वैरथैः सर्वशब्दानां सम्बन्धश्च योगिज्ञानगम्य एव तेषां योगबलेनोभयरूपपराप्रत्यक्षात्। युक्तं चैतत् एकस्यैव स्फोटस्य शब्दब्रह्मरूपस्य सर्वशब्दतदर्थोभयोपादानत्वेनोभयरूपतया उभयोरपि तत्कार्ययोरुभयरूपत्वात्।

क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणम्।
प्रकृतेर्बिन्दुरूपिण्याः शब्दब्रह्माभवत्परेत्युक्तेः॥

नित्यत्वं तु यावत्सृष्टिस्थित्या व्यवहारनित्यतया च बोध्यम्। श्रुतिश्च।

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम्। तामन्ये विदुरन्यामिव च नानारूपामात्मनि सन्निविष्टामिति।

अभिष्यन्दमानाम्। तत्तद्रूपेणाभिव्यक्ताम्। अन्यामिव। भेदवतीमिव। आत्मनि, चित्ते।

प्राणायामान्तरे देवी वाग्वै नित्यं स्म तिष्ठति ।
स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा ॥
वैखरीवाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धनी ।
केवलं बुध्युपादानक्रमरूपानुपातिनी ॥
प्राणवृत्तिमनुक्रम्य मध्यमावाक् प्रवर्तते ।
अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा ॥
स्वरूपज्योतिरेवान्तः परावागनपायिनीति भारतं च ।

एते श्रुतिभारते हरिग्रन्थे स्पष्टे । हरिवंशे ऽपि अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय इति । योग्यतालक्षणः सम्बन्ध इत्यादेः कैयटस्य कारणतावच्छेदकधर्मरूपः सम्बन्ध इत्यर्थः । तत्त्वमस्यादिवाक्यस्याखण्डार्थेन शुद्धेनापि ब्रह्मणाध्यासिकतादात्म्यम् ॥ १८ ॥

(कुं०टी०) अत एव । सङ्केतस्य शक्तिग्राहकत्वादेव । महर्षीति । महर्ष्यादिभ्य ईश्वरेण साक्षात् सङ्केतः प्रकाशित इत्यर्थः । तत्सङ्केतः । ईश्वरसङ्केतः । ननु विद्यमानस्यैव शब्दार्थसम्बन्धस्य सङ्केतेन प्रकाशे यस्य शब्दस्य यस्मिन्नर्थे सम्बन्धो नास्ति तस्य सङ्केतो न स्यादत आह । सर्वे च शब्दा इति । इति सर्वैरर्थैरिति । इति हेतोः सर्वैरर्थैः सम्बन्ध इत्यर्थः । नित्य इति । ईश्वरकृतत्वे तु जन्यत्वेनानित्यत्वापत्तिरिति भावः । तन्त्र्यन्ते व्युत्पाद्यन्ते ऽनेनेति तन्त्रम् । उभयरूपपरेति । शब्दमात्रस्यार्थमात्रस्य च ब्रह्मोपादानकत्वेन ततो भेदाभावात् । उभयोः । शब्दशब्दार्थयोः । क्रियाशक्तिप्रधानायाः परिणतिक्रियोन्मुखायाः प्रकृतेः सकाशादित्यर्थः । तदुक्तं काशीखण्डे क्रियाशक्तिरिदं विश्वमस्य त्वं कारणं तत इति । विन्दुरूपिण्या इति ।

चिदचिन्मिश्राया इत्यर्थः । अयम्भावः । मायानुपहितं ब्रह्म निर्गुणं मायोपहितं सगुणं तच्च ब्रह्म जगदुपादानमिति मते तदेव बिन्दुशब्दवाच्यम्, प्रकृतेरुपादानत्वे तु सैव बिन्दुः । स च बिन्दुः कारणरूपः सूक्ष्मः कार्यरूपस्तु त्रिविधः बिन्दुर्बीजं नादश्च । बिन्दुः ब्रह्मरूपः शक्तिर्बीजं तयोः क्षोभ्यक्षोभकभावरूयः सम्बन्धो नाद इति । शब्दब्रह्मेति । शब्दार्थयोरभेदात् सकलार्थस्वरूपिणो ब्रह्मणः शब्दरूपत्वमित्यर्थः । ब्रह्मात्मकशब्देन जगतो व्याप्तत्वाच्च शब्दब्रह्म जगदुपादानम् । बिन्दुश्च स्पष्टव्यञ्जनात् । नन्वेवं स्फोटस्य जन्यत्वेनानित्यत्वापत्तिरत आह । नित्यत्वाच्चेति । अर्थेनेति । अर्थेन सह न प्रविभक्तमत्यन्तं भिन्नं तत्त्वं शब्दरूपत्वं यस्या इत्यर्थः । एकामिति । स्फोटरूपायास्तस्या एकत्वात् ।

प्राणापानेति । सर्वेषां प्राणापानान्तरे वाग्रूपा देवी तिष्ठति । तस्या एव वैखर्यादयो ऽवस्थाभेदाः । स्थानेषु, ताल्वादिषु । विवृते, विवर्तरूपतां प्राप्ते । प्राणवृत्तीति । प्राणवायुव्यापारेण वर्णाभिव्यक्तेः । तदुक्तं स्मृत्यन्तरे प्राणेनाप्यायिता सेयं व्यवहारानिबन्धनीति । तथा च श्रोत्रविषयत्वेन प्रतिनियतं परैः संज्ञेयं श्रुतिरूपं यस्याः सा वैखरी । मध्यमा तु बुद्धिमात्रोपादना परिगृहीतक्रमेव प्राणवृत्त्यनुगता । पश्यन्ती तु प्रतिलीनाकारा समाविष्टक्रमशक्तिः । बुद्ध्युपादानेति ।

ननु नित्यः शब्दार्थसम्बन्ध इति वार्तिकव्याख्यावसरे अर्थस्यानित्यत्वात्तत्सम्बन्धस्य नित्यत्वासम्भव इत्याशङ्क्य योग्यतालक्षणः सम्बन्ध इति कैयटासङ्गतिरर्थस्यानित्यत्वे तादात्म्यलक्षणयोग्यताया अपि नित्यत्वासम्भवादत आह । कैयटस्येति । शब्दस्य नित्यतया तन्निष्ठकारणतावच्छेदक-

स्यापि नित्यत्वमितिभावः । ननु सदेव सौम्येदमग्र आसी-दित्युपक्रम्य विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यावगमात् पदार्थसंसर्गरूपवाक्यार्थविषयत्वं तत्र कथमत आह । तत्त्वमस्यादीति । अखण्डार्थेनेति । तत्पदत्वं पदवाच्ययोः परोक्षत्वापरोक्षत्वविशिष्टयोः सामानाधिकरण्यासम्भवाद्विशेषणांशपरित्यागेन विशेष्यमात्रबोधादितिभावः । अत्र वेदान्तिनः । क्रियाकारकभावं पुरस्कृत्य शब्दानां प्रवृत्तिर्जायमाना धर्मधर्मिभावं पुरस्कृत्यैव वाच्या स च धर्मधर्मिभावो न ब्रह्मगोचरो, ब्रह्मणो धर्मशून्यत्वात् । अतः पदपदार्थविभागमन्तरणैव तत्त्वमसीत्यादिवाक्यमखण्डमेवाखण्डब्रह्मवाचकमिति वदन्ति । वाक्यतात्पर्यविषयीभूतत्वं वाक्यार्थत्वम् । तथा चाखण्डब्रह्मणः प्रतीयमानस्य वाक्यशक्यत्त्वाद्वाक्यवाक्यार्थयोरभेद इति भावः । अत्रेदं बोध्यम् । प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकं च । वैशिष्ट्याद्यवगाहि घटं जानामीत्यादि सविकल्पकम् । संसर्गानवगाहि तत्त्वमस्यादिवाक्यजन्यं निर्विकल्पकम् । सो ऽयं देवदत्त इत्यादिवद्विषयावच्छिन्नचैतन्यस्य चाभेदात्प्रत्यक्षत्वम् । शुद्धेनापीति । यथा तत्ताविषयकज्ञानाजनकस्यापीन्द्रियस्य वा सहकारेण तत्ताविषकज्ञानजनकत्वमेवं सखण्डप्रतिपादकस्यापि वाक्यस्याखण्डार्थप्रतिपादकत्वमपीति भावः ॥ १८ ॥

(क०टी०) तदनुमाने मानमाह।अत एवेति। तेन तदनुमानाङ्गीकारादेवेत्यर्थः। तद्धेवेति। महर्ष्यादिव्यवहारपारम्पर्यात्त्वित्यर्थः। तत्सङ्केत इति। ईश्वरसङ्केत इत्यर्थः। ईश्वरसङ्केतप्रकाश्यस्वाभाविकसम्बन्धसत्त्वे मानान्तरमपि सूचयन्नत्र मानान्तरमप्याह। तथेति। योगवाचस्पत्यवदित्यर्थः। उक्तपातञ्जलभाष्यव्याख्यानमेवेदम्। सम्बन्धः। भाविकः। अत एव। तस्य प्रकाशत्वादेव। तान्त्रिकाः। वैयाकरणः।

नन्विदमस्मदादीनां दुर्ज्ञेयं विशिष्य सकलार्थज्ञानाभावात् अत आह।सर्वैरिति। ज्ञानगम्य एव। ज्ञानविषय एव। तेषाम्। योगिनाम्। उभयेति। शब्दतदर्थोभयेत्यर्थः। परा। शब्दब्रह्म। ननु परा वाक् सा च शब्दरूपा नोभयरूपेति कथं तत्प्रत्यक्षेण तत्सम्बन्धज्ञानमत-स्तत्समर्थयते। युक्तं चैतदिति। कुतस्तत्राह। एकेति। तत्कार्य-योः। शब्दब्रह्मकार्ययोः। उभयेति। प्रत्येकमुभयरूपत्वादित्यर्थः। ननु तदुपादानत्वे एव किं मानमत आह। क्रियेति। सर्गोत्पादनरूपाक्रि-यासामर्थ्यं प्रधानं यस्या इत्यर्थः। तदर्थमेव हि सा। अन्यथा तदान-र्थक्यमेव। ईदृशी या प्रकृतिः परमेश्वरसिसृक्षात्मकमायावृत्तिता जाता बिन्दुरूपिणी अव्यक्तरूपा त्रिगुणा अस्या बीजनादबिन्दुरूपा-त्रयवत्वे ऽपि चिदंशाख्याबिन्दुस्वरूपा ततः शब्दशब्दार्थकारणं सर्वसृष्ट्युपयोग्यावस्थाविशेषरूपं चेतरभिन्नं शब्दब्रह्मापरपर्यायप-रानामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं नादमात्रमुत्पन्नमित्य-र्थः। नन्वेवं कथं नित्यत्वमत आह। नित्यत्वमिति। अर्थेनेति। अर्थेन सहाप्रविभक्तं तत्त्वं स्वरूपं यस्याः सा। एतेन परारूपत्वमुक्तम्। ता-मेकां अन्ये नानारूपां विदुरित्यर्थः। तत्तद्रूपेण। विशिष्य शब्दार्थो-भयरूपेण। सा। वाक्। चतुर्विधा। परा पश्यन्ती मध्यमा वैखरी। तत्रादौ वैखरीस्वरूपमाह। प्राणेति सार्द्धेन। प्राणश्चापानश्च तयोर-न्तरं समानश्च तेषु सदास्थितवती ततः स्थानेषु कण्ठादिषु वायौ विवृते पृथक्त्वे सति स्वीकृता वर्णपरिग्रहा प्रयोक्तॄणां या प्रा-णवृत्तिः सा निबन्धनं कारणं यस्याः सा वैखरी वाक् इत्यर्थः। मध्यमामाह। केवलमिति। तत्तदर्थतत्तच्छब्दविशेषोल्लेखिनी बुद्धिः उपादानं शब्दब्रह्म तयोर्यः क्रमस्तद्रूपमनुपश्चात्पतति स्वी-करोति सा प्राणस्य वृत्तिवर्त्तनमनुक्रम्य मध्यमावाक् हृद-यदेशे तिष्ठतीत्यर्थः। पश्यन्तीमाह। अविभेति। यतः सर्वस्यावक्रम उक्तरूपस्संहृतो यया अत एवाविभागात् का-र्यकारणयोर्विभागरहिता पश्यन्तीत्युच्यते। परामाह। स्वरूपेति। अन्तः मूलाधारे ज्योतिःस्वरूपा अनपायिनी उक्तरीत्या सा परा-वागित्यर्थः। नन्वनयोः श्रुतिभारतयोस्तत्र तत्र नोपलभ्भो ऽत आह। एते चेति। वर्णसंशय इत्यनेन पराख्यः शब्दब्रह्मरूपः स्फोट उक्तः। उक्तहरीग्रन्थार्थे कैयटविरोधं परिहरति। योग्यतेति। ननु श-

ब्दार्थयोस्तादात्म्यस्य तादृशस्याङ्गीकारे तत्त्वमसीत्यादावर्थज्ञाना-भावात्तदग्रहे कथमस्मदादीनां बोधो ऽत आह । तत्त्वमिति । अस्यो-भयत्रान्वयः ॥ १८ ॥

तादात्म्यग्रहोपायः । तद्ग्रहश्च नेह नानास्तीत्यादिनिषेधवाक्य-मनने सति शमदमादिसम्पन्नस्यातिशुद्धचित्तस्यैवेति न दोषः । यद्वा शब्दाद्विशिष्टबोध एव, अखण्डार्थस्तु मानसबोधविषय एव । यद्वा निषेधवाक्यसहकारेण धर्मोपलक्षिते शक्तिग्रहात् तदुपलक्षिताखण्डार्थस्यैव बोध इत्यादिद्रष्टव्यम् ।

तादात्म्यमूलकस्य सम्बन्धत्वे अर्थभेदात्तत्तादा-त्म्यापन्नशब्देषु भेदौचित्येनार्थभेदाच्छब्दभेद इत्युपप-द्यते । समानाकारत्वमात्रेण तु एको ऽयं शब्दो नानार्थ इति व्यवहारः । तस्य निरूपकाश्रयभेदाभ्यां भेद इत्येके ॥ १९ ॥

(कुं० टि०) ननु तत्त्वमसीत्यादिवाक्यश्रवणे ऽस्मदादी-नामप्यखण्डब्रह्मबोधापत्तिरत आह । तद्ग्रहश्चेति । वाक्य-मननं, वाक्यार्थमननम् । तच्च साधकबाधकप्रमाणोपन्यासरूपयु-क्तिभिरनुचिन्तनम् । शमो ऽन्तरिन्द्रियनिग्रहः । दमो बहिरिन्द्रि-यनिग्रहः । सम्पन्नस्येति ।

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणो गतिः ।
तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिः ॥

इति वचनेन कर्मसहितस्यैव तत्त्वज्ञानस्य मोक्षहेतुत्वात् । ननु वाक्यजन्यज्ञानस्य कथं संसर्गानवगाहित्वमितिचेत् । सत्यम् । तात्पर्यविषयत्वमेव वाक्यजन्यज्ञाने तन्त्रम् । अस्ति चात्रापि वि-शुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमिदमेवाखण्डार्थत्वम् । ननु

ब्रह्मणो महावाक्यार्थज्ञानाविषयत्वे अदृष्टो द्रष्टा अश्रुतः श्रोतेति श्रुतिविरोध इति चेन्न। अविद्यया आवृतस्यैव स्वरूपस्य आवरणनिरासाय महावाक्यजन्यज्ञानविषयत्वात्। निरुपाधिकस्य तु आवरणाभावान्नास्ति श्रुतिजन्यज्ञानेन सम्बन्धः। ननु व्यवहारमार्गे वेदान्तिभिरपि पदार्थकल्पनावश्यमङ्गीकार्या। अन्यथा वाक्यार्थस्यापूर्वत्वेन वाक्यार्थे वाक्यसङ्केतग्रहाभावाद्बोध एव न स्यात्। तस्मादखण्डयोर्वाच्यवाचकभावो न सम्भवतीत्यस्वरसादाह। यद्वेति। अखण्डार्थत्वं, संसर्गानवगाहि यथार्थज्ञानजनकत्वम्। तत्त्वमसीत्यादिवाक्यमेव ब्रह्मप्रत्यक्षं जनयतीत्यद्वैतसिद्धान्तविरोधमाशङ्क्याह। यद्वेति।

अर्थभेदाच्छब्दभेद इति। नन्वेवं वेदे पठितस्य शब्दस्य विनियोगकाले ऽर्थान्तरे प्रयोगाच्छब्दभेदापत्तिरिति चेदत्रोक्तं हरिणा।

मन्त्रास्त्वविनियोगेन लभन्ते भेदमूहवत्।
तान्याम्नायान्तराण्येव पठ्यन्ते कश्चिदेव तु॥

इति मन्त्राणां सर्वेषां वेदत्वमेव। वेदे तु कश्चिदेव मन्त्रः पठ्यत इति तदर्थः। नन्वस्मिन्पक्षे एकः शब्दो नानार्थः अज्ञाः पादा माषा इति भाष्यं कथमुपपद्यतामत आह। समानाकारत्वेति। वस्तुतो ऽर्थभेदाच्छब्दभेद इत्ययुक्तम्। कुटीभार्य इत्यत्र समानायामाकृतौ भाषितपुंस्कत्वाभावान्न पुम्वदिति भाष्यासङ्गतेः सामर्थ्यादिना ऐक्योपपादने बीजाभावात् इति चेत्सत्यम्। विपर्येण तु नानालिङ्गकरणादित्यादिना भाष्यकृतैव शब्दैक्यं दर्शितम्। आन्यभाव्यं तु कालशब्दव्यवायादित्यादिना च शब्दभेदो दर्शितः। तस्य, तादात्म्यस्य। ततश्च शब्दभेदः तादात्म्यभेदश्चेति प्रथमः पक्षः। शक्तिनिरूपकः अर्थः शक्त्याश्रयः

शब्दः तदुभयभेदाद्भेद इत्यर्थः । यतूक्तं कुसुमाञ्जलौ शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रम इति । अस्यार्थः शक्तिभेदो न चो हेतौ अभिन्नो यतः शक्तिशक्तिमतोरभेदात् । ननु स्वभावादेवैकस्य नानाकार्यकारित्वं तत्रोक्तं स्वभावो दुरतिक्रम इति । कार्यजननस्वभावस्यानुवर्तमानत्वादेककारणेन कार्यान्तरस्याप्यापत्तिरिति तन्मते एकस्य दण्डस्य घटहिंसाद्यनेककार्यजनकत्वं न स्यात् । किञ्च सो ऽयमित्यत्र प्रत्यभिज्ञायां यदि सादृश्यमेव बीजं स्यात् तदा सो ऽयं ककार इत्यत्रापि तथात्वापत्तौ ककारादीनामप्यैक्यापत्तिरिति ॥ १९ ॥

(कु०टी०) तद्ग्रहश्चेति । तादात्म्यग्रहश्चेत्यर्थः । तथा च तस्यैव बोधो नास्माकमिति न शङ्कोक्तदोषस्तदाह । न दोष इति । उक्तापिसूचितं सर्वसाधारणं पक्षान्तरमाह । यद्वेति । विशिष्टे शक्त्यग्रहेण ततो ऽपि लाघवादाह । यद्वेति । तादात्म्यमूलकस्य वाच्यवाचकभावस्य न तु परोक्तस्य । नन्वेवमेकस्य नानार्थत्वधीः कथमत आह । समेति । तस्य । तादात्म्यस्य । क्वचित्तथैव पाठः ॥ १९ ॥

तादात्म्यभेदपक्षः । अन्ये त्वेकत्रैवाम्रफले रूपरसगन्धादीनां भिन्नानां तादात्म्यवत् एकत्रैव शब्दे ऽनेकार्थनिरूपितानि भिन्नानि तादात्म्यानीत्याहुः । परे तु निरूपकभेदे ऽपि तादात्म्यमेकमेवेति शक्त्यैक्यमेवेत्याहुः । हलोऽनन्तरा इति सूत्रे सरूपसूत्रे च भाष्ये सूचितमिदं पक्षत्रयम् । सर्वजातीयैः सङ्केतैरस्य सम्बन्धत्वेनैव ज्ञानं तदेव च बोधसाधनमिति बोध्यम् । न च तयोस्तादात्म्यस्वीकारे समव्याप्ततया शब्दादनुमानमेव स्यादर्थस्येति प्रमाणान्तरत्वभङ्गः । पक्षधर्मताज्ञानाद्यनपेक्षतया तस्य प्रमाणान्तरत्वात् । सिद्धिसत्त्वे इच्छां विनापि बोधदर्शनाच्च ॥ २० ॥

(कुं० टी०) भिन्नानि तादात्म्यानीति। अर्थभेदेऽपि न शब्दभेदः। अनन्तव्यक्तिकल्पनापत्तेस्तस्मादेकवृन्तगतानेकफलवदेकस्मिन् शब्दे नानार्थसम्बन्ध इति भावः। अस्मिन्पक्षे तद्यः सारण्यके ससीमके ग्रामशब्दो वर्तते तमभिप्रेत्योच्यते अनन्तराविमौ ग्रामाविति भाष्यं व्यक्तिभेदमारोप्य। अत्र शब्दैक्यमते पक्षद्वयं शक्यतावच्छेदकभेदेऽपि शक्तिरेकैव शक्यतावच्छेदकभेदाच्छक्तिरपि भिन्नैवेति। शक्यतावच्छेदकं च शक्यतावच्छेदकतापर्याप्त्यधिकरणं नातः सूर्याचन्द्रमसोर्भेदात्पुष्पवन्तपदे नानार्थता। आद्यपक्षे यथा वायौ रूपसमवायसत्त्वेऽपि रूपनिरूपितत्वविशिष्टसमवायो नास्तीति रूपवत्ता बुद्धिर्न भवति एवं तदर्थनिरूपितत्वविशिष्टशक्तिस्मरणाभावादेकार्थबोधकालेऽपरार्थबोधः। शक्तिभेदाच्च नानार्थत्वव्यवहारः सर्वार्थनिरूपितवृत्तीनां वर्तत इत्येकशब्दोपात्तत्वादेकत्वं न्याय्यमित्याहुः। किञ्च शक्तिभेदे गौरवमित्यपि बोध्यम्। सर्वजातीयैरिति। ईश्वरकृतानामस्मदादिकृतानां च सङ्केतानां नानाविधसङ्केतानां च सङ्केतत्वेनैव सम्बन्धतेत्यर्थः।

०० समव्याप्ततयेति। सहचरिततयेत्यर्थः। आनयपदं घटसम्बद्धानयनपदार्थबोधकं घटपदसम्बद्धत्वादित्येवं व्याप्येन शब्देन व्यापकस्यानुमानादिति भावः। अत एवोक्तं गौतमेन प्रदाहपाटनानुपपत्तेश्च सम्बन्धाभाव इति। अग्निशब्दोच्चारणे मुखदाहापत्तेर्न शब्दार्थयोर्व्याप्यव्यापकभाव इति तदर्थः। तार्किकमते तु शब्दस्याकाशनिष्ठतया व्यधिकरणत्वान्न तेनानुमानमिति भावः। पक्षेति। पक्षः सन्दिग्धसाध्यवान्। पक्षधर्मताज्ञानं, हेतोः पक्षवृत्तित्वज्ञानम्। अर्थव्याप्यशब्दवदिदमिति परामर्शं विनापि शाब्दबोधान्न तस्यानुमितित्वमिति भावः।

नन्वियमनुमितिर्व्याप्तिज्ञानाद्यनपेक्षा विलक्षणैव । अन्यथा भिन्नविषयकप्रत्यक्षं प्रति शाब्दसामग्र्या अनुमितिसामग्र्याश्च प्रतिबन्धकताद्वयकल्पने गौरवमत आह । सिद्धिसत्त्वे इति । पर्वते वह्निनिश्चयोत्तरं पर्वते वह्न्यनुमितिर्जायतामितीच्छयैवानुमितिर्भवति शाब्दबोधस्तु निश्चयसत्त्वे ऽपीच्छां विनैव भवतीति वैषम्यमिति भावः । यद्यपि शब्दार्थयोस्तादात्म्याभावे ऽपि घटमानयेत्यादिपदान्यर्थविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वादित्यनुमाने वैयधिकरण्याभावादनुमितिः सम्भवति, तथापि शब्दार्थयोस्तादात्म्ये व्याप्यव्यापकभावस्य झटित्युपस्थितिरित्यतः तत्पक्षे निराकरणमिदम् ॥ २० ॥

(क० टी०) आश्रयाभेदे ऽपि निरूपकभेदादेव भेद इत्यर्थभेदे ऽपि शब्दैक्यमिति पक्षमाह । अन्ये त्विति । आदिना स्पर्शसंख्यादः । तादात्म्यवत् । तादात्म्यानीवेत्यर्थः । अन्वर्थकतादात्म्यमादाय सर्वघत्ताबुद्धिप्रसङ्ग इति भावः । पक्षद्वयादपि लाघवादाह । परेत्विति । अपिराश्रयभेदसमुच्चायकः । एकमेवेति । स्वतो भेदस्तु न गौरवात् । तत्तन्निरूपितत्वविशिष्टतादात्म्यसम्बन्धेन तद्वत्ताधिरहान्नोक्तापत्तिरिति भावः । अत्र मानमाह । हलो ऽनन्तेति । तत्र हि सर्वत्रातज्जातीयकं व्यवधायकं भवति कथमनन्तराविमौ ग्रामाविति ग्रामशब्दो ऽयं बह्वर्थ अस्त्येव शालासमुदाये वर्तते इत्याद्युक्त्वा तद्यः सारण्यक इत्याद्युक्तम् । केचिदर्थभेदेन शब्दभेदमिच्छन्ति । प्रत्यभिज्ञानं तु सामान्यनिबन्धनम् । अन्ये त्वेकशब्दत्वम् । तत्र चानेकशक्तियोगः एकशक्तित्वं वेति मतविकल्पः । तत्र यदा एकशब्दत्वपक्षस्तदा तद्यः सारण्यक इति भाष्यं शक्तिभेदादुपचरितभेदाश्रयम् । भेदपक्षे तु ग्रामशब्दो ऽयं बह्वर्थ इति भाष्यमभिन्नसामान्यनिमित्तैकत्वाध्यवसायाश्रयमिति कैयटेनोक्तम् । ग्रामशब्दो ऽयमित्यस्य तद्यः सारण्यक इत्यस्याविरोधायाह । केचिदिति । अन्यायश्चानेकार्थ-

त्वमिति तद्भावः। सामान्यं च ग्रामशब्दत्वादि। अन्ये त्विति। व्यक्तिभेदकल्पनायां गौरवमिति तद्भावः। तत्र चेति। निरूपकभेदाच्छक्तिभेद इति भावः। एकेति। समवायैकत्वनये रसो रूपवानित्यादिप्रयोगवदन्यार्थबोधकाले ऽन्यार्थबोधो वारणीयः। तदर्थसम्बन्धेन शक्त्यग्रहादतत्तदर्थविशिष्टशक्तिभेदेन च नानार्थत्वव्यहार इति भावः। तत्र यदेति। एकशक्तित्वपक्षे त्वर्थभेदादपचरितभेदाश्रयमिति बोध्यम्। ग्रामशब्दो ऽयं बह्वर्थ इति तु मुख्यार्थमेव। अत्र सर्वार्थनिरूपितवृत्तीनां वर्तत इत्येकशब्दबोध्यत्वेनाभेदबोधनादेकशक्तित्वपक्षो भाष्यबोधितः। तत्र वर्तनक्रिया अस्तिक्रियायाः कर्त्रीत्युद्द्योते उक्तम्। एव सरूपसूत्रे ऽपि बोध्यम। ननु तादात्म्यमूलकशक्तिज्ञानत्वेनैतज्ज्ञानं न बोधजनकमत आह। सर्वेति। भेदघटितसङ्केतैरध्यासङ्केतैश्चेत्यर्थः। अस्य। तादात्म्यमूलकसम्बन्धस्य। एतेनोक्तव्यावृत्तिः। एवमग्रे ऽपि। तदेवेति। तत्त्वेन ज्ञानमेवेत्यर्थः। अनुपपत्तिग्रहस्य तदभावे एव सत्त्वमिति भावः। वैशेषिकरीत्या शङ्कते। न चेति। तयोः शब्दतदर्थयोः। अनुमानमेवेति। इत्थं तत्प्रयोगः घटमानयेत्यादिपदानि तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बकत्वात् घटमानयेत्यादिपदकदम्बवदिति। तथाचानेन संसर्गज्ञानसिद्धौ ज्ञानावच्छेदकतया पदार्थसंसर्गसिद्धिः सम्भवतीति शब्दो न पृथक्प्रमाणमिति भावः। तदाह। प्रमाणन्तेति। नैयायिकरीत्योत्तरयाति। पक्षेति। आदिना व्याप्त्यादिप्रतिसन्धानपरिग्रहः। तथा च तदभावदशायामपि शाब्दबोधस्यानुभविकतया तदानीमनुमितिसामग्र्यभावेन तत्तदसम्भवाच्छब्दस्य प्रमाणान्तरत्वमावश्यकम्। तदाह। तस्येति। शब्दस्येत्यर्थः। ननु शब्दस्य प्रमाणान्तरत्वे सर्वत्र शाब्दबोधजनकसामग्र्यन्तरकल्पने गौरवमिति सर्वत्र शाब्दबोधस्य व्याप्त्यादिप्रतिसन्धानकल्पनमेव सम्यक्। तथा सति क्लृप्तसामग्र्यैवोपपत्तौ सामग्र्यन्तराकल्पनेन लाघवादत आह। सिद्धीति॥ २०॥

प्रत्यक्षसमाग्री न शाब्दबोधप्रतिबन्धिका। किञ्च पदमात्रात्पदार्थप्रत्ययस्य जायमानस्यानुमितित्वासम्भवः। परेभ्यः स्मृतिरे-

वेति तु न युक्तं तत्तानुल्लेखात् वाक्यादापितदापत्ते-श्च । किञ्च शाब्दयामीत्यनुव्यवसायान्न स्मृतित्व-मनुमितित्वं वा तज्जन्यप्रत्ययस्य । किञ्च तथानुव्य-वसायप्रयोजिकायाः शाब्दत्वजातेस्तदवच्छिन्ने आ-काङ्क्षादिज्ञानहेतुत्वस्य च कल्पनावश्यकत्वे तद्वत्य-नुमितित्वस्य व्याप्तिस्मृतित्वस्य च कल्पनागौरवम् । किञ्च सिद्धिसत्त्वे ऽपि शाब्दबोधोदयेनानुमितेश्चा-नुदयेन सिद्धिप्रतिबध्यतावच्छेदककोटौ शाब्दाति-रिक्तत्वविशेषणेन गौरवम् । न च तत्प्रत्यक्षादिज्ञान-नाशादेव तत्रानुमितिः अनुभवविरोधात् । सर्वत्र तथापत्तेश्चेति दिक् ॥ २१ ॥

(कुं० टी०) ननु सिद्धिसत्त्वे ऽनुमितिरिव शाब्दबोधो ऽपि न भवति समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वेन तदन-न्तरं शाब्दबोधस्यानुपयोगादत आह । किञ्चेति । ननु पदश्रवणा-नन्तरं पदार्थस्मरणे एते पदार्थाः परस्परं संसर्गवन्तः आका-ङ्क्षादिमत्पदस्मारितत्वादित्यनुमानमस्त्वित्यस्वरसादाह । पदमा-त्रादिति । व्याप्तिस्मरणादिकं विनापीति भावः । शाब्दबोधे पदार्थस्मरणं व्यापारः तथा च पदार्थानां स्मृतिरेव नातिरि-क्तप्रमितित्वमिति तार्किकमतं निराकरोति । स्मृतिरेवेति । एक-सम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकत्वात् । ननु पदेभ्यो ऽर्थे स्मृते ततो ऽनुमितिः कस्मादित्यत आह । न युक्तमिति । कि-ञ्चैतन्मते पदार्थस्मरणमेव शाब्दबोधहेतुः तथा चावान्तरवा-क्यार्थबोधकाले तस्य नष्टत्वात्ततो महावाक्यार्थबोधो न स्यात् तस्मात्पदप्रयोज्या उपस्थितिरेव हेतुः सा चावान्तरवाक्यार्थ-बोधरूपैवेत्यदोषः । तत्तानुल्लेखादिति । तत्तां बुध्या विषयीकृत्यै-

व स्मरणोऽस्यादिति भावः । वाक्यादपीति । तथा च वाक्यादपि स्मरणस्यैवापत्तौ अनुमितिशाब्दबोधयोरुच्छेद इत्यर्थः । न चापूर्ववाक्यार्थस्थले पूर्वमनुभवाभावात्स्मरणासम्भव इति वाच्यम् । खण्डशः प्रसिद्धानां पदार्थानां संसर्गाणां च स्मरणसम्भवात् ।

तथानुव्यवसायेति । तादृशानुव्यवसायात् शाब्दत्वजातिः कल्पनीयैव तदवच्छिन्नं प्रति आकाङ्क्षादिज्ञानस्य च हेतुत्वमवश्यं कल्पनीयमेवेति किमनुमितित्वादिकल्पनयेत्यर्थः । सिद्धिसत्त्वे ऽपीति । पर्वते वह्निज्ञानान्तरमनुमितिर्न भवति शाब्दबोधस्तु शब्दप्रयोगानुपातीदुर्निवार इति भावः । ननु सिद्धिसत्त्वे ऽपि पदार्थानुमितिवत् शाब्दबोधो ऽपि सम्भवतीति चेन्न । अनुमित्सायां सत्यामेवानुमितेरुदयात् । परार्थानुमितौ पर्वतो वह्निमान्धूमात् यो यो धूमवान् सो ऽग्निमानित्येवं पञ्चावयवात्मकं वाक्यं प्रयुज्यते शाब्दबोधस्तु परप्रयुक्तात् वाक्यात्स्वस्य भवतीति भेदात् । प्रतिबध्यत्वेति । शाब्दातिरिक्तज्ञानं प्रति सिद्धिः प्रतिबन्धिकेति वक्तव्यं स्यादित्यर्थः ।

नाशादेवेति । ज्ञानस्य क्षणिकत्वात् प्रत्यक्षनाशे क्षणानुमितिरित्यर्थः । ननु एकक्षणविलम्बेऽनुभवविरोधो नास्तीत्यत आह । सर्वत्रेति । सिद्धिनाशानन्तरक्षणे एवानुमितेरापत्तेस्सिषाधयिषाकाले ऽप्यनुमितिर्न स्यादित्यर्थः । अत एव यत्र वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षं ततः सिषाधयिषा तत्रानुमित्युत्पत्तये सिषाधयिषाविरहविशिष्टसिद्ध्यभावकल्पनेति तार्किकाः । ऋष्यादिव्यवहारात् शक्तिग्रह इति पूर्वमुपपादितम् । ऋष्यादिव्यवहारश्च साधुष्वेवेति साधूनामेव वाचकत्वम् ॥२१॥

(कु० टी०) ननु सिद्धिप्रतिबध्यतावच्छेदककोटौ शब्दान्यत्वं निवेश्यते इति नायं दोषो ऽत आह । किञ्चेति । मात्रशब्दो ऽवधार-

णे । हेतोरुक्तस्यासम्भवादिति भावः । ननु पदात्पदार्थोपस्थितिर्नानुमितिः किन्तु स्मृतिरिति नायं दोषो ऽत आह । पदेभ्य इति । एवो ऽनुमितिशाब्दबुद्धिनिरासाय । तत्तेति । सोऽयमित्यादाविव स इत्येवमित्यर्थः । ननु तदभावे ऽपि फलानुरोधेन तदङ्गीकारो ऽत आह । वाक्यादपीति । अपिः पदसमुच्चायकः । तदापत्तेश्च । स्मरणापत्तेश्च । सम्बन्धिज्ञानतयैव पदज्ञानवत्तदुपयोग इति भावः । ननु फलबलात्पदार्थोपस्थितेः पूर्वं नियमतो वाक्यार्थांशोद्बोधकासमवधानकल्पमत एव घस्नसादौ हरे ऽवेत्यादौ विशिष्टशक्त्यैव संसर्गांशे उद्बोधकासमवधानात्प्राक् पदार्थोपस्थितिमात्रं ततस्तदंशे ऽप्युद्बोधकसमवधाने तद्विषयको वाक्यार्थबोधः । अत एवापूर्वो वाक्यार्थ इति प्रवादः सङ्गच्छते । अपूर्वत्वं च शाब्दबोधप्राक्क्षणवर्तिजनकशब्दजन्यस्मृत्यविषयत्वमिति न ततः स्मृतिरत आह । किञ्च शाब्देति । शाब्दयामीत्याकारकशाब्दत्वावच्छिन्नावगाहिसर्वसिद्धानुव्यवसायेन शब्दजातिसिद्धेरत एव तदवच्छिन्नवरणतया शब्दस्य प्रमाणत्वसिद्धिरिति भावः । तज्जेति । शब्दजेत्यर्थः । अत एव नानुमितं न साक्षात्कृतं किन्तु शब्दादेवावगतमित्यनुभवः सङ्गच्छते । ननु यथा पदार्थोपस्थितेः स्मृतित्वमते शब्दजन्यत्वमात्रेण परं तस्यामपीतरस्मृतिविलक्षणः शाब्दयामीति व्यवहारः न तु वाक्यज्ञानपदार्थोपस्थितिकार्यतावच्छेदकीभूतजातिविशेषाक्रान्तता तस्यास्तथा चास्मृतावपि तद्व्यवहारो ऽत आह । किञ्चेति । तथेति । शाब्दयामीत्याकारकेत्यर्थः । तदवच्छिन्ने तद्वृत्तीति । शाब्दवृत्तीत्यर्थः । आदिना पक्षधर्मताज्ञानादिसङ्ग्रहः । ननु नेदं गौरवमुक्तयुक्तिभ्यामत आह । किञ्चेति । इदं गौरवं विघटयितुं शक्नुते । न चेति । तत्प्रत्यक्षेति । अनुमितिविषयार्थं प्रत्यर्थः । आदिनानुमित्यादिनां सङ्ग्रहः । नाशादेवेत्येवेन सिद्धेः प्रतिबन्धकत्वनिरासः । तदानीं नाशरूपकारणभावादेव तदापत्तेरभावात् । तत्र । सिद्धिस्थले । अनुभवेति । सिद्धिसत्त्वे इच्छासत्त्वं ऽपि अनुमितेरनुभूयमानत्वेन तस्यैव तद्धेतुत्वमित्यस्यानुभवविरुद्धत्वात् । ननु विसंवाद्यनुभवो नेष्टसाधकोऽत आह । सर्वत्रेति । यावत्प्रतिबध्यप्रतिबन्धकभावस्थले इत्यर्थः । तदापत्तेश्चेति । तत्तदभावस्यैव हेतुत्वापत्तेश्चेत्यर्थः । तथा च प्रतिबध्यप्रतिबन्धकभा

धमात्रोच्छेदापत्तिरिति भावः । किञ्चानुमितेरसम्भवात् । न च गौरस्तितावान्स्वधर्मिकान्वयबोधानुकूलाकाङ्क्षाद्याश्रयपदोपस्थापितत्वाद्याप्त्यभावग्रहदशायां गौरस्तीत्यादितो ऽन्वयबोधानापत्तेः । पदजन्या हि पदार्थोपस्थितिः स्वरूपसत्येवान्वयबुद्धावुपयुज्यते न तु ज्ञाता प्रमाणाभावात् । पदैरनुपस्थितस्यापि तदुपस्थितत्वग्रहादन्वयधीप्रसङ्गाच्च । न च गौः पदमस्तित्वद्गोज्ञानपूर्वकोच्चारणविषयः अस्तिपदसाकाङ्क्षपदत्वात् यन्नैवं तन्नैवं यथा आकाशमित्यनुमानमिति वाच्यम् । गवादिपदानां ज्ञानपूर्वकोच्चारितत्वाद्यभावनिश्चयदशायां जायमानसर्वज्ञानानुभवसिद्धबोधस्यासङ्गत्यापत्तेः । गवादिनिष्ठमुख्यविशेष्यताशालिबोधस्यैवमप्यनुपपादनाच्च । अपि च शाब्दबोधोत्तरं नानुमिनोमीत्यनुव्यवसायान्न शाब्दत्वमनुमितित्वव्याप्यम् । न च तस्य व्याप्त्यादिज्ञानघटितसामग्रीजन्यानुमितित्वावच्छिन्नाभावविषयकत्वान्न दोष इति वाच्यम् । व्याप्त्यादिप्रतिसन्धानविरहदशायामपि तस्योत्पत्त्या तद्विषयकत्वासम्भवादिति दिक् । तदाह । दिगिति ॥२१॥

अपभ्रंशे ऽपि शक्तिसत्त्वम् । **सा च शक्तिः साधुष्विवापभ्रंशेष्वपि शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात् । व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम् । अत एव बालानां तिरश्चां च बोधः । न हि तेषां तदैव तत्सम्भव इत्यन्ये । न च साधुस्मरणात्ततो बोधः ।**

ते साधुष्वनुमानेन प्रत्ययोत्पतिहेतवः ।
अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः ।

इति हर्युक्तेः । अनुमानमत्र ज्ञानं साधुविषयस्मरणं वेत्यर्थः । तद्विदां साधु विदाम् । असाधोः साधुप्रकृतिकत्वात्सादृश्येन तज्ज्ञानमिति वाच्यम् । साधुस्मरणं विनापि बोधानुभवात् । तद्वाचकसाधु-

शब्दमजानतां बोधानापत्तेश्च । तद्वाचकत्वेन स्मरणं तु नार्थोपस्थापकं, शक्ततावच्छेदकानुपूर्व्यग्रहात् । तद्वाचकसर्वनामस्मरणाननुभवाच्च । उच्चारितस्यैव बोधकत्वेन स्मृतसाधुतो बोधासम्भवाच्च । न च शक्तिभ्रमाद्बोधः, पूर्वभ्रमाच्चोत्तरभ्रम इति पामराणां शक्त्यग्रहे ऽपि तद्रूपोपपत्तिरिति वाच्यम् । घटत्वादिविशिष्टघटादिरूपार्थनिरूपितायाः घटादिपदवृत्तित्वेन गृहीतायाः भिन्नानुपूर्वीकत्वरूपविशेषदर्शनसत्त्वेन साधारणधर्मदर्शनाभावेन च गगरीपदादौ भ्रमानुपपत्तेः । यदि तु अशक्त्या केनचिद्गगरीति प्रयुक्ते ऽम्बाम्बेत्यादाविव घट इति साधुशब्दस्मरणात्प्रयोज्यस्य बोधे तटस्थस्य गगरीशब्दादेवास्य बोध इति भ्रमेण यस्य शक्तिभ्रमस्तन्मूलकश्चान्येषामपि । तदुक्तं हरिणा ।

तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशका इति । इवशब्देन तदुपगमस्य भ्रमत्वं सूचितम् । तादात्म्यस्य शक्तित्वं च स्पष्टमेवोक्तम् ॥ २२ ॥

(कुं०टी०) इदानीं मतान्तरमाह । सा चेति । ननु व्यवहारदर्शनस्य कथं शक्तिग्राहकत्वं तद्बोधकशब्दाभावादशक्तिग्रहाभावे इष्टसाधनत्वग्रहाभावात्स्तनपाने प्रवृत्त्यनापत्तेरत आह । व्यवहारदर्शनेति । व्यवहारदर्शनमुद्बोधकविधया स्मारकमेवेति लाघवं जीवनादृष्टमेवोद्बोधकमित्यर्थः । अत एव । पूर्वजन्मानुभूतस्मरणस्वीकारादेव । अन्यथा इष्टसाधनताज्ञानाभावात्स्तनपानादौ प्रवृत्तिर्न स्यात् । पश्वादीनां च जडप्रायाणां प्रतिनियतजात्यनुसारेणैव नियतैव काचित्प्रतिभा बोध्यते अतस्तेषामप्यनादिवासनैव बीजमिति भावः । तदैव । आद्यबोधकाले एव ।

तत्सम्भवः। शक्तिग्रहसम्भवः। न चेति। वाच्यमित्यत्रान्वयः। तदुक्तं हरिणा।

असाधुरनुमानेन वाचकः कैश्चिदिष्यत इति।

वाचक इत्यस्य बोधक इत्यर्थः। अयम्भावः न हि विद्वांसो ऽपभ्रंशादेव साक्षादर्थं पश्यन्ति इति नापशब्दानामर्थेन सम्बन्धः। अपशब्दास्तु सादृश्यात्साधुशब्दमनुमापयन्ति साधुस्मरणादिति यदुक्तं तत्रैव मानमाह। ते साधुष्विति। असाधवः। साधुषु। साधुस्मरणेन। बालः अव्यक्तं भाषते साधुविदां व्यक्ते निश्चयो भवतीत्यर्थः। तज्ज्ञानम्। साधुस्मरणम्।

विनापीति। अयम्भावः अर्थगत्यर्थं शब्दप्रयोगः। अर्थावगतेश्चापशब्देभ्यो ऽप्याविशिष्टत्वात्तेषामप्यर्थेन सम्वन्ध इति। एतदर्थबोधकं किञ्चित्साधुपदं भविष्यतीत्यनुमानाद्बोध इति मतं निराकरोति। नार्थेति। शक्ततावच्छेदिकाया आनुपूर्व्या ज्ञाने एव वाच्यस्योपस्थितेरित्यर्थः। तद्वाचकतदादिपदस्मरणाद्बोध इत्यपि निराकरोति। अननुभवाच्चेति। ननु पामराणां घटादिपदे शक्तिग्रहाभावात्कथं तत्सादृश्यमूलको गगरीशब्दे भ्रम इत्याशङ्क्याह। पूर्वपूर्वेति। यस्य शक्तिशब्दपूर्वको भ्रमस्तद्वदित्यर्थः। घटत्वविशिष्टेति। घटनिरूपिताया घटपदनिष्ठायाः शक्तेः गगरीपदे भ्रमो न सम्भवति वर्णभेदरूपविशेषदर्शनसत्त्वात्। न हि करचरणादिमत्त्वनिश्चयानन्तरं स्थाणौ पुरुषत्वभ्रमो भवति।

यदि चेति। अशक्त्या गगरीशब्दो ऽनेनोच्चारित इत्याद्यपुरुषेण ज्ञाते ततो द्वितीयपुरुषस्य गगरीशब्द एव बोधक इति भ्रम इत्यर्थः। तादात्म्यमुपगम्यैवेति। अपभ्रंशाः साधुशब्दैरभेदमिवापन्ना अर्थस्य प्रकाशका इत्यर्थः। तादात्म्यस्येति।

अयम्भावः अयमर्थ इत्यभेदेन व्यवहारादध्यासलक्षणे श-ब्दार्थयोस्तादात्म्ये स एव मुख्यः। सम्बन्धान्तरकल्पने तु तस्यापि सम्बन्धान्तरं कल्प्यमित्यनवस्थानात् । प्रतीतावर्थस्यापि विषयभावेनापेक्षणात्परत असामान्यात्सम्बन्धत्वव्यवहार इवशब्देनेति । साध्वसाध्वोस्तादात्म्यस्य तात्त्विकत्वे चासाधूनामपि बोधकत्वमागतमिति ग्रन्थकार एव आहार्धेन। तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशका इत्यर्थाभिप्रायेणाह । इवशब्देनेति । इवशब्देन शक्तेर्भ्रमः सूचित इत्यर्थः ॥ २२ ॥

(क० टी) एवं शक्तिं निरूप्य तदाश्रयमाह । सा चेति । वाच्यवाचकभावाख्येत्यर्थः। मतान्तरमाह। व्यवेति। चस्त्वर्थे। इदं दृढयति। अत एवेति। शक्तिस्मरणाङ्गीकारादेवेत्यर्थः । ननु स्मरणवद्भ्रहोऽपि तेषां भवतीति किमिति तत्पक्षत्यागो ऽत आह । न हीति । तेषाम्। बालादीनाम्। तदैव। बोधकाले एव। तत्सम्भव इति। अयोग्यत्वादिति भावः । अत्र नैयायिकाः व्युत्पन्नानां साधुस्मरणात् बोधोऽव्युत्पन्नानां शक्तिभ्रमाद्बोध इति न तेषु शक्तिकल्पनेति तत्राद्यपक्षं खण्डयति। न चेति । ततः । अपभ्रंशात्। वैयाकरणस्यापीदमावश्यकमिति सूचयतितुमाह । ते साधुष्विति । यद्यपि हेतव इत्यग्रे ।

तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः ।
न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ॥
न यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ।
इत्यग्रे ऽम्बाम्बेति हरिग्रन्थे दृश्यते तथाप्यनुपयुक्तत्वादत्रानुल्लेखः ।
एवं साधौ प्रयोक्तव्ये यो ऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थो ऽभिधीयत ॥

इत्यस्य निश्चय इत्यस्मादग्रिमस्येव विवक्षितार्थस्य तावतैव लाभादिति भावः। ननु स्मरणाद्बोधे ऽनुमितिघटितहर्युक्तेः कथं हेतुत्वमत आह। अनुमेति। तदसम्भवात् व्याप्तिग्रहादिविलम्बेन तस्यानियतत्वाच्च अत्र तु सर्वत्रेति भावः । तावताप्यनुभवाद्यसम्भवादाह । साध्विति। साधुनि विषयसप्तमीत्याह ।विषयेति। यदा

तादृशो बालः अव्यक्तं तत्प्रभाषते तदा तद्विदां तेनापभ्रंशेन व्यक्ते साधुशब्दज्ञाने निश्चयो भवतीत्यर्थः। तद्धृदि निधायाह। तद्विदामिति। एतेन तद्राहितानां तदभावे ऽपि न क्षतिरिति सूचितम्। अत एव तस्यात्रोल्लेखः। अन्यथार्धश्लोकेनैव निर्वाहे ऽस्याधिक्यं स्पष्टमेव। ननु एकसम्बन्धीति रीत्या स्मरणं सति सम्बन्धे ऽत्र तु न सो ऽत आह। असाधोरिति। तथाच तद्घटकयत्किञ्चिद्वर्णादिरेव साधारणधर्म इति भावः। तज्ज्ञानम्। साधुस्मरणम्। तत्रादौ विशेषव्युत्पन्नस्थले दोषमाह। साध्विति। ननु तादृशानुभवे एव विप्रतिपत्तिः, कारणं विना कार्यानुभवस्य क्वाप्यभावेन मानाभावश्च, फलबलेन तस्य नियमेन कल्पनं चास्तु तत्र न दोषो ऽतः सामान्यव्युत्पन्नस्थले दोषमाह। तद्वाचकेति। अपभ्रंशबोध्यार्थवाचकेत्यर्थः। ननु व्युत्पन्ना द्विविधाः तत्तद्वाचकसंस्कृतविशेषज्ञानवन्तस्तद्विकलाश्च। तत्राद्यानां तथाबोधे ऽपि द्वितीये ऽनुपपत्तिर्दत्ता सा न युक्ता तेषां सामान्यज्ञानसत्त्वेन तदर्थज्ञापकत्वेन वस्तुतस्तद्वाचकसाधुस्मरणमित्यर्थः। स्थापकमिति। तथाच बोधः सुतरां नेति भावः। आनुपूर्वीग्रहस्य यथा कारणत्वमावश्यकं तथाग्रे स्फुटीभविष्यति। नन्वेवमपि सर्वनामस्मृतेस्तेषां बोध इति नोक्तदोषो ऽत आह। तद्वाचकेति। बुद्धिस्थत्वेन तद्वाचकेत्यर्थः। नन्वननुभवे विप्रतिपत्त्यादिः प्रागुक्तदोष एवातः सर्वसाधारणप्रबलदोषमाह। उच्चारितेति। इदं चाग्रे स्फुटीभविष्यति। एतेन फलबलेनानुमितिसामग्र्या नियमेन कल्पनमिति तन्नव्योक्तसंस्कृतैरयमर्थो न बुद्धः किन्त्वेतदुक्तभाषयेति व्युत्पन्नव्यवहाराच्चेत्यपि बोध्यम्। तस्मात्सामान्यव्युत्पन्नस्थले दोषस्तदवस्थ एवोक्तहरिस्तु परमतानुवादक इति न तद्विरोधदोष एतद्विरुद्धस्यापि हरेर्वक्ष्यमाणत्वादिति भावः। अथ तदुक्तद्वितीयपक्षं खण्डयति। न च शक्तीति। पामराणामिति शेषः। ननु तेषां शक्त्यग्रहे कथं तद्भ्रमो ऽत आह। पूर्वपूर्वेति। चस्त्वर्थे। तदिति। शक्तिभ्रमेत्यर्थः। सिद्धान्तमतेनाह। घटत्वेति। परमते तु तत्पदार्थघटितेश्वरेच्छाया इत्यादौ बोध्यम्। घटे ऽन्वयो ऽस्या गृहीतायाः शक्तेरिति शेषः। नव्यनैयायिकोक्तयुक्तिं खण्डयितुमाह। तदुक्तमिति। तेषु साध्विति। पूर्वागमसादृश्यात्कारोक्ताव-

पि शक्त्युपकारकत्वेन तद्भिन्नत्वात्कथं शक्तिभ्रमो हर्युक्तो ऽत आह । तादात्म्येति । चः प्राग्वत् । तथोक्त्येति भावः । अत एव तस्यापि पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति व्यवहार इति प्रागुक्तम् ॥ २२ ॥

अत्रार्थे जैमिनिमतम् ।

तदुक्तं जैमिनिना तदशक्तिश्चानुरूपत्वादिति । तद्भाष्यतकृता च तत्रोक्तरीत्या शक्तिभ्रम उपपादित इत्युच्यते तदा प्रत्येकं तत्तत्संस्कृतस्य तत्तदपभ्रंशेन विनिगमनाविरहात्तेषु शक्तिः । न च सकलदेशशिष्टपरिगृहीतत्वं विनिगमकम् । शवतिर्गतिकर्मा कम्बोजेषु विकार एवैनमार्या भाषन्ते इत्यादिभाष्यरीत्या तत्तद्देशनियतसंस्कृतेषु शक्तिसिद्ध्यनापत्तेः । वाचकस्य व्यञ्जकत्वे आलङ्कारिकाणां प्राकृतभाषोदाहरणस्यासङ्गत्यापत्तेश्च । तत्तद्देशीयशिष्टानां तत्तद्भाषासु जायमानस्य निर्विचिकित्सशक्तत्वप्रत्ययस्य बाधकं विना भ्रमत्वायोगाच्च । अत एव स्त्रीशूद्रबालानां प्रयुक्ते साधौ अर्थसंशये तदपभ्रंशेन निर्णयः ॥ २३ ॥

(कुं टी०) तदशक्तिरिति । तस्य साधुशब्दस्य अशक्तिरशक्त्या करणापाटवेनान्यथा उच्चारणमनुरूपत्वात्समानवर्णवत्त्वादित्यर्थः । शवतिरिति । गत्यर्थकः शवधातुः कम्बोजदेशे आर्येषु तु जनपदेषु विकारे ऽर्थे प्रयुज्यते शवो मृतक इतीत्यर्थः । वाचकस्य व्यञ्जकत्वमिति । यथा

पन्थिअ ण एत्थ सत्थरमत्थिरत्थलग्गामे ।
ओणअ पओहरं पेक्खिअ उण जइ वससि ता वससु इति ।
पथिक न अत्र संस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे ।
उन्नतपयोधरं प्रेक्ष्य पुनर्यदि वससि तदा वसेति तस्यार्थः ।

पं रामतेज पाण्डेय

अत्र पाषाणमयग्रामे आस्तरणं नास्ति पयोधरो मेघः स्तनश्चेति श्लेषः । अत्र पयोधरशब्देनोपभोगक्षमत्वं व्यज्यते तदपभ्रंशस्य पओहरशब्दस्य तत्र वाचकता व्यवहारः । शक्तिभ्रमस्यात्यन्तमसम्भवं दर्शयति । अत एवेति । प्रयुक्ते साधौ स्त्रीशूद्रबालानामर्थसंशये इत्यन्वयः । ननु यवशब्देन दीर्घशूकविशेष एव ग्राह्यो न कङ्गुरित्येतत्प्रतिपादकतदधिकरणासङ्गतिः शब्दशक्तेरुभयत्र तुल्यत्वादत आह । इदं तात्पर्यमिति । यत्तु वसन्ते सर्वसस्यानां जायते पत्रशातनमिति वाक्यशेषान्निर्णय इति तन्न । पैलवौदुम्बरौ वैश्यस्य दण्डावित्यत्र वाक्यशेषाभावात्पीलुशब्देन हस्तिनोऽपि ग्रहणापत्तौ हस्तिवदस्थिदण्डस्यापि ग्रहणापत्तेः ॥ २३ ॥

(कु० टी०) अन्यसम्मतिमप्याह । जैमिनाना चेति । उक्तमित्यस्यानुषङ्गः । तदशक्तिरिति । तेषामपभ्रंशानां न शक्तिः किन्तु शक्तिभ्रमः अनुरूपत्वात्तत्सदृशत्वादित्यर्थः । ननु सूत्रस्याग्रे वक्ष्यमाणसिद्धान्तभूतार्थान्तरपरतयापि सुयोजत्वमत आह । तद्भाष्येति । शबरस्वामिनेत्यर्थः । तथा चोक्तो ऽर्थ एतदनुरोधेनेति भावः । तत्र । गगर्यादौ । भाषाणां नानात्वेन गौरवनिरासाय । प्रत्येकमिति । संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वात् । एतेन तासां नानात्वेन भाषान्तरैर्विनिगमनाविरहान्नैकत्र शक्तिरित्यप्यपास्तम् । संस्कृते प्रत्येकं भाषाभिर्विनिगमनाविरहात् । तेषु । अपभ्रंशेषु विनिगमकं संस्कृते एव शक्तौ अपभ्रंशे तदभावात् । इत्यादीत्यादिना हंमतिः सुराष्ट्रेषु रंहतिः प्राच्यमगधेषु गमिमेव त्वार्याः प्रयुञ्जते इत्यादिपक्षस्य परिग्रहः । अनापत्तेरिति । सकलदेशशिष्टापरिगृहीतत्वात् । एवञ्च दुश्च्यवनशब्दस्येन्द्रमूकादिशब्दानां मूकबधिरादौ शक्तिरपि न स्यात् शिष्टैस्तदप्रयोगात् । अत एवाप्रयुक्तत्वदोषावसरे दुश्च्यवनादिशब्दानुदाजहार प्रकाशकृत् । न च कोशप्रामाण्येन तत्र तत्कल्पनम् । शक्तिभ्रमेण कोशकर्ता तत्पाठ इत्यस्यापि कल्पयितुं शक्यत्वादिति भावः ।

ननु मास्तु तत्रापि शक्तिरिति भ्रान्तं प्रत्याह । वाचकस्येति ।

माए घरोवअरणं णत्थिअत्ति सहिअं तुमए ।
ता भण किं करणिज्जं एवं जेव ण वासरो थाई ॥
मातर्गृहोपकरणं अद्य खलु नास्तीति साधितं त्वया ।
तत्कथयं किं करणीयमेवमेव न वासरः स्थायी ॥

अत्र विहारार्थिनीति व्यज्यते । अयम्भावः न संस्कृतत्वं न वा भाषात्वं शक्त्यवच्छेदकं किन्त्वानुपूर्वी सा च भिन्नभिन्नैव सर्वत्रेति घटकलशादिपर्यायेष्विव नैकेनापरान्यथासिद्धिरिति भाषायां शक्तिरेवेति । यद्यपि वाच्यव्यञ्जकत्वे इदमुदाहृतं तत्र तथापि तेषामशक्तावव्याच्यत्वेन तदसङ्गतिरित्याशयेन वाचकस्येत्युक्तम् । ननु तदपि तथास्त्विति वादिनं भ्रान्तं प्रत्याह । तत्तदिति । निर्विचिकित्सेति । निःसन्दिग्धेत्यर्थः । विनेति । बोधकत्वस्याबाधितत्वादिति भावः । अत एव । अपभ्रंशे शक्त्यङ्गीकारादेवेत्यर्थः । बालानामित्यस्य व्यवहितान्वयः । प्रयुक्ते इत्यस्यान्येत्यादिः । न चैवमार्यम्लेच्छाधिकरणासङ्गतिः तेनानार्यप्रसिद्धे ऽर्थे ऽशक्तत्वप्रतिपादनादत आह । अर्थेति ॥ २३ ॥

आर्यम्लेच्छाधिकरण- तात्पर्यनिरूपणम् । आर्यम्लेच्छाधिकरणस्य तु इदं तात्पर्यम् । तत्र यद्यपि आर्या यवशब्दं दीर्घशूकेषु प्रयुञ्जते तमेव च बुध्यन्ते म्लेच्छास्तु प्रियङ्गौ तमेव च बुध्यन्ते । म्लेच्छपदेनानार्याः । तथापि आर्यप्रसिद्धेर्बलवत्त्वाद्दीर्घशूकपरतैवेति सिद्धान्तितम् । तत्र हि शवतिर्गतिकर्मेत्याद्युक्तभाष्यात् द्वयोरपि शक्तिग्रहाद्बोधेनोभयत्रापि साधुत्वेन शक्तत्वेन च तृतीयस्य सन्देहे विकल्पबोधे वा आर्यप्रसिद्धेर्बलवत्त्वाद्वेदे तद्बोध एवोचित इति । एवञ्चानार्यैरपि यज्ञे यवा एवोपादेयाः पूर्वप्रश्ने तु अनार्यैः प्रियङ्गव एवोपादेया इति विशेषः । तदुक्तं हरिणा ।

शब्दतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिता इति ।

आर्या रङ्गाशिष्टत्वात्तत्प्रसिद्धेर्बलवत्त्वमिति बोध्यं न तु अनार्यप्रसिद्धे ऽर्थे ऽशक्तत्वे ऽसाधुत्वे वा तात्पर्यम् । जैमिनिरप्याह तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यादिति । यवशब्दे उभयथा शब्दार्थावगमाद्विकल्पः स्यादित्यर्थः ।

एवं पूर्वपक्षे सिद्धान्तसूत्रं शास्त्रस्थानां तन्निमित्तत्वादिति । शास्त्रस्थानां शिष्टानां स शब्दार्थः वेदे इति शेषः, तेषामविच्छिन्ना स्मृतिः शब्देषु वेदेषु च ते शिष्टा हि श्रुतिस्मृतिधारणे निमित्तमित्यर्थः । यत्तु दीर्घशूकेषु शक्तः सादृश्यात् प्रियङ्गुषु प्रयुज्यते पूर्वसस्ये क्षीणे द्वयोरप्युत्पत्तेः । तच्च तयोः सादृश्यमिति शबरस्वामी । अत्र वदन्ति तदा एकस्य गौणत्वमिति विकल्पपूर्वपक्षासङ्गतिः । किञ्च यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना उत्तिष्ठन्तीति दीर्घशूकसादृश्यस्य सङ्गतिर्वाक्यशेषो ऽप्युक्तयुक्तिमूलक इति दिक् ॥२४॥

(कुं टी०) उक्तभाष्यादिति । तेन तत्र शक्तिभ्रमो न शङ्कनीय इति भावः । द्वयोरपि । आर्यम्लेच्छयोरपि । उभयत्रापि । कङ्गौ दीर्घशूके च । साधुत्वेनेति । म्लेच्छदेशे कङ्गावेव यव शब्दः साधुरित्यर्थः । विकल्पेति । प्रसिद्धिद्वयेन विकल्पः स्यादित्यर्थः । अत्र यवशब्देन दीर्घशूकविशेष एवग्राह्यः यत्रान्या ओषधयो म्लायन्त इति वाक्यशेषादिति सिद्धान्तितं भाष्यकृता शबरस्वामिना । एतच्च वार्तिककारो नाभ्युपैति आर्यप्रसिद्धेर्बलवत्त्वादेव निर्णये वाक्यशेषोपन्यासवैयर्थ्यापत्तेः । तस्माद्यत्रार्याणामेव शब्दार्थाभिधानसंशयस्तत्रैव वाक्यशेषेण निर्णय इति । वस्तुतस्तु वारुणप्रघासिककरम्भपात्रेषु एव यव-

शब्दस्य दीर्घशूकपरता स्यात्तत्रैव वाक्यशेषसत्त्वात् न तु दार्शपौर्णमासिकद्रव्यविधायकवाक्ये तत्र वाक्यशेषाभावात् । तस्माद्वाक्यशेषो ऽभ्युच्चयत्वेनोक्त इत्यभिप्रेत्याह । आर्यप्रसिद्धेरिति ।

यज्ञे यवा एवेति । तेषामेवापूर्वजनकत्वात् । शब्दतत्त्वम् । शब्दविशेषार्थविशेषतादात्म्यम् । शिष्टाः । अतीन्द्रियार्थदर्शिनः । ते हि इन्द्रियव्यापारमन्तरेणापि शब्दार्थयोः सम्बन्धं पश्यन्ति तदुपदेशपारम्पर्याच्चास्मदादीनामपि सास्नादिव्यञ्जकसहकारेणार्थाभिव्यक्तिः । व्यवस्थिता इति । प्रमाणत्वेनेति शेषः । न तु अनार्येति । यवशब्दस्य कङ्गौ न शक्तत्वं नाप्यसाधुत्वमित्यर्थः । तेष्वदर्शनादिति । तथाच वार्तिकम् ।

स्मृत्याचारविरोधे वा साम्यवैषम्यसंशये ।
समा विप्रतिपत्तिः स्यान्मूलसाम्याद्द्वयोरपीति ॥

शब्दार्थस्य लोकप्रमाणकत्वेन विरोधाभावात्समा विप्रतिपत्तिः स्यादित्यर्थः ।

तेषाम् । शिष्टानाम् । अविच्छिन्नेति । पारम्पर्यायातेत्यर्थः । शब्देषु वेदेषु चेति । यवशब्दो दीर्घशूकविशेषस्यैव वाचकः स एव वेदे गृह्यत इत्याकारेत्यर्थः । एकस्य गौणत्वमिति । सादृश्यात्तु कङ्गौ प्रयोगे गौणत्वेन समत्वाभावाद्विकल्पाशङ्का असङ्गतेत्यर्थः । यत्रान्या ओषधय इति वसन्तकाले तथा सम्भवः । तथैव । पूर्वसस्यक्षये एव । अन्यथेति । प्रियङ्गूणामन्यथोत्पत्तिस्वीकारे भवदुक्तसादृश्यासङ्गतिरित्यर्थः । ननु आर्यप्रसिद्ध्या दीर्घशूकग्रहणे उक्तवाक्यशेषवैयर्थ्यमत आह । उक्तयुक्तीति । आर्यप्रसिद्धिवचनरूपेत्यर्थः ॥ २४ ॥

(क० टी०) तत्रादौ तद्विषयमाह । तत्र हीत्यादिना । तत्र हीत्यस्य सिद्धान्तितमित्यत्रान्वयः । ननु म्लेच्छशब्देन प्रसिद्धार्थ

ग्रहणे तेषां तत्र प्रयोगे ऽपि वेदे तत्प्रसक्त्यभावाच्छङ्कैवायुक्तात आह। म्लेच्छेति। म्लेच्छअव्यक्ते शब्दे इति धात्वनुसारादपशब्दभाषणकर्तृत्वेन ते उच्यन्त इति भावः। तत्तात्पर्यमाह। तत्र हीति। यवादिशब्दस्थले हीत्यर्थः। द्वयोरपि। प्रियङ्गुदीर्घशूकयोरपि। शक्तत्वमेव साधुत्वमिति जीर्णनैयायिकमतं लक्षणया तत्त्वस्य च भाष्योक्तस्य निरासायाह। शक्तत्वेन चेति। सन्देहकस्याप्यबोधे। ननु बोधसामग्रीसत्त्वात्कथं सन्देहो ऽत आह। विकल्पेति। पृथक्शक्तिग्रहेण यौगपद्यासम्भवादिति भावः। ननु तेषां वेदे तथा बोधस्यैवौचित्ये ऽप्यन्यत्र तद्बोधात्को विशेषः पूर्वपक्षसिद्धान्तयोरन्यथा शङ्कासङ्गत्यापत्तिरन्यविशेषस्तु नात्र सम्मतो ऽत आह। एवञ्चेति। तेषां वेदे तद्बोधस्यैव सत्त्वे चेत्यर्थः। अपिरार्यसमुच्चायकः। एवेन प्रियङ्गुव्यावृत्तिः। अग्रे एवेन दीर्घशूकव्यावृत्तिः पक्षे इत्यस्यानुषङ्गः। अथोदार्यैर्यवा एव तत्रेति बोध्यम्। शब्दतत्त्वम्। तत्साधुत्वम्। अयं शब्दः साधुरयमेतदर्थ इत्येवं निश्चये प्रमाणभूता इत्यर्थः। ननु हर्यधिकरणयोर्मिथोविरोधः तत्रार्यप्रसिद्धेर्बलवत्त्वमुक्तमत्र तु शिष्टानां तत्त्वं चार्यानार्यसाधारणमिति कथं तत्रेदं मानमत आह। आर्याणामिति। एवञ्च तेषां शिष्टत्वमेव नेति भावः। पूर्वपक्ष्युक्तमीमांसकसम्मततात्पर्यं निराचष्टे। न त्विति। येन मम विरोधः स्यादिति भावः। न च शक्तत्वे तात्पर्ये ऽन्यत्र बोधो न स्यादत आह। असाधुत्वे वेति। एवमधिकरणाशये हरिसम्मतिमुक्त्वा मीमांसकाज्ञानं प्रकटयितुं तन्मूलसम्मतिमाह। जैमिनिरपीति। तेषु यवादिशब्देषु अदर्शनात् देशकर्तृभेदात् समेति तटस्थस्येति भावः। तदाह। यवेति। यवादीत्यर्थः। अवगमात् आर्यम्लेच्छयोर्विकल्प इति शिष्टपदप्रवृत्तिः। एतेनापि पूर्वसन्देहपक्षो नादृतः। शास्त्रस्थानामिति सूत्रे पाठः, तदेव शेषपूरणेन व्याचष्टे। य इति। शिष्टपदप्रवृत्तिनिमित्ताशिष्टेः शासनस्य शास्त्रज्ञानपूर्वकत्वमित्यर्थकशास्त्रपूर्विका हि शिष्टिरिति पृषोदरादिसूत्रे भाष्योक्तत्वात्तदर्थमाह। शिष्टानामिति। ननु नायं नियम उक्ताधिकरणसिद्धो ऽत आह। वेदे इति। शेष इति। तत्र हेतुं व्याख्यातुमाह। तेषामिति। शब्देषु। वैदि-

कभिन्नेषु । हेतुमाह । ते शिष्टा हीति । धारणं च शब्दार्थनिर्णयद्वारा तदर्थानुष्ठातृत्वेन । तथाच तन्निमित्तत्वादिति बहुव्रीहिर्बोध्या । एतत्सूत्रव्याख्यानमन्यदीयं खण्डयति । यस्त्विति । अयम्भावः शास्त्रस्थानां नैयायिकादीनां यः सः शब्दशक्यः प्रियङ्गौ प्रयोगस्तु तन्निमित्तत्वात् तन्निष्ठसाधारणधर्मनिमित्तकसादृश्यादिति सूत्रार्थ इति । शक्तः । यवशब्दः । द्वयोरपि । प्रियङ्गुदीर्घशूकयोरपि । तच्चेति । तदेव चेत्यर्थः । तदा एकत्र शक्तिरेकत्र सादृश्यात्प्रयोगे एकस्य प्रियङ्गोः सादृश्यसम्बन्धमूलकलक्षणाया एव गौणीत्वादिति भावः । इतरसङ्गतौ हेतुत्वबोधकः तुल्यार्थास्तु विकल्पेरन्निति न्यायविरोधादिति भावः । बिकल्पेति । प्रियङ्गूणां ग्रहणं दीर्घशूकानां चेत्येवं रूपेत्यर्थः । ननु गौणत्वमुख्यत्वकृतभेदे तुल्यप्रयोजनकत्वाद्विकल्पसङ्गतिरेवात आह । किञ्चेति । यत्र । देशे । अथ तत्क्षणानन्तरं तत्रेति शेषः । एते । दीर्घशूकाः । इतीत्यस्य वेद इत्यत्रान्वयः । अन्यथा तथोत्पत्त्यङ्गीकारे । नन्वस्तु तद्ग्रन्थासङ्गतिस्तथापि यत्रान्या इति वेदासङ्गतिरेव तेनोभयलाभात्, अधिकरणमते तु एकस्यैव लाभ इति विरोधश्चात आह । वाक्येति । यत्रान्या इत्यादीत्यर्थः । उक्तयुक्तीति । शिष्टार्थप्रसिद्धिबलवत्त्वरूपयुक्तिमूलक इत्यर्थः । तां युक्तिं हृदि निधाय तामेव दर्शयतीति भावः । अन्यथा तद्विरोधादधिकरणासङ्गतिरेव स्यात् । किञ्च लोकप्रयोगपरतया सो ऽपि साधारण एवास्तु । एतेनोक्तवाक्यशेषाद्दीर्घशूके शक्तिरिति निर्णयः कङ्गौ तु शक्तिभ्रमात्प्रयोगः नानाशक्तिकल्पने गौरवात् हर्यादौ त्वविनिगमकान्नानाशक्तिकल्पनमिति नैयायिकोक्तमपास्तमुक्तयुक्तेः । किञ्चार्यम्लेच्छाधिकरणमपि सर्वेषां शक्त्यङ्गीकारे एव सङ्गतमन्यथा म्लेच्छबोधस्य भ्रममूलकत्वेन भ्रान्तिविषयरजतज्ञानस्येव वस्त्वसाधकत्वेन कस्या बलवत्त्वमिति विचाराप्रवृत्तेः । तदाह । दिगिति ॥ २४ ॥

ऋष्यार्यम्लेच्छानां तुल्यं शिष्टत्वम् । न्यायभाष्यकारो ऽपि आप्तोक्तः शब्द इति सूत्रे ऽर्थसाक्षात्कारवानाप्तः स यथा दृष्टार्थबुबोधयिषया यं प्रयुङ्क्ते स प्रमाणशब्द इति ऋष्यार्यम्लेच्छानां समानमाप्तलक्षणमित्याह ।

तत्र ऋषिर्वेदः म्लेच्छो ऽपशब्दवक्ता । ततः सूत्रकृता सामयिकः शब्दार्थप्रत्यय इति प्रमाणत्वेन लक्षितशब्दमात्रजप्रत्ययस्य तुल्यमेव सामयिकत्वमुक्तम्। सामयिकत्वं समयगृहीतसम्बन्धजन्यत्वमिति न ऋषीणां विरोधः । काव्ये च्युतसंस्कृतादिदोषस्य दोषकताबीजं तु साधुपदसमुदायमध्ये ऽसाधुपदर्शनेन विप्रसभायां चण्डालदर्शनेनेव हृदयोद्वेगकर एवेति बोध्यम् ।

साधुत्वं नापभ्रंशानां शिष्टैर्धर्मबुद्ध्या तदप्रयोगात्। न चैवं ततो बोधानापत्तिरसाधुत्वानिश्चयस्य तत्प्रतिबन्धकत्वादिति वाच्यम्। तत्सत्त्वे ऽपि ततो बोधदर्शनेन तस्य तदप्रतिबन्धकत्वात्। साधुत्वं च व्याकरणव्यङ्ग्योऽर्थविशिष्टशब्दनिष्ठः पुण्यजनकतावच्छेदकजातिविशेषः। तदुक्तमेकः पूर्वपरयोरिति सूत्रे भाष्ये एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति । सम्यक् ज्ञातः सम्यक्त्वेन साधुत्वेन ज्ञातः शास्त्रान्वितः शास्त्रव्युत्पादनमार्गेणानुसंहितः सुप्रयुक्तः शिक्षोक्तरीत्या प्रयुक्तः तस्य च विशिष्टप्रयोगकोशव्याकरणाद्यनुमापकम् ॥ २९ ॥

(कुं०टी०) आप्तोपदेश इति। आप्तस्य भ्रमादिशून्यस्य य उपदेशः स शब्द इति तदर्थः । स इति। आप्तोऽस्मिन्नर्थे यं शब्दं प्रयुङ्क्ते स तत्र प्रमाणमित्यर्थः। यथेति । यथा येन प्रकारेण दृष्टं दर्शनं यस्य तादृशो यो ऽर्थ इत्यर्थः। समानमिति । तत्तदर्थबोधकतत्तच्छब्दप्रयोक्तृत्वादिति भावः । आर्यपदेन गतार्थतां निराकरोति । ऋषिर्वेद इति ।प्रमाणत्वेनेति। प्रमाणत्वेन लक्षितो यः शब्दस्त-

स्माज्ज्ञातस्य प्रत्ययस्येत्यर्थः । एवं चापभ्रंशजस्यापि सामयिकत्वं तुल्यमिति भावः । ननु वेदार्थस्य समयप्रकाशितत्वं सम्भवति वृद्धव्यवहारैः शक्तिग्रहे ऽपि वेदवाक्यस्य समुदायान्तत्वादर्थेनाज्ञातसम्बन्धत्वात्तत्कल्पने सङ्केतापातात्सापेक्षत्वेनाप्रामाण्यापत्तिरत आह। समयगृहीतेति। लोकवेदयोरर्थभेदाभावाद्वेदवाक्यस्यापि लौकिकव्युत्पत्तिमूलकत्वेन सङ्केतानपेक्षत्वादनपेक्षमेव प्रामाण्यम्। ऋषीणामिति ।वेदवाक्यानां सामयिकार्थबोधकत्वविरोधेनेत्यर्थः । ननु दीनं त्वामनुनाथते स्तनयुगं यत्रानृतं मा कृथा इत्यत्रात्मनेपदस्यासाधुत्वे ऽप्यदोषः क्रतोर्बहिरदोषादित्यत आह । काव्ये इति ।

ननु दन्त्यमध्यास्वशब्दाद्वाजिबोधादर्शनेनासाधुत्वज्ञानं प्रतिबन्धकमत आह । तत्तत्त्वे ऽपीति। असाधुत्वनिश्चये सत्यपभाषाशब्दादर्थबोधान्न प्रतिबन्धकत्वमिति भावः। अस्वशब्दस्य वाजिनि साधुत्वाभावादाह। अर्थविशिष्टेति। शिक्षोक्तरीत्येति । अम्बूकृतादिदोषराहित्येनेत्यर्थः । तस्य चेति । साधुत्वस्य चेत्यर्थः ॥ २५ ॥

(क०टी०) नव्यनैयायिकभ्रमं प्रकटयितुमपभ्रंशे शक्तौ साधकान्तरम-प्याह ।न्यायेति। वात्सायनीयेत्यर्थः।तत्रादौ पदार्थमाह। अर्थसाक्षादिति । अनेनाताद्दशस्य तत्प्रयुक्तस्याप्यतत्त्वं सूचितम् । उपदेश इति कर्मणि घञित्याह । यमिति । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रस्योपक्रान्तत्वादाह । प्रमाणेति । तस्यैव लक्ष्यत्वादिति भावः । इतीति । सामान्यार्थेनेत्यर्थः । अन्यथा कस्य चिद्विशेषस्योपादानं कुर्यादिति भावः। ननु ऋषेरार्यत्वात्कथं भेदोक्तिरत आह । तत्रेति । त्रयाणां मध्ये इत्यर्थः । तदुक्तमृषिणेत्यादौ तथा दर्शनादिति भावः। ननु मुख्यम्लेच्छस्य प्रकृतानुपयोगो ऽत आह। म्लेच्छ इति। एवञ्च यदि भवदुक्तवैषम्यं साध्वसाध्वोस्तदिदं स्यात्तर्हि तुल्यमेव न तुल्यप्रमाणशब्दत्वं कथमुक्तं तस्मा-

त्तत्र शक्तिरेवाभिमता। एवं भाष्यसम्मतिमुक्त्वा सूत्रसम्मतिमप्याह। तत इति। एवमपभ्रंशसाधारण्येन प्रमाणशब्दलक्षणकथनादग्रे इत्यर्थः। इति। अनेन सूत्रेण। प्राग्वत् शब्दादित्यस्यार्थमाह। प्रमाणेति। मात्रशब्दः कात्स्न्र्ये। उक्तसूत्रेण प्रमाणत्वेन लक्षिता यावन्तः शब्दास्तज्जन्यज्ञानस्येत्यर्थः। उक्तमिति। तेन हि आर्यम्लेच्छानां समानमेव वाचकत्वमुक्तमन्यथोक्तरीत्या तुल्यत्वोक्तिरसङ्गतैव स्यात्। नन्वेवमपि वैयाकरणनैयायिकऋषीणां मिथो विरोधापत्तिराद्येन समयगृहीतसम्बन्धजन्यत्वमर्थज्ञाने उक्तमन्त्येन तु साक्षात्समयजन्यत्वमुक्तमत आह। सामर्यीति। नन्वपभ्रंशे शक्त्यङ्गीकारे च्युतसंस्कृतित्वादेः काव्यदूषकत्वं न स्यात्तद्बीजस्य शाब्दबोधासम्भवस्याभावादत आह। काव्य इति। पददर्शनेन। तच्छ्रवणेन। नन्वेवं तेषां साधुत्वस्याप्यापत्तिस्तुल्यत्वादत आह। साधुत्वं त्विति। शिष्टैरिति। इदं च तस्याऽनुमापकमित्यनुपदमेव स्फुटीभविष्यति। साधुत्वज्ञानं तु शाब्दबोधे न कारणं तदभावेऽपि बोधात्तदभिप्रेत्याह। न चेति। एवम्। तेष्वसाधुत्वनिश्चये। ततः। अपभ्रंशात्। कत्वादिति। अत एव साधुतो ऽप्यसाधुत्वनिश्चये बोधो न। तदिति। असाधुत्वानिश्चयसत्त्वे ऽपि संस्कृतमविदुषां प्राकृतादितो बोधेन तन्निश्चयस्य बोधाप्रतिबन्धकत्वादित्यर्थः। न च तत्र मानसो बोधः अन्यत्रापि तथात्वापत्त्या शब्दप्रामाण्योच्छेदप्रसङ्गादिति भावः। ननु किमिदं साधुत्वं यदपभ्रंशेषु नास्ति। न च व्याकरणनिष्पाद्यत्वं, नव्यनैयायिकोक्तमनुकरणे शब्दमात्रस्य व्याकरणनिष्पादित्वेन सर्वत्र साधुत्वापत्तौ साध्वसाधुविभागोच्छेदापत्तेः। न च यः शब्दो यत्रार्थे व्याकरणव्युत्पन्नस्स तत्र साधुस्तद्व्युत्पन्नत्वग्रहश्च क्वचित्स्पष्टोपलभ्यमानव्याकरणात् क्वचिच्छिष्टप्रयोगकोशादिभिरनुमानात् तस्य च बाहुलकादिना सङ्ग्रहः। यथा पुष्पवन्तपदं साहित्यावच्छिन्नोभयविषयकार्थबोधे एव साधु नैकतरार्थमात्रबोधे, यथा वा दारशब्दो बहुवचनान्त एव साधुर्नैकवचनान्तो, यथा वा वचधातुस्तिप्परः साधु नान्तिपर इति वाच्यम्। लाक्षणिकानां तत्तदर्थे व्युत्पादनविरहेण तेषां तत्र साधुत्वानापत्तेरेतेन शक्तत्वमेव साधुत्वमित्यप्यपास्तम्। तत्त्वे ऽपि साधु-

शाने

त्यव्यवहाराच्चापभ्रंशेष्वतिव्याप्तेश्च । परमते समासादौ प्रत्ययसमुदाये च शक्त्यभावेन तस्यासाधुतापत्तेश्च । प्रत्येकशक्तिमादाय साधुत्वे च बाधत इत्यादिवद्बाधतीत्यादेरपि साधुतापत्तेश्च । द्योतकेष्वव्याप्तेश्च । न चोपसन्दानिकीशक्तिरेव द्योतनेति चेन्न । उपसन्दीयत इत्युपसन्दानं समभिव्याहृतपदं तद्वृत्तिशक्त्युद्बोधकत्वमिति तदर्थसत्त्वेन तेषु शक्त्यभावात् । एतेन वृत्तिमत्वं तदित्यपि परास्तम् । न च वाचि विशेषस्तत्कत्वादिना साङ्कर्यापत्तेरत आह । साधुत्वं चेति । चस्त्वर्थे । तस्य नित्यत्वादाह । व्यङ्ग्य इति । अश्वास्वशब्दादेः क्रमेण वाजिदरिद्रादौ साधुत्ववारणायार्थविशिष्टेति । तत्सिद्धौ मानमाह । पुण्येति । अनेन तस्य पुण्यजनने एवोपयोग इति सूचितम् । एतेन तज्ज्ञाने शाब्दबोधहेतुतायास्तदभावनिश्चये तत्प्रतिबन्धकताया वा प्राङ्निरासादीदृशसाधुत्वस्य क्वोपयोग इत्यपास्तम् । ननु तेन पुण्यजनने एव किं मानमत आह । तदुक्तमिति । तस्य पुण्यजनकत्वमुक्तमित्यर्थः । भाष्ये इत्यस्य पठितया श्रुत्येति शेषः । तामेवाह । एक इति । अन्विति । ज्ञात इत्यर्थः । व्याकरणपदमुपलक्षणं तत्रेत्याह । तस्य चेति । साधुत्वस्येत्यर्थः । मुख्यत्वादाह । शिष्टेति । आदिना निरुक्तादिः ॥ २५ ॥

शक्यार्थेनैव लाक्षणिकपदसाधुत्वम् । लाक्षणिकेष्वपि शक्यार्थमादायैव पदस्य साधुत्वं पदान्तरसम्बन्धेऽन्वयाद्यनुपपत्त्या शक्यतावच्छेदकारोपेणैव लक्ष्यार्थबोधात् । गोपीत्यादौ प्रक्रियादशायां गोपेति प्रातिपदिकस्य गोपत्वारोपेण तत्स्त्रीबोधकत्वानुमानं पुंयोगादाख्यायामिति शास्त्रतः ।

लिङ्गं लिङ्गपरिज्ञाने सूत्रं प्रत्ययशाशकम् ।
सोऽयमित्यभिसम्बन्धात्पुंशब्दे स्त्र्यभिधायिता ॥

इति हर्युक्तेः । अत एव यदिह परिनिष्ठितं तत्साधु इत्यर्थापत्तिलभ्यवाक्यात्साधुत्वबोधकं व्याकरणमिति भाष्यं सङ्गच्छते । तद्बोधकं व्याकरणमप्यत्वे पाणिनि-

थमेवेत्यपि भाष्ये स्पष्टम् । एवञ्च व्याकरणव्युत्पत्तिज्ञानपूर्वकं साधुत्वेन ज्ञातसाधुशब्दप्रयोगाद्धर्म इति बोध्यम् । अत एव समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियम इति भाष्ये उक्तम् ।

वाचकत्वाविशेषे ऽपि नियमः पुण्यपापयोः ।

इति हरिणाप्युक्तम् ॥ २६ ॥

(कुं० टी०) ननु अश्वशब्दो वाजिनि साधुरित्येव साधुताया अर्थविशेषनियन्त्रितत्वात्तीरादौ गंगादिपदस्य साधुत्वानापत्तिरत आह । लाक्षणिकेष्वपीति । ननु कथं तीरबोध इत्यत आह । पदान्तर इति । तत्र तीरे प्रवाहत्वमेवारोप्यते, अन्यथा शब्दार्थसम्बन्धस्यानित्यत्वापत्तिरिति भावः । एवञ्च प्रवाहत्वप्रकारकप्रतीतिविशेष्यप्रसिद्धार्थत्वं मुख्यत्वं तादृशाप्रसिद्धार्थत्वं च गौणत्वं बोध्यम् । ननु गोपालननिमित्तस्य गोपशब्दस्य स्त्रियां वृत्त्यभावादारोपितगोपत्ववत्याश्च ङीषः प्रत्युपस्थापकाभावात्कथं तदनुशाशनमत आह । गोपीत्यादाविति । या हि स्वयं गाः पालयति तत्र गोप इत्येव भवति पालनक्रियारहितायां गोपभार्यायां तद्धर्मलाभाद्गोपशब्दः प्रयुज्यते । एतेन पुंयोगे अजीति वदन्तः परास्ताः । तत्र जातेरेव निमित्तत्वेन तद्धर्मलाभस्य निमित्तत्वं नास्तीति पुंयोगासम्भवात् । ननु पूर्वं स्त्रीबोधाभावात्कथं ङीषः प्राप्तिरत आह । प्रक्रियेति । तत्स्त्रियां गोपत्वारोपेण ङीषो निमित्तं स्त्रीबोधकत्वं प्रक्रियादशायामानुमानिकमित्यर्थः । ननु तीरादिपदवदत्र तात्पर्यग्राहकाभावादाक्षेपे किं बीजमत आह । इति शास्त्रत इति ।

पुंयोगादिति शास्त्रात्स्त्रीत्वबोध इति यदुक्तं तत्र मानमाह । लिङ्गमिति । प्रत्ययशासकं पुंयोगादिति सूत्रं स्त्रीलिङ्गज्ञाने लिङ्ग-

मनुमापकमित्यर्थः । अत्रेदं तत्त्वं गोपालनरहितायां गोप्यां गोपशब्दस्य वृत्तौ दम्पतिभावसम्बन्ध एव निमित्तम् । यथा हि गङ्गायां घोष इत्यत्र सामीप्यसम्बन्धात्तीरे वृत्तिः मञ्चाः क्रोशन्तीत्यत्र संयोग एव सम्बन्धः आयुर्घृतमित्यत्र जनकत्वं, तथा देवकी इत्यादौ जन्यजनकभावसम्बन्धेनैव दुहितरि वृत्तिः । निरूढश्चायं व्यवहार इति न सम्बन्धान्तरमाक्षिप्यातिप्रसङ्ग आपाद्यः । इत्थमेव जगदीशीत्यादयः प्रयोगाः । एवञ्च देवदत्तादिशब्दानां स्वत एव स्त्रियां वृत्तिसम्भवेन पुंयोगाभावाट्टाबेव । जात्यन्तरीयायां शूद्रभार्यायां शूद्रशब्दस्य प्रवृत्तौ तु शूद्रसम्बन्ध एव निमित्तमिति । पुंशब्दे पुंवाचके गोपशब्दे प्रक्रियादशायां बोधकत्वमानुमितिकमेवेत्यत्र मानमाह । अत एवेति । अयम्भावः यदि तिबादिविधावेव व्याकरणस्य तात्पर्यं तदा साध्वनुशासनत्वभङ्गः, अतः साधुत्वविशिष्टास्तिबादयो विधीयन्ते । ननु लडादीनां प्रयोगाभावात्कथं साधुत्वविशिष्टस्य विधानमिति चेदेवं तर्हि वर्तमाने लट् भवति तेन च यत् परिनिष्ठितं तत्साधु इत्यर्थ इति । अर्थापत्तीति । अर्थस्य उपपादकस्य आपत्तिः कल्पना । यथा पीनो देवदत्त इत्यत्र पीनत्वान्यथानुपपत्त्या रात्रिभोजनं कल्प्यते ॥ २६ ॥

(कु० टी०) नन्वेवं यः शब्दो यत्रार्थे इति प्रागुक्तमेव समायातमिति लाक्षणिकाव्याप्तिरेवात आह । लाक्षणीति । शक्यसम्बन्धित्वेन गृहीतार्थबोधस्यैव लक्षणाजन्यत्वे शक्यार्थबाधज्ञानस्य लक्षणाजन्यबोधे कारणत्वेन च लक्षणास्थले प्रथमं शक्यबोधस्यावश्यकतया तमर्थमादाय साधुत्वोपपत्तिः । एवं गङ्गयाव्यवहितसमीपघोषविषये प्रयोगे गङ्गायां घोष इत्यादौ गङ्गापदस्य तीरपरत्वे ऽपि स्त्रीप्रत्ययादिसङ्गतिः । पदस्य पदान्तरसम्बन्धे एव श्रोतृबोधो लक्षिणिकार्थप्रतिसन्धानेन प्रागुपस्थिततीरगाम्भीर्यम

दायैव शास्त्रप्रवृत्त्या णत्वस्त्रीत्वादिप्रयुक्तकार्यप्रवृत्तेर्गङ्गयात्यन्तसमीपघोषविषये न तत्प्रयोगे गङ्गायां घोष इत्यादौ सप्तम्या औपचारिकाधारे ऽपि साधुत्वबोधनं साधकतममिति तमग्रहणेनेति भावस्तदाह । पदस्येति । पदान्तरेति च । आदिना तात्पर्यानुपपत्तिपरिग्रहः । मुख्यसिद्धान्तमतेनाह । शक्येति । अयमेव लक्षणेत्यग्रे स्फुटीभविष्यति । एतेन शिष्टप्रयोगादिभिस्तत्तदर्थेऽपि तेषां व्याकरणव्युत्पाद्यत्वानुमानेनादोष इति प्राचोक्तमपास्तम् । लोके पदस्य लक्षणाया लिङ्गात्यागे ऽपि तस्य प्रायिकत्वं ध्वनयन्प्रातिपदिकलक्षणायां यत्र शास्त्रं तात्पर्यग्राहकं तत्र स्वलिङ्गत्याग एवेत्याह । गोपीत्यादाविति । तत एवाह । प्रक्रियेति । अस्य तदनुमापकत्वे मानमाह । लिङ्गमिति । अनुमापकमित्यर्थः । प्रत्ययेति । स्त्रीप्रत्ययेत्यर्थः । लक्षणाबीजानां बहूनां तत्रोक्तत्वादाह । सो ऽयमिति । नन्वेवमपि पुण्यजनकतावच्छेदकं तत्तदर्थे तत्तच्छब्दस्य व्याकरणव्युत्पाद्यत्वमेव साधुत्वमास्तां कृतं जातिविशेषाङ्गीकारेणेदमेवाभ्युदययोग्यतापदेनोच्यते अत आह । एवेति । तादृशजातिविशेषाङ्गीकारादेवेत्यर्थः । न हि व्याकरणव्युत्पाद्यत्वस्य साधुत्वे इदं सङ्गच्छेत तस्य शास्त्रबोध्यत्वासम्भवादिति भावः । वाक्यादित्यनेन सूत्रं तु कथमपि न तद्बोधकमित्यन्यत्र स्पष्टमिति सूचितम् । प्रसङ्गादाह । तद्बोधकं चेति । फलितमाह । एवञ्चेति । तस्य पुण्यजनकत्वे चेत्यर्थः । पूर्वकमिति ज्ञानक्रियाविशेषणम् । यद्यप्युक्तश्रुतौ ज्ञानप्रयोगयोरुपादानं भाष्ये ऽपि मतद्वयमुक्तं तथापि ज्ञानाद्धर्म इति मतं न युक्तमित्यन्यत्र स्पष्टम् । अत एव प्रयोगस्य तदव्यवहितपाठस्तस्य व्यवहितपाठस्तदाह । ज्ञातसाधुशब्दप्रयोगादिति । अन्यथा शास्त्रेण साधुत्वबोधनस्य वैयर्थ्यं स्पष्टमेवेति भावः । अत एवेति । उक्तमभिप्रेत्यैवेत्यर्थः । अस्याग्रे ऽप्यन्वयः । शब्दैश्चेति पूर्वान्वयि । तद्भाष्यस्थहरिमप्याह । वाचकत्वेति । शब्दापशब्दयोरिति शेषः । अत एव साधूनेव प्रयुञ्जीतेति विधिर्नासाधूनिति निषेधश्च फल इति भावः ॥ २६ ॥

अपभ्रंशे शक्तिग्रह- किञ्च अपभ्रंशे शक्त्यंशे कदापि कस्यापि

स्य न भ्रमत्वम् । व्यवहर्तुर्बाधादर्शनेन न तत्र शक्तिग्रहस्य भ्रमत्वमसति बाधके प्रमात्वस्यैव न्याय्यत्वात् । किञ्चैवमृषीणामार्षज्ञानेन तदभावनिश्चयात्तेषां भ्रमासम्भवेन तन्नो बोधानापत्तिः । किञ्च प्रमाणानां सम्बद्धार्थबोधकत्वेन तेषामपि अर्थेन सम्बन्ध आवश्यकः । अत एव गौरित्यस्य शब्दस्यार्थे बहवो गावी गोणी गोता गोपोतलिकेत्यादयो ऽपभ्रंशा इत्यर्थकं गौरित्यस्य शब्दस्य गाव्यादयो ऽपभ्रंशा इति भाष्यमाञ्जस्येन सङ्गच्छते । अत एव धर्मार्थत्वं साधूनामुक्तं भाष्ये । एतेन अर्थापत्त्येते उच्यन्ते शब्दाः न धर्मायेति शबरस्वाम्युक्तमपास्तम् ।

जैमिनिसूत्रस्याप्ययमर्थः, अपभ्रंशा अपि साधवः ते ऽपि हि साधयन्त्यर्थमिति पूर्वपक्षे अन्याय्यो ऽनेकसाधुशब्दत्वमिति केचिदेव साधवो न सर्वे इति मनसि निधाय तर्हि साधौ प्रयोक्तव्ये असाधूच्चारणं कथमित्याशङ्क्य शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वमिति सूत्रेण प्रयत्नसाध्ये कार्ये प्रमादस्य दर्शनात् यथा शुष्के पतिष्यामीति कर्दमे पतति, तथा साधौ प्रयोक्तव्ये ऽसाधोः प्रयोग इत्युक्तम् ॥ २७ ॥

(कुं०टी०) किञ्चेति । शक्तौ रजतमिदं नेति बाधानिश्चयानन्तरं पूर्वज्ञानस्य भ्रमत्वं कल्प्यते अपभ्रंशनिष्ठशक्त्यंशे तु कस्यापि बाधादर्शनान्न भ्रमत्वसम्भव इत्यर्थः । तदभावनिश्चयादिति । ऋषीणां भ्रमाभावेन शक्त्यभावनिश्चयादित्यर्थः । प्रमाणानाम् । ज्ञायमानशब्दानाम् । तेषामपि । अपभ्रंशानामपि । अत एव । अपभ्रंशानामप्यर्थसंबन्धसत्त्वादेव । धर्मार्थत्वमिति । न तु बोधकत्वमुक्त-

मित्यर्थः। अर्थायद्येत इति। एते शब्दा अर्थबोधाय उच्यन्ते इत्यर्थः। जैमिनिसूत्रस्यापीति। तत्र हि प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्थास्यादिति पूर्वपक्षसूत्रं प्रयोगानियमस्य अशास्त्रत्वात् मूलभूतश्रुतिरहितत्वात्साधुषु प्रयोगनियमो न स्यादित्यर्थः। सिद्धान्तसूत्रमाह। अन्यायो ऽनेकेति। शब्दे इति। प्रयोक्तव्ये इति शेषः। प्रयत्नानिष्पत्तेरपराधः प्रयत्नान्तरस्योत्पत्तिः प्रयोग इत्युक्तम्॥ २७॥

(क० टी०) समानायामित्यादिभाष्यादिप्रसङ्गात्सिंहावलोकन्यायेन पुनरप्यपभ्रंशेषु शक्तिमन्यथा साधयति। किञ्चेत्यादिना। कदापीत्यनेन त्रैकालिकबाधाभाव उक्तः। कस्यापीत्यनेन सर्वदेशीयतदभाव उक्तः। दोषान्तरमाह। किञ्चेति। एवम्। तत्र शक्त्यनङ्गीकारे। आर्षेति। दिव्येत्यर्थः। निश्चये हेतुस्तस्य तत्र प्रतिबन्धकत्वादाह। तेषामिति। ऋषीणामित्यर्थः। ततो ऽपभ्रंशेभ्यस्तेषामेवेति भावः। दोषान्तरमाह। किञ्च प्रमेति। पूर्वमाप्तत्वस्य प्रमाणत्वस्य च तुल्यत्वस्योक्तत्वादिति भावः। अत एवास्यात्रैव लेखो न प्राक्। बोध कत्वेन। अन्यत्र तथा दृष्टत्वात्। तेषामपि। अपभ्रंशानामपि। अर्थेनेत्यादि जातावेकवचनम्। पुनरपि तां दृढयति। अत एवेति। तत्र शक्तिसत्त्वादेवेत्यर्थः। अन्यथा तयोर्मिथो ऽसम्बन्धात् तस्यार्थस्य शक्तिभ्रमाद्बोधका इत्येवं सम्बन्धकल्पने वक्रतया च सम्बन्धार्थे षष्ठीघटितादिमद्भाष्यासङ्गतिरेवेति भावः। नन्वसाधोः साधुप्रकृतिकत्वेन तत्सम्बन्धेनैव तत्सङ्गतिरत आह। अत एवेति। प्राग्वत्। यदर्थमिदं पुनरुक्तं तदाह। एतेनेति। उक्तभाष्याविरोधेनेत्यर्थः। एते। साधवः। नन्वेवं तदशक्तिरिति प्रागुक्तजैमिनिसूत्रविरोध एवात आह। जैमिनीति। अयम्। वक्ष्यमाणः। ननु तद्भाष्यकृत्संमतः प्रागुक्तः तदर्थमेव तत्रादावपक्रममर्थत आह। अपीति। साधेति। बोधयन्तीत्यर्थः। अर्थबोधकत्वमेव साधुत्वमिति तद्भावः। अत्र सिद्धान्तसूत्रमाह। अन्य इति। अनेन सूत्रेणोक्तमिति शेषः। तात्पर्यार्थमाह। केचिदिति। अनेके च ते साधुशब्दाश्च तेषां भावस्तत्त्वमिति सूत्रार्थ इति भावः। अस्या-

नुक्तत्वादाह । मनसीति । अन्यथा पूर्वोत्तरग्रन्थासङ्गतिरेवेति भावः । तर्हि केषांचिदेव साधुत्वे तेषां मते शब्दस्य जन्यत्वमित्याह । शब्दे इति । हेतुलब्धमाह । प्रयत्नेति । भागित्वमित्यस्य दृश्यत्वमित्यर्थस्तदाह । दर्शनादिति । तथा च प्रमादादसाधूच्चारणमिति भावः ॥ २७ ॥

किञ्च एकस्यार्थस्यानेकसाधुशब्दत्वमन्याय्यं तस्मादेको ऽनादिरन्ये ऽपभ्रंशाः हस्तः करः पाणिरित्यादयो ऽभियुक्तोपदेशात्सर्वे साधव इत्युक्त्वाः तत्राभियुक्तोपदिष्टः साधुरित्युक्तम् । तत्रेदमाशङ्क्येत गौरिति प्रयोक्तव्ये गाव्यादीनामिव गगर्यादीनामपि प्रमादात्प्रयोगः कुतो नेति । तत्रेदं सूत्रं तदशक्तिश्चानुरूपत्वादिति । तेषामेवाशक्त्योच्चारणमनुरूपत्वात् अर्थतो ऽवयवतश्चानुरूपत्वादिति तदर्थः । तत्रार्थत आनुरूप्याग्रहणे गोयादिशब्दानामप्युच्चारणं प्रसज्येत एकदेशानुरूप्याच्च विभक्तिव्यत्यये ऽपि अश्मकैरागच्छामीति प्रयोगादश्मकेभ्य इत्यर्थावगतिर्भवति । तत्र यद्ययं तदर्थे लौकिकः प्रयोगस्तदा न साधुर्वेदे तु साधुरित्यन्यत् । एवञ्च पतञ्जलिनैकवाक्यता भवति ॥ २८ ॥

(कुं० टी०) गगर्यादीनामपीति । गोशब्दापभ्रंशतयेत्यर्थः । गोयादिशब्दानामिति । गोशब्दापभ्रंशतयेत्यर्थः । वेदे तु साधुरिति । विभक्तिव्यत्ययादिति भावः । पतञ्जलिनेति । समानायामर्थावगतौ शब्दैश्चापशब्दैश्चेति वार्तिकं व्याचक्षाणेनेत्यर्थः ॥ २८ ॥

(क० टी०) पूर्वसूत्रस्य नोक्तार्थः किन्त्वन्य एवेत्याह । किञ्चेति । अनेकेति । बहुव्रीहिरयं इति भावः । अनपभ्रष्टत्वमनादित्वं वा साधुत्वमित्याशयेनाह । अनादिरन्येऽपभ्रंशा इति । नन्वेवं पर्यायाणा-

मप्यसाधुत्वं स्यादत आह । हस्त इति । अभियुक्ताः । कोशकृतः । पर्यवसितमाह । तत्रेति । अर्थे इत्यर्थः । तेषां मध्ये इति । एवञ्चाप-भ्रंशानां न साधुत्वमिति भावः । एवमुपक्रममुक्त्वा प्रकृतमाह । तत्रेदमिति । नान्वित्यादिः । तत्र शङ्कायामुत्तरमुक्तमिति भावः । अत एव तन्न्यायेनाह । तेषामेवेति । गाव्यादीनामेवेत्यर्थः । लक्षणयाह । उच्चारणमिति । विनिगमनाविरहात्पद्यमित्यादाविवाह । अर्थ इति । पदजन्यप्रतीतिविशेष्यतेत्यर्थः । अवेति । शब्दविशिष्टार्थयोरेक-देशात इत्यर्थः । तदर्थः । सूत्रस्य शब्दो ऽर्थः । पूर्वविषयमर्थमि-त्यस्य तात्पर्यार्थ इत्यपौनरुक्त्यं बोध्यम् । तत्राद्यस्य फलमाह । त-त्रेति । तयोर्मध्ये इत्यर्थः । अवयवतस्तत्त्वस्य सत्त्वादिति भावः । आदिना गगर्यादिग्रहणम् । अपिना गाव्यादिसमुच्चयः । द्वितीयसाम्येन सर्वावयवतः तथा सति तत्त्वमेव न सादृश्यमित्याह । एकेति । तद्ग्रहाच्चेत्यर्थः । अत्र विभक्त्यंशे एवाशक्त्यान्यथो-च्चारणं तत्र यदि इदं नोच्येत तदा पदजन्यप्रतीतिविशे-ष्यस्यार्थपदेन ग्रहणात्तस्य चात्र भेदात्तदभावात्तदपभ्रंशाभावे-न ततस्तदर्थावगतिर्न स्यात् । एतदुक्तौ तु तद्भेदे ऽपि अ-वयवतस्तत्सत्त्वात् मल्लग्रामादिवद्भूयसा व्यवहाराद्विशिष्टार्थैकदे-शसाम्यसत्त्वाच्चास्यैव प्राबल्यमिति ततस्तत्सिद्धिः । अवयवैकदे-शशब्दाभ्यां चोभयोरप्येकदेशयोर्ग्रहणमत एव सामान्येन तथो-क्तमन्यथा शब्दतश्चेत्येव ब्रूयादिति भावः । अवगतीति पाठः स चा-र्थसमाप्तौ । विशेषमाह । तत्रेति । द्वितीयनिवेशे सतीत्यर्थः । न साधुरिति । समाने ऽर्थे शास्त्रान्वितो ऽशास्त्रान्वितस्य निव-र्तक इति ऋलृक्सूत्रभाष्योक्तेः । वेदे त्विति । तत्र सर्वेषां व्यत्ययसत्त्वात् । एवं तत्सूत्रार्थवर्णनफलमाह । एवं चेति । तत्र त-स्यासाधुत्वाङ्गीकारे चेत्यर्थः । सम्भवत्येकवाक्यत्व इति न्या-यात् ॥ २८ ॥

अपभ्रंशानां शक्तत्वे इष्टापत्तिः। नन्वपभ्रंशानां शक्तत्वे ऽर्थवत्त्वादर्थवत्सू-त्रेण प्रातिपदिकत्वापत्तिरिति चेदिष्टापत्तेः । अत एव पस्पशायामेवं हि श्रूयते यर्वाणस्तर्वाणो नाम ऋषयो बभूवुस्ते तत्र भवन्तो यद्वानस्तद्वान इति प्रयो-

क्त्र्ये यर्वाणस्तर्वाण इति प्रयुञ्जते याज्ञे कर्मणि पुनर्नापभाषन्ते इत्युक्तं भाष्ये । तत्र यर्वाणस्तर्वाण इति णान्ताज्जसि यर्वाणस्तर्वाणो नामेति प्रयुक्तम् । अत एव उत्वोत्वादि बभूवुरित्यनेन सामानाधिकरण्यञ्च । प्रकृतिप्रत्यययोरुभयोरपि शास्त्रविषयत्व एव साधुत्वं न त्वन्यतरस्य गगरीत्यादि च घटःइत्यस्यैवापभ्रंश इति न ततः सुः । गगरीमित्यादिप्रयुञ्जते चेति केचित् । परे तु साध्वनुशासने ऽत्र शास्त्रे इति भाष्योक्तेः अर्थवत्त्वेन साधूनामेव संज्ञाविधावुद्देश्यत्वमिति नासाधुषु प्रातिपदिकसंज्ञा । यर्वाणस्तर्वाण इत्यादौ सुबप्यसाधुरेव । अत एव परश्चेति सूत्रे भाष्ये किंमस्य द्वयसमित्यसाधुर्वृत्तिजसादृश्ये ऽप्यवृत्तिजत्वादित्युक्तम् । प्रकृत्युद्देशेनैव प्रत्ययानां विधानात्केवलानामेषामसाधुत्वं बोध्यते । तत्र वृत्तिजसदृशत्वात्कश्चित्साधुरिति भ्राम्येत इति प्रत्ययः परश्चेति नियमेनास्याप्यसाधुत्वमुक्तं भाष्ये ऽर्थतः शब्दतश्च प्रत्ययजातीयः स पर एवेत्यर्थेनास्यासाधुत्वं बोध्यते । एवञ्च शास्त्रविहितत्वाभावादमीष्वसाधुत्वमित्युक्तप्रायम् ।

अस्वे अश्वशब्दस्यासाधुत्वमुक्तमन्यत्र । अत एव प्रकृतिपर एव प्रत्ययः प्रत्ययपरैव च प्रकृतिरिति नियमाकारो दर्शितो भाष्ये । साधूनामेव प्रत्ययविधावुद्देश्यत्वेन प्रकृतित्वम् । खण्डशक्तिबोधनद्वारा समुदायसाधुत्वबोधकं व्याकरणमर्थवत्त्वबोधनवत् । एवञ्च भाषानुसारेण क्रियमाणनामोत्तरं विभक्तिरप्यसाधुरित्याहुः । अत एव समानायामर्थावगतौ शब्दे-

श्चापशब्दैश्च शास्त्रेण धर्मनियम इति भाष्ये उक्तम्।
वाचकत्वाविशेषे ऽपि नियमः पुण्यपापयोरिति।
हरिणाप्युक्तम् ॥ २९ ॥

(कुं० टी०) यर्वाण इति। तन्नामान इत्यर्थः। ननु गगरी-शब्दादिभ्यो ऽपि सोरुत्पत्त्यापत्तिरत आह। प्रकृतिप्रत्यययो-रिति। शास्त्रविषयत्वे इति। शास्त्रीयोद्देश्यतावच्छेदकवत्त्वे इत्य-र्थः। घट इत्यस्यैवेति। तथा चार्थबोधकत्वसत्त्वे ऽपि एकत्ववि-शिष्टार्थस्य प्रकृत्यैव क्रोडीकारान्न ततः सुरिति भावः। असा-धुरेवेति। श्रुतौ तु असाध्वनुकरणस्यापि साधुत्वान्न दोष इति भावः। अर्थवत्त्वेनेति। साधव एवार्थवन्तः प्रातिपदिकसं-ज्ञाविषया इत्यर्थः। अत एवेति। यतो ऽनुशिष्टप्रकृतेः प्रयुज्यमा-न एव प्रत्ययः साधुरत एवेत्यर्थः। वृत्तिजसादृश्ये ऽपीति। एव-ञ्च यद्यपि केवलानामेषां साधुत्वं न प्राप्तं तथापि न केवलः प्रत्यय इत्यस्य प्रत्ययसजातीय इत्यर्थ इति भावः। नियमेनेति। ङ्याप्प्रातिपदिकादिति पञ्चमीनिर्देशादेव प्रत्ययानां परत्वे सि-द्धे ऽपीत्यादिः। अस्त्रे। दरिद्रे। तद्बोधकम्। साधुत्वबोधकम्। धर्मनियमः। धर्मार्थो नियमः। असाधुरनुमानेन वाचकः कैश्चिदि-ष्यत इति पूर्वार्धेनापभ्रंशानामवाचकत्वमभिधाय हरिर्मतान्तर-माह। बाचकत्वाविशेषे ऽपीति। अस्तु वा अपभ्रंशादर्थावगमः शास्त्रेण तु पुण्यपापनियमः क्रियते साधुभिरेवार्थो वक्तव्यो नासाधुभिरेवं हि क्रियमाणमभ्युदयकारि भवतीति ॥ २९ ॥

(क० टी०) पतञ्जलिना ऋलक्सूत्रस्थेन वृत्त्यार्थबोधजनकत्व-मर्थवत्त्वं तत्सूत्रे निविष्टमित्याह। नन्वपीति। एकदेशिमतमाह। इष्टापत्तेरित्यादि केचिदित्यन्तेन। अत एव। प्रातिपदिकत्वसत्त्वादेव। पस्पशायामित्यस्य भाष्ये उक्तमित्यत्रान्वयः। तद्ग्रन्थमाह। एवं हीति।

बभूवुरित्यग्रे प्रत्यक्षधर्माणः य एव । अत्र विदितवेदितव्याधिगतयाथातथ्या इति मध्ये भाष्ये ऽस्ति तथापि प्रकृतानुपयोगात्तस्य त्यागः । ते ये उक्तलक्षणास्ते अतस्तत्र भवन्तः पूज्याः प्रयुञ्जते प्रयुक्तवन्तो यतस्ते एतादृशास्ततो लौकिकेष्वर्थेष्वतिवैराग्येणाग्रहाभावात् यद्वास्तु नः किं प्रयोजनं तद्वास्तु वः किं प्रयोजनमित्यर्थे तथा प्रयोक्तव्ये यथा तथा प्रयुक्तवन्त इत्यर्थः । याज्ञे कर्मणि तु साधूनेव प्रयुक्तवन्तस्तदाह । याज्ञे इति । संयता इति तदर्थः । इदं दृढयति । अत एवेति । जसः सत्त्वादेवेत्यर्थः । नन्वेवं शास्त्रविषयतया साधुत्वापत्तिरिति भाष्यासङ्गतिरेवात आह । प्रकृतीति । नन्वेवं रीत्या गगरीत्यादावपि सुबुत्पत्त्यापत्तिरत आह । गगरीति । असाधूनां साधुपदप्रकृतिकत्वादित्यर्थः । तथाच तेनैव तदर्थस्योक्तत्वान्न पुनः सुबिति भावः । तस्य प्रथमोपस्थितित्वेनोक्तहेतोश्च तन्मात्रप्रकृतिकत्वेन कर्मत्वादेरनुक्तत्वादाह । गगरीति । आदिना तृतीयादिपरिग्रहः । केचिदिति सूचितामरुचिं प्रकटयन्सिद्धान्तमाह । परे त्वित्यादिना । संज्ञेति । प्रातिपदिकेत्यादिः । असाधुष्विति । सम्बन्धिनो ऽधिकरणत्वविवक्षया सप्तमी । नन्वेवं कथं तत्र न सात आह । यर्वाण इति । इदं दृढयति । अत एवेति । तस्याप्यसाधुत्वादेवेत्यर्थः । ननु शास्त्रस्य तत्त्वे किमित्यवृत्तित्वमत आह । प्रकृतीति । तत्र प्रकृतिभावादिति भावः । तत्र । उक्तप्रयोगे अपिरस्यैव समुच्चायकः । अनतिप्रसङ्गाय नियमस्वरूपमाह । अर्थत इति । एतदनुक्तौ वस्धातोरपि पूर्वप्रयोगो न स्यादत इदमुक्तम् । द्वितीयानुक्तौ कर्मशब्दस्यापि पूर्वप्रयोगो नातस्तदुक्तमत एव प्रत्ययजातीयइत्युक्तं न तु प्रत्यय इत्येव । एवञ्च । तस्यासाधुत्वे च । अर्थ विशेषान्तर्भावेणैव साधुत्वमवश्यं वाच्यमिति ध्वनयन्नर्थत इत्यावश्यकमिति सूचयन्नाह । अस्वे इति । अन्यथा तस्य तत्रासाधु त्वं न स्यात् शब्दतस्तत्सारूप्यस्य सत्त्वात्सदृशयोरभेदादिति भावः । उभयोः शास्त्रविषयत्व एव साधुत्वं नान्यतरस्येत्यत्र मानमाह । अत एवेति । तदाशयमाह । साधूनामेवेति । ननु वाक्यस्य पदस्य साधुत्वं, व्याकरणबोध्यं तु प्रकृत्यादीनामिति कथं साधूनामेवेत्यत आह । खण्डेति । प्रकृ-

त्यादीत्यर्थः । निर्विवादत्वेन सर्वाभिमतदृष्टान्तमाह । अर्थेति । यथा तत्तदर्थबोधनद्वारा समुदायार्थबोधनं तथेति भावः । पूर्वमतासाङ्गत्यमेवेत्याह । एवञ्चेति । तेषामेव प्रकृतित्वे चेत्यर्थः ॥ २९ ॥

साधुत्वस्य जातित्व न सङ्करः ।

ननु साधुत्वस्य जातित्वे कत्वादिना सङ्कर इति चेन्न । ययोर्जात्योः परस्परासामानाधिकरण्येनैव सिद्धिः परस्परमाश्रयभेदकता च लोकसिद्धा तयोः साङ्कर्यस्यैव दोषत्वात् । आश्रययोर्भेदभङ्ग एव हि साङ्कर्यं दूषकताबीजभूतादृशजात्योर्यत्र साङ्कर्यप्रसङ्गस्तत्रोभयवैलक्षण्यं स्वीकार्यं, यथा नृसिंहे अश्वतरे वा । ययोस्तु सामानाधिकरण्येनैव सिद्धिः तयोः सामानाधिकरण्यस्य व्याप्यव्यापकभावापन्नजात्योः साङ्कर्यस्यैवादोषत्वात् ।

एवञ्च साङ्कर्यमुपाध्योरपि दोषाय यदि तत्रापि आश्रयभेदप्रसङ्ग इति स्पष्टं श्रीहर्षकृतखण्डने न तु साङ्कर्यस्य सर्वथा जात्यभावकल्पकत्वं मानाभावात् । एवञ्च भूतत्वमूर्तत्वे पृथिवीत्वशरीरत्वे च जातिरूपे एव । क्रियासमवायिकारणतावच्छेदकतया मूर्तत्वादेरिव भूतादिपदशक्यतावच्छेदकतया भूतत्वादेरपि जातित्वात् । न हि कारणतावच्छेदकतयैव जातिसिद्धिर्न शक्यतावच्छेदकतयेति राजाज्ञास्तीति दिक् ॥ ३० ॥

(कुं॰ टी॰) सङ्कर इति । केवलसाधुत्वं साधुगकारे केवलकत्वमसाधुककारे उभयमित्यर्थः । ययोर्जात्योरिति । यथा-नरत्वसिंहत्वयोरेकत्र समावेशान्नरसिंहत्वं भिन्नमित्यर्थः । भेदभङ्ग एवेति । नरत्वाश्रयो ऽन्यः सिंहत्वाश्रयश्चान्य इत्येवं भेद-

स्यासिद्धिरेवेत्यर्थः । अत एव गुणगतजातौ साङ्कर्यं न दोषायेति न समाहितम् । अश्वतरे इति । तत्राश्वत्वगर्दभत्वयोः सङ्करः । ययोस्त्विति । पृथिवीत्वद्रव्यत्वयोः समावेशस्यादूषणत्वादिति भावः ।

स्पन्दसमवायिकारणतावच्छेदकतया मूर्तत्वं जातिः तत्साङ्कर्याद्भूतत्वं न जातिः भूतत्वस्योपाधित्वात्तत्साङ्कर्यं तु मूर्तत्वस्य जातित्वे न बाधकमिति तार्किकमतं निराकरोति । उपाध्योरपीति । इदं च प्राचीनखण्डनम् । दीधितिमते तु जन्यद्रव्यसमवायिकारणतावच्छेदकतया पृथिव्यादिचतुष्टयवृत्तिरेव भूतत्वं जातिः । आकाशे भूतपदव्यवहारस्तु बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वप्रयुक्तो भाक्तः । मानाभावादिति । स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावनियमस्य भङ्गप्रसङ्ग इति तदुक्तिस्तु निर्युक्तिकेति भावः । शरीरत्वे चेति । केवलपृथिवीत्वं घटादौ केवलशरीरत्वं तैजसादिशरीरे अस्मदादिशरीरे चोभयमिति साङ्कर्यात् शरीरत्वं न जातिरिति तार्किकाः । राजाज्ञास्तीति । लाघवरूपयुक्तेस्तुल्यत्वात् । अत एव जलपदशक्यतावच्छेदकतया जलत्वं जातिरिति वर्धमानः । यत्तु द्रव्यवृत्तिकपालादौ द्रव्यान्तरोत्पत्तिवारणाय तत्प्रतिबन्धकतावच्छेदकतया भूतत्वजातिरिति तन्न । मूर्तत्वमादाय विनिगमनाविरहात् ॥ ३० ॥

(क० टी०) चरमदोषमत्रोद्धर्तुं शङ्कते । ननु कत्वादिना सङ्कर इतीति । एवञ्च साधुत्वं जातिः कथमिति भावः । यद्यपि कौस्तुभे द्वेधान्यथा समाहितमत्र तथापि सिद्धान्तभूततृतीयप्रकारमाह । ययोरिति । घटत्वपटत्वाद्योरित्यर्थः । स्यैवेति । साङ्कर्ये हि त-

योर्जात्योरवैधर्म्ये तदाश्रययोर्भेदस्य भङ्गापत्तेः। तदाह। आश्रयेति। ननु घटत्वपटत्वाद्योस्तादृशयोरपि न क्वचित्साङ्कर्यप्रसङ्ग इति किमस्य लक्ष्यमत आह। तादृशेति। यत्र। आश्रये। यथेति। तथाच नृसिंहत्वमश्वतरत्वं तत्र भिन्नमेव न तूभयजात्याक्रान्तत्वमिति भावः। आद्यव्यावर्त्यमाह। ययोस्त्विति। घटत्वकलशत्वाद्योरित्यर्थः। कार्यतावच्छेदकतया। विनिगमनाविरहादिति भावः सामेति। परस्परेत्यादिः। क्वचित्तथा पाठ एव। तयोराश्रयाभेदकत्वेन तद्भेदभङ्गरूपदूषकत्वाभावादाह। तयोरिति। साङ्कर्यस्य। एकत्र समावेशमात्ररूपस्य। एवमग्रे ऽपि। स्वसमानाधिकरण्यस्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वं यत्र तत्र स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावः, अस्ति चैतद्व्याप्यजातिविशिष्टव्यापकजाताविति नियमभङ्गस्य जीर्णनैयायिकैः तद्बीजत्वस्योक्तत्वेन तव तस्येष्टत्वेन दृष्टान्ततयाह। व्याप्येति। एवञ्च तादृशजात्योः साङ्कर्यस्य प्रसक्तस्य दूषकत्वे च। उपाध्योः। तादृशोपाध्योः। अपिना तयोरेव समुच्चयः। यद्यप्येवं तथापि लक्ष्यं स्वल्पमित्याशयेनाह। यदीति। आकाशत्वकालत्वाद्योर्मिथो ऽसामानाधिकरण्येनैव सिद्धिर्मिथ आश्रयभेदकृता च लोकसिद्धा तयोरेकत्रेश्वरे साङ्कर्येण तत्रोभयवैलक्षण्यस्वीकारेऽन्यथाश्रयभेदभङ्गप्रसङ्गो वैधर्म्यभेदभङ्गप्रसङ्गादिति भावः। खण्डने। न्यायमतखण्डने। तथा च साङ्कर्यस्य जातिबाधकत्वमप्येतदेव यत्तद्वैधर्म्यकृतभेदप्रसञ्जकत्वरूपमिति फलितम्। तदाह। न त्विति। मानेति। उक्त एवाशयः। एवञ्च। तस्य सर्वेण तदभावाकल्पकत्वे च। आदिना कार्यतावच्छेदकपरिग्रहः। वैषम्यं परिहरति। न हीति। मीमांसकमते ऽप्यसति बाधके समनियतधर्मान्तराभावे च लाघवाच्छक्यतावच्छेदकतयैव जातिसिद्धिस्सुवचा। किञ्च भौतिकसृष्टिकारणतावच्छेदकतया भूतत्वसिद्धिरेवं गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिवद्भोगकारणतावच्छेदकतया शरीरत्वजातिसिद्धिस्तदाह। दिगिति॥ ३०॥

देशभाषिकानामसाधुत्वम्। देशभाषानुसारेण कृतानां कुञ्ची मञ्ची आप्यकोण्डेत्यादिनाम्नामसाधुत्वमेव। टिघुभादि-

संज्ञानां तु शिष्टप्रयुक्तत्वात्साधुत्वमेव । सर्वशब्दानां सर्वार्थवाचकत्वे ऽपि वृद्धिरादैजित्यादीनामज्ञातशक्तिज्ञापकसङ्केतरूपतया विधित्वमेव । यत्तु ।

व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित् ।
नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत् ॥
वृद्ध्यादीनां च शास्त्रे ऽस्मिन् शक्त्यवच्छेदलक्षणः ।
अकृत्रिमो ऽभिसम्बन्धो विशेषणविशेष्यवदिति।

तत्र सङ्केते कृते तत्तत्सङ्केतज्ञानरूपप्रकरणवशात्तस्यैवोपस्थितिर्नान्यस्येति फलितनियमपरम् ।

तदेतद्विशेषणविशेष्यवदित्यनेन सूचितम् । यथा नीलो घट इत्यनेन विद्यमान एव घटे नीलसम्बन्धः पुरुषेण बोध्यते न तु नीलादियोगः क्रियते नील एव न पीत इति नियमश्च फलति तद्वदित्यर्थात् । पाणिन्युपदेशादिरूपसङ्केतग्राह्यत्वात्तत्संज्ञात्वस्य संज्ञानामनित्यत्वव्यवहारो ऽपि । वाचकताबोधकत्वे ऽपि तदनुत्पादकत्वान्न शब्दार्थसम्बन्धनित्यताहानिः। तेष्वेव वृद्धिपदवाच्यत्वोपदेशो वक्त्रिच्छाया एव नियामकत्वाच्च यदृच्छाशब्दत्वव्यवहारः स्वेच्छया संज्ञाः क्रियन्त इति च व्यवहारः । वेदमात्रप्रसिद्धशब्दभिन्नत्वरूपलौकिकत्वादुक्तरीत्या साधुत्वाच्च तेषां शास्त्रविषयता । किञ्च सर्वेषां सर्वार्थवाचकत्वमस्माभिर्दुर्ज्ञेयं विशिष्यसकलार्थशब्दज्ञानाभावात् । सामान्यज्ञानं तु न बोधोपयोगि । योगिदृष्ट्या तु तथा व्यवहारः शास्त्रे । स्पष्टश्चेदं सर्वमृलृक्सूत्रे भाष्ये इत्यन्यत्र विस्तरः । देशभाषया क्रियमाणनाम्नः सु-

क्तवाकादौ सङ्कल्पादौ चौल्लेखस्तु बर्बराणां भ्रान्त्यैव । तस्माद्घोषवदाद्यन्तरन्तस्थं द्व्यक्षरं वा नाम कर्तव्यं कृतं कुर्यान्न तद्धितमिति गृह्यसूत्रोक्तनाम्नैव साधुना तदुचितम् ॥ ३१ ॥

(कुं० टी०) असाधुत्वमेवेति । शास्त्रव्यवहारमार्गेणैव नामकरणात् । ननु सर्वे सर्वार्थवाचका इति मते वृद्धिरादैजित्यादीनां नियामकतया विधित्वाभावादाधुनिकसंज्ञात्वासङ्गतिरत आह । सर्वार्थवाचकत्वे ऽपीति । अयम्भावः शब्दार्थसम्बन्धो योग्यतालक्षणो ऽभिप्रेतः । सर्वो हि शब्दः संज्ञात्वेन विनियुज्यमानो योग्यत्वात्सर्वत्रार्थे सम्बद्धः । शक्त्यवच्छेदमात्रे तु संज्ञाकर्तुर्व्यापारः शब्दार्थसम्बन्धस्य नित्यत्वात् । एवञ्च शक्त्यवच्छेदान्नियमत्वमज्ञातशक्तिप्रकाशकत्वाच्च विधित्वमपीति । व्यवहारायेति । क्वचित्संज्ञिनि संज्ञाया नियमो व्यवहारायेत्यर्थः । डित्थाद्यर्थे डित्थादिपदसम्बन्धो नित्य एव, गवादौ गोशब्दादीनामिवेत्यर्थः । तदिति । नियमपरमित्यत्रान्वयः ।

वक्त्रिच्छाया इति । नन्वेवं शब्दार्थसम्बन्धस्यानित्यत्वापत्तिरिति चेन्न । वक्त्रिच्छया शक्तिप्रकाशनमित्यर्थात् । ऐजादिपदे कृत्वाद्यापादनं सङ्गमयति वृद्धिरादैजित्यादीनां लोकप्रयुक्तत्वरूपलौकिकत्वाभावादाह । वेदमात्रेति । लौकिकत्वादिति । लौकिकप्रयोगे शास्त्रप्रवृत्तेरावश्यकत्वादिति भावः । सूक्तवाकेति । अमुकशर्मा आयुराशास्ते इत्यादिसूक्तवाकप्रयोगो यागेषु सङ्कल्पश्च यद्यपि मानसो व्यापारस्तथापि शब्दप्रयोग एव तथैव विधानात् । अन्तरन्तस्थमिति । अन्तः मध्ये अन्तस्था यरलवा यस्य ॥ ३१ ॥

(क० टी०) यत्तु स्वेच्छयेति पक्षे टिघुभाद्याधुनिकसंज्ञावत् आ-

प्यकोण्डेत्यादीनामपि साध्वसाधुबहिर्भावः कथं तदर्थे ऽनादिप्र-युक्तत्वे सति शक्तिवैकल्यादिनान्यथोच्चारणविषयत्वस्यैवासाधु-पदार्थत्वात् । किञ्च तदर्थे यस्य कस्यापि साधुत्वेन शास्त्रे ऽन्वाख्याने हि सो ऽन्यस्यासाधुत्वं बोधयेत्, न च तथा प्र-कृते ऽस्ति । एवं यो यत्रार्थे ऽनादिप्रयुक्तः सन् व्याकरणबोध्यः स तत्रार्थे साधुरिति तत्त्वं बोध्यम् । अत एव सकलदेशशिष्टा यज्ञा-दिषु तत्तदाधुनिकसाङ्केतिकनामग्रहणे प्रत्यवायं न मन्यन्ते । अन्य-था साधूनेव प्रयुञ्जीत नासाधूनित्यादिनिषेधसद्भावात्तदापत्तिर्दु-र्वारेति प्राञ्चस्तन्नेत्याह । देशेत्यादि । ननूक्तजातिविशेषस्याश्रय-स्य व्याकरणसंस्कृतत्वेनाप्यादाविव टिघुभादावर्थाभाव इति ते-षामप्यसाधुतापत्तिरत आह । टिघुभेति । धर्मबुद्ध्येति भावः । तथाच मुख्यमिदमेव तदनुमापकमिति तत्र व्याकरणपदमुपलक्षणम् । तेन व्याकरणसंस्कारकल्पनाद्यथाश्रुतमेव वेति तत्र तत्त्वमेवेति ततो वैलक्षण्येनात्र न प्रत्यवायो यज्ञादौ तत्र त्वस्त्येवेति भावः । यत्तु उक्तसाधुत्वमाधुनिकसंज्ञासु नाव्याप्तं सर्वे सर्वेति पक्षव्यव-हारायेति नियमबोधनेन तासामप्यनादित्वेनादोषादिति प्राञ्चस्त-न्नेत्याह । सर्वेति । वाचकत्वस्य गृहीतस्यैव बोधजनकतद्ग्रहस्य व्यवहारतः सङ्केतेन वा जायमानत्वाद्विधित्वसम्भवे इति भावः । नन्वेवं हरिविरोधो ऽत आह । यत्त्विति । अत्र केचित् क्वचित्सं-ज्ञिनि संज्ञानां नियमो व्यवहारायेत्यन्वयः । नियतव्यवहारा-येति तदर्थः । ननु विधिरेव किं न स्यादत आह । नित्य एवेति । डित्थादिष्वर्थेषु डित्थादिपदानां नित्य एव सम्ब-न्धो गवादिपदानां गवाद्यर्थेष्विवेत्यर्थः । सर्वेति पक्षेणेदम् । सामा-न्येनोक्तमेवार्थं विशिष्याह । वृद्ध्यादीति । अस्मिन् व्याकरणे वृद्ध्या-दीनां शब्दानां शक्तिसङ्कोचलक्षणो नियमो व्यवहारायेत्यन्वयः । अ-वच्छेदः । सङ्कोचः । इष्टान्यार्थनिरासाय च नियमः । तत्र हेतुरकृ-त्रिम इति । यत इत्यादिः । कृत्रिमत्वमाधुनिकत्वम् । यथा गुणद्र-व्ययोर्गुणे विशेषणत्वं द्रव्ये विशेष्यत्वम् । अकृत्रिममनादिसिद्धमेव न त्वाधुनिकं तद्वत्संज्ञाः संज्ञिसम्बन्धो ऽकृत्रिम एवेत्यर्थ इत्या-हुः । यत्तु इदं गोत्रसंज्ञाविषयमिति तन्न । सङ्कोचे मानाभावात् । वृद्ध्यादीनामिति विरोधाच्च । यदपि नियमः सङ्केतग्रह इ-

स्यर्थ इति तदपि न । उक्तत्वात्तदेतत् ध्वनयन्नन्यथा आह । तत्रेति । तत् इत्युक्तं तत्र सर्वत्र तत्रेति यावत् । अत एवाह । तत्तदिति । ज्ञानेति । उभयाकाङ्क्षासहकृतेत्यर्थः । तस्यैव । तस्य तस्यैव परमिति न तु मच्छास्त्रे वृद्धिशब्देनादैच एव ग्राह्या इति शाब्दनियमपरम् । तथा सति विनिगमनाविरहादादैचो वृद्धिशब्देनैव ग्राह्या इति नियमस्याप्यापत्तावाकारादीनां स्वशब्दादिभिर्व्यवहारानापत्तेः । तदस्मिन् वृद्धायेत्यादावनिष्टापत्तेश्च । अत्र पक्षे इत्थमर्थेऽनियमः शक्तिबोधनं शक्तिस्तु नित्येत्याह । नित्य इति । एवञ्च वृद्धिशब्दस्याप्यनेकेष्वर्थेषु शक्तिरस्त्येव तद्बोधनफलकं शास्त्रं अज्ञातशक्तिबोधकत्वात् । अपत्यं पौत्रेति सूत्रस्य कैयटोक्तनियमानुपपत्तेश्चतदाह । वृद्धादीनां चेति । अवच्छेदो निश्चयः । शब्दार्थस्यानवच्छेदे इत्यादौ तस्य तदर्थकत्वस्य दर्शनादिति तदेतत्संबन्धविशेषणम् । अत एवात्राह । तत्त्विति । तेन । तदुक्तवाक्येन । वाक्यान्तराशयेनाह । नीलादीति । सामर्थ्यादाह । नील एवेति । एवञ्चेदमेवहरिसंमतं न तत् परिसंख्यायां चात्र शास्त्रे प्रायेण नियमव्यवहारः । अत्र मते तस्मिन्नित्यादौ न दोषः । तादृशज्ञानसत्त्वे ऽप्युभयाकाङ्क्षाया अभावात् । तत्र साहचर्येण लौकिकार्थावगतेरिति बोध्यम् । नन्वेवं न हि संज्ञानित्येति तद्धितार्थोत्तरेति सूत्रभाष्यविरोधापत्तिरत आह । पाणिन्युक्तेति । आदिना वार्तिककारीयादिपरिग्रहः । संज्ञाभूततत्पदवाच्यत्वज्ञानस्यैतच्छास्त्रज्ञानात्प्रागभावे नित्यत्वमिति तद्भावः । अन्यथा वैयाकरणानां शब्दस्य नित्यतया संज्ञायाश्च शब्दस्वरूपतया यथाश्रुतभाष्यासङ्गतिः स्पष्टैव । घटादौ घटादिपदवाच्यत्वज्ञानं तु प्रवाहनित्यमिदं तु नेति विशेषः । नन्वेवं सिद्धे शब्दार्थसम्बन्धे इति वार्तिकादिविरोधो ऽत आह । वाचकतेति । नन्वेवं ऋलृक्सूत्रभाष्यादौ यदृच्छाशब्दत्वव्यवहारासङ्गतिरत आह । तेष्वेवेति । आदैक्ष्वेवेत्यर्थः । एवेनान्यव्यवच्छेदः । इदमुपलक्षणं वृद्धिपदेनादैज्वाचकत्वस्यापि । हरिव्यवहारो ऽप्येतावतैवेत्याह । स्वेच्छयेति । नन्वेवमप्यसाधुत्वात्कथं शास्त्रविषयतात आह । वेदेति । कर्णोभिर्देवास इत्यादीत्यर्थः । इदं

चान्यत्रावश्यकम् । एतेन तत्सम्बन्धस्यानादित्वेन वा सामयिकत्वं-लौकिकत्वमित्यपास्तम् । नन्वेवमप्यसाधुत्वात्कथं सा अन्यथा साध्वनुशासने इति भाष्यविरोधापत्तेरत आह । उक्तेति । शिष्टप्रयुक्तत्वेनेत्यर्थः । उक्ते ऽर्थे भाष्यसंमतिमप्याह । स्पष्टश्चेदमिति । सर्वधादीनां तत्त्वेन तत्त्वासत्त्वं गाव्यादीनामसाधुत्वमशास्त्रविषयत्वं च तेषां यदृच्छाशब्दत्वेन व्यवहरणं च । तद्भाष्यमनुपदमेव स्फुटी भविष्यति । इदञ्चाभ्युपेत्योक्तम् । वस्तुतस्तदेव नेत्याह । किञ्चेति । ननु तथाज्ञानाभावे ऽपि सामान्यज्ञानमस्त्येवात आह । सामान्येति । अतिप्रसक्तत्वादिति भावः । ननु तर्हि स व्यवहार एव नात आह । योगीति । शास्त्रे ऽत्रपान्तजले च एतदुपपत्तिरूदूघोतादावित्यादिन्यत्रेतिसञ्ज्ञादाह । देशेति । एवञ्चेत्यादिः । वाचकत्वस्य सत्त्वेन साधुत्वभ्रान्त्यैवेत्यर्थः । तर्हि कथं कार्यमत उपसंहरन् आह । तस्मादिति । तेषामसाधुत्वादित्यर्थः । घोषवानादिर्यस्य तत् । घोषशब्दो धर्मपरः । अन्तर्मध्ये ऽन्तःस्थाः यणः यस्य । अन्तःस्थाशब्द आकारान्तः । कृतं, तदन्तमेव । अत एवाह । नेति । तद्धितम् । तदन्तम ॥ ३१ ॥

नामदेवताकीर्तनम् । किञ्च अग्न्यादिनक्षत्रदेवता उक्त्वा नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतमिति वेदाङ्गज्योतिषोक्तम् । नक्षत्रनाम च तदुपयोगिनामकरणे नाक्षत्रनामनक्षत्रपादाक्षरादिकार्यमिति वृद्धाः । गृह्यपरिशिष्टे च कचित्तथैवोक्तम् । एतदेव जातकर्मप्रकरणे नक्षत्रनाम च निर्दिशति तद्रहस्यं भवतीत्यापस्तम्बेनोक्तम् । तदेव चाभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यातामौपनयनादित्याश्वलायनेनोक्तम् । एवमेव नामकरणे शिष्टानामाचारश्च । अत एव ज्यौतिषं यज्ञकर्मणीत्युक्तम् ।

तत्तन्नक्षत्रवाचकेभ्यो जातार्थप्रत्यये निष्पन्नं त-

त्तन्नक्षत्रनामेति केचित्। तत्र पुत्रस्य नाम गृह्णाति रौहिणायतिष्यायेति बौधायनसूत्रं मूलम्। यत्त्वसावसावित्यादिश्च नामनी इत्याश्वलायनेनोक्तं तत्तु सन्दिग्धम्। यद्यपि देवत्रातेनानुराधो देवदत्त इति प्रयोक्तव्यमित्युक्तं तत्र सूत्राक्षरानुग्रहाश्चिन्त्यः। शाङ्खायनादयश्च ज्यौतिषोक्तमेवाद्रियन्ते। इदानीमाश्वलायना देवत्रातोक्त्या निर्दिशेद्यजमानस्य नाम सांव्यवहारिकं नाक्षत्रं च यथा कृष्णशर्मा रौहिण इत्यपीत्याश्वलायनश्रौतकारिकोक्त्या च तथैवाचार इति नामकरणेऽपि तदेव नाक्षत्रं नामेति च वदन्ति। परे तु बौधायनादिवाक्ये रोहिण्यादिपदं तन्नक्षत्रजातत्वेन तत्तद्देवतानामोपलक्षणम्। एवं हि ज्यौतिषेण तेषामेकमूलकल्पनालाघवं भवति विकल्पस्यानौचित्याच्च। संज्ञापर्यायनामशब्देन पञ्चकादिशब्दवत् केवलयौगिकश्रावणादिशब्दानां ग्रहीतुमनौचित्याच्च। अभिवादनं प्रयोजनमस्येत्यर्थकाभिवादनीयशब्देन तस्य वक्तुमशक्यत्वाच्च तस्य साधारणत्वादित्याहुः॥ ३२॥

(कुं० टी०) अग्न्यादीति। अग्न्यादयो नक्षणत्राणां देवताः। एताभिरिति। अग्निदत्तेत्यादिवत्। ज्यौतिषोक्तमिति। अश्विन्यादिचरणाक्षरेण कृतं चूडामणिरित्यादिकं च नाम यज्ञकर्मोपयोगीत्यर्थः। तथैवोक्तमिति। नाक्षत्रं नाम इदमेवोक्तमित्यर्थः। प्रकरणे इति। उक्तमित्यत्रान्वयः। नाम चेति। चकारेण नामान्तरसमुच्चयः। निर्दिशति। लिखति। रहस्यमिति। अप्रकाश्यत्वात्। तदेव चेति। आश्वलायनेनाभिवादनीयं चेत्यादि

तदेवोक्तमित्यन्वयः । व्यावहारिकं नाम कृत्वा अभिवादनीयमभिवादनप्रयोजनं नाम उपांशु कर्तव्यं तच्च मौञ्जीबन्धनान्तं मातापितरावेव जानीयातामुपनयनकाले चानेननाम्नाभिवादयेति कुमारं प्रति वाच्यम् । नाम गृह्णातीति श्रौते कर्मणि अयं यजमानो ऽमुकशर्मणे पुत्रायायुराशास्ते इत्यादिप्रयोगात् । स च दर्शपूर्णमासयोर्वेदिमध्ये यजमान उपविश्य पुत्राणां नाम गृह्णाति अमुकशर्मा सन्तनोतु इत्यादिप्रयुज्यते । यत्त्वसाविति । अयं यजमान इत्यस्यानन्तरं नामद्वयमुच्चार्य आयुराशास्ते इति होता ब्रूयादित्यर्थः । असावसाविति । इदं नामद्वयप्रदर्शनम् । संदिग्धमिति । कीदृशं नामद्वयमित्यनिश्चयात् । देवत्रातेनेति । असौ देवदत्त असौ आनुराध इत्येवं नामद्वयं प्रयोक्तव्यमित्याश्वलायनवाक्यार्थ इति भावः । सूत्राक्षरेति । तत्सूत्रबलात्तादृशनामद्वयस्यालाभात् । आश्वलायना इति । देवत्रातोक्तकारिकोक्त्या चाचरन्तीत्यत्रान्वयः । सांव्यवहारिकम् । व्यवहारार्थंसङ्केतितम् । अत्रायमाचरः स्वकुलदेवतानुसारेणामुकभक्त इति कांस्यपात्रे नामलिखित्वा मासनाम कुर्यात् । तच्च ।

कृष्णो ऽनन्तो ऽच्युतश्चैव वैकुण्ठो ऽथ जनार्दनः ।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिरिति ॥

अत्र चैत्रादिर्मार्गशीर्षादिर्वा क्रमः । ततो नक्षत्रनाम ततो द्व्यक्षरं चतुरक्षरं चेत्यादिशर्माद्यन्तव्यावहारिकं नाम लेख्यमिति ॥ ३२ ॥

(क० टी०) पक्षान्तरं सूचयन्नाह । किञ्चेति । कृत्तिकादिक्रमेणेति भावः । अत्र एता वै इति एतासामिति वा वाच्ये एताभिरित्युक्त्या नाम्नस्तद्घटितत्वं सूचितम् । तत्त्वञ्च तत्प्रातिपा-

दकशब्दघटितत्वम् । अत एव कुलदेवतानक्षत्रसम्बद्धं पिता नाम कुर्यादिति शङ्खोक्तिः । अन्यथा मासनाम गुरोर्नाम दद्याद्बालस्य वै पितेति गार्ग्यवत् ब्रूयात् । तथाच तदपि भक्तशर्मेत्याद्य- ग्निदत्तशर्मेत्यादि वा बोध्यम् । या एता नक्षत्रदेवता उक्तास्ता- भिरेताभिर्यन्नाम तद्यजमानस्य यज्ञकर्मणि नक्षत्रजं नक्षत्रात्त- दुत्पत्तेर्ज्ञातं शास्त्रज्ञैः स्मृतमित्यर्थः । यजेत्युक्त्या ऋत्विक्कर्तृक- यजमाननामोल्लेखविषयताऽस्य सूचिता । यज्ञेत्यनेनान्यनिरा- सः । नक्षत्रमित्यनेनान्यस्य तत्त्वनिरासः । नक्षत्रसम्बन्धीदमेव नामेति भावः । तर्ह्यन्यत्र कथमत एतत्प्रसङ्गादाह । नामकर- णे इति । अत्र मानं सूचयन्नाह । गृह्येति । आश्वलायनेत्यादि । छे- च । छेऽपि । एकवाक्यतार्थमाह । एतदेवेति । नक्षत्रपादाक्षरादीत्य- र्थः । जातेति । जातं वात्सप्रेणाभिमृश्योत्तरेण यजुषाज्यस्य आ- धायोत्तराभ्यामभिमन्त्रेण मूर्द्धन्यवघ्राणं दक्षिणे कर्णे जाप इत्य- ग्रे इत्यर्थः । वात्सप्रो दिवस्परीत्यनुवाकः । उत्तरेण । तस्मिन्नह- मिति यजुषा । उत्तराभ्यामङ्गादङ्गादभ्याभवेति द्वाभ्याम् । अनयोरे- वाग्रे उभयत्र सम्बन्धः । जापो जपः उक्तमन्त्रान्तोक्त्यसावित्यव्य- वहितं नक्षत्रनाम्नो जपः । सम्बुध्येति सूचयितुमव्यवहितोक्तत्व- साधर्म्याज्जातकर्माव्यवहितकालिकनामकर्माह । नक्षत्रेति । चेना- ग्रिमव्यावहारिकसमुच्चयः । निर्दिशतीति । वर्तमानसामीप्ये इति लट् । निर्देशः । व्यवहितोच्चारणम् । नन्वेतस्यैवात्र निर्देशः कुतो ऽत आह । तदिति । नक्षत्रनामेत्यर्थः । रहस्यम् । सर्वाज्ञेयम् । तथाच भाविसंज्ञयात्र निर्देशः । एतेन तस्याकृतत्वात्कथमत्र निर्देश इत्य- पास्तम् । अनेन वक्ष्यमाणकालवदयमपि नाम कर्मकाल इत्यु- क्तं भवति । अत एवाश्वलायनेन कालान्तरं नोक्तम् । जातक- र्मप्रकरणे एव तत्प्रयोगसमाप्त्युत्तरं नाम चास्मै दद्युरित्याद्युक्तं च । तत्र जातकर्मानन्तरमेव वा नाम चास्मै दद्युरिति गृह्य- स्थचकारस्वरसेन जातकर्मसमानकालिकता लाभादिति भ- ट्टोजिदीक्षितैर्व्याख्यातं च । वृत्तिकारो नारायणो ऽप्येवम् । प्राग्व- दाह । तदेव चेति । तदेकवाक्यतापन्नयुक्तमेव चेत्यर्थः । अभीति । आहूतादिः सन् येन नाम्ना ऽभिवादयते तत्तदभिवा- दनीयमसांव्यवहारिकं तच्च समीक्षेत कुर्यात् । चेनपू -

वोक्तसांव्यवहारिकसमुच्चयः । तदभिवादनीयं मातापितरावेव विद्यातां आ उयनयनात् । तदारभ्य उपनीतस्य त्वाचक्षते अनेन नाम्नाभिवादयस्वेति भाष्यकृद्‌वृत्तिकारौ । आचारसंवादमप्यत्राह । एवमेवेति । आचारः । आचारो ऽपि । लेखश्चेति पाठे स लेखो ऽपि । तण्डुलोपरि लेखो ऽपीत्यर्थः । अत एव । नामकरणे सर्वसम्मततया तस्यैव सत्त्वेनान्यस्याप्रसिरेव । मन्तातरमाह । तत्तदिति । प्रत्यये सति लुप्ते वा । दर्शपूर्णमासेष्टिप्रकरणस्थं तमाह । यस्त्वसाविति । अयं यजमानो ऽसावित्यत्रासावसाविति यजमाननामनी सांव्यवहारिकनाक्षत्रे च प्रथमान्तेनादिश्यायुराशास्ते इत्यादि होता ब्रूयादित्यर्थः । देवेति । तद्भाष्यकृतेत्यर्थः । तत्रान्याचारविरोधो ऽपि दोष इत्याह । शाङ्खेति । अत एव चः तत्रैवेति भावः । एवेनोभयव्यवच्छेदः । तत्रैवाचारभेदमाह । इदानीमिति । चरति तत्रैवेति भावः । एवञ्च मतभेदस्तत्र सिद्धः । अतो नामकरणे ऽपि मतभेदमाह । नामकरणे ऽपीति । इमं विरोधं परिहरन्सिद्धान्तमाह । परे त्विति । आदिनोक्तकारिकादेवत्रातपरिग्रहः । देवतानामेति । तदतद्घटितनामेत्यर्थः । तेषाम् । बौधायनादीनाम् । ननु व्रीह्यादिवद्विकल्प एवास्त्वत आह । विकल्पेति । अष्टदोषदुष्टत्वादिति भावः । ननु तथापि अन्यत्रेवात्रापि स एवास्त्वत आह । संज्ञेति । तेषु वाक्येष्वित्यर्थः । ननु नेदं सर्वं नामकर्मप्रकरणस्थमिति असति बाधके नामशब्दो वाचकसुबन्तपर एवास्तु, किञ्च वृद्ध्यादेः संज्ञात्वस्य पाणिनेर्ऋतकादेस्संज्ञात्वं भगवत इष्टत्वेन कृतं कुर्यादित्यादितत्सूत्रे उक्तत्वेन च तेन तद्ग्रहणे बाधकाभावादाह । अभीति । प्रागुक्ताश्वलायनीये इत्यर्थः । अत्र हेतुमाह । तस्येति । श्रावणादेरित्यर्थः । अभिवादनकार्ये एव तस्य श्रावणत्वं नान्यकार्ये इत्यस्याभावादित्यर्थः । एवञ्च तत्र तथा सुवचत्वे ऽपि नामकरणे तथा दुर्वचमिति तेषां तथाचारस्तत्रायुक्त एवेति भावः ॥ ३२ ॥

प्रकरणार्थनिष्कर्षः । अत्र तत्त्वं महान्तो विदाकुर्वन्तु । यत्तु कुश्रीत्यादीनां साधवसाधुबहिर्भूतत्वं शास्त्राविष-

थता चेति तन्न । तृतीयकोटेरभावात् । एवं विधेभ्यो ऽन्यत्र शास्त्रविषये साध्वसाधुबहिर्भावस्य क्काप्यदृष्टत्वाच्च । अत एव ऋलृक्सूत्रे लृकारोपदेशे प्रयोजनं यदृच्छाशब्दे दध्यलृतकाय देहीत्युक्त्वा न्याय्यस्य ऋतकस्य भावात् तस्यैव संज्ञात्वं न्याय्यं न त्वस्येत्यादिनास्यासाधुत्वाच्छास्त्राविषयत्वेन परिहृतम् । न्याय्यस्येत्यस्य शास्त्रबोधितस्य शिष्टप्रयुक्तस्य चेत्यर्थः ।

यद्यपि समाने प्रवृत्तिनिमित्ते ऽन्वाख्यातो ऽनन्वाख्यातस्य निवर्तको भवति यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्तयतीति भाष्येण ऋतकस्य शास्त्रप्रसिद्धत्वे ऽपि क्रियाप्रवृत्तिनिमित्तकत्वेन लृतकशब्दस्य शब्दप्रवृत्तिनिमित्तकस्य भिन्नार्थस्यास्य नासाधुत्वबोधनं लभ्यते, तथापि शब्दाप्रयुक्तत्वेनैवास्यासाधुत्वं कैयटेनोक्तम् । स्वीकृतं च शास्त्रान्वितानामपि वचन्तीत्यादीनां शिष्टाप्रयुक्तत्वेनासाधुत्वं सर्वैः । ततः पक्षान्तरैरपि परिहारा भवन्तीत्याशयेन अर्थीशब्दानां प्रवृत्तिर्न सन्ति यदृच्छाशब्दा इत्यादिना परिहारान्तरमुक्तं तदा ऽसाधुत्वं शास्त्रविषयत्वं च स्पष्टमेवोक्तम् । एवञ्चैतत्पक्षैकवाक्यतया अग्रे ऽपि तत्त्वमेवोचितम् । एकस्यैव पक्षभेदेन शास्त्रविषयत्वतदविषयत्वयोर्न वेति सूत्रे भाष्ये तिरस्काराच्च ।

किञ्चैवं साधुत्वस्य व्याकरणव्यङ्ग्यतानापत्तिः । साध्वनुशासने शास्त्रे इत्यादिभाष्यासङ्गतिश्चेति दिक् । एवञ्च भाषाशब्दानां शिष्टैर्धर्मबुद्ध्या साधुपर्यायवद-

प्रयोगाद्व्याकरणलक्षणाननुगमाच्चार्थवत्त्वे ऽपि न शास्त्रविषयत्वमिति न तत्र प्रातिपदिकत्वमित्यन्यत्र विस्तरः ॥ ३३ ॥

(कुं० टी०) अत्र तत्त्वमिति । स्वस्वगृह्यानुसारेण प्रयोगात्सूचितः । अतएव कात्यायनेन कुमारस्य दक्षिणे कर्णे श्रावयेदित्याद्यन्यथोक्तम् । बहिर्भूतत्वमिति । ऐजादिशब्दवदस्यापि संज्ञात्वात् । तन्नेति । ऐजादिपदानां तु साधुत्वमन्यत्रोपपादितमिति भावः । ननु चतुष्टयीपक्षे अव्युत्पन्नसंज्ञानामपि सत्त्वात्कथं तासां शास्त्रबोधितत्वमतआह । शिष्टप्रयुक्तस्य चेति । अव्युत्पन्नसंज्ञाविशिष्टप्रयुक्त एवसाधुरित्यर्थः । लृतकेति । क्रियाशब्देन ऋतकशब्देन स्वरूपपरस्य लृतकशब्दस्य कथं व्यावृत्तिरित्यर्थः । पक्षान्तरैरपीति । यथा व्यक्तिपक्षे सरूपसूत्रारम्भं जातिपक्षे प्रत्याख्यानम् । परिहारान्तरमिति । तथाच चतुष्टयीपक्षस्य त्रयीपक्षेण प्रत्याख्याने अव्युत्पन्नस्य लृतकशब्दस्याभावान्न लृकारोपदेशे प्रयोजनमिति भावः । आरोपितत्वमिति । चतुष्टयीपक्षे ऽप्यसाधुत्वमित्यर्थः । अव्युत्पन्नसंज्ञासद्भावे ऽपि शिष्टप्रयुक्तानामेव साधुत्वमिति भावः । किञ्चैवमिति । व्याकरणाव्युत्पाद्यस्यापि साधुत्वे इत्यर्थः ॥ ३३ ॥

(क० टी०) नन्वेवं यज्ञकर्मणि केषां चिदेकवाक्यतायामपि आद्युक्तमतभेद एवैवं नामकरणे ऽपि मतभेद एवेति कथं व्यवस्थात आह । अत्रेति । उक्तविषये इत्यर्थः । अत्रेदं तत्त्वम् । यज्ञकर्मणि ऋत्विक्कर्तृकयजमाननामोल्लेखविषये सर्वं सर्वैर्ज्योतिषोक्तमेव कार्यम् । तत्रैव स्वकर्तृकनामोल्लेखविषये केचिन्मतोक्तस्यैवादरः कार्यः । अभिवादने तु नक्षत्रपादाक्षराद्येव । व्यवहारे तु आद्यमेव । तत्रापि घोषवदादीति न नियतमाश्वलायनगृह्ये युग्मानित्येव पुंसामित्येवफलत्वेन वृत्तिभाष्यकारादिभिस्तथोक्त-

त्वात् । अत्रापि वा यस्मिन्निति वदता आपस्तम्बेनापि तदनादरः सूचितः । तथाच युग्मत्वादिकमेव नियतम् । अत एवाधिकाक्षराण्यपि नामानि सिद्धानि । अत एव स्वस्त्यस्मै देवदत्ताय ब्रूतेति ब्राह्मणान्वदेत् नामाभिवादनीयं तु पित्रोर्हैद्योपनीतेति इति नामकर्मप्रकरणे जान्वाच्य दक्षिणं पादमाचार्यस्योपगृह्य च नाम्नाभिवादनीयेन शिरस्त्वस्यावनम्य चेति ब्रह्मचारिहोमप्रकरणे आश्वलायनगृह्यकारिकायामुक्तम् । सन्ध्यावन्दनादावाचारोऽप्येवमेव । नामकरणे तु नक्षत्रपादाक्षराद्येव नाक्षत्रं नामेति तथा तेषामाचारो ऽयुक्त एवेति सर्वेषामविरोधेन व्यवस्थेति न को ऽपि दोषः । एतेन यज्ञातकर्मप्रकरणे नामकरणे च सुदर्शनांङ्किलाकारविधातीर्थचन्द्रचूडादिभिरुक्तं तत्सर्वमपास्तमिति । कौस्तुभकृदाद्युक्तिं खण्डयति । यत्त्विति । कूचीति चतुष्टयीपक्षे । डित्थुभादीनामिति । कूचीत्यादीनामित्यर्थः । साध्विति । पुण्यजनकतावच्छेदकधर्मरूपसाधुत्वस्याभावात्तदर्थे ऽनादिप्रयुक्ते शक्तिवैकल्यादिनान्यथोच्चारणविषयत्वस्यैवासाधुत्वेन तदभावाच्च अनपभ्रष्टत्वरूपसाधुत्वस्यैव शास्त्रप्रवृत्त्युपयोगित्वेनोभयबहिर्भूतत्वे ऽपि शास्त्रविषयत्वाक्षतिस्तदाह । शास्त्रेति । नन्वत्रैव सेति कुतस्तदभावो ऽत आह । एवं चेति । उक्तसंज्ञाशब्देभ्यो ऽन्येषु जात्यादिशब्देष्वित्यर्थः । दुष्टत्वाच्चेति । यदि दुष्टत्वं तर्हि तदनुकरणे ऽपि प्रकृतिवदनुकरणमित्यनेन शास्त्रविषये दध्य्लृतक इत्यादाद्यच्कार्याय लृकारोपदेशस्यानुकरणे ऽर्थतयावश्यकत्वे ऽनुकरणार्थलृकारोपदेशप्रत्याख्यानपरभाष्यवार्तिकविरोधः । तत्र हि साधोरनुकरणं साध्वेव अशिष्टाप्रतिषिद्धस्य तादृशमेव अर्थादसाधोरसाध्वेवेति लृकारानुकरणमसाध्वशास्त्रविषयमेवेति न लृकारोपदेशस्तदर्थं इत्युक्तम् । भाष्यकृता त्वसाध्वनुकरणस्य भिन्नार्थत्वेन साधुत्वमाश्रित्य तदर्थं स कार्य इत्युक्तमित्यन्यत् । तदेतद्ध्वनयन्नुक्तार्थे भाष्यान्तरविरोधमाह । अत एवेति । तदभावादेवेत्यर्थः । प्रयोजनमिति । लृकारोपदेशो यदृच्छाशक्तिजानुकरणस्तुत्याद्यर्थ इति वार्तिकोक्तेरिति भावः । न्याय्यभावात्कल्पनं संज्ञादिष्विति तदुक्तमेवाद्यफलखण्डनमाह । न्याय्यस्येति । भावात् । सत्त्वात् । अस्य । लृतकस्य । एवमग्रे ऽपि ।

वक्ष्यमाणोपपत्तये सिद्धान्तमाह । न्याय्येति । तन्नेत्यादिः । अत एवाद्याभावप्रयुक्ता साधुत्वाभावे ऽपि न परिहारपरभाष्यासङ्गतिरित्याह । यद्यपीत्यादिना । भाष्येणेत्यस्य लाभे हेतुत्वेनान्वयः । कत्वेनेत्यग्रे न तेनेति शेषः । बोधनमित्यग्रे इतीति शेषः । अस्यावश्यकतामाह । स्वीकृतश्चेति । आदिनानभिधानविषयपरिग्रहः । तथाचाद्यसत्त्वे ऽपि तदभावात्तदभावे ऽपि प्रकृते तत्सत्वान्न तदसाधारणतद्धर्मकं किन्तु तत्सहकृतमेवेति तदेवासाधारणतद्धर्मकमाद्याभावे ऽपि तत्सत्त्वेन तत्त्वाङ्गीकारादत एवार्षत्वात्साधुतेति तत्र तत्रोक्तिरेवञ्चान्वयव्यतिरेकः तत्रैव नाद्ये इति तदभावात्तस्य तत्त्वेन परिहारभाष्यं चतुष्टयीपक्षाश्रयमुक्तं सम्यगेवेति भावः । ततस्तदनन्तरं ये गुणक्रियाजातिप्रवृत्तिनिमित्तकास्तेषु तेष्वर्थेषु प्रसिद्धास्तेतत्तद्गुणाद्यारोपेण तेषु पिण्डेषु सङ्केत्यन्त इति लृतकादीनां तादृशप्रसिद्ध्यभावान्न तेषां क्वचिदपि सङ्केत इति तदाशयः । एवञ्च सर्वथा तेषां न साधुत्वमिति तात्पर्यम् । तदाह— । तदेति । त्रयीपक्षे इत्यर्थः । तत्र साधकान्तरमपि ध्वनयन्नाह । एवञ्चेति । त्रयीपक्षे तत्त्वसिद्धौ चेत्यर्थः । तत्त्वमेव । असाधुत्वमेव । तच्चोक्तरीत्यैव नान्यथेति इतो ऽपि तदावश्यकत्वमेवेति भावः । ननु पक्षभेदादेवमस्त्वेकवाक्यतेति वैषम्यमास्तामिति परिहारभाष्यमेकदेशियुक्तिरेवान्यत्र तथासत्त्वे ऽप्यत्र तदङ्गीकारे मानाभाव इति कैयटो ऽसङ्गत एवात आह । एकस्यैवेति । एवञ्चानेन भाष्येण कृचयादीनामसाधुत्वं शास्त्राविषयत्वं टिघुभादीनां तु पाणिन्यादिशिष्टप्रयुक्तत्वाद्येवेति बोधितमिति स्पष्टमेवेति त्वन्मते एव विरोध इति भावः । यत्त्विति मते दोषान्तरमाह । किञ्चेति । एवमुभयबहिर्भूतस्य शास्त्राविषयत्वे तस्यातिप्रसक्तत्वादिति भावः । तत्रैव दोषान्तरमाह । साध्विति । एवमित्यस्यादावनुषङ्गः । किञ्च तस्य तथात्वे तञ्झञ्झ्यसाधुत्वस्यैवापत्तिरित्यपि बोध्यम् । तदाह । दिगिति । नन्वेवमपि भाषाशब्दानां शिष्टप्रयुक्तत्वमस्त्येवेति प्रागुक्तासङ्गतिरेवात आह । एवञ्चेति । तन्मतस्यायुक्तत्वे चेत्यर्थः । आद्यमपि नेत्याह । व्याकरणेति । असाधुत्वेनेति पाठः । इत्युक्तमिति । तथाच तदाख्याय पुनः स्मारितमिति भावः ॥ ३३ ॥

शक्तेस्त्रैविध्यम् । शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च । शास्त्रकल्पितावयवार्थाप्रतीतौ यदर्थनिरूपितं प्रकृतिप्रत्ययसमुदायमात्रे बोधकत्वं तत्पदे सा तदर्थनिरूपिता रूढिः । यथा मणिनूपुरादौ । शास्त्रकल्पितावयवार्थमात्रबोधे योगशक्तिः । यथा पाचकादौ । अश्वगन्धापदमौषधिविशेषबोधे रूढम् । अश्वसम्बन्धवत्तया वाजिशालाबोधे यौगिकम् । इदं यौगिकरूढमित्युच्यते । रूढिर्योगापहारिणीति तु प्रकरणाद्यभावे इति बोध्यम् ।

यत्र मण्डपपदादिभ्यो मण्डपानकर्त्रादेः रूढ्यर्थमण्डपादिगुणवत्त्वेन बोधस्तत्र प्रथमप्रतीतरूढिविषयमुख्यार्थत्यागेन योगरूढिपूर्वकलक्षणाया बलवत्त्वेन लक्षणयैव बोधः । यत्र शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितं समुदायेबोधकत्वं सा योगरूढिः । यथा पङ्कजादिपदे । तत्र पङ्कजनि कर्तृपद्ममिति बोधात् । पद्मस्यानुपपत्तिप्रतिसन्धानं सम्बन्धप्रतिसन्धानं च विना बोधान्न तत्र लक्षणावसरः । क्वचित्तात्पर्यग्राहकवशात्केवलरूढ्यर्थस्य केवलयोगार्थस्य च बोधः । भूमौ पङ्कजमुत्पन्नं कह्लारकैरवमुखेष्वपि पङ्कजेष्वित्यादौ । स्पष्टश्चेदमाहार्दिति सूत्रे भाष्ये ॥ ३४ ॥

(कुं० टी०) रूढिरिति । समुदायार्थमात्रबोधकपदे शक्ती रूढिरित्यर्थः । ननु प्रकृतिप्रत्ययविभागस्यापारमार्थिकत्वात्कथं रूढ्यरूढिविभाग इत्यत आह । शास्त्रकृत्कल्पितेति । तदुक्तं हरिणा ।

वाक्ये त्वर्थान्तरगते सादृश्यपरिकल्पने ।
केषाञ्चिद्रूढिशब्दत्वं शास्त्र एवानुगम्यते इति ॥

अस्यार्थः । वृत्तिवाक्ययोः सादृश्ये कल्पिते केषाञ्चिच्छब्दानां विग्रहे ऽर्थान्तरप्रतीतेरूढिशब्दत्वम् । मण्डपशब्दे हि मण्डपानकर्ता विग्रहार्थो विद्यते सर्वश्चैतदवयवविभागादिकं कल्पितमेव । यदर्थेति । यादृशार्थेत्यर्थः । मणीति । मण्यते इति मणिः । मणशब्द इति । नुवति स्तुवति पुरं नूपुरः । नन्वश्वगन्धाशब्दे कथं यौगिकार्थबोधः पङ्कजपदात्कुमुदबोधवारणाय रूढेः प्रतिबन्धकत्वस्वीकारादत आह । योगापहारिणीत्विति । अवयवार्थानुसन्धानमूलकयौगिकार्थापेक्षया रूढ्यर्थस्य प्रथमोपस्थितत्वमेव बलवत्त्वे बीजम् । यत्र तु यौगिकार्थस्य प्रथममुपस्थितिस्तत्र तस्यैव बलवत्त्वम् । यथा वाजिभ्यो वाजिनमित्यत्र वाजिशब्देन नाश्वस्य बोधः किन्तु वाजमन्नमामिक्षारूपमस्ति येषामिति योगाद्विश्वेदेवानामेव ग्रहणमिति आमिक्षाधिकरणसङ्गतिः । प्रकरणाद्यभावे इति । यत्र प्रकरणादिवशाद्यौगिकार्थस्य प्रथममुपस्थितिस्तत्र तद्बोधो भवत्येवेत्यर्थः । यत्तु नानार्थविषयाद्यौगिकार्थबोधवारणाय रूढेः प्रतिबन्धकत्वमावश्यकमिति तन्न । ग्राह्याभावानवगाहितया तस्य प्रतिबन्धकत्वासम्भवात् । मणिमन्त्रादिन्यायेन तत्कल्पने च गौरवात् । मण्डपानकर्त्रादेरिति । वस्तुतो यो मण्डपानकर्ता चैत्रादिस्तस्य मण्डपानकर्तृत्वेन न बोधः किन्तु मण्डपो गृहविशेषस्तत्सादृश्येन बोधः । तत्र रूढिमूलिकाया लक्षणाया बलवत्त्वाल्लक्षणयैव बोध इत्यर्थः । प्रथमप्रतीतेति । पङ्कजपदात्समुदायशक्त्या उपस्थिते पदे पङ्कजनिकर्तृत्वस्यान्वयात्प्रथमप्रतीतत्वम् । अत एव न केवलयोगेन कुमुदादिबोधः । बलवत्त्वेनेति । रूढेर्योगापहारित्वादिति भावः । यत्रेति । यत्रावयवशक्तिलभ्या समुदायशक्तिस्तत्रेत्यर्थः । तत्र हि पङ्कजनिकर्तृत्वान्वितं विशेष्यपदम् । अत्रेदं चिन्त्यते । योगरूढिस्थले योगार्थ-

स्यापि शाब्दबोधविषयत्वे पङ्कजपदात्पङ्कजनिकर्तृपद्ममिति बोधापत्तिः। न त्वेतदनुभवसिद्धं स्थलपङ्कजमिति प्रयोगानापत्तेः पङ्कजं पङ्कजमिति प्रयोगानापत्तेश्चेति। ननु पङ्कजपदादपि कदाचिल्लक्षणया कुमुदबोध इष्यत एव। तथाच सर्वसाधारणी शक्तिरेवास्तु पद्मरूपविशेषपरतायां तु लक्षणैवास्त्वित्यत आह। पद्मस्येति। केवलरूढ्यर्थबोधमुदाहरति। भूमौ पङ्कजमिति। अत्र योगार्थस्य बाधः। कल्हारेति। कुमुदादौ प्रयोगोऽवयवार्थमादायैवेत्यर्थः। कल्हारम्। ह्रस्वकमलम्। कैरवम्। कुमुदम्। एतत्प्रभृतिषु। पङ्कजेष्वित्यर्थः॥ ३४॥

[क॰ टी॰] एवञ्च तत्स्वरूपे निरूपिते विशेषजिज्ञासाया तद्भेदमाह। शक्तिरिति। तत्राद्यामाह। शास्त्रेति। तत्रेत्यादिः। इदमात्र शब्दव्यवच्छेद्यस्वरूपकीर्तनम्। ननु तदन्तर्गतं लक्षणं तु यदर्थेति तन्मात्रे बोधकत्वं च तद्घटकावयवानां स्वार्थानुपस्थापकत्वेनेति भावः। शास्त्रेति। यत्पदीयेत्यादिबोधे इत्यस्य तत्पदे तदर्थनिरूपितेति शेषः। कादौ। तत्पदे। अर्थभेदाच्छब्दभेद इति मते उक्तान्तर्भावसम्भवान्न तुरीयोऽतिरिक्तः शब्द इति चतुर्धा तद्विभागोऽयुक्त इतिसूचयन्नाह। अश्वेति। अर्थभेदेऽपि शब्दैक्यमिति मतेनाह। इदमिति। ननु रूढिर्योगापहारिणीति प्रवादः रूढिज्ञानं योगार्थबोधप्रतिबन्धकमिति तदर्थस्तथाच कथं तत्र योगार्थबोधोऽत आह। रूढिरिति। उभयत्र प्रकरणादावुभयबोधस्येष्टत्वादाह। द्यभावे इति। तत्र रूढ्यर्थस्य शीघ्रोपस्थितिकत्वेन बलवत्तया योगापहारकत्वम्। तथाच यत्र योगार्थे एव प्रकरणं तत्र तत्साचिव्याद्योग एव बलवानिति नोक्तदोष इति भावः। एवं मण्डपादिपदेऽपि बोध्यम्। तस्य क्रियाजातिशब्दत्ववत्संज्ञाशब्दत्वस्यापि सत्त्वात्। तत्र विशेषमाह। यत्रेति। यत्र त्वित्यर्थः। मण्डपो मण्डपोऽभवदित्यादावित्यर्थः। अत एव मण्डपानेति वस्तुतस्तत्त्वेऽपि तेनाबोधात्संज्ञाशब्दस्थरीत्याह। रूढ्यर्थेति। तत्राधुनिकसङ्केतसत्त्वेन शक्त्यभावस्य प्रागुक्तत्वादाह।

तत्रेति । पदे इत्यर्थः । ननु तत्र योगार्थबोध एव कुतो नात आह । योगादिति । ननु रूढेस्ततो बलवत्त्वे ऽपि न लक्षणाया अत आह । रूढीति । तत्र हेतुरुक्तः । प्रथमेति । तत्र यो बोधः स लक्षणयैवेत्यर्थः । अतो न पौनरुक्त्यम् । अत एवाकाशपदस्याकाशत इति योगमनादृत्याकाशगुणं विभुत्वादियोगेन ब्रह्मणि निरूढलक्षणारूपा लक्षणैवादृता दहराधिकरणे । बोधादिति । तथाच तादृशविशिष्टबोधकतायाः समुदाये स्वीकार आवश्यकः । अन्यथा ततो नियमेन तदुपस्थितिर्न स्यादिति भावः । ननु पङ्कजपदस्य पद्मत्वविशिष्टे लक्षणैवास्तु किं समुदायशक्त्यात आह । पद्मस्येति । तत्कारणसमवधानेति भावः । विशेष्यभूतेति । अर्थविशेषणेन राजपुरुषादिपदानां योगरूढित्वनिरासः । अश्वगन्धादिपदवदितो ऽपि प्रत्येकमात्रबोधापत्तिस्तु उक्तयुक्त्यैव नेति भावः । नन्वेवं क्वचित्प्रत्येकबोधो ऽत्रापीष्टो न स्यादत आह । क्वचिदिति । यथाक्रममुदाहरणे आह । भूमाविति । अत एव दृष्ट्वा सहस्रनयनो न वृषापि तृप्त इत्यादावपौनरुक्त्यम् । तथाच तत्पदसमभिव्याहाराय तत्तात्पर्यग्रहस्य तत्तदर्थबोधे प्रतिबन्धकत्वस्य स्वीकारान्न दोष इति भावः । अत्र मानमप्याह । स्पष्टमिति । तत्र हि परिमाणशब्दस्य सर्वतो माने प्रस्थादौ योगरूढिरित्युक्त्वा तदस्य परिमाणं संख्यायाः संज्ञेति सूत्रे संख्यापरिमाणयोर्विशेष्यविशेषणभावानुपपत्तिमाशङ्क्य वचनादियती विवक्षा भविष्यतीत्युक्तम् । रूढिपरित्यागेन परिच्छेदकत्वमात्रमाश्रयिष्यत इत्यर्थ इति । अत एव शब्दार्थस्येति जातावेकवचनम् । सन्देह इति सति सप्तमी । तथाचास्य तत्र निमित्तत्वं फलति ॥ ३४ ॥

शक्तिनियामकनिरूपणम् । सैषा शक्तिः संयोगादिभिर्नानार्थशब्देषु नियम्यते । तदुक्तं हरिणा ।

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इति ॥

एते संयोगादयः शब्दार्थस्यानवच्छेदे सन्देहे तदपाकरणद्वारेण विशेषस्मृतिहेतवो निर्णयहेतव इत्यर्थः । उपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णयद्वारा तन्मात्रार्थविषयकान्वयबोधजनका इति भावः । संख्यासंज्ञासूत्रे भाष्येऽपि स्फुटमेतत् ।

अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकं संयोगादयस्तद्व्यञ्जकप्रपञ्चः तैः सामर्थ्यस्यैवाभिव्यक्तेरिति परे । सवत्सा धेनुरवत्सा धेनुरिति संसर्गविप्रयोगयोरुदाहरणे । रामलक्ष्मणावित्यत्र साहचर्येणोभयोर्युगपदेव नियमनमिति नान्योन्याश्रयः । साहचर्यं सादृश्यं सदृशयोरेव सहप्रयोगनियमात । रामार्जुनगतिस्तयोरित्यत्र विरोधेन तत् । अञ्जलिना जुहोति अञ्जलिना सूर्यमुपतिष्ठत इत्यत्र जुहोत्यादिपदार्थवशादञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वम् ।

सैन्धवमानयेत्यादौ प्रकरणेन तत । अक्ताः शर्करा उपदधातीत्यादौ तेजो वै घृतमिति घृतस्तुतिरूपाल्लिङ्गादक्ता इत्यस्य घृतसाधनाञ्जनपरत्वम् । रामो जामदग्न्य इत्यादौ जामदग्न्यपदसन्निधानेन रामः परशुरामः । अभिरूपाय कन्या देयेत्यादौ अभिरूपतरायेति सामर्थ्यात्प्रतीयते । यश्च निम्बं परशुनेत्यादौ औचित्यात् परशुनेत्यस्य च्छेदनार्थत्वम् । भात्यत्र परमेश्वर इत्यत्र राजधानीरूपदेशात्परमेश्वरपदं राजबोधकम् । चित्रभानुर्भातीत्यादौ रात्रौ वह्नौ दिवा सूर्ये । व्यक्तिर्लिङ्गम् । मित्रो भाति अत्राद्ये सूर्योऽन्त्ये सुहृत् । स्थूलपृषतीमित्यादौ

स्वरात्तत्पुरुषबहुव्रीह्यर्थनिर्णयः । आदिनाषत्वसत्व णत्वादि । सुसिक्तमित्यत्र पूजार्थः सुः कर्मप्रवचनीयः सुषिक्तमित्यत्रोपसर्गोऽन्यार्थः । प्रणायके प्रणयनक्रियाकर्ता णत्वात् । प्रनायके प्रगतनायकदेशबोध इति पुञ्जराजः । क्वचित्प्राकरणिकार्थबोधोत्तरं वक्तृबोद्धव्यवैशिष्ट्यप्रतिभादिसहकारेण द्वितीयार्थबोधोऽपि । यथाशालकादिप्रयुक्तात् सुरभिमांसमित्यादेर्द्वितीयाश्लीलार्थबोधः ॥ ३५ ॥

(कुं० टी०) नानार्थेति । नानार्थत्वे चार्थभेदाच्छब्दभेद इति पक्षे नानार्थप्रतिपादकसदृशशब्दत्वम् । अनेकेषामिति । अनेको जना इति प्रयोगस्य ग्रन्थकृतैव व्यवस्थापयिष्यमाणत्वात्तद्विरुद्धमेतत् ।

सामर्थ्यमेवेति । कारणत्वमेवेत्यर्थः । संयोगादयः सामर्थ्यस्यैव व्यञ्जका इत्यर्थः । सवत्सेति । धेनुशब्देन नवप्रसूता सर्वापि गृह्यत इति मते इदम् । अवत्सेति । निषेधस्य प्राप्तिपूर्वकत्वादवत्सापि गौरेवोच्यते । नान्योन्याश्रय इति । अन्यथा रामसाहचर्याल्लक्ष्मणो दाशरथिः लक्ष्मणसाहचर्याच्च रामो दाशरथिर्ग्राह्य इत्यन्योन्याश्रयः । साहचर्यं न सह चरता दीधीवेवीटामित्यादावसम्भवादित्याह । सादृश्यमिति । रामार्जुनेति । अत्र रामार्जुनयोरिव तयोर्गतिरिति कस्य चिदुपमायां सदृशलक्षणया विरोधात् भार्गवकार्तवीर्ययोर्बोधः । अत्र केचित् । रामादिपदस्य भार्गवादावभिधानियमे विरोधः विरोधाच्चाभिधानियमनामित्यन्योन्याश्रय इति तन्न । तयोरिति तत्पदस्य परस्परविरोध्यर्थप्रतिविम्बनेन तदानीमेव रामार्जुनयोरित्यत्रापि विरोधस्फूर्तेः । अञ्जलिनेति । होमसामर्थ्यात्तदनुकूलाचारो

गम्यते । अञ्जलिनोपतिष्ठत इत्यत्र त्वन्य एवेत्यर्थः । तथाचार्थशब्दः प्रयोजनवाची । सैन्धवमिति । भोजनकाले नाश्वबोध इत्यर्थः। मृत्तिकामिश्रा क्षुद्रपाषाणप्रायाः शर्कराः । यद्यपि अक्ता इत्यत्र न विशेषः शब्दार्थः नापि तेजो वै घृतमित्यत्र विधिरस्ति तथापि यः स्तूयते स विधीयत इति न्यायेनाक्ता इत्यत्र विधिरपि कल्प्यः। एताश्च अग्न्याधानार्थाः परिस्थाप्यन्ते । लिङ्गादिति। संयोगातिरिक्तसम्बन्धेन सम्बद्धो व्यावर्तकधर्मो लिङ्गम्। यथा कुपितो मकरध्वज इत्यत्र समुद्रव्यावृत्तात्कोपात्कामे। यत्तु लिङ्गं चिह्नमिति तन्न। असाधारणधर्मो हि चिन्हं न च कोपः कामस्य तादृशः। सन्निधिः । सामानाधिकरण्यम् । तेन सशङ्खचक्रो हरिरित्यत्र नातिव्याप्तिः । शङ्खचक्रसामानाधिकरण्याभावात् । परशुनेति । अत्र च छिनत्तीति गम्यते। मित्रो भातीति पुल्लिङ्गस्य सूर्ये प्रयोगः क्लीबस्य सुहृदि । स्थूला पृषती गौः स्थूलानि पृषन्ति च यस्या इति वा सन्देहः । पूर्वपदप्रकृतिस्वराद्बहुव्रीह्यर्थावगमः ।

आदिपदार्थमन्यमाह । वक्त्रीति । क्वचिद्वक्तृवैशिष्ट्यं क्वचिद्धि द्रव्यस्य वैशिष्ट्यम् । यथा ।

अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम्।
श्रमखेदसलिलनिश्वासानिस्सहा विश्राम्यामि क्षणमिति ॥

अत्र वक्त्री कामिनी तस्या दुःशीलत्वादिरूपवैशिष्ट्यं विजानता चौर्यरतगोपनं व्यक्तीभवति । बोद्धव्यस्य यथा ।

औन्निद्र्यं दौर्बल्यं चिन्ता अलसत्वं सनिश्वसितम् ।
मम मन्दभागिन्याः कृते अह ह सखि त्वामपि परिभवति॥

तस्याश्च दुःश्चेष्टया वैशिष्ट्येन कामुकोपभोगो व्यज्यते । नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा सैव वासनेत्युच्यते तस्यामेव सत्यां व्यङ्ग्यप्रतीतेः । तदाहुः ।

सवासनानां नाट्यादौ रसस्यानुभवो भवेत्।
निर्वासनास्तु रङ्गादौ वेश्मकुड्याश्मसन्निभा इति ॥

सुरभिमांसमिति। सुरभि यन्मासमिति सुरभेर्गोर्मांसमिति चार्थः।द्वितीयार्थबोधो ऽपीति। अत्र संयोगादिभिरभिधायां नियमितायां द्वितीयवाच्यार्थबोधो ऽपि व्यञ्जनयैवेत्यालङ्कारिकाः। अत एव साक्षात्सङ्केतवान्वाचक इत्यपहाय साक्षात्सङ्केतितं यो ऽर्थमभिधत्ते स वाचक इति लक्षणं कुर्वन्ति। अश्लीलेति। अश्रीरस्यास्तीति सिध्मादित्वाल्लच् कपिलकादित्वाद्रस्य लः। अश्लीलश्च व्रीडादिदायकः॥ ३८ ॥

(क० टी०) नन्वेवमेतत्सत्त्वे तेषां तत्त्वं बाधितमत आह। तदपेति। विशेषो ऽर्थः। स्मृत्यर्थमाह। निर्णयेति। नन्वेवमपि तदेव कथमादावत आह। उपेति। मध्य इति शेषः। अल्पाच्तरमिति वत्स्वार्थे तरप्। द्वारेति। तदपाकरणद्वारेति शेषः। तथाच तादृशबोधजननमेव नियमनं नानार्थशब्दजबोधे तात्पर्यनिर्णयस्य हेतुत्वात्। तथाच सत्यपि सम्बन्धग्रहे संयोगादिज्ञानस्य तज्जन्यप्रथमार्थतात्पर्यग्रहस्य वा प्रतिबन्धकत्वान्न द्वितीयार्थज्ञानमिति भावः। अत्र मानान्तरमप्याह। संख्येति। तत्र हि वतुसाहचर्यात्तद्धित एव डतिर्न तु पातेर्डतिरित्युक्तम्। नन्वेतेषां व्यधिकरणत्वात्कथं वक्तृतात्पर्यनिर्णायकत्वमतः सिद्धान्तमाह। अत्रेति। एषां मध्ये इत्यर्थः। एकमित्यस्यैव व्याख्या मुख्यमिति। मुख्येति पाठे मुख्यस्य विशेषार्थतात्पर्यस्य निर्णायकमित्यर्थः। मुख्यमित्यनेन गौणं तेषामपि सम्भवतीति न हरिविरोध इति सूचितम्। तदाह।संयोगादय इति।तदिति। सामर्थ्येति। तद्व्याख्याकृदुक्तानि एतेषां क्रमेणोदाहरणान्याह। सवत्सेत्यादिना पुञ्जराज इत्यन्तेन। धेनुशब्दो धानकारकस्त्रीव्यक्तिमात्रबोधकः। उभयोरित्यस्य मध्यमणिन्यायेनान्वयः। यत्तु साहचर्यं सहचरता एकत्र कार्ये प्रसिद्धपरस्परसापेक्षत्वमिति काव्यप्रकाशकृदादयस्तन्नेति ध्वनयन्नाह। सादृश्यमिति। सहचरस्य भावः साहचर्यं सहचरणं च प्रायेण सदृशयोरेव लोके दृष्टमिति साहचर्यशब्देन सादृ-

इयमुच्यते। नन्वेवं प्रकृते साहचर्यस्योक्तस्य सत्त्वेऽपि साद्दश्याभावात्कथमिष्टसिद्धिरत आह। सदृशयोरेवेति। सदृशार्थयोः शब्दयोरेव द्वन्द्वेन सह प्रयोग इत्युत्सर्गादित्यर्थः। सदृशयोरेव सहविवक्षासत्त्वात्तथाचात्रापि तदेव तन्नियामकम्। अत एव कर्मप्रति सूत्रभाष्ये सदृशानामेव प्रयोगे सहायत्वमित्युक्तम्। अत एवैतत्कारिकाव्याख्याने यं यम्पपाठ यारिभिरिति साहचर्ये उदाहृतं हेलाराजेन वर्जनार्थापसाहचर्यात्तदर्थस्यैव परेः कर्मप्रवचनीयस्य ग्रहणमिति चोक्तं भाष्ये ऽप्येवमेवोक्तमिति भावः। रामार्जुनेति। अत्रापि प्रकरणसहकारेण द्वयोरपि पदयोर्मिथो विरोधिद्वये युगपदेव तात्पर्यग्रहः। एतेन द्वयोरपि नानार्थत्वात्परस्पराश्रयग्रस्तामिदमित्यपास्तम्। असङ्कीर्णोदाहरणं तु रामरावणावित्यादि। एवं प्रागपि बोध्यम्। अर्थपदार्थमाह। पदार्थेति। तन्नियमनम्। एवं प्रागपि। इतिर्वाक्यशेषे। घृतेति बहुव्रीहिद्वयम्। अर्थस्य ते तु तत्सांनिध्याभावे तथेति भेद इत्याह। पदसान्निति। तस्य साधारणस्य सर्वत्राविशिष्टत्त्वात्तदुक्तिसामर्थ्यादाह। तरायेतीति। परशोः कारकत्वेनानेकक्रियासन्देहे योग्यतयाध्याहारेण छेदनान्वयित्वमित्याह। छेदनेति। देशात्। अत्रेति। परामृष्टात्परमेश्वरपदस्य विष्णुत्वेनापि शक्तेर्नानार्थत्वम्। एवं रीत्या सर्वत्र बोध्यम्। अर्थान्तरनिरासायाह। लिङ्गमिति। तस्यापि व्यङ्ग्यत्वाद्व्यञ्जकत्वाच्चेति भावः। ह्यर्थेति। एतदन्यतरार्थेत्यर्थः। इदञ्च वेदे एव बोध्यमिति प्रकाशसम्मतम्। प्रदीपस्तु चिन्त्य एवेति स्पष्टं तदुद्द्योते। सुःपुजायामित्युक्तेराह। पूजेति। यत्तु नियमनं नामैकस्य प्राक् शाब्दबोधस्तदनन्तरमन्यस्यापीति शक्त्यैव निर्वाहे तत्र व्यञ्जना व्यर्थेति तन्नेति ध्वनयन्नाह। कचिदिति।

वक्तृबोद्धृव्यकाकूनां वाक्यवाच्यार्थसन्निधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम्॥

इत्यादिप्रकाशोक्तेराह। वक्त्रीति। तत्राद्योदाहरणमाह। यथेति। शालेति। न पुत्रादिप्रयुक्तादिति भावः। अश्लीलेति। गोमांसेत्यर्थः। तथाच तत्र व्यञ्जनैव। न च संयोगादिना शक्तेरिव व्यञ्जनाया अपि नियमनमिति वाच्यम्। संयोगादिकमतिक्रम्य बोधकत्वेनैव तत्सिद्धेः। अन्यथा सुगन्धिमांसं भोजनप्रकरणे सुरभिमासं भुङ्क्ते

इत्यभिधाने गोमांसानुपस्थितौ विदग्धस्य जुगुप्सानापत्तेरिति भावः । बोध इत्यग्रे इतीति शेषः । इति शक्तिनिरूपणम् ॥ ३५ ॥

लक्षणानिरूपणम् । ननु सर्वेषां सर्वार्थवाचकत्वे लक्षणोच्छेद-इति चेन्न । योगिनां सर्वार्थवाचकत्वज्ञाने सत्यप्यस्म-दादीनां तदभावात् । किञ्च अन्वयाद्यनुपपत्तिज्ञान-पूर्वकशक्यत्वेन गृहीतार्थसम्बन्धज्ञानेनोद्बुद्धशक्तिसं-स्कारबोधे लक्षणेति व्यवहारात् । तच्छक्तिसंस्का-रश्चेदृशे स्थले जन्मातरीणोऽपि । वस्तुतस्तात्पर्या-नुपपत्तिरेव तद्बीजम् । अन्यथा गङ्गायां घोष इत्यादौ-घोषादिपद एव मकरादिलक्षणापात्तिस्तावताप्यन्व-यानुपपत्तिपरिहारात् । एवं रूढिप्रयोजनान्यतर-दपि तत्कारणमनुभवबलात् ॥ ३६ ॥

(कुं० टी०) शक्यत्वेनेति । अन्वयानुपपत्तिज्ञानपूर्वकं यत् शक्यसम्बन्धस्मरणं तेनोद्बुद्धो यः संस्कार इत्यर्थः । व्यञ्जनायामतिव्याप्तिवारणाय शक्यत्वेनेति । मुख्यस्याप्यभि-धारूपसम्बन्धेन प्रतिपादनं सम्भवतीति अन्वयानुपपत्तीत्या-युक्तम् । ननु गङ्गापदस्य प्रवाहमुपस्थाप्य निवृत्तौ प्रवाहसम्ब-न्धेन तीरोपस्थितावपि गङ्गापदस्य वृत्तिर्न स्यादिति चेत्सत्यम् । एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या साक्षात्स-म्बन्धिनो बाधात्सम्बन्धिसम्बन्धिनोऽपि ग्रहणमिति भावः । एतेन तीरांशेऽनुभवाभावात्संस्कारासम्भव इत्यपास्तम् । ग-ङ्गापदसम्बन्धस्य तत्रापि सत्त्वात् । व्यवहारादिति । भगवदि-च्छायाः सन्मात्रविषयत्वात्तीरादावपि वस्तुतः शक्तिरेवेति भावः । एतेनानन्तस्थलेऽतिरिक्तकल्पनापेक्षया क्लृप्तायां शक्यसम्ब-न्धरूपलक्षणायां लाघवमित्यपास्तम् । यत्तु केवलगङ्गापदात्ती-

रबोधाद्घोषपदमेव तीरबोधकम् । अत एव लाक्षणिकं नानुभावकमिति प्रवाद इति तन्न । गङ्गायामिति सप्तम्यर्थस्य तत्रान्वयानापत्तेरप्रकृत्यर्थत्वात् । यत्तु शक्तिर्नेश्वरेच्छारूपा अपभ्रंशे ऽपि सत्त्वात् किन्त्वतिरिक्तैवेति न सा तीरादौ क्लृप्तेति तन्न । अपभ्रंशानामपि वाचकत्वस्यैवौचित्यात् ।

शक्तिसंस्कारः । शक्तिजन्यः संस्कारः । जन्मान्तरीणो ऽपीति । बालानां स्तन्यपानादाविष्टसाधनताज्ञानस्य तथैव सम्भवात् । अन्वयानुपपत्तेर्लक्षणाबीजत्वं दूषयति । वस्तुतस्त्विति । ये त्वाहुरन्वयानुपपत्तिरेव लक्षणाबीजमस्ति च यष्टीः प्रवेशयेत्यादावपि भोजनविषयकप्रवेशान्वयस्य यष्टिष्वनुपपत्तिरिति तद्दूषयति । अन्यथेति । किञ्च अन्वयानुपपत्तेर्लक्षणाबीजत्वं न तज्जनकत्वं शक्यसम्बन्धरूपाया लक्षणायास्तदजन्यत्वात् । नापि लक्ष्यार्थतात्पर्यग्राहकत्वं प्रकरणादिनापि तत्परत्वसम्भवात् । नापि लक्ष्यार्थबोधहेतुत्वं यष्टीः प्रवेशयेत्यादौ व्यभिचारात् । घोषादिपदे इति । न विधौ परः शब्दार्थ इति न्यायात् गङ्गापदे एव लक्षणेत्यन्ये । रूढीति । कुशल इत्यत्र रूढिरेव गङ्गायां घोष इत्यत्र शैत्यादिप्रतीतिरित्यर्थः । यथाहि गङ्गायां घोष इति वाक्यात्पावनत्वं प्रतीयते न तादृशं गङ्गातीर इति वाक्यात् । एवञ्च मुख्यार्थबाधः शक्यार्थसम्बन्धो रूढिप्रयोजनान्यतरच्चेति हेतुत्रयं बोध्यम् ॥ ३६ ॥

(क० टी०) सिंहावलोकनन्यायेन लक्षणां निरूपयति । नन्वित्यादिना । उच्छेदः । अतिरिक्तवृत्तिस्वीकारनैष्फल्यमित्यर्थः । तत्र समाधिं प्रागुक्तमेव तावदाह । योगिनामिति । नन्वेतावता तेषां तदुक्त्यैवान्येषां तदभाव एवेति लब्धं परं तु तेषामपि तद्व्यवहारस्य क्वचिद्व्यक्तत्वेन कुत्र सः । किञ्चान्येषां मते तत्स्वरूपं किमतो योगिनः तादृशवैयाकरणसिद्धान्ताभिमानियावच्छ-

ब्दार्थज्ञानं तथा तत्सर्वं वाचकत्वज्ञानमस्मत्पदवाच्यवैयाकरण-
साधारण्येन तत्तावत् अभ्युपेत्य प्राचीनदीक्षितादिमतेनाह। किं-
श्चेति। आदिना तात्पर्यग्रहः। एतदन्यतरानुपपत्त्येत्यर्थः। अर्थेति।
प्रसिद्धेत्यादिः। बोधे इति। तस्मिन्सति तज्जनकताद्दशसंस्कारे
तच्छक्तौ वा लक्षणेति व्यवेत्याद्यर्थः। व्यवेत्यनेन द्वितीयपक्ष-
स्यैवेष्टत्वं सूचितं लाघवाद्दोषलेशाभावाच्च। नन्वेवं यत्रैहिकः
शक्तिग्रह एव न घटादौ तस्यान्त्यानां तत्र तस्यैवाभावेन तस्य
सुतरामभावाद्बोधाभावापत्तिरत आह। तच्छक्तीति। स चासौ
शक्तिसंस्कारश्चेत्यर्थः। घटादिपदशक्तिसमित्याद्यर्थो वा। न तूद्बुद्ध
शक्त्येत्याद्यर्थः। कारणस्य कार्याव्यवहितपूर्वक्षणवृत्तित्वावश्यकत्वा-
दनतिप्रसङ्गायाह। ईदृशेति। लक्ष्यार्थबोधविषये इत्यर्थः। अपिरै-
हिकसमुच्चायकः। अनेन तदनभिमान्यस्मत्पदवाच्यवैयाकरणानाम-
गतिः सूचिता। तत्र योगिनामैहिक एव तदभिमानिनां द्विविधो
ऽपि तदनभिमानिनां जन्मान्तरीण एव फलबलकल्प्य इति
बोध्यम्। प्रागुक्तं सर्वं युक्तमन्वयनिवेशमात्रं तत्रानुचितमित्याह।
वस्तुत इति। एवेन तद्व्यवच्छेदः। तस्यान्यत्रावश्यकत्वादाह। तद्बी-
जमिति। सर्वत्र सत्त्वादिति भावः। यद्यपि लक्षणाजन्यबोधे ऽन्व-
यव्यतिरेकाभ्यां मुख्यार्थबाधज्ञानं मुख्यार्थसम्बन्धज्ञानं च कारणं
तद्बाधश्च समभिव्याहृतपदतात्पर्यविषये मुख्यार्थतावच्छेदकरूपेण
मुख्यार्थासंसर्गरूपं तेन छत्रिणो यान्ति कुन्तान्प्रवेशय काकेभ्यो दधि
रक्ष्यतामित्यादौ छत्र्यादिमुख्यार्थानां समभिव्याहृतक्रियासु कर्तृ-
त्वादिभिरन्वयाबाधे ऽपि तत्तात्पर्यविषये मुख्यच्छत्र्यच्छत्रिगमनभो-
जनार्थप्रवेशदध्युपघातकावधिकरक्षणेषु मुख्यार्थतावच्छेदकरूपेण
तदन्वयबोधो ऽस्त्येवेति तत्र च्छत्रिपदमेकसार्थप्रविष्टच्छत्रिसमु-
दाये लाक्षणिकमेवमन्यत्रापीति सापि सर्वत्रास्ति। तथाप्याह।
अन्यथेति। अन्यथानुपपत्तिज्ञानस्यैव तद्धेतुत्वे इत्यर्थः। हि यतः।
एवेन तद्व्यवच्छेदः। एतेन क्वचित्सा क्वचित्सेत्यपि निरस्तं गौ-
रवात्। अत एव समुच्चयो ऽपि निरस्तः। हारादित्यग्रे इति
बोध्यमिति शेषः। एवम्। उभयज्ञानवत्। अत्रान्वयव्यतिरेकयोर्दु-
र्वचत्वादाह। अनुभवेति। तथाच ततः द्वितीयपक्षादरो ऽगत्या
तृणारणिमणिन्यायेनाद्यपक्षादरो वेति भावः॥ ३६॥

+तादृशस्य वक्तृतात्पर्यग्रहे

तात्पर्याग्रहो लक्षणाबीजम्। अत्रेदं बोध्यम्। शक्यार्थोपस्थितौ तद्विषयकान्वय बोधे जाते तस्मिन्वक्तृतात्पर्याविषयत्वेनाप्रामाण्यग्रहे सति लाक्षणिकार्थबोधः। शक्यार्थान्वयबोधं विना तत्र तात्पर्याविषयत्वग्रहासम्भवात्। संसर्गविषयज्ञानस्यैवान्वयबोधत्वात्। प्रसिद्धनानार्थविषयकबोधजनकत्वमेव नानार्थत्वमिति नातिप्रसक्तं नानार्थत्वम्। सम्बन्धज्ञानं तीरसम्बन्धि प्रवाहबोधकमिदमिति गङ्गापदशक्यप्रवाहसम्बन्धितीरमिति वा। सम्बन्ध एव लक्षणेत्यन्ये। अत्र पक्षे ऽपि संयोगसंयुक्तवृत्तित्वरूपसम्बन्धद्वयरूपा एका लक्षणा। लक्षणेति जातावेकवचनम्। एवञ्च लक्ष्यतावच्छेदके ऽपि लक्षणाभवत्येवेति बोध्यम्। विशेषणे संयोगरूपो वा लक्ष्यतावच्छेदके न लक्षणा। उभाभ्यामनारोपितैकसम्बन्धस्यासम्भवात्। विशेष्यगतसम्बन्धज्ञानस्य लक्ष्यतावच्छेदकप्रकारकलक्ष्यबुद्धित्वं कार्यतावच्छेदकमित्यलक्ष्यस्यैव भानमित्यन्ये। तादृशसम्बन्धज्ञानजन्या तदुपस्थितिरेव लक्षणा। स्वविषयसम्बन्धिवाचकत्वेन चैषा पदनिष्ठा। वृत्तित्वं तु शाब्दबोधजनकपदपदार्थसम्बन्धत्वमिति परे। तन्मते ऽपि स्फुटमेव लक्ष्यतावच्छेदके लक्षणा। पदादपि शाब्दबोध एव न स्मृतिरिति तेषामाशयः। यत्र कमलानि कमलानीत्यादौ सौरभविशिष्टकमलबोधस्तत्रापि विशिष्टे लक्षणा॥ ३७॥

(कुं० टी०) अप्रामाण्यग्रहे सतीति। शक्यार्थान्वयानुपस्थितौ तत्रानुपपत्तिप्रतिसन्धारासम्भवादिति भावः। बोधं विनेति। अ-

धिकरणानालिङ्गिताभावबोधासम्भवात् । ननु गङ्गापदात्प्रवाहस्योपस्थितावपि तदन्वयबोधे मानाभाव इत्यत आह । संसर्गेति । पदार्थान्तरसम्बन्धोपस्थितिरेवान्वयबोध इति भावः । ननु हर्यादिपदवद्गङ्गादिपदानामपि नानार्थत्वापत्तिरत आह । प्रसिद्धेति । गङ्गापदात्तीरबोधे ऽपि तस्याप्रसिद्धत्वान्न नानार्थत्वमिति भावः । ननु घोषसम्बन्धिनां मत्स्यादीनामपि बोधापत्तिरतो ऽर्थसम्बन्धज्ञानेनेत्यत्र सम्बन्धज्ञानाकारमाह । सम्बन्धज्ञानमिति । तथाच तीरादिविषयकबोधजनकत्वमेव लक्षणेति भावः । ननु गङ्गापदस्यैव तीरबोधकत्वे लाक्षणिकं नानुभावकमिति प्रवादासङ्गतिरिति चेत्सत्यम् । उद्देश्यविधेयभावेनान्वयाभावे तात्पर्यात् । अत एव न विधौ परः शब्दार्थ इति प्रवादः । शाब्दिकमते तु प्रवाहत्वेनैव तीरबोधान्न कापि शङ्का । तार्किकमतमाह । सम्बन्ध एवेति । न तु पूर्वोक्त उद्बुद्धसंस्कारः । ननु तीरतीरत्वयोरेकस्य प्रवाहसम्बन्धस्याभावात्तार्किकमते तत्र शक्यसम्बन्धरूपा लक्षणा न स्यादत आह । अत्र पक्षे ऽपीति । अपिना प्रथमपक्षे ऽपि लक्ष्यतावच्छेदके लक्षणा सूचिता । एतेन शक्यादशक्योपस्थितिरूपा लक्षणा शक्यतावच्छेदके ऽप्यस्ति शक्यसम्बन्धरूपा तु नास्तीत्यपास्तम् । ननु संयोगसम्बन्धस्तीरे तीरत्वे तु संयुक्तवृत्तित्वमिति तयोर्भेदात्सम्बन्ध इत्येकवचनानुपपत्तिरत आह । जाताविति । सम्बन्धत्वेनैकत्वादिति भावः । वस्तुतस्तु पदपदार्थयोरभेदाध्यासेनैकत्वाद्गङ्गापदमेव सम्बन्धिज्ञानविधया तीरस्मारकमस्तु । अविनाभूतत्वात्तीरत्वस्मृतावपि तत्र गङ्गापदवृत्तिकल्पने बीजाभावः । लक्ष्यतावच्छेदके ऽपीति । अन्यथा शक्यतावच्छेदके ऽपि शक्तिर्न स्यात् । ननु तीरत्वं गङ्गाया इति सम्बन्धग्रहाभावान्न तत्र लक्षणेति

चेत् । घटो नेत्यादौ यथा घटत्वे प्रतियोगितावच्छेदकत्वं संसर्गमर्यादया भासते एवं तीरत्वे ऽपि सामीप्यावच्छेदकत्वरूपपरम्परासम्बन्धसत्त्वात् ।

विशेषणे । तीरत्वादौ । दीधितिकारमतमाह । लक्ष्यतावच्छेदके न लक्षणेति । उभाभ्याम् । तीरतीरत्वाभ्याम् । विशेष्येति । तीरादीत्यर्थः । तीरत्वप्रकारकतीरविशेष्यकशाब्दबोधं प्रति तीरनिष्ठसम्बन्धज्ञानं कारणमित्यर्थः । एतन्मते वृत्त्येति नियमभङ्ग इत्यस्वरसः । मीमांसकमतमाह । तादृशेति । शक्यादशक्योपस्थितिर्लक्षणेति तत्सिद्धान्तात् । गङ्गापदेन प्रवाहस्मरणं प्रवाहेण च तीरस्मरणम् । तदेव च बोधहेतु । अत एव गङ्गापदस्य तीरोपस्थापकत्वाभावल्लाक्षणिकं नानुभावकमिति प्रवादः । ननु तीरोपस्थितेः पदजन्यत्वाभावात्कथं शाब्दबोधविषयतेति चेन्न । शक्यार्थबोधे एव तथा नियमेन लक्ष्यार्थबोधे पदार्थोपस्थितेरेव नियामकत्वात् । एतन्मते तीरस्य गङ्गापदार्थत्वाभावात्तत्र सप्तम्यर्थान्वयानापत्तिः । किञ्च उपस्थिति हेतुर्वृत्तिर्न तूपस्थितिरेव वृत्तिः । ननूपस्थितेरर्थनिष्ठत्वाल्लक्षणायाः शब्दधर्मत्वानापत्तिरत आह । स्वविषयेति । लक्षणाविषयतीरसम्बन्धिप्रवाहवाचकत्वसम्बन्धेनेत्यर्थः । ननु शक्तेरिच्छारूपतया लक्षणायाश्च बोधरूपतया भिन्नजातीयत्वाद्वृत्तित्वासम्भव इत्यत आह । वृत्तित्वं त्विति । पदपदार्थेति । गङ्गापदस्य यः प्रवाहे सम्बन्धः यश्च तीरे सम्बन्धः स वृत्तिरित्यर्थः । तथाच तीरसम्बन्धस्यैव वृत्तित्वे ऽपि लक्षणाहेतुत्वात्तस्यापि लक्षणात्वव्यवहार इति भावः । ननु शाब्दबोधजनकेत्याद्ययुक्तं पदेन पदार्थस्मरणस्यैवोदयादत आह । पदादपीति । आशय इति । अन्यथा अवान्तरवाक्यार्थबोधकाले पदार्थ-

स्मरणस्य नष्टत्वान्महावाक्यार्थबोधो न स्यात् । कमलानीति । एकं कमलपदं सौरभविशिष्टस्य बोधकम् । एतेन विशिष्टवाचकपदानां विशेष्ये न लक्षणा शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेत्युक्तेरिति तार्किकोक्तमपास्तम् । तत्प्रवादस्य निर्मूलत्वात् ॥ ३७

(क० टी०) मुख्यार्थान्वयानुपपत्तिज्ञानं तदुपक्षीणमेव समभिव्याहृतपदार्थासंसृष्टमुख्यार्थकत्वेन भ्रमादिरूपदोषरहिताप्तपुरुषोच्चारितत्वविशिष्टेन मुख्यार्थपरत्वाभावानुमानपूर्वकसामान्यतात्पर्यग्रहसहकारेण तदन्यपरत्वग्रहजननात् । तदेतत् ध्वनयन्नाह । अत्रेदमिति । तावन्मात्रेणानिर्वाहादाह । तदितरेति । अत एव तस्या एव तद्बीजत्वमुक्तम् । ननु तदुपस्थितिरेवास्तां कृतं मध्ये ऽन्वयबोधेनात आह । शक्यार्थेति । तत्र । बोधे । अयमन्येषामप्यावश्यक इत्याह । संसर्गेति । इयमपि तेषां न स्वरूपसती हेतुः किन्तु ज्ञातेति भावः । त्वादिति । इतीति शेषः । नन्वेवं नानार्थत्वादक्षादिपदवदर्थसन्देहापत्तिः, किञ्च नानार्थजबोधे तात्पर्यज्ञानकारणत्वावश्यकत्वेन गङ्गायां काष्ठमस्तीत्यादिवाक्ये प्रवाहबोधे ऽपि तात्पर्यज्ञानस्य त्वन्मते कारणत्वकल्पने गौरवमत आह । प्रसिद्धेति । एवं तृतीयमते ऽपि स्वशक्यसम्बन्धेन स्वशक्यान्तरस्यैवोपस्थितिस्तस्याः शक्तेस्तादृशस्थले एवोद्बोधकस्वीकारात्तथाच नाति प्रसङ्ग इति बोध्यम् । कारणवश्यकतज्ज्ञानस्वरूपमाह । सम्बन्धेति । इदम् । गङ्गापदम् । नन्वत्र यस्य न विशेष्यतया प्रकारतया वा तज्ज्ञानं तद्घटकतया तु प्रवाहे तीरसम्बन्धज्ञाने ऽपि न तीरे तत्सम्बन्धज्ञानं लक्षणनिविष्टमार्थिकं चेत् कृतमनेन गौरवं चात आह । गङ्गापदेति । अथादिपदग्राह्यनैयायिकादिमतमाह । सम्बन्धेति । शक्येत्यादिः । आवश्यकत्वाल्लाघवाच्च स च ज्ञातो हेतुर्न स्वरूपसन्निति भावः । अत्र पक्षे दोषमुद्धरति । अत्रेति । अपिना पूर्वपक्षसमुच्चयस्तत्र विशिष्टे एव शक्तिग्रहात् । शक्तिभेदवल्लक्षणाभेदे ऽपि दोषादाह । एकेति । नन्वेवं सम्बन्धत्वस्य प्रत्येकपर्याप्तत्वाल्लक्षणासङ्गतिरत आह । लक्षणेति । तत्फलमाह । एवञ्चेति । त-

था स्वीकारे चेत्यर्थः । प्रकारतयेति भावः । अत्र मते गौरवादत्रैव लघुभूतमतमाह । विशेषणे इति । तत्र सम्बन्धो यथाकथं चिन्निविष्ट इति भावः । अत्रैवेतो ऽपि लाघवान्मतान्तरमाह । लक्ष्यतेति । उक्तरीत्यासम्भवनिरासायानारोपितैकेति तीरेण सम्बन्धः । तीरत्वेन तु संयुक्तसमवायः । अधुनात्वंशे आरोपितत्वमेव । लक्षणे ऽपि तथैव निवेशः । अन्यथातिप्रसङ्गापत्तेस्तथा सम्बन्धद्वयनिवेशे प्रागुक्तगौरवाद्धेति भावः । नन्वेवमलक्ष्यस्य भाने ऽतिप्रसङ्गापत्तिरत आह । विशेष्येति । अथालङ्कारिकादिमतमाह । तादृशेति । तदनुपपत्तिपूर्वकं शक्यत्वेन गृहीतप्रसिद्धार्थसम्बन्धज्ञानजन्येत्यर्थः । तदुपेति । शक्यादशक्योपस्थितिरित्यर्थः । एकसम्बन्धिज्ञानविधया शक्तिप्रयोज्यपदजशक्यज्ञानजन्या शक्यतानवच्छेदकावच्छिन्नोपस्थितिरिति यावत् । गङ्गापदेन प्रवाहोपस्थितौ मुख्यार्थबाधज्ञानसहकृतैकसम्बन्धिज्ञानात्प्राक् गृहीतसम्बन्धकस्योपस्थितस्य तीरादेः शाब्दबोधे भानं, तत्र च पदप्रयोज्यैवोपस्थितिस्तत्र न तु पदजन्यैवेति नियम इति न दोषः । इयं च स्वरूपसती हेतुः । आकाशपदशक्यस्याप्याकाशस्य पदादेव समवायेनोपस्थितिस्तत्सम्बन्धाच्चान्योपस्थितिस्तस्य शाब्दे ऽन्वयवारणाय शक्तिप्रयोज्येति । घटरूपार्थदर्शनेन शक्तिसम्बन्धादुपस्थितघटाकाशस्य शाब्दे ऽन्वयवारणाय पदजन्यपदात्समवायेनोपस्थिताशक्यज्ञानजन्येति । सामान्यशब्दस्य विशेषे । लक्षणास्थले । उपस्थितविषयस्य विशेषप्रकारावच्छिन्नस्यार्थस्य शक्यार्थभिन्नत्वाभावात्तत्संग्रहाय शक्यतानवच्छेदकावच्छिन्नेति । एवञ्च शक्यतानवच्छेदकविशेषरूपावच्छिन्नत्वात्सङ्ग्रहः । न चैवं तादृशोपस्थितेः स्वरूपतो न मुख्यार्थबाधाधीनत्वं सम्बन्धिज्ञानादिरूपोद्बोधकसत्त्वे ऽपि तमनपेक्ष्यैव संस्कारेण मुख्यार्थस्येव तस्याप्युपस्थितेः सम्भवात् । तथाच लक्षणाया मुख्यार्थबाधाधीनत्वव्यवहारानुपपत्तिरिति वाच्यम् । तज्जन्यशाब्दानुभवस्य तदधीनत्वेन तस्या अपि तत्त्वव्यवहारादिति भावः । एवेन मतद्वयव्यवच्छेदः । एवं प्रागपि । नन्वेवमपि कथमस्याः पदनिष्ठत्वमत आह । स्वेति । अत एव लाक्षणिकं पदमिति व्यवहारः । चस्त्वर्थे । एवं मध्यपक्षे ऽपि स्वप्रतियोगिवाचकत्वेन

पदानिष्ठत्वं बोध्यम् । नन्वेवमपि वृत्तिभूतलक्षणाया नेदं लक्षणं योग्यमुपस्थतिहेतुर्हि वृत्तिर्न तूपस्थितिरत आह । वृत्तित्वं त्विति । लक्षणान्तरमपि प्रागुक्तम् । सिद्धान्तमतेन एकवाक्यत्वायाह । तन्मते ऽपीति । विशेषे एव प्राक्सम्बन्धग्रहात् जात्यन्यस्य निर्धर्मिकभानाभावाच्चेति भावः । शक्तिप्रयोज्येति विशेषणलब्धमेवाह । पदादपीति । अन्यथा पदप्रयोज्यापि सा नेति प्रागुक्तदोष एवेति भावः । न च मध्यमपक्षवत्कार्यकारणभावद्वयकल्पनागौरवम् । विशेषकार्यकारणभावानामावश्यकत्वेन तत्कल्पने मानाभावादिति तात्पर्यम ॥ ३७ ॥

लक्षणाभेदाः । सा द्विधा । गौणी शुद्धा च । स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी । तदतिरिक्तसम्बन्धेन तत्प्रतिपादिका शुद्धा । प्रकारान्तरेणापि सा द्विविधा । अजहत्स्वार्था जहत्स्वार्था च । शक्यार्थापरित्यागेनेतरार्थलक्षणमाद्या । तदपरित्यागश्च शक्यार्थस्य येन केनापि रूपेण लक्ष्यार्थान्वयिनान्वयित्वम् । तेन च्छत्रिणो यान्ति कुन्तान्प्रवेशय काकेभ्यो दधि रक्ष्यतामित्यादौ न दोषः । अच्छत्र्यादिसाधारणद्योतकतया[+] काकादेश्च लक्ष्यार्थान्वयिक्रियाविशेषणत्वात् ।

स्वार्थपरित्यागेनेतरार्थलक्षणमन्त्या । परित्यागश्च शक्यार्थस्य केनापि रूपेण लक्ष्यार्थान्वयिनानन्वयित्वम् । अतो गां बाहीकं पश्येत्यादौ न दोषः । अत्र गोसदृशे लक्षणायामपि न गोस्तदन्वयिदर्शनाक्रियान्वयित्वम् । एवं रीत्यान्ये ऽपि प्रकारा ऊह्याः । त्वगादिशब्दानां त्वचा ज्ञातमित्यादौ त्वगिन्द्रिये निरूढलक्षणा । असति प्रयोजने शक्यार्थबाधप्रतिस-

+ रूपाधच्छत्र्यादेः कुन्तवद्विशेषणतया कुन्तानां दृश्यपद्योतकतया +

न्धानपूर्वकं तत्सम्बन्ध्यपरार्थबोधे निरूढलक्षणेति व्यवहारो ऽन्यथा रूढिशक्तिरेवेति बोध्यम्। प्रयोजनवती तु कुन्ताः प्रविशन्तीत्यत्र भीतिपलायमानवाक्ये कुन्तानां तात्पर्यविषयप्रवेशो ऽन्वयबाधात्कुन्तपदस्य तत्संयुक्ते पुरुषे लक्षणा कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनम्।

गङ्गायां घोष इत्यत्र प्रवाहे घोषाधिकरणत्वबाधात् गङ्गापदेन स्वसम्बन्धि तीरं लक्ष्यते गङ्गागतशैत्यपावनत्वप्रतीतिः प्रयोजनम्। गौर्वाहीक इत्यत्र गोसादृश्यं लक्ष्यतावच्छेदकं गवाभेदप्रत्ययः फलम्। व्यञ्जनाजन्यबोधे बाधज्ञानस्याप्रतिबन्धकत्वात्। एवञ्चाहार्यशब्दजन्यभेदकधर्मोपस्थितिकालिकत्वात्। गङ्गायां घोष इत्यादौ च गङ्गागतशैत्यादिप्रतीतये मध्ये तीरादौ गङ्गाभेदप्रतीतिः। उपकृतं बहु नामेत्यादौ लक्ष्ये ऽपकारे ऽनुपकाराभेदप्रतीतिद्वारैव साधुत्वं व्यङ्ग्यम्।

केचित्तु गौर्वाहीक इत्यादौ साधारणधर्माश्रयो जडादिर्जडत्वेन लक्ष्यस्तत्र गवाभेदप्रतीतिद्वारा गोवृत्त्यसाधारणजडत्वप्रतीतिः फलम्। न च गौर्वाहीको जड इत्यादौ पौनरुक्त्यम्। लक्ष्यतावच्छेदकान्तरव्युदासे तस्य तात्पर्यात्। सदृशत्वेन लक्षणेति वादिनापि सादृश्यस्य विशिष्यसाधारणधर्मप्रतीतिं विना पर्यवसानाभावेन प्रसिद्ध्यादिना तात्पर्यावसानं वाच्यमित्यन्यथानुपपत्त्या प्रसृताया लक्षणायाः साधारणधर्मविशिष्टे एवौचि-

त्यात् । एतेन गौर्वाहीक इत्यादौ गोशब्देन स्वशक्यगतजाड्यादिगुणसदृशजाड्यादय एव लक्ष्यन्ते तैश्च जातिशक्तिनये व्यक्तिलाभवत्स्वाश्रयव्यक्तिलाभ इति परास्तमित्याहुः ।

ग्रामो दग्धः पुष्पितं वनमित्यादौ दग्धादिपदान्यर्थं आद्यजन्तानीत्यर्थवत्सूत्रभाष्योक्तेस्तत्र लक्षणैव नेति बोध्यम् । ईदृशेषु जहदजहल्लक्षणेत्यन्ये ॥ ३८ ॥

(कुं० टी०) स्वनिरूपितेति । स्वं शक्यम् । सादृश्यसम्बन्धेन यः शक्यसम्बन्धस्तत्प्रतिपादिका गौणीत्यर्थः । सा । शुद्धा । यत्तु जातिपक्षे गौरनुबन्ध्य इत्यत्र स्वार्थपरित्यागेन व्यक्तिबोधाल्लक्षणेति तन्न । तत्र हि अविनाभावात् व्यक्तिराक्षिप्यते न तु शब्देनाभिधीयते रूढेः प्रयोजनस्य वाऽभावेन लक्षणासम्भवात् । लक्षणम् । बोधनम् । ननु छत्रिपदाच्छत्रिबोधे कथमन्यबोधः, अच्छत्रिबोधे च स्वार्थस्य परित्याग एवेत्यत आह । तदपरित्यागश्चेति । तथाच उभयसाधारणरूपेण शक्यलक्ष्ययोरेकत्रान्वये सेत्यर्थः । येन केनापीति । विशेष्यतया विशेषणतया वा । छत्रिणो यान्तीति । अत्रैकसार्थवाहित्वेनाच्छत्रिणामिव च्छात्रिणामपि गमने ऽन्वयः । यत्र स्वार्थस्य विशेष्यतया क्रियान्वयः सा अजहत्स्वार्था । यष्टीः प्रवेशयेत्यादौ तु जहत्स्वार्थैवेति तार्किकोक्तं निराकर्तुमाह । कुन्तवदिति । कुन्तिनि पुरुषे कुन्तो विशेषणम् । तथाच कुन्तिनामिव विशेषणतया कुन्तानामपि प्रवेशे ऽन्वयः । तीक्ष्णत्वं च साधारणो धर्मः । काकेभ्यो दधीत्यादेरजहत्स्वार्थत्वोपपादनेन तृतीयप्रकारत्वं निराकरोति । दध्युपघातकतयेति ।

अत्रेति । गोसदृशे लक्षणायां गोरपि विशेषणत्वे ऽपीत्यर्थः । ननु गोत्वमेव वाहीके आरोप्यत इति मते कथं स्वार्थस्य त्याग

इति चेत्प्रत्येकं जातीनां व्यापकत्वे ऽपि यत्राभिव्यक्तास्तत्रैव कार्यसाधका इति वक्ष्यमाणत्वेन तद्रीत्या स्वार्थत्यागात् । ननु कुशलादिपदे ऽपि स्वार्थबोधपूर्वकपदार्थो भवति विवेचकत्वे च सम्बन्धो ऽप्यस्तीति निरूढलक्षणात्वापत्तिरत आह । असति प्रयोजने इति । यथा हि शैत्यपावनत्वादिप्रतीतये गङ्गापदेन तीरं लक्ष्यते नैवं रूढिस्थले इत्यर्थः । अन्वयेति । तथाच कुशलशब्दे ऽवयवार्थानुसन्धाने निरूढलक्षणाननुसन्धाने तु रूढिरेव । ननु कथं शुद्धेव द्विधा गौण्या अपि भेदद्वयसम्भवात् । तथाहि गौर्बाहीक इत्यत्र जहत्स्वार्था गोबाहीकोभयतात्पर्यके एते गाव आनीयन्तामित्यादावजहत्स्वार्थेति चेत्सत्यम् । अत्र सम्बन्धः सादृश्यमन्यो वा । आद्ये शक्यसादृश्यस्य शक्यावृत्तितया कथं शक्यस्य लक्ष्यत्वं येनाजहत्स्वार्थता स्यात् । द्वितीये तु सादृश्यसम्बन्धाभावे गौणीत्वमेव न स्यात् । कुन्तानामिति । तात्पर्यविषये कुन्तिप्रवेशे कुन्तानामन्वयबाधादित्यन्वयः ।

गोसादृश्यमिति । उपमितसमासे एव सादृश्यं लक्ष्यतावच्छेदकमित्यन्ये ननु गवाभेदस्य बाधितत्वात्कथं तत्प्रतीतिरत आह । व्यञ्जनाजन्येति । बाधज्ञानं तु निश्चयात्मकमेव प्रतिबन्धकं बाधसंशयानन्तरमपि विशेषदर्शने तद्वत्ताबुद्धेः अप्रतिबन्धकत्वे बीजमाह । एवञ्चेति । अनाहार्यज्ञानस्यैव प्रतिबध्यत्वादिति भावः । भेदकेति । गोत्वबाहीकत्वयोर्भेदकत्वात् । मध्ये इति । वाक्यार्थबोधात् प्रागित्यर्थः । तटादीनां प्रतिपादने कृते तत्प्रतीत्याभेदे सति पावनत्वादिलाभ इति भावः ।

उपकृतमिति । उपकृतं बहु नाम किमुच्यते सुजनता प्राथिता भवता परमित्यत्रापकारिणं प्रति उपकृतमित्यपकारं लक्षयति । गोशब्दस्य जाड्यादिपरत्वे गोर्जाड्यमिति प्रतीत्यापत्तिर्नामा-

र्थयोरभेद इति न्यायविरोधश्चेत्यभिप्रेत्याह । केचित्त्विति । अयम्भावः गवाभिन्नो बाहीक इति बोधे अभेदस्य बाधितत्वाद्गोशब्देन गोसदृशं लक्ष्यम् । गोसादृश्यं च गोगतजाड्यमान्द्यादि । तथाच जडाभिन्नो बाहीक इति बोध इति । अत एव शङ्कते । पौनरुक्त्यमिति । शक्यादशक्योपस्थितिर्लक्षणेति मते तु लाक्षणिकं नानुभावकमिति प्रवादः । तथाच गङ्गापदात्तीरानुपस्थितौ तत्र सप्तम्यर्थान्वयानापत्तिः प्रत्ययानां प्रकृत्यर्थान्वितेति न्यायात् । तार्किकाणामयं प्रवादः कथमिति चेत् । उद्देश्यविधेयभावेन लाक्षणिकं नानुभावकमिति तदर्थः । अत एव न विधौ परः शब्दार्थ इति प्रवादः । परे तु कुमतिः पशुरित्यादौ सर्वलाक्षणिके ऽन्वयदर्शनाल्लाक्षणिकं नानुभावकमिति प्रवादो ऽसङ्गत एवेत्याहुः । ननु साधारणधर्माश्रये लक्षणायामाल्हादयति मुखेन्दुरित्यत्र पौनरुक्त्यापत्तिरिति चेदत्राहुरिन्दुपदस्य इन्दुवृत्तिधर्मवति लक्षणेति ।

सदृशत्वेन लक्षणेति । सदृशे लक्षणेत्यर्थः । सादृश्यस्येति । जडत्वे एव सादृश्यपर्यवसानात्तेनैव रूपेण लक्षणास्त्वित्यर्थः । स्वशक्यगतेति । गवादिपदार्थगोत्वादिसहचारिणो जाड्यादयो लक्ष्यन्त इत्यर्थः । नन्वेवं गौर्बाहीक इत्यत्र सामानाधिकरण्यानुपपत्तिरत आह । जातिशक्तिनये इति । तथाच द्विगुणसदृशजाड्याक्षिप्तं प्रवृत्तिनिमित्तीकृत्य गोशब्दो बाहीके वर्तत इत्यर्थः । परास्तमिति । साधारणं जाड्यादिलक्ष्यतावच्छेदकमाश्रित्य तदाश्रय एव लक्षणाया उचितत्वात् । अन्यथा लक्ष्यमाणव्यधिकरणत्वमशक्यस्य बाहीकस्य गोशब्देन प्रतिपादनासम्भवश्च । तदाहुः लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति । लक्ष्यमाणा ये जाड्यादयस्तैरेव यदि शक्यसम्बन्धस्तदा गौणी वृत्तिरित्यर्थ इति भावः ।

ग्रामो दग्ध इति। अवयवधर्माणां समुदायेऽत्रारोप इति न युक्तम्। दग्धपदस्यैव दग्धगृहवद्वाचकत्वादिति भावः। जहदजहदिति। दग्धस्य तद्वतश्च बोधात्॥ ३८॥

(क० टी०) मतान्तरासाङ्गत्यध्वननाय प्राग्वद्विभजते। सेति। यत्तु गौणी न लक्षणान्तर्गता विशिष्टबुद्धियोग्यसम्बन्धे सत्येव लक्षणाप्रवृत्तेः। न हि संयोगेन दण्डी चैत्र इति वत्सादृश्येन सिंहवान् चैत्र इति भवतीति मीमांसकास्तत्र विशिष्टबुद्धियोग्यत्वे ऽपि विपरीतलक्षणास्थले स्वनिरूपितविरोधाधिकरणत्वसम्बन्धे ऽप्यस्याः सत्त्वात्। तदेतत् ध्वनयन्नादौ तामाह। गौणीति। स्वं शक्यो ऽर्थः। अत एव लाघवेनाह। तदतीति। तदौ प्रक्रान्तपरामर्शकौ। अपिः पूर्वसमुच्चये। सा। लक्षणा। तथाच द्विधापि सा द्विविधेत्यर्थः। लक्षणमित्यत्र करणे ल्युट्। सामान्ये नपुंसकम्। ननु शक्यार्थपरित्यागस्य काप्यभावेन विशेषणं व्यर्थमत आह। तदपरीति। शक्यार्थापरीत्यर्थः। तेनेत्यस्यार्थमाह। छत्र्यादीति। आदिना छत्रिणः। तादृशरूपं चैकसार्थप्रविष्टत्वम्। अत इत्यस्यार्थमाह। अत्र हीति। हि यतः अत्रोदाहृतयोराद्या शुद्धा अन्त्या गौणी। उपसंहरति। एवमिति। सारोपात्वसाध्यवसानात्वरूढिमतीत्वप्रयोजनवतीत्वादिरूपा इत्यर्थः। तेषामेव दिक्प्रदर्शनं कुर्वन्नाह। त्वगादीति। इयं शुद्धा जहत्स्वार्था। ननु रूढिः प्रसिद्धिस्तथाचैषामर्थानां प्रसिद्धत्वे शक्तिरेवास्तु अश्वगन्धादिपदानामिवौषाधिविशेषादावत आह। असतीति। इदञ्च प्रयोजनवत्यतिप्रसङ्गनिरासाय। एतेन यदि कुशलादिपदे शुकादिपदे च तत्पूर्वकं दक्षादेर्गुणिनश्च बोधः प्रामाणिकानुभवसिद्धस्तदा लक्षणा विवेचकत्वरूपं सादृश्यम्। विवेचकत्वं च सतो ग्रहणमसतः परित्यागरूपं कुशग्राहिणि दक्षे च वर्तते। तत्राप्याद्ये जहत्स्वार्थान्त्येऽजहत्स्वार्थाऽन्यथारूढिशक्तिरेवेति सूचितम्। युक्तश्चान्त्यपक्षः दक्षत्वादेः प्रवृत्तिनिमित्तत्वात्। व्युत्पत्तिनिमितस्य च झटित्यप्रतीतेर्बाधप्रतिसन्धानं विनापि तत्प्रतीतेः। कुशेः कलजित्यादिना तत्साधनाच्चेति बोध्यम्। शन्तीति पूर्वान्वयि। कुन्तगतेति। लक्ष्येष्वित्यादिः। इयं शुद्धाऽजहत्स्वार्था पुरुषविशेषणतया कुन्तानां प्रवेशान्वयात्।

इमाम् । शुद्धाम् । जहत्स्वार्था न उक्तयुक्तेः । गोबाहीकोभयपरे गाव एते समानीयन्तामित्यादौ गोबाहीकसमुदायः छत्रिन्यायेन लक्ष्यते न तु गोसदृशत्वेन स्वस्मिन्भेदघटितसादृश्याभावादिति प्राञ्चः । यत्तु मुख्यार्थविशेषणिका लक्षणाऽजहत्स्वार्था सा च गौण्यपीति तन्न । चित्रगुरित्यादावपि परमते ऽजहत्स्वार्थात्वापत्तेः । काकेभ्य इत्यादौ मुख्यार्थस्य विशेषणत्वाभावेन तदसङ्ग्रहाच्च । यदा यत्किञ्चिद्गोसदृशत्वेन गोबाहीकसमुदायप्रतिपिपादयिषया गाव एते यान्तीति प्रयुक्तं तदा गौण्यप्याद्या दुर्वारैवेति नव्याः । तदेतत् हृदि निधाय प्रयोजनवर्ती गौणीं जहत्स्वार्थामुदाहरति । गौरिति । बाहीके गोत्वबाधात् गोसदृशलक्षणादिति भावः । सादृश्यमहिम्ना भिन्नधर्मप्रकारकोपस्थितावपि गोपदशक्याभेदप्रतीतिर्व्यञ्जनया बाहीके ऽत्रेत्याह । गवेति । ननु बाधज्ञानसत्त्वात्कथं तयापि सो ऽत आह । व्यञ्जनेति । बाधितार्थबोधकतयैव तस्या धर्मिग्राहकमानसिद्धत्वादिति भावः । यत्तु आहार्यत्वं भेदस्योपस्थितेस्तदसम्भवेनेच्छयैव तदुत्पत्तेरिति तन्न । विषयविषयिपदाभ्यां तत्तद्धर्मप्रकारेण तयोरुपस्थितौ तयोरन्वयबाधात् । प्रसिद्धत्वादिना झटिति तत्सादृश्योपस्थितौ लक्षणया सदृशप्रकारकबोधे सादृश्यमहिम्ना गोत्वबाहीकत्वयोः सामानाधिकरण्यसम्भावनया जातस्यापि भेदज्ञानस्य निरोधनात् । उक्तहेतोश्च । तदेतत् ध्वनयन्नन्यथा तत्त्वमाह । शब्दजन्येति । कत्वात् । तन्मात्रत्वात् । अयं शुद्धायामप्यावश्यक इत्याह । गङ्गायामिति । इत्यादावपीत्यर्थः । मध्ये । लक्ष्यार्थव्यङ्ग्यार्थबोधयोर्मध्ये । तथाच गौण्यां स एव प्रयोजनं शुद्धायां तु उद्देश्यतया चमत्कारितया च प्रधानस्य प्रयोजनात्तस्य सत्त्वात्स चाङ्गं न तु सर्वथा तत्र तदभावः । तदुक्तं मम्मटेन तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ प्रतिपिपादयिषितप्रयोजनसम्प्रत्यय इति । तत्त्वेत्यस्य मुख्यगङ्गाद्यभेदेत्यर्थः । न च लक्षणामूलतया गङ्गासम्बन्धप्रतीत्या तत्सिद्धिः । गङ्गातटे घोष इत्यतो ऽपि तत्प्रतीत्यापत्तेः । तदप्युक्तं तेनैव गङ्गासम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाल्लक्षणायाः को भेद इति ।

उपकृतं बहु नाम किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम् ॥

एतच्चापकारिणं प्रति विपरीतलक्षणया कस्यचिदुक्तिः । अपकृतं दुर्जनता शत्रो दुःखितं शरदां वर्षाणामिति बोध्यम् । नन्वेवमुपकृतमित्यादावप्यभेदबुद्धिः स्यादत इष्टापत्तिमाह । उपेति । गौण्यां मम्मटादिमतमाह । केचित्त्विति । जडादिः । वाहीकादिः । जडत्वेन । तदादिना । साधारणेन । जाड्यत्वाद्यवच्छिन्नेनेति यावत् । तथाच जडो वाहीक इत्यादिवाक्यार्थ इति भावः । तत्र । वाहीके । अत्रान्यथा आह । लक्ष्यतेति । ननूपस्थापकाभावेन तस्यानुपस्थित्या कथं तद्विशिष्टे लक्षणात आह । सदृशेति । वाच्यमिति । तथाच गौरवमिति भावः । अत एव लाघवादाह । इतीति । शङ्कानिरासायाह । अन्यथेति । मीमांसकमतं खण्डयति । एतेनेति । पौनरुक्त्यापत्तेस्तत्रापि सादृश्यस्य तावता तथात्वेन तथा वाच्यमिति तथौचित्याच्चेत्यर्थः । एवेन गुणिव्यवच्छेदस्तेषां वाहीकशब्दादेव लाभादिति भावः । सामानाधिकरण्यानुपपत्तिरूपप्रदीपोक्तदोषोद्धारमाह । तैश्चेति । तथाच गोनिष्ठजाड्यसजातीयजाड्यवदभिन्नो वाहीक इति बोधः । अत्रारुचिबीजं परे त्वित्यादिना व्यक्तीभविष्यति । मतान्तरासाङ्गत्यध्वननायादौ सिद्धान्तमाह । ग्राम इति । तत्र । ग्रामादिपदे । तदेवमतान्तरमाह । ईदृशेष्विति । ग्रामादिपदस्य स्वार्थैकदेशं परित्यज्य तदेकदेशे वृत्तेस्तथाच तृतीयोऽयं भेदः दग्धभूयस्त्वादिद्योतनं च फलमिति भावः । अन्ये इत्यरुचिबीजं तूक्तरीत्या तत्र तदभाव एव । किञ्च तत्त्वमसीत्यादौ तत्सत्त्वे ऽपि द्वितीयभेदेनैवास्यासङ्ग्रहः । स्वार्थैकदेशत्यागे ऽपि तत्त्यागसत्त्वात् । आद्येन तु न सङ्ग्रहः नञः प्रतियोगितावच्छेदकावच्छिन्नाभावबोधकत्वादिति ॥ ३८ ॥

स्वज्ञाप्यसम्बन्धो लक्षणा । केचित्तु ज्ञाप्यसम्बन्धेनोद्बुद्धशक्तिसंस्कारतो बोधेऽलक्षणा । गभीरायां नद्यां घोष इत्याद्यनुरोधात् । तथाहि न तावद्गभीरपदं तीरलक्षकं नद्यामित्यनन्वयापत्तेः । न हि तीरं नदी । अत एव न

नदीपदे ऽपि। गभीरपदार्थानन्वयात् । न हि तीरं गभीरम् । न च पदद्वये प्रत्येकं सा । विशिष्टनदीतीराप्राप्तिप्रसङ्गात् । न च नदीपदेन गभीरनदीतीरं लक्ष्यते गभीरपदं तात्पर्यग्राहकमिति वाच्यम् । विनिगमनाविरहात् । न च नदीपदस्य द्रव्यवाचकतया साक्षात्सम्बन्धानुरोधेन तत्रैव सेति वाच्यम् । गभीरपदस्यापि नित्यगुणिबोधकतया तेनापि साक्षात्सम्बन्धस्यैव सत्त्वात् । अतः समुदाये साङ्गीकार्या । अत एवार्थवादवाक्यानां प्राशस्त्ये लक्षणासिद्धिः । अपभ्रंशे तु लक्षणेष्टैव । अत एव लक्ष्यस्य व्यञ्जकतायां साहेतीत्याद्युदाहरणं प्रकाशकारैर्दत्तं तस्यापि शक्तत्वाच्च । ज्ञापकत्वं चार्थबोधकतापर्याप्त्यधिकरणत्वमिति न प्रत्येकं वर्णेषु सा । लक्ष्यतावच्छेदकत्ववल्लक्षकतावच्छेदकत्वस्यापि गुरुभूतायां पदघटितानुपूर्व्यां स्वीकारे बाधकाभावः। ज्ञापकताशरीरे ज्ञानं च शाब्दबोधरूपमेव निविष्टमिति न समवायेन घटादिपदज्ञाप्याकाशसम्बन्धिनो ऽप्युपस्थितस्य शाब्दबोधविषयत्वम् । अत एव च्छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वेन च्छत्र्यच्छत्रिसमुदाये लक्षणेति समासादिवृत्तौ विशिष्टशक्तिमनङ्गीकुर्वन्तो ऽपि वृद्धा इत्याहुः ॥ ३९ ॥

(कुं० टी०) स्वज्ञाप्यसम्बन्धो लक्षणा। भवति च वाक्यार्थो ऽपि वाक्यज्ञाप्यस्तेन वाक्यस्य लक्षणेति मीमांसकमतेनाह । ज्ञाप्येति । गभीरायां नद्यामिति वाक्यस्य बोध्यो गभीराभिन्नानदी तत्सम्बन्धस्तीर इति भावः। न हि तीरं नदीति ।

गभीरतीरे नद्यामित्यर्थासम्भवात्। न नदीपदे ऽपीति। नदीपदे-न नदीतीरग्रहणे गभीरसामानाधिकरण्यासम्भव इत्यर्थः। पदद्वये। गभीरपदे नदीपदे च। प्रत्येकमिति। गभीरपदस्य गभीरतीरे नदीपदस्य नदीतीरे इत्यर्थः। विशिष्टेति। गभीरनदीतीरबोधानापत्तेरित्यर्थः। यत्तु गभीरपदं नदीपदं चेत्युभयमपि गभीरनदीतीरलक्षकं तत्रैकपदादर्थबोधे ऽपरं तात्पर्यग्राहकमिति तन्न। एवमपि समुदायशक्तौ पर्यवसाने तस्या एव न्याय्यत्वात्। विनिगमनाविरहादिति। गभीरपदस्यैव लक्षणास्त्वित्यर्थः। गभीरत्वविशिष्टनदीसंयुक्तत्वस्य सम्बन्धत्वे गौरवाल्लाघवान्नदीपदमेव लक्षकमिति युक्तम्। गभीरपदं गभीरत्वगुणे शक्तमित्याशयेन शङ्कते। न चेति। गुणीति। शुक्लादिशब्दवत्। अत एव। समुदाये लक्षणास्वीकारादेव। अर्थवादवाक्यानामिति। अर्थस्य प्रयोजनस्य वदनं विध्यर्थप्रशंसापरं वचनम्। वायुर्वै क्षेपिष्ठा देवता इति वाक्यस्य वायुदेवताकं कर्म प्रशस्तमित्यर्थलक्षकत्वात्। परे तु सर्वत्र विशेष्यपदस्यैव लक्षणा इतरपदानां तात्पर्यग्राहकत्वाच्च वाक्यलक्षणाप्रवाद इत्याहुस्तन्न। विश्वरूपो वै त्वाष्ट्र इत्यादौ विशेष्यपदानामप्यनेकत्वेन कस्य लक्षणेत्यत्र विनिगमकाभावात्।

नन्वेवमपभ्रंशे ऽपि स्वबोधसत्त्वाल्लक्षणापत्तिरतः शक्यसम्बन्धरूपैव लक्ष्मणेष्टव्येति तार्किकमतं निराकरोति। इष्टैवेति। अपभ्रंशे ऽपि लक्षणास्तीति दर्शयति। साहेतीति।

साहेती सहि सुहअं खणे खणे दूमिआसि मज्जकए।
सम्भावणेहकरणिज्जसरसिअं दाव विरइअं तुमए॥

इति प्राकृतम्।

साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मम कृते ।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया ॥

इति संस्कृतम् । मदर्थं नायकं वशीकुर्वन्ती त्वं हे सखि मदर्थं क्षणे क्षणे दूषितासि सद्भावस्नेहाभ्यां सदृशं यत्करणीयं तत् त्वया कृतमिति तदर्थः । अत्र मत्पतिं रमयन्त्या त्वया शत्रुत्वमाचरितमिति व्यज्यते । यत्तु ज्ञाप्यत्वं न स्वजन्यबोधाविषयत्वम् । घटशब्दात्समवायेनाकाशस्याप्युपस्थितेः । नापि स्वजन्यशब्दबोधविषयत्वम् । गङ्गापदात्प्रवाहस्याबोधेन लक्षणानापत्तेः । तस्मात् शक्त्या स्वजन्यबोधाविषयत्वमेव ग्राह्यमिति तन्न । प्रवाहसम्बन्धित्वेनैव तीरबोधात् । अपभ्रंशे ऽपि शक्तिस्वीकारात् । शक्यसम्बन्धो ऽपि तत्रास्तीत्याह । तस्यापीति ।

न प्रत्येकमिति । बोधकतायाः पदादावेव पर्याप्तत्वात्तत्रैव लक्षणेत्यर्थः । पदघटितेति । वाक्यलक्षणायामित्यर्थः । शाब्दबोधरूपमेवेति । घटादिपदादाकाशोपस्थितिस्तु सम्बन्धिज्ञानविधया स्मरणरूपैव । समुदायलक्षणायां तार्किकादीनामपि सम्मतिमाह । छत्रिणो यान्तीति । ननु समुदायशक्त्यनङ्गीकारे छत्रीति समुदायस्याशक्तत्वात् कथं तस्य लक्षणेति चेदत्राहुः । छत्रपदस्यैव एकसार्थवाहे लक्षणा । मतुबर्थश्च सम्बन्धः । तथाच एकसार्थसम्बन्धवन्तो गच्छन्तीत्यर्थः । छत्रिपदस्य लक्षणेति प्रवादस्तु स्वज्ञाप्यसम्बन्धसत्त्वादित्यभिप्रायेण । एकसार्थवत्त्वेन च च्छत्रस्याप्यन्वयादजहत्स्वार्थत्वमिति । अनङ्गीकुर्वन्तो ऽपीति । ये समुदाय शक्तिं नाङ्गीकुर्वन्ति ते ऽपि समुदायलक्षणां वदन्तीत्यर्थः । छत्रिशब्दस्य शक्त्यभावे ऽपि स्वज्ञाप्यसम्बन्धरूपा लक्षणा भवत्येवेति भावः ॥ ३९ ॥

[कु० टी०] उक्तमतानां मध्ये मतद्वयं न युक्तं किन्त्वाद्य-

मेवेति सूचयितुं तत्र शक्येत्यत्र ज्ञाप्येति निवेश्य तदेव परिष्कुर्वतां व्यपेक्षादिवादिनां मतमाह। केचित्त्विति। तदनुपपत्तिपूर्वकं स्वज्ञाप्यत्वेन गृहीतप्रसिद्धार्थसम्बन्धज्ञानेनेत्यर्थः। नन्वत्रैकपदलक्षणोक्तमतेनैव सिद्धेति वृथायं प्रयासो ऽत आह। तथा हीति। पदेपि लक्षकत्वमिति शेषः। अत एवेत्यस्यार्थमाह। गभीरेति। उभयथानन्वयमुद्धरति। न चेति। उक्तमतेनैवेति भावः। एवमग्रे ऽपि। इयमप्युद्धरति। न चेति। एवमग्रे ऽपि। अतः विनिगमनाविरहसत्त्वात्। कार्येति। तत्र च शक्त्यभावेनोक्तमतेनानिर्वाहादिदमावश्यकमिति भावः। मीमांसकसम्मतमपीदमित्याह। अत एवेति। ज्ञाप्यत्वनिवेशादेवेत्यर्थः। नन्वेवमपभ्रंशे ऽपि लक्षणापत्तिः पूर्वमते तु न तस्यावाचकत्वादत आह। अपेति। तदशक्तत्ववादिनां पूर्वमतेन स्यादित्यनिष्टमेवेति तत इदमेव वरमिति वैलक्षण्यसूचकस्तुः। तत्र सम्मतिमाह। अत एवेति। तत्र तदिष्टत्वादेवेत्यर्थः। तायाम्। विषये।

साहेति सहि सुहअं खणे खणे दूमिआसि मज्जकए।
सम्भावणेहकरणिज्जसरिसिअं दाव विरइअं तुमए॥
साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मम कृते।
सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया॥

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यते तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्। एवं परमतेनोक्त्वा सिद्धान्तमतमाह। तस्यापीति। अपभ्रंशस्यापीत्यर्थः। एवञ्च पूर्वमते ऽपि सा तत्र दुर्वारैवेति भावः। नन्वेवमपि बोधकत्वस्य घटकतया वर्णेषु सत्त्वेन तत्रातिप्रसङ्ग एवात आह। ज्ञापकेति। सा। पदादिनिष्ठत्वेन स्वीक्रियमाणा लक्षणा। नन्वेवमपि लक्षकतावच्छेदकगौरवान्न वाक्यनिष्ठत्वमस्या उचितमत आह। लक्ष्यतेति। दध्युपघातकत्वादिस्तत्त्ववदित्यर्थः। नन्वेवमन्यथा ज्ञाप्यत्वमादायातिप्रसङ्ग एवात आह। ज्ञापकतेति। ज्ञाप्यत्वस्य स्वनिष्ठज्ञापकतानिरूपितत्वादिति भावः। स्थितस्य। शब्दादेः। शाब्देति। लक्षणाजन्येत्यादिः। तस्या एवाभावात्तत्र तस्येति भावः। निर्विवादलक्ष्यदर्शनद्वारा सर्वसम्मतिमाह। अत एवेति। ज्ञाप्यत्वनिवेशादेवेत्यर्थः। पूर्वमते तु नेति सूचयन्नाह। समासादीति। आदिना

तद्धितादिः । अपिना तत्समुच्चयः । तथाच तदेकवाक्यतया तेषामिदमावश्यकमिति भावः । अनेनात्रारुचिबीजमपि सूचितम्, वृत्ताविव वाक्ये ऽपि शक्त्यङ्गीकारादिदं वृथेत्येवम् ॥ ३९ ॥

हर्यादिसिद्धान्तनिगर्वः परे तु आरोपितशक्यतावच्छेदकरूपेण शक्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहारः। छत्रिणो यान्तीत्यादावप्यच्छत्रिषु साहचर्याच्छत्रित्वारोपः । काकेभ्यो दधीत्यादावपि दध्युपघातकमात्रे काकत्वारोपः । कमलानि कमलानीत्यादौ कमलत्वेनैव व्यक्तिविशेषबोधः । त्वामस्मि वच्मीत्यादौसम्बोध्यत्वादिनैवोपदेश्यत्वावस्थाविशिष्टतत्तद्व्यक्तिबोधो लक्षणया । अत्र पौनरुक्त्याद्विशेषानाधायकत्वाद्वा तात्पर्यानुपपत्तिः सामान्यविशेषभावः सम्बन्धः। अत एव पुंयोगादाख्यायामिति सूत्रे भाष्ये गोपीत्यादौ गोपसम्बन्धिस्त्रीत्वेन लक्षणायां तस्येदमिति शास्त्रेण तादृशेर्थे ऽण्प्रत्ययान्तस्यैव वा साधुत्वनियमादसाधुत्वापत्तिं दूषणमभिधाय नावश्यमयमेवाभिसम्बन्धो भवति तस्येदमिति किन्तु तन्मूलकः सो ऽयमित्यप्यभिसम्बन्धो ऽस्तीत्युक्त्वा चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति तात्स्थात् ताद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यात् मञ्चा हसन्ति सिंहो माणवकः गङ्गायां घोषः यष्टीः प्रवेशयेत्युक्तम् । सो ऽयमित्यपीत्यादेः सो ऽयमित्यपि विशेष्यविशेषणभावो ऽस्तीत्यर्थः । न च गङ्गायां घोष इत्यादावारोपितगङ्गात्वेन बोधे ऽपि तस्य ज्ञानस्य भ्रमत्वाच्छास्त्रज्ञानवतां सर्वथाभ्रमत्वेन ग्रहाच

तदुत्तरं गङ्गागतशैत्यपावनत्वादिप्रतीतिरूपं फलं न सिध्येत् । अत एव शुक्तिरजतज्ञाने भ्रमत्वज्ञानवतो न प्रवृत्तिरिति वाच्यम् । मध्ये व्यञ्जनया मुख्यगङ्गापदार्थाभेदस्यापि प्रतीतेः । व्यञ्जनाजन्यज्ञाने च बाधज्ञानेन नाप्रामाण्यग्रह इत्यदोषात् ॥ ४० ॥

(कुं० टी०) अर्थमात्रं विपर्यस्तशब्दः स्वार्थे व्यवस्थित इति हर्यादिसिद्धान्तमाश्रित्याह । परे त्विति । वाच्यत्वेन प्रसिद्धो यः प्रवाहस्ताद्भिन्नस्य तीरस्य प्रवाहत्वरूपेण शक्त्यैव बोध इत्यर्थः । प्रवाहत्वमेव तीरे आरोप्यत इति भावः । व्यक्तिविशेषेति । सौरभत्वविशिष्टेत्यर्थः । सामान्यस्यैव वाच्यतया विशेषस्याशब्दार्थत्वादिति भावः । एतेन शक्यादन्येन रूपेण ज्ञातत्वाभावात्तत्र लक्षणा नेति तार्किकोक्तमपास्तम् । आरोपे बीजं दर्शयति । छत्रिणो यान्तीत्यादि । व्यक्तिविशेषेति । यथा एकं कमलपदं सौरभत्वविशिष्टबोधकम् ।

त्वामस्मीति ।

त्वामस्मि वच्मि विदुषां समवायो ऽत्र तिष्ठति ।
आत्मीयां मतिमाधाय स्थितिमत्र विधेहि तत् ॥

अत्रास्मीत्यहमित्यर्थे ऽव्ययम् । अत्र वच्मीत्यनुपयुक्तार्थम् । तदनुपादाने ऽपि वचनक्रियाप्रतीतेरतस्तत्र वचनमुपदेशरूपतां लक्षयति । हितसाधनत्वं चात्र व्यङ्ग्यम् । एवं त्वामस्मीति पदे ऽप्यनुपयुक्तार्थे सम्बोध्यतयैव युष्मदर्थस्य वचनकर्मताप्रतीतेः । वच्मीत्युत्तमपुरुषेणैवास्मदर्थस्य तत्कर्तृताप्रतीतेरतस्ताभ्यामुपदेश्यत्वाप्तत्वे लक्ष्येते । व्यक्तिबोधो लक्षणयेति । शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेति तु निर्मूलमिति भावः । सामान्येति । अस्मदर्थसामान्यं शक्यमाप्तत्वविशिष्टो ऽस्म-

दर्थस्तु लक्ष्यः तयोश्च सामान्यविशेषभावः सम्बन्ध इति भावः । अत एव । आरोपेण बोधादेव । वाक्यस्यैवेति । तद्धितस्य वैकल्पिकत्वात् । गङ्गायां घोष इति । यत्तु तीरत्वेन बोधे जहत्स्वार्था गङ्गातीरत्वेन बोधे त्वजहत्स्वार्थेति तार्किकास्तन्न । तीरत्वेन बोधे शैत्यपावनत्वादीनां प्रतीत्यनापत्तेः ।

ननु गङ्गापदार्थाभेदस्य बाधितत्वात्कथं तदर्थस्याबाधितत्वमत आह । बाधज्ञानेनेति । यत्तु मुखं चन्द्रो गौर्वाहीक इत्यादौ लक्षणां विनैवाभेदबोधः, बाधनिश्चयप्रतिबध्यतावच्छेदककोटौ शाब्दान्यत्वस्य निवेशात् । वह्निना सिञ्चतीत्यादौ तु योग्यताविरहान्न बोधः । इह तु इष्टचमत्कारसिद्धये आहार्ययोग्यताज्ञानस्य सत्त्वादिति तन्न । आहार्याभेदेनैव सिद्धौ शाब्दान्यत्वनिवेशस्य योग्यताज्ञानहेतुत्वस्य च निष्फलत्वात् । आहार्यं प्रात्यक्षिकमेवेति नियमे तु मानाभावः । ये तु मुखचन्द्र इत्यादौ सारोपलक्षणां वदन्ति तन्मते ऽप्यत्र वाच्ययोरेवाभेदान्वयो वाच्ये न तु वाच्यलक्ष्ययोः । अन्यथा राजन्नारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरमित्यत्रोपमितसमासमूलकोपमाभ्युपगमे लक्ष्मीकर्तृकालिङ्गनस्यासामञ्जस्यमित्यालङ्कारिकसमयो व्याहन्येत । किञ्चोपमानवाचकस्य चन्द्रादिपदस्य रूपके उपमानसदृशे लक्षणेत्यालङ्कारिकाः । तत्र समानधर्मरूपं सादृश्यं लक्ष्यतावच्छेदकम् । स च धर्मो लक्ष्यांशे सामान्यरूपेण प्रतीयते, सुन्दरत्वादिविशेरूपेण वा । नाद्यः सादृश्यस्य शब्दोपात्तत्वेनोपमात्वापत्तेः । नान्त्यः सुन्दरं मुखं चन्द्र इत्यत्र पौनरुक्त्यापत्तेः । न च सादृश्यस्य वाच्यतायामेवोपदेशः । नलिनप्रतिपक्षमाननमित्यादौ तदभावापत्तेः । यदि तु सुन्दरं मुखमित्यादौ धर्मोक्तरेण सादृश्यमित्यु-

च्यते। एवमपि विद्वन्मानसहंसेत्यत्र रूपके श्लेषनिमित्ताभेदाध्यवसानेन मानसवशित्वरूपभूपहंसयोः सादृश्ये सिद्धे सदृशलक्षणामूलकस्य भूपे हंसरूपकस्य सिद्धिः। तत्सिद्धौ च सरोमनोरूपार्थद्वयाभिधानलक्षणस्य श्लेषस्य निष्पत्तिरित्यन्योन्याश्रयः। तस्माद्रूपके ऽभेदान्वय एव युक्तः। न च रूपके सदृशलक्षणाया एव फलं ताद्रूप्यप्रतीतिरिति वाच्यम्। तत्सदृश इति शब्दादपि तादृशप्रत्ययापत्तेः। यत्तु वदन्ति रूपके लक्षणा नास्तीत्ययुक्तम्। तथाहि। साधारणधर्मानुपस्थितिदशायां नास्ति रूपकनिष्पत्तिरिति सर्वसिद्धान्तः। तत्र साधारणधर्मवत्त्वरूपसादृश्यस्य रूपके प्रवेशाभावे विशेषधर्मानुपस्थितिदशायां कथं रूपकं पर्यवस्येत्। राजा नारायणमित्यत्रापि विशेषणसमासे उत्तरपदार्थप्राधान्यान्नारायणत्वेनोपस्थिते लक्ष्मीकर्तृकस्यापि न विरोध इति। अत्रोच्यते। उपमितसमासस्थले भेदघटितसादृश्यविशिष्टोपमेये उपमानशब्दस्य निरूढलक्षणा। इदमेवेवादीनां द्योतकत्वम्। सदृश इत्यत्र तु लक्षणाया अभावान्न ताद्रूप्यप्रत्ययः। एवञ्च लक्षणायाः फलं ताद्रूप्यप्रत्यय इतिप्राचां ग्रन्था इत्यलम्॥ ४०॥

(क० टी०) अथ सर्वत्रारुचिसूचकं सिद्धान्तमाह। परेत्वित्यादिना वदन्तीत्यन्तेन। नानार्थत्वनिरसायाह। तत्पदेति। तेन यः प्रसिद्धस्तदन्येत्यर्थः। तत्रारोपानुपयोगादाह। अन्येति। नायं नियम इत्याह। व्यक्तिविशेषेति। व्यवस्थितविकल्पीयो बोधस्तु यं धर्मं धर्मितावच्छेदकीकृत्य शक्तिग्रहस्तदारोपेण शक्त्यैव। सर्वत्र शक्तिग्रहोपस्थितिशाब्दबोधानां समानप्रकारकत्वेन कार्यकारणभावान्नात्र शक्तिग्रहापेक्षा नाप्यतिप्रसङ्गः। एवञ्च न पृथक्कार्यकारणभावादिकल्पनमपि। तदारोपे च शक्यसम्बन्धो निमित्तमित्येतावता शक्यसम्बन्धो लक्षणेत्यप्युपपन्नम्। एवेन तस्या अतिरिक्तत्वानिरास इति भावः।

तदेतद्ध्वनयन् सर्वत्रारोपमाह । छत्रिण इत्यादि । अनेनासम्भवो वारितः । अपिः प्रसिद्धस्य गङ्गायां घोष इत्यस्य समुच्चायकः । अत एव तत्त्यागमात्रं कार्त्स्न्येन दध्युपघातकत्वसाद्दश्यादिति भावः । एवमाद्योदाहरणद्वयमुक्त्वा द्वितीयोदाहरणद्वयमाह । कमलानीति । व्यक्तिविशेषेति । सौरभविशिष्टकमलव्यक्तीत्यर्थः ।

ताला जाअन्ति गुणजाला ते सहिअए हि घेप्यन्ति ।
रइकिअणाणुगाहि आइं होति कमलाइं कमलाइं ॥
तदा तामन्ते गुणा यदा ते सहृदयैर्गृह्यन्ति ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ॥

अत्र पुनरुक्तकमलशब्दः सौरभादिगुणविशिष्टे सङ्क्रमितः सौरभातिशयो व्यङ्ग्यः । इत्यादौ । इत्यादावपि ।

त्वामस्मि वच्मि विदुषां समवायोऽत्र विद्यते ।
आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत् ॥

विद्वत्सभां गच्छन्तमाप्तं प्रति कस्य चिदुक्तिरियमत्र वचनाद्युपदेशादिरूपतया परिणमति तदाह । सम्बोध्यत्वे इति । आदिना स्वतन्त्रोच्चारयितृत्वादि । अग्रे तेनाप्तत्वासाधारणज्ञानवत्त्वैकवाक्यतापन्नसमुदायत्वाप्रतार्यत्वसावधानस्थितित्वपरिग्रहः । अत्रावश्यवाच्यहिताहितत्वानुल्लङ्घनीयाज्ञत्वादिव्यङ्ग्यम् । नन्वनुपपत्तिज्ञानाभावेन कथमुभयत्र लक्षणात आह । अत्रेति । उभयत्रेत्यर्थः । तत्राद्ये आह । पौनरुक्त्यादिति । द्वितीये आह । विशेषेति । उभयत्राप्याह । सामान्येति । अत्र सम्मतिमाह । अत एवेति । तत्र तदारोपादेवेत्यर्थः । स्त्रीत्वेन । तदादिना । तादृशेति । तदर्थकेत्यर्थः । तथा समासस्येव वेत्यपि बोध्यम । पुंयोगादाख्यायां तद्धितवुग्वचनमित्यस्य कण्ठत उक्तत्वादाह । अभिसन्धायेति । हृदि निधायेत्यर्थः । वक्ष्यमाणतो लब्धं शेषमाह । किन्त्विति । चतुर्भिरिति । कथं पुनरतस्मिन्स इत्येतद्भवतीति शङ्कायामित्यादि यद्यपि भाष्ये जटी ब्रह्मदत्त इत्युक्तं तथापि तत्सजातीयमाह । सिंह इति । भाष्ये कण्ठत आरोपानुक्तेराह । कैयटोऽपीति । आरोप्येति । तत्र च तात्स्थ्यादयो हेतवः । शक्यतावच्छेदकप्रकारक एव ल-

क्ष्यार्थबोधः । तत्प्रकारकप्रतीतिविशेष्यप्रसिद्धार्थत्वं मुख्यत्वं, तादृशाप्रसिद्धार्थत्वं च गौणत्वमिति भावः । हसन्तीति । मुख्यमञ्चपदार्थस्याचेतनत्वे हसनकर्तृत्वासम्भवादित्यर्थः । अभेदस्य सम्बन्धत्वस्य खण्डयिष्यमाणत्वादाह । सो ऽयमित्यपीति । साहचर्यं चोक्तान्यसम्बन्धमात्रोपलक्षणमिति बोध्यम् । न चेति । गङ्गासम्बन्धितीरलक्षणायां तूक्तदोष एवेति भावः । स्वरूपतस्तस्याप्रतिबन्धकत्वादाह । शास्त्रेति । आदिः पूर्वादिसङ्गृहीतलक्ष्यान्तराभिप्रायकः । न सिद्ध्येदिति । प्रमात्मकज्ञानस्यैव कार्यसाधकत्वेन तस्यातत्त्वादिति भावः । इदमावश्यकमित्याह । अत एवेति । उक्तो ऽर्थः । तत्रादौ प्राग्वदेवाह । मध्ये इति । प्राग्वत् । नन्वेवमपि बाधज्ञानेन तत्राप्रामाण्यग्रह इति प्रोक्तदोष एवेत्याह । व्यञ्जनेति । अत्र बीजमुक्तम् ॥ ४० ॥

बाधज्ञानसत्वे ऽपि कुत्र चित् नाप्रामाण्यम् ।

वस्तुतस्तु शब्दानुपपत्तिमूलकारोपितार्थबोधे बाधज्ञानेन नाप्रामाण्यग्रहो जन्यते । अत एव पचतीत्यादिजबोधे नाप्रामाण्यग्रहः । तथा सत्यनुपपत्तिपरिहाराभावादित्यग्रे निरूपयिष्यामः । कुन्ताः प्रविशन्तीत्यादौ कुन्तसंयोगविशिष्टपुरुषाणां कुन्तत्वेन प्रतीतिरित्यजहत्स्वार्थत्वोपपत्तिः । कैयटो ऽप्याह आरोप्यते ताद्रूप्यं न तु मुख्यं बालेषु मञ्चत्वारोपान्मञ्चपदप्रवृत्तिर्हसन्तीत्यादिपदान्तरयोगाद्विज्ञायते इति । शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेति तु कस्य चित्प्रमादोक्तिः । यद्वा शक्यतावच्छेदकान्यरूपवत्त्वेन गृहीते ऽर्थे लक्षणा शक्यतावच्छेदकारोप इति तदर्थः । यथा तीरत्वविशिष्टस्य गङ्गात्वेन बोध इति ।

अत एव गङ्गायां मीनघोषौ स्त इत्याद्युपपद्यते ।

+ ।पन्नपदस्य तादृशस्य द्वन्द्वाघवस्य

अन्यथा द्वन्द्वाद्यर्थस्यैकधर्मावच्छिन्ने + ऽन्वयस्यैव वाजां ग्रामे नयति अजाविधनौ देवदत्तयज्ञदत्तावित्यादौ यथासंख्यान्वये द्वन्द्ववारणाय पयः पयो नयतीत्यादावेकशेषवारणाय चावश्यकत्वेन पररीत्या च मीनस्य नीरत्वावच्छिन्ने ऽन्वयेन घोषस्य तीरत्वावच्छिन्ने ऽन्वयेन द्वन्द्वो ऽसाधुः स्यात् । मम तु गङ्गात्वेनैव तीरबोधादेकधर्मावच्छिन्ने ऽन्वयसत्त्वेन न क्षतिः । युगपद्वृत्तिद्वयविरोधो ऽप्यत एव न दोषाय, दूषकताबीजाभावाच्च । अन्वयानुपपत्त्या च युगपदेव गङ्गात्वेनैव नीरतीरयोरुपस्थितिः । काकेभ्यो दधीत्यादावप्येवमेव ॥ ४१ ॥

(कुं० टी०) ननु तद्वत्ता निश्चयं प्रति तदभाववत्ता निश्चयस्य प्रतिबन्धकत्वात्कथं तज्ज्ञानस्य प्रमात्वं शङ्खः पीत इत्यादिबुद्धिवदित्याशङ्क्याह । वस्तुतस्त्विति । अनाहार्यस्यैव प्रतिबध्यत्वादिति भावः । पचतीत्यादिजेति । अन्नाख्यातार्थैकत्वादः क्रियायामारोपादेकवचनादि । तत्र शब्दस्यैकवचनादिप्रयोगस्यानुपपत्तिर्मूलम् । परिहाराभावादिति । एकत्वे एकवचनमित्यादौ एकत्वादिप्रकृत्यर्थगतमेव न्याय्यं सुबन्तादिस्थलवत् । गुणीभूतकर्त्रादावेकत्वान्वयासम्भवाच्च । तार्किकादीनां प्रत्ययानां प्रकृत्यर्थान्वितेति न्यायविरोधश्च स्यात् । मतान्तरे तु क्रियायामेकत्वस्यान्वयाभावात् स्थाली पचतीत्यादौ व्यापारसमुदायस्य पचत्यादिवाच्यस्यैकदेशे आरोप इति दृष्टान्तो बोध्यः । यथेति । तीरत्वेन ज्ञाते तीरे प्रवाहत्वेन बोधाल्लक्षणेत्यर्थः ।

अत एव । प्रवाहत्वेन रूपेण प्रवाहतीरयोर्बोधादेव । अ-

न्यथा। प्रवाहत्वेन बोधाभावे। द्वन्द्वादार्थस्येति। यत्र समुदायार्थस्यैकधर्मावच्छिन्ने ऽन्वयस्तत्रैव द्वन्द्वस्वीकारस्यावश्यकतयात्र द्वन्द्वो न स्यादित्यर्थः। अन्वयस्यैवेति। आवश्यकत्वेनेत्यत्रान्वयः। एतन्नियमस्य फलमाह। अजां ग्राममिति। अत्राजाग्रामयोर्न द्वन्द्वः। ग्रामस्य संयोगे अजायाश्च व्यापारे ऽन्वय इति भेदात्। अजावीति। अजाधनो देवदत्तः अविधनो यज्ञदत्त इति भेदात्। दूषकताबीजाभावाच्चेति। अत एव तार्किका अपि चित्रगुधनमित्यत्रोत्तरपदस्यान्यपदार्थे लक्षणया तत्सम्बन्धिनि तत्पुरुषलक्षणायां च लक्षणाद्वयाद्बोधमभ्युपेत्योक्तनियमं निराचक्रुः। अत एव न। प्रवाहत्वेन बोधादेव न। एवमेवेति। दध्युपघातके विडालादौ काकत्वमारोप्यत इत्यर्थः॥४१॥

(क० टी०) अत्र पक्षे तेनैव निर्वाहे मध्ये ज्ञानान्तरं नाङ्गीकार्यमिति लाघवेन सिद्धान्तमाह। वस्तुतस्त्वति। शुक्तिरजतज्ञानादिनिरासायाह। शब्देति। अस्यावश्यकत्वमाह। अत एवेति। तत्र तेन तदजननादेवेत्यर्थः। बोधे। समूहरूपारोपेणाधिश्रयणाद्यवयवमात्रबोधे। गङ्गादिपदजन्यतटादिशाब्दबोधस्यैव प्रयोजनप्रतीतिनियामकत्वेन गङ्गातटे इत्यादितस्तदभावोपपत्तिरिति भावः। नन्वेवमपि कुन्तत्वेन पुरुषमात्रबोधे छत्रिकाकादिवदजहत्स्वार्थत्वं न स्यादत आह। कुन्ता इति। अत्र वक्ष्यमाणरीत्या तत्तदुपपत्तिस्तेषां स्वतस्तदन्वयासम्भवादत आह। कुन्तेति। कुन्तादियुक्तपुरुषाणामित्यर्थः। अत एवात्र न मतुबिति नासाधुत्वापत्तिरिति बोध्यम्। कुन्तत्वेन। तदादिना। तेषु चोक्तरीत्योक्तप्रयोजनसिद्धेरुपपत्तिः विशेषणतया तस्य तदन्वयात्। नन्वेवं प्रवृत्तिनिमित्ते ऽपि शक्तेः शक्यतावच्छेदकादन्यरूपेण ज्ञानविषयविषये लक्षणा भवतीत्यर्थकेन तत्र तदन्यरूपेण भानमित्याशयकेन शक्यादन्येनेत्यनेन विरोधापत्तिरत आह। शक्यादिति। तस्या अपि नोक्तो ऽर्थो ऽपि तु मदुक्त एवेत्याह।

यद्वेति। ज्ञाते इति भावेक्तः। शक्यादन्यस्यार्थस्य स्ववृत्तिधर्मादन्येनार्थाच्छक्यतावच्छेदकरूपेण ज्ञाते लक्षणा तद्व्यवहारो भवतीत्यर्थं क्लिष्टत्वादुपेक्ष्यान्यथा आह। शक्यतेति। उक्तरीत्या लब्धमिदम्। उदाहरणेन तत्तात्पर्यं प्रकटयति। यथेति। अस्य फलमनुपदमेव स्फुटीभविष्यति। भाष्याद्यारूढोक्तसिद्धान्तं पोषयति। अत एवेति। उक्तरूपलक्षणाङ्गीकारादेव चेत्यर्थः। विपक्षे बाधकपुरःसरमुपपत्तिमुपपादयति। अन्यथेति। पूर्वमताङ्गीकारे इत्यर्थः। सहविवक्षा द्वन्द्वादिनिमित्तं तत्र चोभयोर्निवेश इत्याह। तादृशस्येति। एवः पूर्वत्राप्यन्वेति। तत्राद्यफलमाह। अजामिति। द्वितीयफलमाह। अजेति। चोव्युत्क्रमे, अन्वयेन चेत्यर्थः। आर्थिकेनेति भावः। एवञ्च द्वितीयविषयो ऽयमतो ऽपि तदुक्तिः। अत एवेत्यस्यार्थमाह। मम त्विति। नन्वेवमपि विरोधेन शक्यार्थाबोधेन तदन्वयासम्भवेनासाधुत्वं तदवस्थमेवात आह। युगपदिति। अत एव उक्तप्रयोगान्यथानुपपत्त्यैव। इदमपि तस्य तत्त्वमभ्युपेत्य वस्तुतस्तदेव नेत्याह। दूषकतेति। तेजस्तिमिरादिवदिति भावः। नन्वेवमपि बुद्धेः क्रमिकत्वेन युगपदनुपस्थित्योक्तदोषस्तदवस्थ एवात आह। अन्यथेति। उक्तप्रयोगान्यथानुपपत्त्येत्यर्थः। तन्त्रेणेति भावः। काकेभ्यश्छत्रिण इत्यादावजहत्स्वार्थत्वोपपत्तिरपि युगपदेव तेन तेन रूपेणोभयबोधादित्याह। काकेभ्य इति॥ ४१॥

अत्रार्थे गौतमसम्मतिः। गौतमो ऽप्याह सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणबालकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावे ऽपि तदुपचार इति। तस्य भावस्तद्धर्मस्तदभावे ऽपि तदुपचारस्तच्छब्दव्यवहार इत्यर्थः। स च तमद्धर्मारोपेण। आरोपनिमित्तानि च सहचरणादीनि। यष्टीः प्रवेशय, मञ्चाः क्रोशन्ति, वीरणेष्वास्ते, अयं राजा यमः, प्रस्थः सक्तुः, चन्दनं तुला, गङ्गायां

घोषः, कृष्णः शकटः, अन्नं प्राणाः, कुलस्य राजा इत्युदाहरणानि। यष्टित्वारोपो ब्राह्मणे साहचर्यात्। मञ्चत्वारोपो बालेषु तात्स्थ्यात्। कटेषु वीरणत्वारोपस्तादर्थ्यात्। राज्ञि यमत्वारोपो वृत्तात्। गौर्वाहीक इत्यादावपि साधारणधर्मजडत्वादिरूपेण निमित्तेन बाहीकस्यारोपितगोत्वेन बोधः। ततो व्यञ्जनया मुख्यगवाभेदप्रतीतिः प्रयोजनम्। तत एव चमत्कारः। आद्यबोधे तु न चमत्कारः। तस्मिन् भ्रमत्वज्ञानात्। अत एव गौर्बाहीको जड इत्यादौ न पौनरुक्त्यम्। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेत्यस्य यद्गुणज्ञानपूर्वकं बाहीके गोशब्दप्रयोगस्तैर्ज्ञायमानगुणैर्योगात्तद्गुणरूपात्सम्बन्धादित्यर्थः। प्रकृत्यादित्वात्तृतीया। यद्वा प्रथमत एव तत्र नामार्थयोरभेदबोधः। बाधज्ञानस्यानुपपत्तिजलक्षणाजन्यशाब्दबोधेऽप्रामाण्यग्रहजनकत्वस्याभावात्। सक्तौ प्रस्थत्वारोपस्तन्मानकत्वात्। चन्दने तुलात्वस्य तद्धार्यत्वात्। गङ्गायां तीरधर्माधारत्वारोपः सामीप्यात्। कृष्णगुणयोगाच्छकटे तद्धर्मकृष्णत्वारोपः। प्राणसाधनत्वादन्ने प्राणत्वारोपः। कुलाधिपत्वेन पुरुषे राजत्वारोप इति तद्व्याख्यातारः। न्यायवार्तिककारोऽपि साहचर्यं नाम यष्टिकया सम्बन्धः तत्सम्बन्धात्तु यष्टिकावानित्येव स्यान्न तु यष्टिकेति। यष्टिकावानिति तु मुख्य एव। तस्मादुपचारबीजमन्यद्वक्तव्यम्। उच्यते यष्टिकायां तावदयं यष्टिकाशब्दो यष्टिकात्वजातिनिमित्तकः। तत्र सत्युक्तसमवेतां जातिं ब्राह्म-

णे समवायेनाध्यारोप्य ब्राह्मणं यष्टिकेत्याहेत्याह। भावप्रधानो निर्देश इत्यस्याप्ययमेवार्थः। घटादिपदप्रवृत्तिनिमित्तस्य घटत्वादेस्तत्रैव भेदसम्बन्धेनाहार्यारोपात् घटत्वादिप्रकारकं घटत्वादिबोधो घटादिशब्दाल्लक्षणयेति। अन्नं प्राणाश्चन्दनं तुलेत्यादावाहार्यारोपस्यैव लक्षणात्वादिति बोध्यम्॥ ४२॥

[कुं० टी०] अतद्भावे ऽपि तच्छब्दाशक्यत्वे ऽपि तदुपचारस्तच्छब्दव्यपदेश इति व्याख्यानं तु न युक्तं, व्यपदेशे ऽपि निमित्तस्यैव वाच्यत्वादित्याह। स चेति। सहचरणं संयोगविशेषः। कटेष्विति। कटं करोतीत्यादौ कटानां सिद्धत्वेन कारकत्वासम्भवादिति भावः। सर्वत्र प्रवृत्तिनिमित्तमारोप्यत इत्याह। साधारणेति। साधारणधर्मं जडत्वादिकं निमित्तीकृत्य आरोपितत्वेन बोधादित्यन्वयः। तथाच जडो बाहीक इति बोधानन्तरं गवाभिन्नो बाहीक इति बोधः। गोत्वेनेति। एतेन युगपद्वृत्तिद्वयविरोधो ऽपास्तः। व्यञ्जनयेति। गोत्वारोपेण गोशब्दप्रवृत्तौ ततो ऽभेदबोधे ऽतिजडत्वप्रतीतिरिति भावः। अत एवाह। तत एव चमत्कार इति। आद्यबोधे त्विति। प्रथमत एव गवाभेदबोधे त्वित्यर्थः। तस्मिन्। गवाभेदज्ञाने। भ्रमत्वज्ञानादिति। गवाभेदज्ञानस्य भ्रमात्मकत्वान्न चमत्कार इत्यर्थः। अत एव। आरोपितत्वप्रत्ययादेव। गोशब्दस्य तत्सदृशजडत्वादिपरत्वे तु पौनरुक्त्यापत्तिरित्यर्थः। ननु गोत्वारोपे लक्ष्यमाणगुणैर्योगादिति प्रवादासङ्गतिरत आह। लक्ष्यमाणेति। तथाचारोपहेतुभूतत्वेन ज्ञायमानगुणैर्योगादित्यर्थः।

गवाभिन्नो बाहीक इति बोधे ऽतिजडत्वप्रतीत्या चमत्कारातिशय इत्यभिप्रेत्याह। यद्वेति। ननु लक्षणातः प्राक् कथमभेद-

बोधस्तस्य बाधितत्वेनाप्रामाण्यापत्तेरत आह । बाधज्ञानस्येति । अनुपपत्तिजेति । अनुपपत्तिजा या लक्षणा तज्जन्येत्यर्थः । वस्तुतस्तु बाधज्ञानं न प्रतिबन्धकं न वा तदभावकारणं बाधस्थले विशेषणतावच्छेदकप्रकारकनिश्चयाभावादेव विशिष्टबुद्ध्यनुत्पत्तेः । न्यायवार्तिकेति । उक्तानुक्तदुरुक्तचिन्ताकरं वाक्यं वार्तिकम् । ननूपनिषद्वार्तिकानां कथं दुरुक्तचिन्ताकरत्वं तत्र दुरुक्ताभावात् । सत्यम् । तत्रापिदुरुक्तत्वभ्रान्तिसम्भवात् । ननु सामानाधिकरण्यरूपसाहचर्यस्य यष्टितद्धारिणोरसम्भव इत्यत आह । साहचर्यं नामेति । सम्बन्धास्त्विति । यष्टिकासम्बन्धाद्यष्टिकाशब्दप्रयोगे त्वित्यर्थः ।

उपचारेति । भिन्नत्वेन प्रतीयमानयोरैक्यारोपणमुपचारः । संयुक्तसमवेताम् । ब्राह्मणसंयुक्तयष्टिसमवेताम् । तत्रैव । घटत्वादावेव । भेदसम्बन्धेन आश्रयाश्रयिभावेन । अत एवाह । घटत्वादिप्रकारकेति । तथा च घटत्वविशिष्टस्य घटत्वस्यैव प्रतीतिः । लक्षणयेति । घटत्वविशिष्टघटे शक्तस्य घटत्वविशिष्टे घटत्वे लक्षणेत्यर्थः ॥ ४२ ॥

(क० टी०) मध्यमपक्षवादिनामज्ञानं प्रकटयन् तन्मूलसम्मतिमप्याह । गौतमोऽपीति । प्राग्वत् तद्व्याख्यातग्रन्थमाह । तस्येति । एतेन न सस्तस्याभावेऽपीति व्याख्यानमपास्तम् । उभयथापि भावपदवैयर्थ्यापत्तेः । वीनि दश वीरणानि तृणविशेषाः । राज्ञि । प्रकृते । वृत्तमाचरणम् । तुलायाः साक्षात्स्वतोऽमानत्वादाह । तद्धार्यत्वादिति । तीरधर्मस्तीरत्वं तस्याप्यनारोपादाह । आधारत्वेति । तद्धर्मेति । कृष्यगुणधर्मेत्यर्थः । अत्र सहचरणं न मुख्यमसम्भवात् किन्तु सम्बन्धमात्रोपलक्षणं स्थानादि तस्यैव प्रपञ्चः । महाभाष्येऽप्येवम् । अत एव न तेनास्य विरोध इति सूचयितुमाह । न्यायवार्तिकेति । उद्द्योतकारोऽपीत्यर्थः । साहेति । न चेत्यादिः । तत्र । तस्मिन् सति । अत्र पक्षे गौण्याद्युपपत्ति-

माह । गौर्वाहीक इति । अपिः पूर्वसमुच्चये । साधारणेति । जडत्वावच्छिन्नेत्यर्थः । वाहीकेति । तदादेस्तदादिनेत्यर्थः । प्राग्वदादावाह । तत इति । तस्या आनर्थक्यं परिहरति । तत एवेति । आद्येति । लक्ष्यार्थबोधेनेत्यर्थः । गोत्वावच्छिन्नो वाहीक इत्यनेनेति यावत् । तस्मिन्निति वा ज्ञानेनेति भावः । अत एव । जडत्वस्य तन्निमित्तत्वेनालक्ष्यत्वादेव । रुक्तघम् । तच्छङ्कापि । नन्वत्र पक्षे प्रकाशादिसम्मतलक्ष्यमाणेति भट्टोक्तिविरोधः अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यत इत्यस्य पूर्वार्धम् । अविनाभावो ऽत्र सम्बन्धमात्रं न तु व्याप्तिः मञ्चाः क्रोशन्तीत्यादावभावात् । तद्ग्रहश्च लोके धर्मिण्येवेति तद्भावः । एतेन गौण्यतिरिक्ता वृत्तिरित्यपास्तम् । प्रतीतिरित्यत्रोपस्थितेर्लक्षणात्वे भावे क्तिन् । पक्षान्तरे तु करणे । लक्ष्यतावच्छेदकगुणैर्योगात्तद्वारकसम्बन्धाच्चाद्यत्वम् । तथा च गुणलक्ष्यतावच्छेदकिका लक्षणा गौणीति भाव इत्यत आह । लक्ष्येति । लक्ष्यमाणेत्यस्यार्थो ज्ञायेति । ननु तृतीयासत्त्वे कथमुक्तार्थो ऽत आह । प्रकृत्यादित्वादिति । एतेन साधारणगुणाश्रयेणेति प्रकाशस्यापि तद्रूपसम्बन्धेनेत्यर्थ इति न तद्विरोधो ऽपीति सूचितम् । प्राग्वदत्रापि सिद्धान्तं ततो विलक्षणमाह । यद्वेति । पूर्वं भेदनान्वये ततो व्यञ्जनया अभेदप्रतीतिर्वाच्या, स एव न नामार्थयोरिति व्युत्पत्तेस्तदाह । प्रथमत इति । अत्र पक्षे प्रयोजनं त्वनुपदमेव वक्ष्यति । नन्वेवमपि तत्र गौर्न वाहीक इत्यादिबाधज्ञानेन भ्रमत्वग्रहात्कथं तत्सिद्धिरित्यत आह । बाधज्ञानस्येति । शुक्तिरजतनिरासायाह । अनुपपत्तीति । लक्षणाविशेषणमन्यथा तदानर्थक्यापत्तेरिति भावः । एतेन रूपके न लक्षणा समानविभक्तिकत्वेन नामार्थयोरभेदान्वयोपपत्त्या लक्षणाफलाभावादित्याद्यप्पय्यदीक्षिताद्युक्तमपास्तम् । तथासति तत्राप्रामाण्यग्रहेण शुक्तिरजतज्ञानवत्प्रयोजनासिद्धिप्रसङ्गात् । तत्सादृश्यज्ञानस्य तद्बाधज्ञानजन्याप्रामाण्यज्ञानं प्रति प्रतिबन्धकत्वं स्वीकृत्य प्रसिद्धत्वादिनोपस्थितसादृश्यमहिम्ना अप्रामाण्यज्ञानानास्कन्दिताभेदबुद्धिरित्युक्तौ तु तदनुपस्थितौ दोषो गौरवं चात बोध्यम् । प्रकारान्तरासाङ्गत्यसूचनायान्यत्रापि मदुक्तरीत्यैव निर्वाह इत्याह । भावेति । तमेवाह । घटादीति । तत्रैव । घटत्वादावेव । तथा सर्वत्र

बोधादाह । भेदेति । अत एवाह । आहार्येति । प्रकारान्तरे तु तदसङ्गतिः स्पष्टैवेति भावः । नन्वाहार्यारोपस्य तत्त्वं न दृष्टमत आह । अन्नमिति । तथा च क्वचिदनाहार्यः क्वचिदाहार्य इति न दोषः ॥ ४२ ॥

व्रीहीन् प्रोक्षतीत्यादौ निर्वाहप्रकारः । व्रीहीन्प्रोक्षतीत्यादावपूर्वसाधनीभूतव्यक्तीनामेव तात्पर्यवशाद्व्रीहिपदेन व्रीहित्वेन भानम् । एवं तत्प्रतिनिधिष्वपि व्रीहित्वमारोप्य व्रीहित्वेनैव तात्पर्यवशादपूर्वसाधनीभूततत्प्रतिनिधिव्यक्तीनां भानं न त्वपूर्वसाधनत्वेन भानम् । अत्र सर्वत्र तत्तद्धर्मविशिष्टे शक्यतावच्छेदकधर्मारोपः । अत एव कचतस्त्रस्यति वदनमित्यादौ कचत्वादिना राहुत्वादिविशिष्टस्य बोधान्न त्रासाद्यन्वयानुपपत्तिः । हरिरप्याह ।

एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः ।
निमित्तभेदादेकस्य सार्वार्थ्यं तस्य गद्यते ॥
सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः ।
प्रसिद्धिभेदाद्गौणत्वं मुख्यत्वं चोपचर्यते इति ॥

गौणमुख्यार्थबोधकः शब्द एक एव । युगपत्सर्वार्थप्रकाशनं तु न प्रकरणादिरूपनिमित्तभेदात् । सर्वशक्तेरित्यस्य व्याख्यानमनेकधर्मण इति । गोशब्दो गोत्वजातौ प्रसिद्ध इति तत्र मुख्यः बाहीके त्वप्रसिद्ध्या गौण इति तदर्थः । नन्वेवं शब्दार्थसम्बन्धस्यानित्यत्वं स्यादत आह ।

गोत्वानुषङ्गो बाहीके निमित्तात्कैश्चिदिष्यते ।
अर्थमात्रे विपर्यस्तः शब्दः स्वार्थे व्यवस्थित इति ॥

कैश्चित्। शब्दार्थसम्बन्धनित्यत्ववादिभिः। निमित्तात्। जाड्यादेः। शब्दस्तु गोत्वमेवाभिधत्ते गौरित्यत्र मुख्यं गोत्वं वाहीके तूपचरितम्। शब्द एव प्रवृत्तिनिमित्तमिति पक्षेऽस्मिन् कदाचित् गोत्वजाताव-नुषज्यते कदाचिद्वाहीके इति तन्मते ऽपि प्रसिद्ध्यप्रसिद्धिमूलको गौणमुख्यविभागः। अर्थो ऽत्र विशेष्यभूतः। स्वार्थे प्रवृत्तिनिमित्ते। तदेव शब्दशक्यमित्येकार्थ एव शब्द इति तद्भावः। गौर्वाहीक इत्यादौ लक्षणाफलं तु सादृश्यप्रतीतिः। मुख्यार्थसाक्षात्सम्बन्धमूलारोपान्मुख्यार्थवृत्तिगुणसमानगुणवत्त्वरूपपरम्परासम्बन्धमूलारोपो जघन्य इति गौण्या अतिजघन्यत्वं बोध्यम्॥ ४३॥

[कुं० टी०] व्रीहीन्प्रोक्षतीत्यादावपूर्वसाधननीवारेषु व्रीहित्वमारोप्यत इति प्रतिपादयितुमाह। व्रीहीन्प्रोक्षतीति। अयम्भावः। केषां चित्साहचर्येण जातिः शक्त्युपलक्षणमिति हयुक्तरीत्या व्रीहित्वजात्युपलक्षिता शक्तिरेव क्रियासाधनत्वेनापदिश्यते। एवञ्च जातिक्रिययोरेव विभक्तिप्रापितः श्रौतः सम्बन्धः निराश्रयायाश्च जातेरभावाद्द्रव्यमाक्षिप्यते। तथा च नीवारेषु सदृशत्वाद्व्रीहित्वजातेरनपायात् सिद्धं प्रतिनिधेः श्रौतत्वम्। एतच्च जातिपक्षे एव सम्भवति। व्यक्तिपक्षे तु साक्षाद्द्रव्यस्यैव क्रियासाधनत्वेन प्रधानत्वात्तत्त्यागे प्रतिनिध्युच्छेद एव स्यादिति। अपूर्वेति। एतेन ईप्सिततमे कर्मणि व्रीहीनिति द्वितीयाविधानात्प्रधानस्य प्रतिनिध्यसम्भव इत्यपास्तम्। अत्र प्रोक्षणादेः प्रधानाङ्गत्वेनादृष्टद्वारा प्रधानापूर्वफलत्वं न्याय्यं न तु व्रीहिफलार्थत्वम्। अत एव कृष्णलेषु वितुषीभावरूपद्वारलोपना-

दृष्टाघातनिवृत्तावपि प्रोक्षणम् । व्रीहित्वेनैवेति । तेन व्रीह्यभावे नीवाराणां ग्रहणम् । प्रकृतापूर्वसाधनत्वान्नीवाराणां ग्रहणमिति मतं निराकरोति । न त्वपूर्वेति । अन्यथा यवानामपि प्रोक्षणप्रसङ्गः ।

ननु प्रवृत्तिनिमित्तारोपे ऽनेकार्थत्वाभावात्संयोगादिना विशेषस्मृतिरिति पूर्वोक्तग्रन्थासङ्गतिरित्यतः प्रथमं तत्रैव सम्मतिं दर्शयति । एकमाहुरिति । सर्वेषामर्थानां गोशब्द एक एव वाचकः । अर्थप्रकरणाभ्यां शब्दान्तरेण योगाद्वा एकमेवार्थं प्रकाशयन्ति न सर्वार्थम् । निमित्तभेदात् प्रसिद्ध्यप्रसिद्धिवशात् । सर्वार्थत्वं भिद्यते नानाविधं भवति । क्वचिद्गौणं क्वचिन्मुख्यम् । यद्यपि गोशब्दः सास्नादिमन्तमिव बाहीकमप्यभिदधाति तथापि बाहीके अप्रसिद्धत्वाद्गौणः ।

इदानीं प्रवृत्तिनिमित्तारोपपक्षे सम्मतिं दर्शयितुमुपक्रमते । नन्वेवमिति। गोशब्दस्य बाहीके आरोपे शब्दार्थसम्बन्धस्यानित्यत्वापत्तिरित्यर्थः । विपर्यस्तम् । भिन्नाधिकरणेष्वारोपितं गोत्वमेव सर्वत्रार्थः तस्यैव तु भेद इत्याह । गौरित्यत्रेति । अर्थो द्विविधः गोत्वादि स्वरूपश्च । तत्राद्यं व्याख्याय द्वितीयमाह । शब्द एवेति । सः । शब्दः । अनुषज्यते । विनियुज्यते । नन्वर्थविपर्यासे नानार्थत्वं दुर्वारमत आह । अर्थो ऽत्रेति। तथा च विशेष्यस्य भेदे ऽपि प्रवृत्तिनिमित्तस्य न भेद इति भावः । ननु जडो बाहीक इत्येव प्रयुज्यतां किं गौर्बाहीक इति प्रयोगेणेत्यत आह । लक्षणाफलं त्विति । लाक्षणिकशब्दप्रयोगफलं त्वित्यर्थः । सादृश्यप्रतीतिः । अतिजडत्वप्रतीतिः । मुख्यार्थेति । मुख्यार्थस्य यः साक्षात्सम्बन्धस्तन्मूलकारोपापेक्षेत्यर्थः । गौण्यामेवेति । न चैवं गौण्या लक्षितलक्षणात्वापत्तिः ।

लक्षितलक्षणाया ग्रन्थकृतैव निराकरिष्यमाणत्वात् । लक्षणयैव शैत्यपावनत्वादीनां प्रतीतेर्न व्यञ्जनावृत्त्यन्तरमिति तार्किकमतं निराकुर्वतां प्रकाशकारादीनां सम्मतिं दर्शयति । प्रयोजनं न लक्ष्यमिति । शैत्यपावनत्वादौ शक्यसम्बन्धाभावाल्लक्षणा न सम्भवतीत्यर्थः ॥ ४३ ॥

(का० टी०) स्वमते ऽन्यत्रापि निर्वाहमाह । व्रीहीनिति । आदिना व्रीहीनवहन्त्यादि । परैरपि तत्रैव लक्षणाङ्गीकारादाह । अपूर्वेति । यथा दध्युपघातकेष्वेव काकत्वारोपो नान्यत्र तद्वदिति भावः । एवमुपात्तापूर्वसाधनव्यक्तिवत्तत् । प्रतीति । व्रीह्यादित्यर्थः । अपूर्वसाधनत्वरूपधर्मतौल्यात्तद्वदिति भावः । एवञ्च तत्र सर्वथा न तदावश्यकं तदाह । न त्वपूर्वेति । फलप्रदर्शनाय शक्यादित्यत्र दिक्त्वेनोक्तमन्यत्राप्याह । अत्रेति । लक्षणास्थले चेत्यर्थः । फलमाह । अत एवेति । विशिष्टे तदारोपादेवेत्यर्थः । आदिना ।

वदनात्कुचमण्डलं त्रसति मध्याद्बिभेति नयनम् ।

नयनादधरः समुद्विजति—

इत्यस्य परिग्रहः । आदिना चमत्कारः । एतेन कचत्वादिना बोधे त्रासकरत्वानुपपत्ती राहुत्वादिना बोधे च चमत्कारानुपपत्तिरित्यपास्तम् । कचत्वविशिष्टो राहुरित्यादिबोधेन तदुपपत्तेः । सिद्धान्ते हरिसम्मतिमप्याह । हरिरपीति । नेदं प्रसिद्धनानार्थपरमित्याह । गौणेति । अन्ये । परीक्षकाः पातञ्जला अनेकार्थं शब्दमेकमेवाहुरित्यन्वय इति भावः । अत एव तत्रैवात्रापि युगपदेवानेकार्थबोधः कुतो नेति शङ्कां निराचष्टे । युगपादिति । सार्वार्थ्यशब्दस्तद्बोधकत्वपर इत्याह । एकेति । नन्वेवं कथं गौणमुख्यविभागो ऽत उक्तम् । सर्वशक्तिरिति । तत्र पौनरुक्त्यं परिहरति । सर्वेति । प्रसिद्धिभेदादित्यत्र समाहारद्वन्द्वात्पञ्चमी भेदशब्देन कर्मघञन्तेनाप्रसिद्धिस्तदाह । गोशब्द इति । एवं तथाऽनेकार्थत्वाङ्गीकारे आह । स एव गोत्वेति । गोत्वसम्बन्ध इत्यर्थः । वादिभिः ! पातञ्जलैः । नन्वन्यधर्मस्यान्यत्र कथं संबन्धो ऽत आह । निमित्तादिति । मात्रमवधारणं । उत्तरार्थफलितार्थमाह । शा-

ब्दस्त्विति। अत एव पूर्वं गोजातावित्युक्तम्। एवमपि गौणमुख्यत्वमाह। गौरिति। गौशब्दस्य संज्ञाशब्दत्वमिति पक्षे आह। शब्द एवेति। अनेन शङ्कासमाहिता। अत एव रूपके उपमाव्यङ्ग्येत्यालङ्कारिकसमय इति दीक्षितः। नन्वत्र मते पूर्वमेवाभेदप्रतीत्या फलाभावो ऽत आह। गौरिति। तत्कृत एव चमत्कार इति भावः। नन्वेवमप्यत्र पक्षे आरोपतौल्येन जघन्यशुद्धलक्षणातो गौण्या अतिजघन्यत्वं न सिद्ध्येदत आह। मुख्यार्थेति। जघन्यः। अतिजघन्यः॥ ४३॥

व्यञ्जनाया अवत- गौण्यामेव च परम्परासम्बन्धो लक्षणाबी-
रणबीजम्। जं नान्यत्र। अत एव प्रयोजनं न लक्ष्यं सम्बन्धाभावादिति प्रकाशादावुक्तम्। एवञ्च गवादिशब्दानां व्यञ्जनया जाड्यादिरूपगुणबोधकत्वाद्गुणवचनत्वे ऽपि ततः प्राक् गुणवचनत्वाभावात् प्रकारे गुणवचनस्येति न द्वित्वमिति न तत्सूत्रस्थभाष्यविरोधः। गङ्गायां घोष इत्यादौ गङ्गादिभिर्घोषस्यात्यन्तसामीप्ये गङ्गादौ तीरधर्माधारत्वारोपो गौतमोक्तः। गङ्गादिना घोषस्य व्यवहितसामीप्ये तीरे गङ्गात्वारोपः पतञ्जल्युक्तः। आद्यो ऽपि स्वरितेनाधिकार इति सूत्रे पतञ्जल्युक्तः। यत्र तु प्रकृतिप्रत्यययोर्लोपानुशासनं तत्र इयान् गर्गा इत्यादौ प्रकृतिगर्भे ऽर्थे प्रत्ययस्य गर्गापत्यरूपे ऽर्थे प्रकृतेः साधुत्वं लोपानुशासनबलादिति वदन्ति। द्विरेफपदं तु रूढिशक्त्या भ्रमरबोधकम्। अवयवार्थप्रतीतिस्तु नास्त्येव रथन्तरादिपदवत्। यद्वा पदनिष्ठरेफद्वयस्यार्थे आरोपात्तत्सम्बन्धित्वेनैव भ्रमरबोधः। अत एव भ्रमरपर्यायेषु द्विरेफपदस्य कोशेषु

पाठः। बाधप्रतिसन्धानं विनैव द्विरेफपदाद्भ्रमरबोधे न लक्षणेत्ययुक्तम्।

किञ्च द्विरेफपदेन रेफद्वयसम्बन्धित्वेन भ्रमरपदोपस्थितावपि भ्रमरेति शक्ततावच्छेदकानुपूर्वीरूपेणोपस्थित्यभावाद्बोधानापत्तिः। न च द्विरेफपदाल्लक्षणया तदुपस्थितिः, अत एवात्र लक्षितलक्षणेति व्यवहारः, प्रत्ययार्थान्वये च प्रकृतिप्रयोज्योपस्थितिः कारणमिति वाच्यम्। एवमपि तस्यानुच्चारितत्वेनोच्चारितस्यैव च बोधकत्वेन ततो बोधानापत्तेः। उच्चारितस्यैव बोधकत्वमित्यणुदित्सूत्रे भाष्ये स्पष्टम्। पुस्तकदर्शनस्थले ऽपि मानसजपवत् सूक्ष्मतरताल्वादिव्यापारेण सूक्ष्मतरस्वोच्चारणमस्त्येवेति न दोषः। जपे मन्त्राणां त्रैस्वर्येणैव ज्ञानस्यावश्यकतया तस्य च तत्तत्स्थानेषूच्चदेशाद्युपलभ्यमानत्वरूपतया जपे सूक्ष्ममुच्चारणमित्युच्यते। तथा च भारद्वाजः।

सूतके मृतके कुर्यात्प्राणायाममन्त्रकम्।
तथा मार्जनमन्त्रांस्तु मनसोच्चार्यमार्जयेत्॥
गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेदिति।
किञ्च मानसजपलक्षणे।
धिया यदक्षरश्रेणिवर्णस्वरपदात्मिकाम्।
उच्चरेदर्थसंस्मृत्या स उक्तो मानसो जपः—

इत्यस्मिन्नुच्चरेदित्युक्तम्। अत एव ऋगित्युक्ते तात्पर्यवशाद्विशिष्टसन्निवेशाया अग्निमीले इत्यादिकायास्ततो बोधे ऽपि ततो नार्थप्रत्ययः। गामानयेत्याहेत्यादावनुकरणेनानुकार्यप्रतीतावपि न ततो

ऽर्थबोध इत्यनुभवः । किञ्च अतीतानागतानां पदानां वृत्त्यनाश्रयतया वृत्त्याश्रयत्वेन ज्ञानस्य दुरुपपादत्वात् । पदेष्वतीतत्वादि चोच्चारणक्रियानाशादिना नष्टत्वम् । अनुत्पन्नत्वं च नष्टाभिव्यक्तिकत्वमनुत्पन्नाभिव्यक्तिकत्वं वा । यथा च घ्राणेन्द्रियगृहीतस्यैव गन्धस्य सुखादिजनकत्वं न स्मृतस्य, यथा च महतः पटहादिशब्दस्य कर्णपीडाजनकत्वं श्रुतस्यैव न स्मृतस्य, तथा पदानां बोधजनकत्वं श्रुतानामेव न यथाकथञ्चित्प्रतीतानाम् । यथा तत्र सुखादिजनकतावच्छेदकवैजात्येन तेषां नान्यतो ग्रहस्तथा प्रकृते ऽपि । अत एव परोक्षे लिडिति सूत्रे परोक्षे इति न धातोर्विशेषणं शब्दरूपस्य तस्य परोक्षत्वासम्भवादिति भाष्यकैयटयोरुक्तम् । न च स्वबोध्यपदवाच्यत्वसम्बन्धेन द्विरेफपदं भ्रमरं बोधयतीति युक्तम् । अनुपपत्तिप्रतिसन्धानं विनापि बोधात् । गौणातिरिक्तस्थले साक्षात्सम्बन्धस्यैव लक्षणाबीजत्वादिति दिक् ॥ ४४ ॥

(कुं० टी०) ननु गवादिपदानां व्यञ्जनया जाड्यादिपरत्वे प्रकारे गुणवचनस्येति द्वित्वापत्तिः । प्रकारः सादृश्यम् । सादृश्ये वर्तमानः सन् यो गुणवचन इत्यर्थादित्याशङ्क्याह । प्राग्गुणवचनत्वेति । अयम्भावः । गुणवचनः सन् यः प्रकारे वर्तते तस्य द्वित्वमित्यर्थः । यथा पटुरित्यस्य पटुसदृश इत्यर्थः । इत्येवं रीत्यैव भाष्यशङ्कोत्तरे योज्येते न तु गोशब्दस्य सादृश्यलक्षकत्वेन गुणवचनत्वं सादृश्यनिमित्तकाभेदोपचाराद्गोपशब्दो गोप्यां वर्तत इति पुंयोगादिति सूत्रस्थभाष्यविरोधा-

दिति भावः । गङ्गादिभिः । प्रवाहादिभिः । सामीप्य इति । सतीति शेषः । गौतमोक्त इति । सहचरणस्थानेत्यादिना गौतमेनापि धर्मारोप उक्त इत्यर्थः । पतञ्जल्युक्त इति । चतुर्भिः प्रकारैरित्युपक्रम्य सामीप्याद्गङ्गाशब्दो वर्तत इति प्रागुक्तत्वात् । आद्यो ऽपीति । साधकतममिति तमप् ग्रहणेन गौणाधारस्यापि ग्रहणज्ञापनाद्यत्रात्यन्तसामीप्यात्प्रवाहे घोषाधिकरणत्वारोपस्तत्र सप्तमी सिद्धेति भाष्यम् । ननु गर्गा इत्यादौ गर्गापत्ये गर्गशब्दस्य कथं साधुत्वं पूर्वोक्तप्रकाराणामभावादत आह । यत्र त्विति । शास्त्रे क्वचित्प्रकृत्यर्थः प्रत्ययेनाभिधीयत इति हर्युक्तेः । एवं नक्षत्रे च लुपीति सूत्रमपि उक्ते ऽर्थे मानम् । रथन्तरं साम अभित्वा शूर नोनुम इत्यस्यां गीतम् । लक्षणेत्ययुक्तमिति । बाधप्रतिसन्धानं विनापि बोधाल्लक्षणा न युक्तेत्यर्थः । तार्किकैकदेशिनो लक्षितलक्षणा वृत्त्यन्तरमित्याहुः । तथा हि द्विरेफपदे रेफपदस्य रेफद्वयसम्बन्धिनि भ्रमरपदे लक्षणा भ्रमरपदस्य च भ्रमरे इति तान्निराकरोति । लक्षितलक्षणेति । ननु द्विरेफपदलक्षितेन भ्रमरपदेन शक्त्यैव भ्रमरबोधाल्लक्षणाव्यर्थेति चेन्न । द्विरेफपदवृत्त्यभावे प्रत्ययानां प्रकृत्यार्थान्वितेति न्यायविरोधापत्तेः । एवञ्च द्विरेफपदस्यैव लक्षितलक्षणावृत्तिः । तथा च लक्षितस्य लक्षणेति शब्दार्थः । परे तु शक्यसम्बन्ध एव लक्षणा न तु शक्यस्य साक्षात्सम्बन्धो लक्षणा गौरवात् । तथा च परम्परासम्बन्धेन भ्रमरोपस्थापकत्वाद्द्विरेफपदस्य भ्रमरे वृत्तिः । तथा च लक्षितपदघटितलक्षणा लक्षितलक्षणेत्यर्थ इत्याहुः । ननु प्रत्ययानां प्रकृत्यर्थान्वितेति न्यायविरोधो ऽत आह । प्रकृतिप्रयोज्येति । जप इति । यज्ञकर्मण्यजपन्यूङ्खसामस्वित्येकश्रुतिनिषेधात् ।

वस्तुतस्तु अदृष्टार्थशब्दोच्चारणमात्रं जप इति यज्ञविषये पारिभाषिको भिन्न एव जपशब्दः । त्रैस्वर्येणेति । यथाप्राप्तैस्त्रिभिरपि स्वरैरित्यर्थः । मनसोच्चार्येति । एतेन मानसमनुसन्धानमित्यर्थो निराकृतः । यद्यपि ।

जपश्च द्विविधः प्रोक्तो वाचिको मानसस्तथा ।
वाचिकोपांशु उच्चैश्च द्विविधः परिकीर्तितः ॥
मानसाच्च जपाद्ध्यानं सहस्रगुणमुच्यते ॥

इति याज्ञवल्क्योक्त्या उच्चारणाभाव एव लभ्यते तथापि मानसे ऽपि बुद्धिकल्पितमुच्चारणमस्त्येवेति भावः ।

न ततो ऽर्थबोध इति । अनुकार्यस्यानुच्चारितत्वान्नार्थबोधकत्वमित्यर्थः । द्विरेफपदेन स्मृतं भ्रमरमर्थं बोधयतीत्यत्र दोषान्तरमाह । किञ्चेति । अतीतानागतानामिति । तेषामेव हि स्मृतत्वमिति भावः । तस्माच्छ्रुतमेव बोधकमिति भावः । ननु पदानां नित्यत्वात्कथमतीतत्वाद्युच्यत इत्यत आह । अतीतत्वादि चेति । नाशादिनेति । उच्चारणक्रियानाशादिना अतीतत्वादिव्यवहार इत्यर्थः । अथवा अभिव्यक्तिनाशादिना नष्टत्वादिव्यवहार इत्याह । नष्टत्वमित्यादिना । नष्टाभिव्यक्तिकत्वमित्यारभ्य पक्षान्तरमित्याहुः । वैजात्येन । कारणतावच्छेदकजातिशून्येन । तेषाम् । सुखादीनाम् । नान्यत इति । यथा स्मृतगन्धादेर्न सुखादिज्ञानं सुखादिजनकतावच्छेदकस्य भिन्नत्वादेवं भ्रमरपदे ऽपीत्यर्थः । अत एव । उच्चारितस्यैव बोधकत्वादेव । अनुच्चारितस्यापि बोधकत्वे तु धात्वर्थस्य परोक्षत्वसम्भवाल्लिडाप्यासङ्गतिरिति भावः । तस्य । भूतानद्यतनक्रियावृत्तेर्धातोः ॥ ४४ ॥

(कु० टी०) नन्वेवं शुद्धाभेदत्वेन केषाञ्चित्संमतलक्षितलक्षणा-

याप्यतिजघन्यत्वापत्तिस्तत्रापि परम्परासम्बन्धादत आह । गौण्या-मेवेति । चो ह्यर्थे । अत्र मानमाह । अत एवेति । शुद्धायां तदसत्त्वादे-वेत्यर्थः । अन्यथा तदसङ्गतिः स्पष्टैवेत्यन्यत्र प्रपञ्चः । नन्वेवम-पि प्रकारे गुणेति सूत्रस्थभाष्यविरोधस्तत्र हि गुणेति किं अग्नि-र्माणवकः सर्वेऽपि शब्दाः प्रकारे वर्तमानाः गुणवचनाः स-म्पद्यन्ते तेन कृते ऽपि तस्मिन्प्राप्नोत्येव । एवं तर्हि गुणवचनग्रहण-सामर्थ्यात्प्रकारे वृत्तेः प्राग्यो गुणवचनस्तस्य भविष्यतीत्युक्तम् । ते न हि सादृश्यं लक्ष्यमिति स्पष्टमेव लभ्यत इति चेन्न । गुणेत्य-स्याभावे सादृश्यस्य मुख्यतया प्रकारवृत्तित्वादतिव्याप्तिर्दुस्त्वा तत एव गुणवत्त्वेनापि वारणमुक्त्वा प्रकारव्यञ्जकत्वात्प्राग्यो गुण-वचन इत्युत्तरं दत्तमिति तदाशयेनादोषात् । लक्षणापरकैयट-व्याख्यानन्तु न युक्तमन्यथा पुंयोगादिति सूत्रस्थभाष्यविरो-धो ऽपीति स्पष्टमन्यत्र । तदेतदभिप्रेत्याह । एवञ्चेति । पुंयोगादिति सूत्रस्थस्यान्यसम्मतत्वे सोपपत्तिकत्वे आवश्यकत्वे ऽदुष्टत्वे चेत्यर्थः । धर्मरूपं सादृश्यमिति मतेनाह । जाड्येति । अति-रिक्तसादृश्यमिति मतेनाह । आदीति । ततः । व्यञ्जनातः । न-न्वेवमप्यारोपांशे पतञ्जलिगौतमयोर्विरोध एवात आह । गङ्गा-यामिति । एवञ्चोभयोरुभयमपीष्टं निमित्तभेदेनेति विरोध इति भावः । इदमेव ध्वनयन्नस्यावश्यकत्वमाह । आद्यो ऽपीति । तत्र हि यथाश्रुतसूत्रस्याफलत्वमुक्त्वाधिकं कार्यमित्यर्थकत्व-मुक्त्वा तदुदाहरणावसरे गौणमुख्याधारौ प्रदर्शितौ तिलेषु तैलं दधिन सर्पिः गङ्गायां गावः कूपे गर्गकुलमिति । क्वचित्तु भेदेन सम्बन्धेन बोधे ऽपि साधुत्वबोधकशास्त्रसत्त्वेनासाधुत्वाप्रस-क्त्या लक्षणाया नावसर इति तत्र शक्तिरेव । एवञ्च तत्र लक्षणेति मतमश्रद्धेयम् । तदाह । त्विति । मतान्तरयोः खण्ड-यिष्यमाणत्वेन नान्यत्रेत्युक्तं प्रपञ्चयन् सिद्धान्तमाह । द्विरेफेति । न योगरूढमित्याह । अवयवेति । तत्र तस्या सत्त्वात्साधु-त्वार्थं व्युत्पादनं त्वसताप्यवयवार्थेन तदाह । रथन्तरेति । भ्रमरत्वेनैव बोध इति भावः । यथाकथञ्चिदवयवार्थप्रतीतिस-म्भवे तत्त्यागानौचित्याद्योगरूढिमाह । यद्वेति । एवो ऽप्यर्थे । तेन रूढ्यर्थतावच्छेदकभ्रमरत्वसमुच्चयः । तथा च पूर्वमते जह-

त्स्वार्थात्र मते पङ्कजादितुल्यत्वेनाजहत्स्वार्था। शुद्धयौगिकत्वं तु नकरादावतिप्रसङ्गात्केवलयौगिकस्य तत्पर्यायेषु पाठासङ्गतेश्च। यदि तु कोशप्रामाण्यात्तत्रैवारोपो नान्यत्रेत्युच्यते तदा शुद्धयौगिकमेवास्तु तेनैव तद्बोधो ऽस्तु। यद्वा तदेवोभयार्थतावच्छेदकमस्तु तदेतत् ध्वनयन्नाह। अत एवेति। सर्वथा रूढ्यङ्गीकारादेवेत्यर्थः। न हि लाक्षणिकानां कोशेषु पाठः पर्यायेषु क्वापि दृश्यत इति भावः। ननु द्वितीयपक्षे आरोपसत्त्वेन लक्षणा कुतो नात आह। बोधेति। नन्वेवं पद एव यौगिकमिदमास्तां तेनोपस्थितेन तद्बोध इति किमर्थं तत्रापि योगरूढिरत आह। किञ्चेति। कोशप्रामाण्यादिति भावः। यत्तु जीर्णनैयायिका लक्षितलक्षणाख्यो ऽपि भिन्नो ऽस्या भेदः। इदं तल्लक्ष्यं लक्षितेन पदेन लक्षणा बोध इति तदर्थः। द्विरेफपदं च बहुव्रीहिणा रेफद्वयसम्बन्धिन्यर्थे शक्तम्। तत्त्वं च यद्यपि क्रूरादिपदे ऽप्यस्ति तथापि रूढ्या भ्रमरपदमेव तत्त्वेन बोधयति। तत्र भ्रमरत्वजातिविशिष्टशक्ततावच्छेदकभ्रमरत्वानुपूर्व्यारोपेणोपस्थित्यर्थः द्विरेफपदस्य लक्षणा। एवं लक्षणयोपस्थितं भ्रमरपदं स्वार्थं बोधयतीति न किञ्चित्युक्तदोष इति तत् खण्डयति। न चेति। तदुपेति। भ्रमरपदोपेत्यर्थः। तत्र शक्तिरपि न कल्प्येति भावः। नन्वेवं द्विरेफं पश्येत्यादौ प्रत्ययार्थान्वयस्तत्र न स्यात्तत्र तदन्वये प्रकृतिजन्योपस्थितेः कारणत्वादत आह। प्रत्ययेति। च तु अपिना तज्जन्योपस्थितिसमुच्चयः। तथा च तत्र जन्यत्वं साक्षात्परम्परासाधारणं तत्र निविष्टमिति भावः। एवमपि। उक्तरीत्या निर्वाहेणोक्तदोषाभावे ऽपि। तत्र मानमाह। उच्चारितेति। प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशादित्यादिनेति भावः। एतेन तत्र तदर्थे लक्षणापि मास्तु अनतिप्रसङ्गायास्वीक्रियमाणरूढिरेवानुपूर्वीरूपेण न तु तद्रूपेणेति रूढ्यर्थतावच्छेदिका सैवेतीतो ऽपि लाघवमित्यप्यपास्तं तस्मात्तत्त्वेन बोधानापत्तेः। पुस्तकदर्शनस्थले केनचिदुक्तं व्यभिचारमुद्धरति। पुस्तकेति। अस्या दृष्टचरत्वनिरासायाह। मानसेति। स्वाचेति। स्वमात्रश्राव्योच्चारणमित्यर्थः। अत एव तत्त्वम्। दृष्टान्ते एव तदसिद्धिरिति शङ्कानिरासाय तत्र तदुपपादयति। जपे इत्यादि-

नोक्तमित्यन्तेन । जपे । जपत्वावच्छिन्ने । तस्योपांशुप्रयोगरूपत्वात् । णैवेति । अजपेत्याद्युक्तेरिति भावः । तस्य च । तेषां तथा ज्ञानस्य च । वाह्यजपाशयेनाह । सूक्ष्ममिति । एवं च मानसजपे ऽपि सूक्ष्मतरं तदावश्यकमित्यर्थात्सिद्धम् । तदाह । इदमेवेति । सूक्ष्मतरमेवेत्यर्थः । सूतके । जननाशौचे मृतके । शान्ताशौचे । तथा किञ्च सम्यक् परश्रव्यतया । नन्वेवमपि तस्य जपत्वे किं मानमत आह । किञ्चेति । इदं तन्त्रसारे गौतमीयत्वेनोक्तं जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचकैरित्यादिः । जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतं मानसः किञ्चिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः । मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृत इत्यन्तः । धिया । मनसा । अर्थज्ञानस्य कर्मणि सर्वत्र कारणत्वात्तज्ज्ञानपूर्वकोच्चारणे एवादृष्टमित्याह । अर्थस्येति । तदुक्तं नारसिंहे ऽपि ।

वाचिकश्च उपांशुश्च मानसश्च त्रिधा जपः ।
त्रयाणां जपयज्ञानां श्रेयान्स्यादुत्तरोत्तरः ॥
यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः ।
मन्त्रमुच्चारयेद्व्यक्तं जपयज्ञः स वाचिकः ॥

स्पष्टत्वं चात्मानं प्रत्येव परं प्रति स्पष्टस्य नोच्चैर्जप्यं बुधः कुर्यात्सावित्र्यास्तु विशेषत इति शङ्खेन निषेधात् ।

शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ च चालयेत् ।
किञ्चिच्छब्दं स्वयं विद्यादुपांशु स जपः स्मृतः ॥
किञ्चिदिति तथा तद्ध्वनिं जानीयादिति ।
अपि पादाक्षरं श्रेण्योर्वर्णाद्वर्णं पदात्पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥

इति भाष्ये । उक्तार्थे ऽनुभवमपि प्रमाणयति । अत एवेति । उच्चारितस्यैव बोधकत्वादेवेत्यर्थः । अनुभवे न्वयो ऽस्य ततो भिन्नमित्यादितः । द्वितीयानुभवमाह । गामिति । नैयायिकमते दोषान्तरमाह । किञ्चेति । वृत्त्यनेति । आश्रयस्यैवाभावादिति भावः । पदज्ञानस्य कारणत्वस्य परैरपि स्वीकारात्प्रागुक्तकार्यकारणभावानुरोधेनाह । वृत्त्याश्रयेति । अन्यथातिप्रसङ्गापत्तिस्तदवस्थैवेति भावः । ननु शब्दनित्यतावादिनामिदं कथमत आह । पदे-

ष्विति । परम्परया तत्त्वमिति भावः। ततो लाघवादाह । नष्टेति । भाष्याद्युक्तं दृष्टान्तपूर्वकमुपपादयति । यथा चेति । आदिना दुःखः। एवव्यवच्छेद्यमाह । नेति । एवमग्रे ऽपि। प्रकृते न तथेति शङ्कानिरासाय प्रकृतविषयमेव दृष्टान्तमाह । यथा च महत इति। प्रकृतसङ्ग्रहायाह । यथेति । नन्वेवं सामान्यकारणमात्रव्यभिचारो ऽत आह । यथा तत्रेति । गन्धादावित्यर्थः। तेषाम्। गन्धादीनाम्। उक्तभाष्योक्तार्थे भाष्यान्तरमपि मानमाह। अत एवेति । उच्चारितस्यैव बोधकत्वादेवेत्यर्थः। तत्र हि परोक्षे काले इति न वै कालाधिकारो ऽस्तीति संखण्ड्य धातुरिति वर्तते धातौ परोक्षे इत्यस्य खण्डनायोक्तं धातुर्वै शब्दः न च शब्दस्य प्रत्यक्षपरोक्षताया सम्भवोस्तीति भाष्ये उक्तम्। तयोर्विशेषणतायामिति । तदर्थं प्रत्ययप्रकृतिशब्दस्योच्चार्यमाणस्यानुभूतत्वात्परोक्षत्वासम्भवस्ततो यथा प्रत्यक्षत्वमव्यभिचाराच्छब्दस्य विविशेषणं न सम्भवति एवं परोक्षत्वमप्यसम्भवादविशेषणमित्यर्थ इति कैयटः। यत्तु गुरवः स्वबोध्यपदबोध्यत्वसम्बन्धेन द्विरेफपदमेव भ्रमरत्वजातिविशिष्टमुपस्थापयतीति लक्षणैवैषा रूढिमती न तु लक्षितलक्षणाख्यस्तद्भेदो ऽस्तीति तत्खण्डयति । न चेति। पदम् । पदमेव। अत एव प्रयोजनं लक्ष्यसम्बन्धाभावादिति प्रकाशादावुक्तम्।

लक्ष्यं न मुख्यं नाप्यत्र न च शब्दः स्खलद्गतिः।
एवमप्यनवस्थास्याद्या मूलक्षयकारिणी ॥
प्रयोजनेन सहितं लक्षणीयं न युज्यते ।
ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ॥
विशिष्टे लक्षणा नैवं विशेषाः स्युस्तु लक्षिते ।

इत्यन्तेन। तस्माच्छक्तिविशेष एव लक्षणा न त्वतिरिक्ता सेति। तथा वदन्तो निखिलतान्त्रिका उक्तमहाभाष्याद्यनवधाननिबन्धनत्वेनायुक्ता एवेति बोध्यम्। तदाह। इति दिगिति ॥ ४४ ॥

व्यञ्जनानि- मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्या-
रूपणम्। र्थसम्बद्धासम्बद्धसाधारणप्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धसंस्कार-

विशेषो व्यञ्जना । अत एव निपातानां द्योतकत्वं स्फोटस्य व्यञ्जता च हर्यादिभिरुक्ता । द्योतकत्वं च क्वचित्समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणानामप्येतत्स्वीकार आवश्यकः । एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र तथैवानुभवात् । वक्त्रादिवैशिष्ट्यप्रतिज्ञानं व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेत्यन्यत्र विस्तरः ॥ ४५ ॥

(कु० टी०) लक्षणयैव व्यञ्जना गतार्थेति तार्किकमतं निराकर्तुमाह । मुख्यार्थेति । निश्शेषच्युतचन्दनं स्तनतटमित्यादौ मुख्यार्थबाधाभावे ऽपि अधमपदार्थपर्यालोचनया व्यङ्ग्यार्थप्रतीतेर्व्यञ्जना वृत्त्यन्तरमेवेति भावः । सम्बद्धेति । मुख्यार्थसम्बन्धाभावाद्रूढ्यादेरभावाच्च न लक्षणेत्यर्थः । वक्त्रादीति । वक्त्रादीनां वैशिष्ट्यस्य ज्ञानेन प्रतिभया च उद्बुद्धः संस्कार इत्यर्थः । व्यञ्जकत्वलक्षकत्वयोर्वैलक्षण्यं दर्शयति । अत एवेति । निपानातामिति । तेषां मुख्यार्थाभावेन लक्षणाया असम्भवात् व्यञ्जकतारूपा द्योतकतैवेत्यर्थः । स्फोटस्येति । लक्षणायास्तु तत्र न सम्भवः । क्वचिदिति । यथा प्रजयतीत्यत्र प्रकृष्टजयबोधकत्वम् । प्रादेशं विलिखतीत्यत्र प्रादेशं विनिर्मायेत्यर्थेन क्रियाक्षेपकत्वादुक्तम् क्वचिदिति । वैयाकरणानामिति । न केवलं कवीनामेव किन्तु वैयाकरणनामपि व्यञ्जना आवश्यकी यतो व्यञ्जकत्वमेव द्योतकत्वमित्यर्थः । लक्षणाव्यञ्जनयोर्वैलक्षण्यान्तरमपि दर्शयति । एषा चेति । लक्षणा पदनिष्ठा व्यञ्जना तु एकदेशादिनिष्ठापीत्यर्थः ॥ ४५ ॥

(कु० टी०) अथ व्यञ्जनां निरूपयति । मुख्यार्थेति । कचित्तत्सम्बन्धग्रहापेक्षासत्त्वात्तन्निरपेक्षत्वमादिर्वा नोक्तः । तच्च बोधविशेषणम् । तदेवाह । मुख्यार्थेति । एतदुभयसाधारणः प्रसिद्धाप्रसिद्धान्यतरो यो ऽर्थस्तद्विषयक इत्यर्थः । वक्त्रादीति ।

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् ॥
यो ऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ।

इति प्रकाशादयः। वक्ता कविस्तन्निबद्धश्च बोद्धव्यः प्रतिपादनीयो जनः । अन्तर्भावितण्यर्थत्वात् । अतो न वाच्येनाभेदः । काकुः । शोकभीत्यादिभिर्ध्वनेर्विकार उच्चारयितुः शोकाद्यनुमापको जातिविशेषः । वाक्यवाच्याभ्यां सहितो ऽन्यसन्निधिरिति समासेन निमित्तत्रयम् । अन्यो ऽत्र वक्तृबोद्धव्यभिन्नः । प्रस्तावः प्रकरणम् । देशो विजनादिः । कालो वसन्तादिः । आदिना चेष्टालीलादिहावपरिग्रहः । वैशिष्ट्यं वैलक्षण्यम् । तच्च वक्त्रादिषु प्रत्येकं सम्बध्यते । पञ्चम्यर्थः सहकारिरूपहेतुत्वम् । तच्च तदभावे व्यञ्जनानुदयाद्बोध्यम् । प्रतिभेत्यनेनेदं प्रतिपादितं नवनवोन्मेषशालिनी बुद्धिः प्रतिभा । तदुक्तम् ।

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मतेति ।

नवनवोन्मेषो जन्मान्तरीयतद्बीजनकत्वज्ञानजन्यसंस्कारोद्बोधः । वक्त्रादिवैशिष्ट्यसहकारेण तज्जनिका च बुद्धिः प्रतिभेति फलितम् । या वासनेत्युच्यते तस्यां सत्यामेव वक्तृवैशिष्ट्यादिसत्त्वे ऽपि व्यङ्ग्यप्रतीतिरिति । एवञ्च शक्तिरतज्जन्मगृहीतैवार्थबोधिका व्यञ्जना तु जन्मान्तरगृहीतापीत्यपि शक्तेरस्याभेदकत्वम् । इदमेवाभिप्रेत्य व्यञ्जना स्वरूपसती हेतुरिति प्रवादः । अर्थस्य । त्रिविधस्यापि तु कस्य चिदेव अन्यो ऽर्थो वाच्यलक्ष्यभिन्नः । व्यक्तिर्व्यञ्जना करणव्युत्पत्तेः । एवेन शक्तिलक्षणा निरासः सङ्केताद्यभावादिति तदर्थः । प्रतिभादीत्यादिना निपुणतादि । कचित्तद्रहितपाठ एव । अत्रेदं बोध्यम् । व्यञ्जनासामान्यलक्षणं अर्थविषयकः प्रतिभोद्बुद्धः संस्कारविशेष इत्येव अनतिप्रसक्तत्वात् । दीक्षिताद्युक्ताद्यलक्षणामते ऽनतिप्रसङ्गाय मुख्यार्थेति । मध्यमं तु स्वरूपकीर्तनम् ।

तृतीयं तु सहकारि । एवञ्च नियन्त्रितार्थविषयकधी-जनकत्वं शब्दव्यञ्जना। वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापारत्वमर्थव्यञ्जना । अर्थस्येत्यनेन शब्दव्यञ्जनानिरासः । एतेषां न प्रत्येकमेव व्यञ्जकत्वं किन्तु मिलितानामपीति । अत एव । व्यञ्जनाया अङ्गीकारादेव । स्फोटस्येति । अनेकव्यक्तीत्यादिनेति भावः । ननु तत्रोपयोगे ऽपि द्योतकत्वस्यान्यादृशत्वान्न तत्रोपयोगो ऽत आह । द्योतकत्वं चेति । अन्यादृशस्याप्यत्र वक्ष्यमाणत्वादाह । क्वचिदिति । प्रजयतीत्यादावित्यर्थः । अत एव पूर्वं प्राकृतस्योल्लेखः। अत एव केवलानां तेषां प्रयोगो ऽसाधुः । उपसंहरन्नाह । इति वैयेति। अपिना नैयायिकादिसमुच्चयः । तैरपि केषां चित्त्वाङ्गीकारादिति भावः । नैषा पूर्ववत् शब्दप्रवृत्तिरेवेत्याह । एषा चेति । शब्दो वाक्यैकदेशः प्रकृतिप्रत्ययादिः । रचना आकृतिः। आदिना लीलादिहावाः। अनतिप्रसङ्गादाह । वक्त्रादीति । वैशिष्ट्यज्ञानं चेति पाठः। चेति प्रतिभासमुच्चयः । यत्त्वर्थस्य न व्यञ्जकत्वं किन्तु शब्दस्यास्यास्तन्मात्रवृत्तित्वादिति तन्न ।

रतिकाले विलोक्य श्रीर्नाभिपद्मे पितामहम् ।
रसाकुला छादयते दक्षिणं नयनं हरेः ॥

इत्यादौ हरिपदेन दक्षिणनेत्रस्य सूर्यात्मकत्वं तत्सङ्कोचेन सूर्यास्तस्तेन पद्मसङ्कोचस्तेन पितामहस्य गमनं तेनाप्रतिबद्धं रतिविलसितमिति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तत्तदर्थप्रतीत्युत्तरमेव व्यङ्ग्यप्रतीतेरर्थस्यापि व्यञ्जकत्वावश्यकत्वात् ।

पश्यात्र नलिनीपत्रे बलाका दृश्यते ऽचला ।
रम्ये मारकते पात्रे शुक्तिरेव च निर्मला ॥

इत्यत्रापि वक्तृतात्पर्यविषयीभूतवाच्यार्थबाधाभावे ऽपि तज्ज्ञानाभावे ऽपि निश्चलत्वेन शुक्त्युपमया चास्तत्वं तेन तस्य निर्जनत्वं तेन तदेवावयोः सङ्केतस्थानमित्यादिक्रमेण तत्तदर्थव्यङ्ग्यप्रतीतेर्मुख्यार्थबाधज्ञानसत्त्वे तदप्रतीतेश्च। अत एवाद्यं विशेषणं पदस्य च तत्तत्स्वार्थबोधने उपरतत्वात् पुनःपुनरनुसन्धाने गौरवं तदननुभवात् । गतो ऽस्तमर्क इत्यादेः शिष्येण सन्ध्यावन्दनादेः कर्तव्यत्वाशयेन गुरुं प्रति प्रयुक्ताद्वक्तृतात्पर्याभावे ऽपि

प्रातिवेश्यादीनामभिसरणोपक्रमादिबोधस्य वाच्यार्थधीपूर्वकस्य वाच्यार्थबाधज्ञाने ऽजायमानस्य लक्षणयोपपादयितुमशक्यत्वाच्च । यत्तु गतो ऽस्तमर्क इत्यादौ न व्यञ्जना एकसम्बन्धिदर्शनादपरसम्बन्धिस्मरणवदुपपत्तेरिति तन्न । गतो ऽस्तमर्क इत्यादिश्रवणोत्तरं सन्ध्यावन्दनकर्तव्यत्वं मया स्मृतमित्यनुव्यवसायाभावात् ततानुल्लेखात् इदं पदमेतदर्थस्य न वाचकं नापि लक्षकं नापि स्मारकमपि तु व्यञ्जनया बोधकमिति प्रामाणिकव्यवहारेणाव्यतिरिक्तत्तत्सिद्धेः । असम्बद्धस्यापि व्यङ्ग्यत्वाच्च । एतेन तदर्थानां वक्त्रादिवैशिष्ट्यज्ञानप्रतिभासहकृतमनसेव विशिष्टधीसम्भवात् चमत्कारं प्रति शाब्दस्येव मानसस्यापि चेष्टानुरोधेन हेतुतायाः क्लृप्तत्वाच्च व्यञ्जनासत्त्वे न मानम् । प्रतिभा च तत्पदार्थविषयसंस्कारोद्बोधको बुद्धिविशेष इत्यपास्तम् । व्यङ्ग्यो ऽर्थो ऽनुमेय इति त्वयुक्तमेव । विरुद्धानैकान्तिकेभ्यो व्याप्तिपक्षधर्मतादिनिर्णयाभावे ऽपि व्यङ्ग्यार्थप्रतीतेः । किञ्च सिद्धिसत्त्वे ऽपि व्यङ्ग्यार्थबोधदर्शनेन तत्प्रतिबध्यतावच्छेदककोटौ तद्भेदनिवेशो ऽतिगौरवापत्त्या तज्जन्यबोधस्यातिरिक्तत्वे एव लाघवात् । अन्यथा शब्दप्रमाण्योच्छेदापत्तेरिति दिक् । अनया कटाक्षेणाभिलाषो व्यञ्जित इति सर्वजनप्रसिद्धेरस्यां चेष्टावृत्तित्वमप्यावश्यकम् । बोधकत्वस्य चेष्टायां सत्त्वे ऽपि तन्निष्ठबोधकत्वं न शक्तिश्चेष्टा शक्तिरिति प्रामाणिकव्यवहाराभावात् । किन्तु तज्जन्यबोधे तज्ज्ञानस्य कारणत्वं बोध्यम् । यत्तु तत्तद्वाचकशब्दज्ञानद्वारा चेष्टया बोध इति तन्न । चेष्टया जडमूकादिव्यवहारानापत्तेः । तस्यापि जन्मान्तरीणशब्दस्मरणमित्यन्ये इति दिक् । तदाह । इत्यन्यत्रेति । गुरुमञ्जूषादावित्यर्थः । इति व्यञ्जनानिरूपणम् ॥ ४५ ॥

शब्दस्वरूपनिरूपणे शङ्का । ननु को ऽसौ शक्त्याश्रयः शब्दः । न च वर्णाः प्रत्येकम् । तथा सति द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः । नापि संहताः । उच्चरितप्रध्वंसित्वेन यौगपद्यासम्भवात् । उत्पत्तेरभिव्यक्तेर्वा क्षणस्थायित्वात् ।

क्षणशब्देन तदाधारः कालः । मुख्यक्षणस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्याप्यप्रत्यक्षत्वापत्तेः । उच्चरितप्रध्वंसित्वं चोच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वम् । एवञ्चायं पूर्वो ऽयं पर इति प्रत्यक्षविषयेदंशब्दघटिताभिलापाभिलप्यमानपौर्वापर्यज्ञानस्यैको यणित्याद्युपयोगिनो ऽसम्भवः । नष्टस्य प्रत्यक्षविषयेदमा परामर्शायोगात् । पदप्रत्यक्षस्याप्येवं क्रमावगाहिन एव परः सन्निकर्ष इति सूत्रोक्तभाष्यकृदनुभवसिद्धस्यानुपपत्तिः । न च पूर्ववर्णस्थितिकाले द्वितीयवर्णोत्पत्तिः । पूर्ववर्णनाशोत्तरं यत्नान्तरेण वर्णान्तरोत्पत्तेः । यावद्गकारे वाग् वर्तते न तावदौकारे इति येनैव यत्नेनैको वर्ण उच्चार्यते तेनैव विच्छिन्नस्तस्मिन्वर्ण उपसंहृत्य तं यत्नमन्यं यत्नमुपादाय द्वितीयः प्रवर्तते इति तत्रैव सूत्रे भाष्ये उक्तत्वात् । न चोत्तरवर्णप्रत्यक्षकाले संस्कारवशादव्यवहितोत्तरत्वसम्बन्धेन पूर्ववर्णवत्त्वं तदुत्तरवर्णे गृह्यते, एवं तदुत्तरवर्णप्रत्यक्षकाले संस्कारोपस्थितविशिष्टवर्णवत्त्वं तदुत्तरवर्णे गृह्यत इति तज्ज्ञानं सुलभं सरो रस इत्यादौ विशेषश्च । यद्वा पूर्वपूर्वजाः शब्दाः शब्दजशब्दन्यायेन चरमवर्णप्रत्यक्षपर्यन्तं जायमाना एव भवन्तीति न पदप्रत्यक्षानुपपत्तिरिति वाच्यम् । अयं पूर्वो ऽयं पर इत्याभिलापासम्भवात् । नष्टाविद्यमानयोः सम्बन्धिनोरव्यवहितोत्तरत्वस्य सम्बन्धताया वक्तुमशक्यत्वाच्च । एवं पदप्रत्यक्षोपपादने ऽपि पदस्याविद्यमानत्वेन त-

श्र वृत्त्याश्रयत्वग्रहानुपपत्तेश्च। अविद्यमाने आश्रयत्वाङ्गीकारे नष्टो घटो जलवानित्यादेरापत्तिः। अविद्यमानयोरपि जलघटयोराश्रयतानिरूपकत्वस्याश्रयत्वस्य च त्वद्रीत्या बाधाभावात् तज्ज्ञानस्य प्रमात्वापत्तिः। किञ्चैवं पदवाक्ययोरभावेन शब्दार्थसम्बन्धस्यैव हानिः। तदुक्तम्।

अशाब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत्।

इति पदसमुदायात्मकवाक्यस्येव वर्णसमुदायरूपपदस्याप्यभावात्। उभयोरप्यर्थासम्भवादिति तदर्थः। किञ्चैवं पदमिति बुद्धेस्तदेवेदं कृष्णपदमिति बुद्धेश्चानुपपत्तिः पक्षद्वयेऽपि। न चैकजातीयबुद्धिविषयत्वौपाधिकी एकबुद्धिविषयत्वौपाधिकी च सेति वाच्यम्। तज्जातीयमिदं पदमिति व्यवहारस्याप्यापत्तेः। तदेवेदं पदमिति नियमेन व्यवहाराच्च। एतेन पूर्वनखादिनाशोत्तरं पुनरुत्पन्ननखादौ तदेवेदं नखं त एव इमे केशा इति वत् सादृश्येन प्रत्यभिज्ञेत्यपास्तम्।

अवयवैरेवैकबुद्धिविषयैरकः पट इत्यादिबुद्ध्युपपत्तावयविनोऽप्यतिरिक्तस्य तदसिद्ध्यनापत्तेश्च। किञ्चैवमुच्चारणभेदाद्भिन्नेषु शक्तिग्रहासम्भवो व्यक्तिवाद इवानन्त्यव्यभिचारात्। व्यभिचारश्च गृहीतशक्तिकस्यैव बोधकत्वमिति सर्वसिद्धो नियमो बोध्यः। आनुपूर्वी तु तत्कालघटितत्वेनाव्यवहितोत्तरत्वाननुगमात् प्रत्युच्चारणं भिन्नेति तस्या अपि शक्ततावच्छेदकत्वे सैव दुरवस्था। तादृशाव्यवहितोत्तर-

त्वेनानुगमो ऽपि तादृशत्वस्य दुर्ज्ञेयत्वादयुक्त एव । व्यवधानाभावे सति यज्ज्ञानध्वंसविशिष्टज्ञानविषयत्वमेवानुपूर्वी तत्परिच्छेदश्च मनसैवेति पक्षे ऽपि ज्ञानव्यक्तिभेदेनानुपूर्व्यनन्तैव । न च चरमवर्णव्यङ्ग्यस्तत्तत्पदवृत्तयो ऽनन्ता जातयः शक्ततावच्छेदकत्वेन कारणतावच्छेदकत्वेन च कल्प्यन्त इति न दोष इति वाच्यम् । अनन्तजातिकल्पने गौरवात् । उक्तरीत्या वृत्त्याश्रयत्वासम्भवाच्च । पदानामसत्त्वेन तत्र जातेरप्यसम्भवाच्चेति ॥ ४६ ॥

(कुं० टी०) ननु को ऽसाविति । अखण्डपक्षे आभ्यन्तरः स्फोटो जातिव्यक्ती बाह्यस्फोटाविति त्रीणि वाक्यलक्षणानि । सखण्डपक्षे तु नियतसाधन आख्यातशब्दपदक्रमो वा पदसङ्घातो वा आद्यमेव पदं वा सर्वाणि पदानि वेति पञ्च वाक्यलक्षणानि । तत्रैषु अष्टसु पक्षेषु कः पक्षो युक्त इति विचारः । तथा शक्त्याश्रयाः । शब्दानां नित्यत्वमभिप्रेत्याह । अभिव्यक्तेरिति । क्षणशब्देनेति । क्षणो नाम शब्दतन्मात्रद्वारा प्रकृतेः परिणामविशेषः क्षणधारारूपकालस्य परमापकर्षावधिः । स च न प्रत्यक्षः । अतिसूक्ष्मत्वात् । किन्तु तत्समूहरूपः काल एव । यथा परमाणौ स्वीय ऊर्ध्वनभोदेशत्यागोपलक्षितः कालः क्षणः । ननु उच्चारणप्रध्वंसयोर्यौगपद्यमयुक्तमत आह । उच्चरितप्रध्वंसित्वं चेति । प्रत्यक्षविषयेति । प्रत्यक्षविषयो य इदं शब्दस्तद्विषयो यो ऽयं पूर्व इत्यादिरभिलापस्तद्विषयस्य पौर्वापर्यस्य ज्ञानं न सम्भवतीत्यर्थः । पदप्रत्यक्षस्यापीति । भाष्यकृदनुभवसिद्धस्य क्रमात्रगाहिनः पदप्रत्यक्षस्योपपत्तिरित्यन्वयः । यावदिति । एकैकवर्णवर्ति वागिन्द्रियमेकमेव वर्णमुच्चा-

श्यति न द्वौ वर्णौ उच्चरितश्च वर्णस्तदानीमेव नष्ट इति पौर्वापर्यसंहितयोरसम्भव इत्यर्थः। वागिति। वागिन्द्रियमित्यर्थः। तेनैव यत्नेन विच्छिन्ने नष्टे उपसंहृत्य तं यत्नं त्यक्त्वा।

पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितचरमवर्णानुभव एव तावद्वर्णगोचरां स्मृतिं जनयतीति तार्किकोक्तं शङ्कते। न चेति। उपस्थितेति। उपस्थितो विशिष्टो यो वर्णस्तद्वत्त्वं तृतीयवर्णे गृह्यत इत्यर्थः। शब्दजशब्देति। यथा वीचिरुत्पन्ना तरङ्गान्तरमुत्पादयतीति वीचीतरङ्गन्यायेनैकैकशब्दाच्छब्दान्तरोत्पत्तिः ततः श्रोत्रमागतो गृह्यत इति तार्किकाः। अव्यवहितोत्तरत्वसम्बन्धेनेत्यादिकां प्रथमामाशङ्कामुद्धरति। अभिलापासम्भवादिति। पदवाक्ययोरभावेनेति। वर्णानां समुदायस्यासम्भादिति भावः। तथा भवेदिति। पदार्थो ऽपि अशाब्दः स्यादित्यर्थः। यत्तूक्तं लीलावत्यां एकं पदमिति बुद्धिरेकसुप्तिङन्तत्वावच्छेदेनेति तन्न। सुप्तिङन्तयोरनुगतस्यैकस्य पदावच्छेदकस्य वक्तुमशक्यत्वात्। एकत्वबुद्धेरौपाधिकत्वे सर्वत्र तदुच्छेदापत्तेश्च। पक्षद्वये ऽपीति। संस्कारवशादिति पक्षे पदा अनन्ताः शब्दा इति पक्षे चेत्यर्थः। न चैकेति। घकारटकारयोर्भेदे ऽपि घकारटकारबुद्धेरेकजातीयत्वादेकपदत्वव्यवहार एवं दिनभेदेनोच्चारितयोर्घटपदयोरेकबुद्धिविषयत्वात्तदेवेदमिति व्यवहार इत्यर्थः। किञ्चैवमिति। एकघटपदे शक्तिग्रहे ऽप्यन्यघटपदे शक्तिग्रहाभावात्। ननु सकलघटपदे आनुपूर्वीसाम्यात् शक्तिग्रह इत्यत आह। तत् कालेति। तत्तत्कालघटितस्याव्यवहितोत्तरत्वस्यैकस्याभावादित्यर्थः। सैव। शब्दान्तरस्य बोधकत्वानापत्तिरूपैव। आनुपूर्वी त्विवाति। भिन्नैवेत्यत्रान्वयः। तत्तत्पदवृत्तयस्तत्पदनिष्ठाः। अनन्ता इति। पदभेदात् ॥ ४६ ॥

(क० टी०) अथ वाचकशब्दं निरूपयति । नन्वित्यादिना । वर्णस्फोटवादिमतं द्वेधा खण्डयति क्रमेण । न च वर्णा इत्यादिना । तथा पर्याप्तिसम्बन्धेन शक्त्याश्रयः । पत्तेरिति । किञ्च धनं वनमित्यादौ मलोपाद्यापत्तेः । किञ्च प्रत्येकं दीर्घबोधापत्तेः । न च प्रत्येकं वर्णैरर्थस्मरणमात्रं जन्यते चरमेण पुनः स्पष्टं जन्यते प्रत्यक्षे एवं स्मरणे ऽपि वैजात्यस्वीकारे बाधकाभावाद्वाच्यम् । प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वाद्गुरुत्वाच्चेत्यपि बोध्यम् । संहृता इति । न च प्रत्येकावृत्तेः कथं समुदितवृत्तित्वं द्वित्वादिवदुपपत्तेरिति भावः । उच्चारितेति । प्रत्येकं वर्णानामित्यादिः । ननु उच्चरितप्रध्वंसित्वमेव कुतो ऽतो नित्यत्वपक्षे आह । अभीतीति । जन्यत्वपक्षे आह । उत्पत्तेरिति । नन्वेवं वर्णप्रत्यक्षं न स्यात्क्षणस्यात्प्रत्यक्षत्वादत आह । क्षणेति । तच्छब्देनान्यतरपरामर्शः । क्षणसमूहरूपः प्रत्यक्षयोग्य इत्यर्थः । अयमेवोच्चारणाधिकरणकालः । नन्वेवमपि प्रत्यक्षत्वं नोच्चारणाधिकरणकालिकध्वंसप्रतियोगिस्वरूपतत्त्वाङ्गीकारादत आह । नष्टस्येति । तथा च प्रक्रियोच्छेदापत्तिरिति भावः । यदि कालिकं पौर्वापर्यं तदा ऽसम्भवः । पूर्वापरयोर्युगपत्स्थित्यभावात् । अत एव न दैशिकमपि । आद्यमपि युगपदवस्थितेष्वेव गृहीतुं शक्यं न तु नष्टविद्यमानयोरयं ज्येष्ठो ऽयं मध्यमो ऽयं कनिष्ठ इति व्यवहारवदयं पूर्वो ऽयं पर इति व्यवहारस्यापि नष्टविद्यमानयोरसम्भवः तयोः सम्बन्धस्य निरूपयितुमशक्यत्वात् । घकारः पूर्वमुत्पन्नस्ततो ऽकारस्ततो ऽन्य इत्येवं कालिकपौर्वापर्यग्रहः सम्भवन्नपि न तदुपयोगीति तात्पर्यम् । लौकिकं दोषमाह । पदेति । एवेन तस्यातत्त्वव्यवच्छेदः । पर इति । एकैकवर्णवर्तिनो वा न द्वौ युगपदुच्चारयति गौरिति यावद्गकारे वाग्वर्तते नौकारे न विसर्जनीये च यावदौकारे न गकारे न विसर्जनीये यावद्विसर्जनीये न गकारे नौकारे इति तत्र भाष्यम् । वाक् शब्देन वागिन्द्रियम् । यथा परः प्रयुज्यते न वर्णो वर्णस्य सहाय इति च भाष्यम् । पूर्ववर्णध्वंसानन्तरं यद्यप्यपरः प्रयुज्यते तथापि स पौर्वापर्यादिव्यवहारे वर्णस्य पूर्वनष्टस्य न सहायः नष्टविद्यमानयोः सम्ब-

न्धाभावान्न तद्व्यवहारप्रयोजक इत्यर्थः । एवञ्च तज्ज्ञानाभावेन ततो बोधोच्छेदापत्तिः । एवञ्चोपलम्भो न युगपत् नापि वास्तवी सत्तेति दोषद्वयमिति भावः । उभयमुद्धरति । न चेति । पूर्ववर्णजनको यस्तेनैव द्वितीयादिवर्णोत्पत्तिरित्यर्थः । खण्डयति । पूर्वमिति । एकेन यत्नेन वर्णे उच्चारिते तस्मिन्नष्टे तज्जनकयत्ने च नष्टे यत्नान्तरोत्पत्त्यनन्तरं द्वितीयवर्णोत्पत्तेरित्यर्थः । अत्र मानमाह । यावदिति । विच्छिन्ने । नष्टे । तं यत्नमिति । पूर्वयत्नं त्यक्त्वेत्यर्थः । अन्यमिति । यत्नान्तरमित्यर्थः । तत्रैव । परःसन्नीत्यत्रैव । परमतं खण्डयति । न चेति । यत्तु प्रत्येकवर्णानुभवजनितसंस्कारसहकृतान्त्यवर्णप्रत्यक्षसामग्र्या स्मृतिप्रत्यक्षाविषयाः सञ्जातसहभावा वाचकाः । एवञ्च सदसदनेकविषया पदप्रतीतिः स्मृतिप्रत्यक्षात्मिकेति तत्र क्रमाविपरीतक्रमानुभूतानामविशेषेणार्थबोधकत्वापत्तेः । क्रमस्य संस्काराविषयत्वेन स्मृत्याविषयत्वात् । न चानुभवक्रमोपहितानामेव तेषां स्मृत्या विगाहनात् क्रमव्युत्क्रमयोरविशेष इति देवताधिकरणे मिश्रोक्तरीत्या निर्वाह इति वाच्यम् । अनुभवक्रमस्य स्मृतिक्रमे ऽनियामकत्वात् । दृश्यते ह्यपूर्वैर्युरनुभूतमस्मृत्यापूर्वैर्युरनुभूतस्य स्मरणम् । किञ्च तत्तानुल्लेखान्न तत्र स्मरणत्वं युक्तं तदेतदभिप्रेत्याह । उत्तरेति । तज्ज्ञानम् । पौर्वापर्यज्ञानं पदज्ञानं च । सर इति । आनुपूर्वीलाभादिति भावः । आदिना नदी दीनेत्यादि परिग्रहः । अन्यत्रावश्यकयुक्ति लाघवादाह । यद्वेति । अत एवाह । चरमेति । पदेति । इदमुपलक्षणं पौर्वापर्यज्ञानस्यापि । यासम्भवादिति । तस्य कालदेशान्यतरकृतत्वेनाद्य एककालवृत्तित्वेन तदसम्भवादित्यर्थः । एवञ्च पौर्वापर्यज्ञानं नेति भावः । पदज्ञानमपि नेत्याह । नष्टेति । तस्य तद्घटितसन्निवेशापेक्षत्वादित्यर्थः । द्वितीये आद्य दोषोद्धारे ऽप्याद्यसाधारणं द्वितीये दोषमाह । एवमिति । उक्तरीत्येत्यर्थः । स एव च बोधोपयोगीति प्रागुक्तम् । ननु तत्राप्याश्रयत्वमस्त्वत आह । अविद्येति । यथासंख्यमाह । आश्रयेति । त्वया तत्रैव तत्रापि तद्धर्माङ्गीकारादिति भावः । नापीत्यत्र दोषान्तरमाह । किञ्चेति । एवम् । तेषां तदाश्रयत्वेनोक्तरीत्या तयोरुपपादने । अभावेन । फलाभावादातिरिक्ततदस्वीकारेण । तदुक्तमिति । हरिणेति शेषः । यद्यपि तुल्ययुक्त्या

वाक्यस्य वाक्यार्थशक्तिसाधको ऽयं तथापि तत एव तात्पर्यार्थमाह । पदेति । अर्थासम्बन्धादिति । तयोरशाब्दत्वापत्तिरिति शेषः । दोषान्तरमाह । किञ्चेति । पक्षेति । तेषां प्रत्येकं संहतानां वा तत्त्वमिति पक्षद्वये ऽपीत्यर्थः । व्युत्क्रमेणोभयत्रोपपत्तिमाह । न चेति । तथा चारोप इति भावः । आद्ये दोषमाह । तज्जातीयमिति । अपिना तस्यैव सङ्ग्रहः । इष्टापत्तावाह । तदेवेदमिति । एतेन । उक्तदोषद्वयेन । आदिग्राह्यमाह । त एवेमे इति । द्वितीये दोषमाह । अवयवैरिति । पक्षद्वयसाधारणमेव दोषान्तरमाह । किञ्चैवमिति । उक्तो ऽर्थः । आनन्त्येति । समाहारद्वन्द्वः । मध्यमपदलोपि समासो वा । ननु यस्य शक्तिग्रहस्तस्मादेव बोध इति क्व व्यभिचारो ऽत आह । व्यभीति । यस्य शक्तिग्रहस्तस्मान्न बोध इत्यादावेवोक्तं यस्माद्बोधस्तस्य न स इति व्यभिचारइत्यर्थः । नन्वानुपूर्वीरूपावच्छेदकैक्येन तेषामनुगमान्नोक्तदोषाविति तत्सम्भवो ऽत आह । आनुपूर्वीति । भेदे ऽननुगमो हेतुस्तत्र तद्घटितत्वं स्वकालोत्तरकालिकत्वं हि सेति भावः । अपिर्व्युत्क्रमे । तस्याः शक्ततावच्छेदकत्वे ऽपीत्यर्थः । अनुगमो ऽपीति । आनुपूर्व्या इति भावः । ननु तस्याः कालाघटितत्वेनायं दोषो ऽत आह । व्यवेति । इदं चाव्यवहितोत्तरत्वलाभार्थम् । वैशिष्ट्यं च ज्ञाने कालिकसामानाधिकरण्येन । एवेनोक्तव्यवच्छेदः । शब्दतो ऽसम्भवादाह । मनसैवेति । एवं मौनिश्लोके लिपिक्रमेण ज्ञानक्रमो ऽनुमेयः । घचटेत्यादिवारणाय सत्यन्तम् । कदम्बगोलकन्यायेनोत्पन्नटकारान्तराविषयकस्वोच्चारणविषयाद्यज्ञानध्वंसविशिष्टटकारप्रत्यय इत्यर्थः । ज्ञानेति । ज्ञानरूपव्यक्तीत्यर्थः । तैवेति । तथा चोक्तदोष एवेति भावः । प्रकारान्तरेण तयोरभावमाह । न चेति । चरमेति । तथा च पूर्वं तदनभिव्यक्तेर्न बोध इति भावः । अत एवाह । अनन्ता इति । कल्पकमाह । शक्तेति । अत्राविश्वस्तं प्रत्याह । कारणतेति । बोधेत्यादि न दोष इति । तद्दोषद्वयाभावात्तदसम्भवरूपदोषो नेत्यर्थः । नन्वन्यथानुपपत्त्या गौरवमिष्टमेवात आह । उक्तेति । पदादेरसत्त्वेन यथा तत्र तदभावस्तथात्रापि तदुपपादने ऽपि तेषामसत्त्वे तत्त्वाद्येत्यर्थः । तथा च तदसम्भव एवेति भावः । तुल्ययुक्त्या

दोषमाह । पदानामिति ॥ ४६ ॥

शब्दस्वरूपशङ्कानिरासः ।

अत्रोच्यते । प्रलये नियतकालपरिपाकानां सर्वप्राणिकर्मणामुपभोगेन प्रक्षयाल्लीनसर्वजगत्का माया चेतने ईश्वरे लीयते । लयश्चायमपुनःप्रादुर्भावफलको नात्यन्तिकः नाशादुत्तरं सर्गानुपपत्तेः । नापि सर्वथा अभानम् । प्रतिभासमात्रशरीरस्य मिथ्यावस्तुनो ऽनवभासे तदभावस्यैवापत्तेः । किन्तु सुप्तेव तिष्ठति कार्यप्रवृत्त्यभावात् । स्वप्रतिष्ठेश्वरप्रकाशस्यात्यन्तनिर्विकल्पकतया तद्बलाद्भासमानाप्यभानप्रायैव । ततो ऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतो ऽबुद्धिपूर्विका सृष्टिर्मायापुरुषावाविर्भवतः । ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते । ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते । इदमेव शक्तितत्त्वम् । तस्य बिन्दोरचिदंशो बीजम्, चिदचिन्मिश्रो ऽंशो नादः, चिदंशो बिन्दुरित्यचिच्छब्देन शब्दार्थोभयसंस्काररूपा अविद्योच्यते ॥ ४७ ॥

(कुं० टी०) स्फोटस्यैव वाचकत्वं दर्शयितुमाह । अत्रोच्यते इति । प्रलये । भौतिकादिप्रलये । महाप्रलयस्वीकारे तु सर्वकर्मणामेव नाशो भवति, ततश्च शेषकर्माभावे पुनः शरीरारम्भानापत्तेः । अत एव यदिह रमणीयचरणा ततः शेषेणेत्यादि श्रूयते । नियतेति । नियतकालं परिपाको भोगो येषाम् । लीनसर्वजगत्केति । भुक्तभोग्यानां प्राणिनां मायायां लयः तस्याश्चेश्वरे इत्यर्थः । एवञ्च कारणनाशात्कार्यनाश इति तार्किकोक्तमयुक्तम् । तथा च रज्जूरगादिवदपृथग्भूतानामात्मन्यध्य-

स्तानां वियदादीनां शुद्धे ब्रह्मणि लयो भवति। स च न मृदि घटस्येवानुपलब्धिरूपः किन्तु रज्वामहेरिव। तत्र बुद्धिवृत्तेरपि लीनत्वादेव न कश्चिद्वेद। स च लयः कालविशेषावधिसापेक्षः सुप्तवत्तिष्ठति तस्यामवस्थायाम्। यथा जतुकाष्ठसंयोगेषु पृथङ्ग दृश्यते, यथा वा जलसैन्धवरसौ एकलीभूतौ पृथक्त्वेन नानुभूयेते तथात्र न तमृते ऽन्यत् ज्ञायते रज्वामिव सर्पबाधे तदतिरिक्तवत्। अत एवाहङ्कारशून्यत्वान्न प्रमाता। साक्ष्यभावान्न द्रष्टा। साक्षिवृत्तेरपि लयान्न ज्ञाता। चरमान्तःकरणवृत्त्या ब्रह्मविद्याख्यया प्रपञ्चं विषयी करोति। एवञ्च सर्वं जगदुपसंहृत्य शुद्धचिन्मात्ररूपेणावतिष्ठते। तदुक्तं हरिणा।

प्रकृतौ प्रविलीनेषु भेदेष्वेकत्वदर्शिनाम्।
द्रव्यसत्त्वं प्रपद्यन्ते स्वाश्रया एव जातयः॥

इति।

मूलप्रकृत्या ब्रह्मणा वा ये जगत एकत्वमभेदेन पश्यन्ति तेषां मते निरन्वयविध्वंसाभावान्महासामान्यरूपे तस्मिन्मूलकारणे लयमात्रं महाप्रलय इति शक्तिरूपेषु पदार्थेषु यथायथं शक्तियोगः द्रव्यात्मना तदानीमपि जातीनां सत्त्वं द्रव्यान्तरस्याभावात्। ईश्वरे इति। यथा स्फटिके जपाकुसुमसान्निधानाद्रक्तत्वावभासस्तत्रैव स्फटिकांशप्रबोधे यद्वगनत्वावभास एवं शुद्धायां चिति मायोपाधिसान्निध्यादीश्वरत्वाध्यासः। सो ऽयमात्मा आवरणविक्षेपशक्त्या अविद्याया आश्रयः। तत्रावरणांशेन शुद्धरूपतिरोधानं विक्षेपांशेन ईशादिस्थूलदेहान्तानां प्रतिभासः। तयोर्निवृत्तौ शुद्धचित्स्वरूपेणावतिष्ठते। लयश्चायमिति। नात्यन्तिक इत्यत्रान्वयः। अत एव सहस्रयुगपर्यन्तं लयः। आत्यन्तिकलयस्तु मुक्तावेव। प्रतिभासमात्रेति। रज्जौ सर्पावभासवदद्वैतनये

मिथ्याभूतस्य प्रपञ्चस्य अनादिमिथ्यावभासनिमित्तकल्पनयैव सत्त्वात्। मायाकल्पितत्वमपि हि व्यवहारदृष्ट्यैव न वस्तुतः। प्रातीतिकतद्रूपेणैव व्यवहारस्योत्पन्नत्वात्। तदभावस्येति। आत्यन्तिकस्येति शेषः। सुप्तेवेति। कार्याजनकत्वात्सुप्ता इव तिष्ठन्तीत्यर्थः। प्रधानांशतमस्समुद्रेकेणान्यानवभासो हि स्वापः। तथा च कर्मविक्षेपसंस्कारसहितलक्षणाविधावशेषतासाम्येन स्वापसादृश्यं लयस्य तत्र ह्यन्तकरणादयो ऽविद्यायां सूक्ष्मरूपेण शक्तिरूपेण वासनाभिः सहावतिष्ठन्ते। एवञ्च सूक्ष्मरूपेण स्थिता शक्तिः स्थूलरूपेण विवर्तते। एतेन शक्तिमिश्रिताद्ब्रह्मणः पुनः शक्तेः कथमुत्पाद इत्यपास्तम्। स्वप्रतिष्ठेति। स्वरूपमात्रे प्रतिष्ठितस्येश्वरप्रकाशस्येत्यर्थः। प्रकाश्यप्रकाशकहीनस्येति यावत्। अनौपाधिकचैतन्यं हि तस्य स्वरूपम्। विषयविषयिणोर्भेदाभावाद्धर्मान्तरस्य चाभावादिति भावः। अत्यन्तेति। तार्किकप्रसिद्धनिर्विकल्पकधर्मधर्मिविषयं ब्रह्मात्मकं तु ज्ञानं निर्विषयमेव। प्रातिपदिकार्थमात्ररूपेणावस्थितं निर्विकल्पकमविद्याकृतभेदानिवृत्तौ शुद्धरूपेणावस्थानात्। अभानप्रायेवेति। मायायाः भाने तु चितः सविकल्पकत्वापत्तौ निर्विकल्पकत्वं भज्येत। अपरिपक्वेति। अभुक्तेत्यर्थः। संस्कारस्यानादित्वाच्च न पूर्वसर्गकर्मशेषविरोधः। नन्वीश्वरस्यानादित्वे तदैक्षत बहुस्यां प्रजायेयेति सृष्टिसमये आगन्तुकमीक्षणं कथमुपपद्यतामिति चेत्सत्यम्। यथा विषयेन्द्रियसन्निकर्षाज्जीवोपाध्यन्तःकरणवृत्तिभूतायां मायायां वृत्तिभेदादिदमिदानीं स्रष्टव्यमित्याकारिका जायन्ते। प्राप्तपरिपाकैः। उपस्थितपरिपाकैः। प्राणिकर्मपरिपाकवशेन सिसृक्षावशादेको ऽहं बहु स्यामिति भगवतो बुद्धिर्भवति। प्रबुद्धिः। अविद्यापरस्येश्वरस्य

स्वभावो लीलेति चोच्यते । नन्वसङ्गोदासीनस्य परमार्थतो निरतिशयस्य शक्तिशक्तिमतोरभेदेन शक्तेरप्यभावाच्च स्रष्टृत्वासम्भव इत्यत आह । मायापुरुषाविति । तदुक्तं सूतसंहितायाम् ।

ब्रह्मरूपात्मनस्तस्मादेतस्माच्छक्तिमिश्रितात् ।

इति । शक्तिमिश्रितात् । मायोपहितात् । मायाशक्तिशबलादिति यावत् । अयम्भावः । अद्वितीयस्य ब्रह्मणः क्रीडाया असम्भवादिच्छोत्पद्यते । सैव माया । तदुक्तं काशीखण्डे ।

यदेकलो न शक्नोति रन्तुं स्वैरश्वरप्रभो ।
तदिच्छा तव योत्पन्ना सेव्याशक्तिरभूत्तव ॥
त्वमेको द्वित्वमापन्नः शिवशक्तिप्रभेदतः ।

इति । कार्यरूपविन्दोस्त्रैविध्यमाह । बीजमिति । शक्तिरित्यर्थः । चिदचिन्मिश्रः । तत्सम्बद्धः । चिदंशः । ब्रह्मरूपः ॥४७॥

(क० टी०) वाचकस्वरूपं वक्तुमादौ लयस्थितिपूर्विकां सृष्टिप्रक्रियामाह । प्रलय इत्यादिना । नियतेति हेतुगर्भं विशेषणम् । सर्वत्वं प्राणिविशेषणम् । ईश्वरे । ब्रह्मणि । आत्यन्तिक इत्यस्य व्याख्या पुनरिति । तस्य च धाता यथा पूर्वमित्यादिश्रुत्या सिद्धत्वादिति भावः । मात्रपदेन व्यावहारिकत्वव्यवच्छेदः । अभानमिति । सर्वथेत्यादिः । इष्टापत्तावुक्त एव दोषः । लयादेवाह । सुप्तेवेति । न तु सुप्ता तदसम्भवादिति भावः । अत एवाह । कार्येति । अभातत्वे हेतुरयम् । तदानीमपि तत्सत्त्वायाह । अत्यन्तेति । प्राग्वदेवाह । प्रायेवेति । ततः । प्रलयानन्तरम् । स्वफलेति । स्वस्वकर्मकलेत्यर्थः । एतेन वैषम्यादिनिरासः । तत्र स्वस्य फलाभिसन्धेरभावादाह । अबुद्धीति । तयोः प्रकाशरूपा सृष्टिरित्यर्थः । अनेन कर्मणां मायायाश्चानादित्वमुक्तम् । ततः । उभयप्रादुर्भावानन्तरम् । ततः । मायावृत्त्युत्पत्त्यनन्तरम् । त्रिगुणम् । सत्त्वरजस्तमोगुणात्मकम् । अस्यावश्यकतामाह । इदमेवेति । ईश्वरस्येति भावः । त्रिगुणत्वं सफलयति । तस्येति । व्युत्क्रमेणेति भावः । अचिच्छब्देन न माया तस्या एतदनंशत्वादाह । अचिदिति । तत्स्वरूपमाह । शब्देति ॥४७॥

पराया वाचो निरूपणम्। अस्माद्बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते। एतज्जगदुपादानं रवपरादिशब्दैर्व्यवह्रियते।

बिन्दोस्तस्माद्भिद्यमानाद्रवो ऽव्यक्तात्मको ऽभवत्।
स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते॥

इत्युक्तेः। एतत्सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनेनाभिव्यज्यते। ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थ पवनसंस्कारः तदाभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं पराषागित्युच्यते। तदुक्तं हरिणा।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्तते ऽर्थभावेन प्रक्रिया जगतो यत इति॥४८॥

(कुं० टी०) रवपरादीति। रवशब्देन पराशब्देन चोच्यत इत्यर्थः। तस्मात्पराद्बिन्दोः अव्यक्तो रवो ऽभूदित्यर्थः। मूलाधार इति। षण्णवत्यङ्गुलो देहायामः। तत्राष्टचत्वारिंशत्ममधस्तादुपरि च परित्यज्य मध्ये मूलाधारः। तदाहुः।

पायवन्ताद्व्यङ्गुलादूर्ध्वं लिङ्गाच्च व्यङ्गुलादधः।
मध्यमेकाङ्गुलं यच्च देहमध्यं प्रचक्षत इति॥
नवाङ्गुलोर्ध्वतस्तस्मादस्थिकन्दो ऽण्डसन्निभः।
चतुरङ्गुलविस्तारस्तन्मध्यं नाभिरुच्यत इति॥

कुण्डलिनी मूलप्रकृत्यात्मिका महदादिभिर्वेष्टिता सर्पवत्तिष्ठति मूलाधारादुत्थितः पवनो नाडीद्वारेण कार्याणि करोतीति पातञ्जले स्पष्टम्।

सङ्गीतरत्नाकरे ऽपि।

गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम्।
अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे॥
आधाराद्व्यङ्गुलादूर्ध्वं मेहनाद्व्यङ्गुलादधः।
एकाङ्गुलं देहमध्यं तप्तजाम्बूनदप्रभामिति॥
पवनस्योत्पत्तिश्च मूलाधारे भवति। तदुक्तम्।
देहे ऽपि मूलाधारे ऽस्मिन्समुद्याति समीरण इति।

अत एव तस्य मूलाधारे व्यञ्जकत्वम्। सर्वगतमपि। सर्वत्र व्याप्तमपि। पवनसंस्कार इति। इच्छया जातेन प्रयत्नेन मूलाधारस्थः पवनो युज्यत इत्ययमेव संस्कार इत्यर्थः। शब्दब्रह्मेति। अयम्भावः। यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणवृत्तिभेदा जायन्ते तथा सृज्यमानप्राणिकर्मवशेन, परमेश्वरोपाधिभूतमायायां वृत्तिभेदा जायन्ते इति। एतेन पूर्वोक्तप्रक्रियायां ब्रह्मणो निमित्तकारणत्वावगमादेतस्मादात्मन इति श्रुतौ जनिकर्तुरित्यपादानलक्षणपञ्चम्यनापत्तिरित्यपास्तम्। स ऐक्षत एको ऽहं बहु स्यामिति श्रुतौ ईक्षितृत्वश्रवणेन निमित्तत्वाद्बहुवचनश्रवणेन चोपादानत्वस्यापि स्वीकारात्। तथा च हेताविति निमित्तपञ्चम्यपि तन्त्रेण बोध्या। एवञ्च शुद्धब्रह्मणो निर्विकारत्वमेव। ऋग्वेदे ऽपि वागेव विश्वा भुवना जज्ञे वाचक इत्सर्वममृतं यच्च मर्त्यमिति। छन्दोभ्य एव प्रथममेतद्विश्वं विवर्तत इति च। स्वप्रतिष्ठतयेति। आधारान्तरनिराकरणायैतत्। निष्पन्दम्। शून्यम्। पश्यन्त्यां स्पन्दसामान्यमेवास्ति स्पन्दविशेषस्तु मध्यमायाम्। अनादीति। आदिनिधनरहितं शब्दोपग्राह्यतया शब्दतत्त्वं स्थितिप्रवृत्तिप्रविभागादिशब्देन क्रियते। तच्चाक्षरनिमित्तत्वादक्षरं प्रत्यक्चैतन्ये निवेशितस्य परबोधार्थमभिव्यक्तेः अर्थभावेन विवर्तते तत्वादप्रच्युतमेकं भेदानुकारेणासत्यानेकरूपतां

नान्नारम्भवादः परिणामवादो वा विवक्षितः किन्तु विवर्तवादः। यथा रज्जुः स्वयमविकृतैव सती मायया सर्पाकारेण विवर्तते। कारणस्वरूपाविरोधे च कार्यप्रतिभासः। अतो ब्रह्मणो निर्विकारत्वान्न नित्यत्वाविरोधः ॥ ४८ ॥

(क० टी०) अत एवाह। अस्मादिति। रजसः प्रवर्त्तकत्वादिति भावः। शब्दार्थयोः सामान्यतो गुणाभावादाह। ज्ञानेति। मात्रपदेनांशान्तरव्यवच्छेदः। सृष्ट्युपयोगित्वं विशदयति। एतदिति। तथा च श्रुतिः वागेव विश्वा भुवनानि जज्ञे इति। आदिना शब्दब्रह्मादिपरिग्रहः। आचार्योक्तिमाह। बिन्दोरिति। उक्तं हि प्रपञ्चसारे।

प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम।
इत्युपक्रम्य प्रकृतिमुपवर्ण्य कालभेदमुक्त्वा।
प्रकृतेश्च क्वचित्कालो विकृतिं प्रतिपादयेत्।
सा तत्त्वसंज्ञा चिन्मात्रज्योतिषः सन्निधेस्तदा॥
विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम्।
कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा॥
स्थूलसूक्ष्मतरत्वेन तस्य द्वैविध्यमिष्यते।
स बिन्दुर्नादबीजत्वभेदेन च निगद्यते॥

इत्युक्तोक्तं तैर्बिन्दोरिति उभयत्र एव इति पाठः। भिद्येति हेतुगर्भं विशेषणम्। अंशत्रययुक्तादित्यर्थः। वर्णादिविशेषरहितत्वादाह। अव्यक्तेति। अत एवाह। सर्वेति। एतेनैतदवस्थात्रयस्येश्वरशक्तिरूपत्वेन व्यापकत्वे ऽपि तत्तत्स्थानयोग्यादेरभिव्यक्तेस्तत्तत्स्थानस्थेत्युच्यते इति सूचितम्। मूलेति। कुण्डलिन्यामित्यर्थः। जातेन तत्रैव तदिति। पवनचलनेन तत्रैवाभिव्यक्तमित्यर्थः। अक्षरम्। व्यापकम्। विवर्तत इत्यनेन पश्यन्त्यादयो ऽप्यस्या विवर्ता एवेति सूचितम्। अर्थभावेन। अर्थरूपेण। ननु तस्य पश्यन्त्यादिविवर्तसम्भवे ऽपि तेन रूपेण कथं विवर्तो विरुद्धत्वादत आह। प्रक्रियेति। यतो यस्माज्जगत उत्पत्तिरित्यर्थः। शब्दार्थोभयसंस्काररूपाविद्यामिश्रितत्वेनाविरोधादिति भावः। शक्ति-

शक्तिमतोरभेदादियं चेतनैव । अत एव शारदादावित एव सर्वसृष्टिः स्पष्टमेवोक्ता अस्याश्चेतनत्वं च । एवञ्चैतद्विवर्तभूतं पश्यन्त्याद्यवस्थात्रयमपि चेतनमिति बोध्यम् । इत्थं हि तत्रोक्तम् ।

सच्चिदानन्दविभवात्सकलात्परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादात् बिन्दुसमुद्भवः ॥
परशक्तिमयः साक्षात्त्रिधा ऽसौ भिद्यते पुनः ।
बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः ॥
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ।
समवायः समाख्यातः सर्वागमविशारदैः ॥
रौद्रीबिन्दोस्ततो नादात् ज्येष्ठा बीजादजायत ।
वामा ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः ॥
सज्ञानेच्छाक्रियात्मानो वह्नीन्द्वर्कस्वरूपिणः ।
भिद्यमानात्परात् बिन्दोरव्यक्तात्मा ततो ऽभवत् ॥
शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः ।

इति । समवायः सम्बन्धः क्षोभ्यक्षोभकरूपः सृष्टिहेतुः । भिद्यमानादिति । पराबिन्दोरित्यनेन व्यक्त्यवस्थारूपो यः प्रथमो बिन्दुस्तस्मादव्यक्तात्मा वर्णादिविशेषरहितो ऽखण्डो नादमात्रं रव उत्पन्नः । तत्स्वरूपमेवाह । शब्देति । तदुक्तमाचार्यैः ।

स रवः श्रुतिसम्पन्नैः शब्दब्रह्मेति कथ्यते ।

इति । उक्तं च क्रियांशात्परमिति ईश्वरप्रत्यभिज्ञायां यत इच्छति तज्ज्ञातुं कर्तुंवा स्वेच्छया अनन्तरं हि तत्कार्यज्ञानदर्शनशक्तिना ज्ञानशक्तिस्तदर्थं हि यो ऽसौ स्थूलः समुच्चयः सा क्रियाशक्तिरुदिता ततः सर्वं जगत्परमिति पदार्थादर्शे । तदेव । पराख्यशब्दब्रह्मैव ॥४८॥

पश्यन्त्या निरूपणम् । तदेव नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्तं मनो विषयः पश्यन्तीत्युच्यते । एतद्द्वयं सूक्ष्मतरमीश्वराधिदैवं योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानाद्विषयमित्युच्यते ।

मध्यमाया निरूपणम् । ततो हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशे ऽभिव्यक्ततत्तदर्थविशेषतत्तच्छब्दविशे-

षोल्लेखिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदेवत्या परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमा वागित्युच्यते । स्वयं तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन उपांशुशब्दप्रयोगे च श्रूयमाणा सेत्याहुः । एतदवस्थात्रयमपि सूक्ष्मतमसूक्ष्मतरसूक्ष्मप्रणवरूपम् ।

वैखर्या निरूपणम् । सैव चास्यपर्यन्तं गच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदेवत्या वैखरी वागित्युच्यते । प्रणव एव व्यानोदानाभ्यां वैखरीरूपं प्रतिपद्यते । अत एव हरिणा व्याकरणस्य त्रिविधा वाग् विषय इत्युक्तम् ।

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परम्पदम् ॥

इति । एतत । व्याकरणम् । अनेकतीर्थेति । श्लिष्टव्यक्तवर्णरूपा प्राप्तसाधुभावापभ्रष्टा दुन्दुभिवेणुवीणादिशब्दरूपा चेत्यर्थः ॥ ४९ ॥

(कुं० टी०) तदेव । शब्दब्रह्मैव । सूतसंहितायामपि ।
सो ऽहं ब्रह्म न संसारी न मत्तो ऽन्यत्कदाचन ।
इति विद्यात्स्वमात्मानं स समाधिः प्रकीर्तित इति ॥
निर्विकल्पकेति । तत्त्वं च चिन्मात्रविषयकत्वम् ।
समाधिस्तुसमाधानं जीवात्मपरमात्मनोः ॥
ब्रह्मण्येव स्थितिर्या सा समाधिः प्रत्यगात्मन इति ।
योगिनामित्युक्त्या न बुद्ध्या निश्चयात्मिकया हिरण्यगर्भदेवत्या तद्रूपप्रणवरूपत्वेन वोपास्यता दर्शिता । निराधारस्य

इयं व्याख्या १८३ पृष्ठे ३ पंक्तेरारभ्य

चोपासनासम्भवादाधारो ऽप्युक्तश्चेतनाधिष्ठानमन्तरेणाचेतनानां प्रकाशकत्वासम्भवादधिष्ठातृदेवताकीर्तनम् । व्यानोदानाभ्यामिति । तथा च श्रूयते अथ यः प्राणापानयोः सन्धिः स व्यानः यो व्यानः सा वागिति । तथा योगशास्त्रे ऽपि ।

हानोपादानचेष्टादिर्व्यानकर्मेति चोच्यते ।
उदानकर्म तत्प्रोक्तं देहस्योन्नयनादि यदिति ॥

श्लिष्टव्यक्तेति । व्यक्तवर्णा अव्यक्तवर्णा च साधुश्चेत्यादिकेत्यर्थः । अन्त्यवर्णाभिव्यक्त इति । तदाहुः सकृत्प्रपद्यमानो नावधार्यते अभ्यासेन तु स्फुटावभास इति । प्रथमाक्षरेण हि आभासमात्रं जन्यते तदुत्तरोत्तरवर्णकलापेन तु स्फुटतरपरिच्छेदः । संस्कारविशेषोत्पादनद्वारेणाभिव्यक्तिविशेषस्य रजतत्वादौ दृष्टत्वात् । रूषिता । छुरिता । तथा च व्यञ्जकभेदोपाधिकः स्फोटभेद इति भावः । जपाकुसुमादीति । तदुक्तं हरिणा ।

यथा रक्तगुणे तत्त्वं कषाये व्यपदिश्यते ।
संयोगिसन्निकर्षात्तु वस्त्रादिष्वपि गृह्यते ॥

यथारक्ते गुणैर्विद्यमानं तत्त्वं रक्तत्वं स्वाश्रयसमवायात्कषाये रक्तद्रव्ये व्यवह्रियते तथा सम्बन्धिनोः सम्बन्धाद्वस्त्रे ऽपि रक्तत्वं व्यवह्रियते इत्यर्थः । ननु उपसमीपवर्तिनि स्वीयं धर्ममादधातीति उपाधिरिति व्युत्पत्त्या जपाकुसुमोपाधिको लोहितः स्फटिक इति प्रत्ययो ऽस्तु स्फटिकलौहित्ये जपाकुसुममुपाधिरिति प्रयोगः कथमिति चेत् । सङ्क्रामकत्वमेव तत्र सप्तम्यर्थः । समर्पकाः । आपादकाः । समाधत्ते । सहस्रदीपेति । ननु जपाकुसुमाद्युपाध्यभावे ऽपि स्फटिकबोधवत् केवलस्फोटस्यापि व्यक्त्यापत्तिरत आह । उपाधिभिन्नेति । येन क्रमेणेति । ध्वनिसमानाकारैव स्फोटाभिव्यक्तिरिति भावः । चित्तभित्तौ । चित्तदेशे ।

ननु टकारव्यञ्जनदशायां घकारस्य नष्टत्वात् कथं तदुत्तरत्वग्रह इत्यत आह । दैशिक एवेति । ननु घटाकारस्फोटस्याभिव्यक्तत्वात्सर्वदा तदर्थबोधापत्तिरत आह । तदुपरागेति । उपरागोऽवभासस्तद्बोध्यो यो ऽर्थस्तदाकारा या वृत्तिस्तदतिरिक्तवृत्तिरित्यर्थः । अयम् । स्फोटः । आन्तरत्वादिति । अयम्भावः स्फोटो द्विविधः आभ्यन्तरो बाह्यश्च । तत्राभ्यन्तरो बुद्ध्यनुसंवृत्तिरूपः । बाह्यस्तु जातिव्यक्तिभेदाद्द्विविधः । सङ्घातवर्तिनी जातिरेव वाचिकेत्याद्यः । एको ऽनवयवः शब्द इति व्यक्तिस्फोटः ॥ ४९ ॥

(क० टी०) वायुनेति । नाभिदेशे इति शेषः । मनोविषय इति पाठः । तस्याजहल्लिङ्गत्वात् । एवमग्रे ऽपि । उपाधेः प्रत्याख्यानात्सूक्ष्मतमे ऽपि सूक्ष्मतरत्वं नानुपपन्नम् । अत एव वक्ष्यति सूक्ष्मतमेत्यादि । यथाक्रममाह । निर्वीति । व्यक्तेति । पश्यन्त्येवेत्यर्थः । बुद्ध्या । अन्तःकरणेन । परेति । एतदाशयेनैव शब्दतत्त्वविद्भिः शब्दस्यावस्थाचतुष्टयमाम्नातम् ।

वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा ।
द्योतितार्था च पश्यन्ती सूक्ष्मावागनपायिनीति ॥

अश्रुतिगोचरेति च्छेदः । सा श्रुतिगोचरा न किं त्वन्तःकरणग्राह्या वैखर्येव श्रुतिग्राह्येत्यर्थः । तत्फलमाह । स्वयमिति । तुर्वैलक्षण्ये । निमित्तान्तरमाह । सूक्ष्मेति । एतासां क्रमेण स्वरूपाण्याह । एतादिति । सैव च । मध्यमेव च । परावृत्त्येति । मुखदेशं प्राप्येति शेषः । अपिना स्वश्रोत्रम् । अपञ्चीकृतभूतकार्यसमष्टिः सूक्ष्मशरीरोपहितो हिरण्यगर्भः । पञ्चीकृतभूतकार्यसमष्टिः स्थूलशरीरोपहितो विराट् । एतदुभयभिन्न ईश्वरः अधिदैवमेतानि त्रीणि रूपाणि । ननु वैखर्याः किं स्वरूपमत आह । प्रणव इति । सूक्ष्मेत्यादिः । सहेति । तेनाभिव्यक्ताविति शेषः । अत एव । परायाः वर्णादिविशेषरहितत्वेनाव्यक्तत्वादेव । तमेवाह । वैखर्या इति । अनेकतीर्थभेदायास्त्रय्या वैखर्या मध्यमायाः पश्यन्त्याश्च वाच एतत्परं पदं स्थानमित्यद्भुतामि-

त्यर्थः । तीर्थमुपायः प्रकार इति यावत् । तदाह । श्लिष्टेति । वर्णांशे भेदद्वयम् । पदार्थांशे तदाह । आसेति । ध्वन्यंशे आह । दुन्दुभीति । रूपा चेति । या तस्या इति शेषः । व्याख्यातमिदं व्याख्यातृभिः । तत्र स्वपरोभयश्रोत्रविषया वैखरी मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्त्या व्यवहारकारणम् । पश्यन्ती तु लोकव्यवहारातीता । योगिनां तु तत्रापि प्रकृतिप्रत्ययविभागावगतिरस्ति परायां तु नेति त्रय्या इत्युक्तम् ।

स्वरूपज्योतिरेवान्तः परा वागनपायिनी ।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥

इत्युक्तेः । आह खल्वपि चत्वारि वागिति । ऋङ्मन्त्र इति । स चेत्थं चत्वारि वाक्परिमितापदानि तानि सूक्ष्मतरसूक्ष्मस्थूलस्थूलतररूपाः परा पश्यन्ती मध्यमा वैखर्याख्या अवस्था एवं चत्वारि पदानि यानि मनीषिणो ऽध्यात्मकुशला ये ते विदुस्तासां मध्ये त्रीणि पदान्यवस्था गुहायामाधारनाभिहृदयेषु निहिता निहितानि नेङ्गयन्ति सर्वेषां ज्ञानविषया न भवन्ति चतुर्थं वैखर्याख्यं मनुष्या वदन्ति मनुष्यवदने प्रकटीभवतीत्येवं ऋक्भाष्ये माधवेन नृसिंहोत्तरतापनीभाष्ये गौडपादैश्च व्याख्यातः । श्रीपतञ्जलिना तु नामाख्यातोपसर्गनिपाताश्चत्वारि पदानीत्यादिना पदचतुष्टयज्ञानसाध्यमनीषित्वसम्पत्तिरूपव्याकरणप्रयोजनपरतया व्याख्यातः । उभयत्राप्यस्य तात्पर्यमभियुक्तव्याख्यानबलादवगम्यते । एवमन्येष्वपि निरुक्तादिव्याख्यानेष्विति बोध्यम् । नन्दिकेश्वरकाशिकायामपीदमुक्तम् ।

अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः ।
आद्यमन्तेन संयोगादहमित्येव जायते ॥
इकारादिऋकारान्ता वर्णाः समनवन्ततः ।
सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ॥
ज्ञप्तेर्बभूव पश्यन्ती मध्यमा वाक् ततः परम् ।
वक्त्रे विशुद्धचक्राख्ये वैखरी सा मता ततः ॥
वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ।
चन्द्रचन्द्रिकयोर्यद्वद्यथा वागर्थयोरपीति ॥

इदमेवाभिप्रेत्य वागर्थाविवेत्युपमां चकार कालिदास इति दिक् ॥ ४९ ॥

स्फोटस्वरूपम्

तत्र मध्यमाया योनादांऽशस्तस्यैव स्फोटात्मनो वाचकत्वेनाक्षतिः। स च यद्यप्येकोऽखण्ड एकैकवर्णेनाप्यभिव्यज्यते तथाप्यन्त्यवर्णाभिव्यक्तो बोधहेतुः। अतो नैकवर्णजाभिव्यक्त्युत्तरमर्थप्रत्ययः । तत्र च व्यञ्जकरूपप्रतिबिम्बनात्तद्रूपरूषितैव तदभिव्यक्तिरित्येकोऽपि नानात्वमिवापन्नः। यथा जलचाञ्चल्येनेन्दुप्रतिबिम्बस्य चञ्चलत्वेन ग्रहणम् । यथा च स्फटिकादेर्जपाकुसुमाद्युपाधिवशात्तद्रूपरूषितस्य भानम्। यथा च मुखे मणिकृपाणदर्पणाद्यभिव्यञ्जकवशाद्दैर्घ्यवर्तुलत्वादिभानं तद्वत्। प्रतिबिम्बसमर्पकाश्च संस्कारास्ते च स्थिरा एव। न चैवमनेककालिकतत्तद्वैखर्यभिव्यक्तेरौपाधिकनानात्वात्तवाप्यनुगमाय जातिरावश्यकी । सहस्रदीपाभिव्यक्तपटस्येव अनेकजपाकुसुमाभिव्यक्तस्फटिकस्येव च नानात्वाभावात् । उपाधिभिन्नव्यञ्जकाभावान्न कदापि वर्णराहित्येन तत्प्रत्यक्षम्। येन क्रमेण च चित्तसंस्कारास्तेनैव क्रमेण व्यञ्जकरूपरूषितता तस्येति स्वीकारान्न सरो रस इत्यनयोरविशेषः। तत्र च तदुत्तरत्वग्रहाश्चित्तभित्तौ दैशिक एव तदुपरागनाशिका च तद्बोध्यार्थाकारवृत्त्यतिरिक्तवृत्तिरेव। अयश्चान्तरत्वाच्छ्रोत्रग्राह्यवैखरीसंस्कृतान्तःकरणग्राह्य एव। व्यञ्जकरूपरूषितस्य तस्यैवार्थे सङ्केतग्रहः। अतो घटकलशादिपर्यायाभिव्यक्तस्फोटे गृहीतशक्तिकस्य पुंसोऽप्रसिद्धपदश्रवणे नार्थबोधः।

वैखरी तु ।
वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शनभेदो ऽत्र प्रवादेष्वनवस्थितः ॥

इति हर्युक्तेः। पातञ्जलभाष्ये व्यासेनापि तथोक्तेश्च। आख्यातोपयोग इति सूत्रे पतञ्जल्युक्तेश्च । वाय्वादिपरिणामरूपा कण्ठताल्वाद्यभिघातजन्यैवेति बोध्यम् । वायोः । प्राणादिरूपस्य । अणूनाम् । शब्दतन्मात्रपरमाणूनाम् ।

आम्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ।
इति हर्युक्तेः ॥ ५० ॥

(कु० टी०) व्यञ्जकेति । व्यञ्जकसमानाकारस्यैव व्यङ्ग्यस्य सङ्केतग्रह इत्यर्थः । अर्थबोध इति । अप्रसिद्धपर्यायश्रवणे ऽर्थबोधो नेत्यर्थः । वायोरिति । कैश्चिद्वायोः कैश्चिच्छब्दतन्मात्रपरमाणूनां कैश्चिज्ज्ञानस्य शब्दत्वमिष्यत इति मतभेदः । तत्र शुद्धाविति समष्टयहङ्कारेण ईश्वरो ऽस्तीति भावितवतो ऽपि स ईश्वरो द्वितीयेन सङ्कल्पेन छिद्रमभूत् तदाकाशम् । स ईश्वरः पुनः सङ्कल्पान्तरेण तस्मिन्नाकाशे वायुवेगसहायः शब्दरूपेण परिस्पन्दो ऽभूत् । वाय्वनुग्रहादेव हि संयोगविभागहेतुर्गतिर्भवति । तथा च कात्यायनसूत्रं शब्दस्तदिति । वाय्वात्मकः शब्द इति तदर्थः । तस्मिन् छिद्रे अन्तरं लब्ध्वा वायोर्वृद्धिरिति स्पष्टं हरिवंशे । आकाशरूपाद्ब्रह्मणः सकाशात्स्पर्शतन्मात्रापरपर्यायः सूक्ष्मो वायुः स्वकारणेन शब्देन स्वगुणेन स्पर्शेन च गुणवानिति वेदान्ते । केचिदज्ञानस्य शब्दत्वं वदन्ति ।

अथायमान्तरो ज्ञाता सूक्ष्मो वागात्मनि स्थितः ।
व्यक्तये स्वस्वरूपस्य शब्दत्वेन विवर्तते ॥

इति । अन्तःकरणमेव मनोवाय्वादिद्वारा शब्दत्वेन विवर्तत इति भावः । पतञ्जल्युक्तेश्चेति । तत्र हि आख्यातोपयोग इति सूत्रं नारब्धव्यमपक्रामति हि तस्माज्ज्ञानं यथा ज्वालारूपे ज्योतिरविच्छेदेनोत्पद्यमानं सन्ततं तथोपाध्यायज्ञानानि भिन्नशब्दरूपतापन्नानि सन्ततानीति स्पष्टम् । प्राणादिरूपस्येति । यद्यपि वाह्यवायावपि शब्दो ऽनुभवसिद्धस्तथापि न तस्येहोपयोग इति भावः । चरमाणूनाम् । परमाणूनाम् । आभ्राणीव । आभ्रफलानी व प्रचीयन्ते वर्धन्ते । शब्दाख्या इति । ते परमाणवः शब्दाख्याः शब्दनामानो भवन्तीत्यर्थः । वायोः शब्दत्वं हरिरेवाह ।

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥

वक्तुरिच्छेत्यनेनैकस्यैव वायोरनेकशब्दरूपत्वोपपत्तिरुक्ता । आभ्राणीवेत्यस्य पूर्वार्धं तु ।

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।

इति ॥ ५० ॥

(क० टी०) एवं सृष्टिप्रक्रियामुक्त्वा प्रकृतमाह । तत्रेति । परादीनां मध्ये इत्यर्थः । पराषश्यन्त्योर्योगिज्ञानविषयत्वादाह । मध्यमायामिति । नादांशः चेतनः । अत एवाह । स्फोटात्मन इति । अक्षतिः । प्रागुक्तानन्त्यव्यभिचारप्रयुक्तशक्तिग्रहासम्भवादिदोषाभावः । नन्वेवं तस्य स्वरूपसतो वाचकत्वे सर्वदार्थबोधापत्तिरत आह । स चेति । नादांश इत्यर्थः । उक्तहेतोरेवानुवदति । एकोऽखण्ड इति । अपिर्व्युत्क्रमे अखण्डो ऽपीत्यर्थः । ननु समुदितानां व्यञ्जकत्वे तद्धेतोरिति न्यायेन तत एव बोधोपपत्त्या तद्वैयर्थ्यापत्त्या प्रागुक्तरीत्या समुदायासम्भवेन चाह । एकैकेति । तथा च न सर्वदार्थप्रतीतिरिति भावः । अत एवाह । तथापीति । अन्त्यवर्णबुद्धिरपि पू-

र्षपूर्ववर्णानुभवाहितसंस्कारसहकृतैव तद्व्यञ्जिकेति बोध्यम् । व्यक्ताव्यक्त एव । न चैवं एकेनैव तद्व्यञ्जने इतरवैयर्थ्यमिति वाच्यम् । यथा हि रत्नतत्त्वस्य प्रतीन्द्रियसन्निकर्षमभिव्यक्तावपि द्वाभ्यां तिसृभिश्च जनितसंस्कारसहकृतपरिपाकरूपसहकारिसम्पत्त्या जनिते चरमप्रत्यये विशदं चकास्ति रत्नतत्त्वं न प्राक्षु प्रत्ययेषु तथा स्फोटः प्रत्येकमभिव्यक्तो ऽपि चरमवर्णजाभिव्यक्तिजसंस्कारसहकृतपरिपाकवन्मनःपरिणामे चकास्ति । एवञ्च तदनन्तरमेवार्थधीर्न ततः प्राक् तदाह । अत इति । नन्वेवमपि तस्यैकत्वेन सकृदभिव्यक्तात्सर्वार्थबोधापत्तिरत आह । तत्र चेति । स्फोट इत्यर्थः । वस्तुतो नानात्वाभावस्य वक्ष्यमाणत्वादाह । नानात्वमिवेति । तद्दूषितो ऽभिव्यक्तिस्त्वित्थमविभागमपि पदं वाक्यं च नानेव भागवदिवावयवविप्रतीत्यनुसारेण व्यञ्जयन्ति वर्णाः स्वोपरागवशादिति । अत एव स्फुट्यते वर्णैः स्फुटत्यर्थो ऽस्मादिति द्विविधं स्फोटशब्दानिर्वचनं कृतम् । अत्रासम्भववारणायानेकदृष्टान्तपूर्वमाह । यथेत्यादिना । ननु वर्णानां युगपदसत्त्वात्कथं तेषां प्रतिबिम्बो ऽत आह । प्रतीति । ननु तेषामपि नष्टत्वमत आह । ते चेति । ते त्वित्यर्थः । यावत्कार्यमिति भावः । एवम् । तेषां तत्र प्रतिबिम्बाङ्गीकारे काळचारवारणायेति भावः । दीपेति । पर्यायेणेति भावः । जपेति । नीलपीतादिद्रव्यसन्निधानेनानेकविधतया गृहीतस्य चेत्यपि बोध्यम् । नानात्वेति । वास्तवेत्यादिः । नन्वेवमपि प्रतिबिम्बने क्रमाभावात्सरो रस इत्यादौ दोष एवात आह । येनेति । वस्त्वर्थे । उच्चारणक्रमसत्त्वादिति भावः । अनुभवक्रमस्य बाधात्स्मृतिक्रमे च नियामकत्वे ऽप्यत्र तदभावादाह । तेनैवेति । नन्वेवमपि कालैक्येन तद्वदत्रोत्तरत्वग्रहासम्भवेन कथमविशेषवारणमत आह । तत्र चेति । प्रतिबिम्बरूपे चेत्यर्थः । एवेन तद्व्यावृत्तिः । अत एव भित्तावित्युक्तम् । एकप्रदेशस्थघटपटकुड्यादिवत् । नन्वेवमपि तदुत्तरं सर्वदा तद्बोधापत्तिरत आह । तदुपेति । तत्प्रतिबिम्बेत्यर्थः । तत्र चेत्याद्युक्तिमुपपादयन् अस्य श्रोत्रग्राह्यत्वं निराचष्टे । अयं चेति । उक्तः स्फोटश्चेत्यर्थः । हृदयदेशस्थत्वादाह । अन्तरेति । तत्र तत्त्वं च येन तदुल्लेखस्तत्त्वम् । अत एव प्राक् बुद्धेस्तद्विशेषणम् । एवेन श्रोत्रग्राह्यत्वव्यवच्छेदः । नन्वेवमपि पर्यायशब्देष्वेकघटक-

लशादिपर्यायाभिव्यक्ते स्फोटे गृहीतशक्तिकस्य पुंसो ऽप्रसिद्धपदश्रवणे ऽप्यर्थप्रत्ययापत्तेः प्राक् गृहीतशक्तिकस्यैव स्फोटस्य तेनाभिव्यञ्जनात्। न च तत्तत्पर्यायाभिव्यक्तस्फोटे शक्तिग्रहस्तत्तत्पर्यायश्रवणे ऽर्थधीहेतुरिति वाच्यम्। एवं हि प्रतिपर्यायं शक्तिग्रहावश्यकत्वे तत्तत्पर्यायगतशक्तिग्रहहेतुताया एव युक्तत्वात्। तत्तु तत्तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन हेतुत्वे गौरवात्। अत आह। व्यञ्जकेति। स्फोटे कस्मिन्। नार्थेति कारणाभावात्। ननु वैखर्या एव वाचकत्वं कुतो न। किञ्च सा किमिति श्रोत्रग्राह्यात आह। वैखरी त्विति। अग्रे ऽन्वयो ऽस्य। तथोक्तेश्चेति। इत्थं हि तत्। वागिन्द्रियं वर्णेष्वेवार्थवत् श्रोत्रं च ध्वनिपरिणाममात्रविषयमिति ध्वनिर्नाम वागिन्द्रियादावुदानवायोरभिघाताज्जायमान उदानवायोराकाशस्य परमाणूनां वा परिणामभेदः। स च वर्णरूपो ऽप्यवाचकत्वात् ध्वनिरिति तद्व्याख्यातारः। तथा चध्वनिरूपपरिणाम इत्यर्थः। अत्र विशेषो ऽग्रे व्यक्ती भविष्यति। पतञ्जलीति। सूत्रखण्डनायोपाध्यायादपक्रान्तमधीयमानशब्दजातमुपादत्त इत्यर्थेनापक्रमजविश्लेषाश्रयत्वादपादानत्वं संसाध्य शब्दानामपक्रमणं न युक्तमन्यथा सर्वथा तदापत्तिरिति शङ्कायां सन्ततत्वादित्यनेन शब्दस्य व्यञ्जका ध्वनय उपाध्यायेनोत्पाद्यमाना भिन्ना अपि सादृश्यात्तत्त्वेनाध्यवसीयमानां श्रोतुः पुनःपुनरुत्पाद्यमानत्वेन सन्ततत्वनिति पुनःपुनः श्रोत्रप्रदेशं गच्छतं स्फोटरूपं शब्दमभिव्यञ्जयन्तीत्याशयकेन समाधायाथवा ज्योतिर्वत् ज्ञानानि भवन्तीति हि तत्रोक्तम्। यथा प्रतिक्षणं विनश्यदपि ज्वालारूपज्योतिरविच्छेदेनोत्पद्यमानं सादृश्यात्तत्त्वेनाध्यवसीयमानं सन्ततमिति व्यवहारविषयस्तथैवोपाध्यायज्ञानानि भिन्नानि शब्दरूपतामापद्यमानानि सन्ततान्युच्यन्ते ज्ञानस्य शब्दरूपापत्तिरिति दर्शनमत्र भाष्यकृत इति कैयटः। आदिना अणुज्ञानाकाशपरादिसङ्ग्रहः। अस्यास्तात्त्विकत्वात्समसत्ताकत्वाच्चाह। परीति। अत एव पूर्वविरोधो न। एवेन नित्यत्वनिरासः। हरौ कैश्चिदन्त्यस्य प्रत्येकं त्रिषु सम्बन्धात्कैश्चित् वायोः कैश्चिदणूनां कैश्चित् ज्ञानस्य शब्दत्वप्राप्तिरिष्यते इत्यर्थस्तदाह। वायोरिति। औपाधिकं तस्य नानात्वमिति विनिगमनाविरहादाह।

प्राप्यादीति । अत एवोक्तं तेनैव ।

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ॥

इति । वक्तुरिच्छेत्यनेनैकस्यैव वायोरनेकशब्दत्वोपपत्तिरुक्ता । शब्दतन्मात्रादिरूपपरमाणूनामिति। आदिना स्पर्शतन्मात्रादि। अत्रापि तदुक्तिमेवाह । अप्राणीवेति । इदम् । अग्रिमाग्रिमम् । तत्र । स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिता इत्यस्य पूर्वार्धम् । तस्याम् । तस्यां सत्यां तेन प्रेरिताः परमाणवः आभ्रवत्प्रचिताः सन्तः शब्दाख्या-स्तद्रूपताप्राप्त्या तद्वाच्या इत्यर्थः । उभयत्र मानमिदम् ॥ ५० ॥

छायातपादिष्वप्येष क्रमः । छायातपतमांस्यप्येवम् ।

अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः ।
छायातपतमःशब्दभावेन परिणामिनः ॥

इति तदुक्तेः । ज्ञानस्य । वक्तृज्ञानस्य । पराशक्तिसा-हित्येन च तत्परिणाम इति बोध्यम् । कैश्चिदित्यनेन पराशक्तिरेव मध्यमावत्परिणामविशेषो ऽन्येषां मते वैखरीति सूचितम् । तदाह । प्रवादेषु । शास्त्रेषु । अत्र विषये दर्शनभेदः सिद्धान्तभेदो ऽनवस्थित इति ।

आत्मा बुद्ध्या समेत्यर्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते—

इति शिक्षायामपि मारुत एव नाभेरूर्ध्वमुच्चरन् मूर्ध्न्यभिहत आत्मानं तत्त्वेनाभिव्यनक्तीत्यर्थः । आत्मान्तःकरणं संस्काररूपेण स्वगतानर्थान् बुद्ध्या स्ववृ-

न्स्या समेत्य विषयीकृत्य तद्बोधनेच्छायुक्तमनोऽभिहतकायाग्निप्रेरितो वायुर्मूर्धपर्यन्तं गतस्ततः प्रतिनिवृत्तो वक्त्राभिघातेन वर्णान् जनयत इत्यक्षरार्थः ॥८१॥

(कुं०टी०)छायातमसोस्तेजोभावरूपतां तार्किका वदन्ति तान्निराकरोति। छायातपेति। यत्तु तेजोऽभाव एव तमः न हि तस्य गुणाश्रयतास्तीति तन्न। न ह्यस्मन्मते गुणाश्रयो द्रव्यमिति लक्षणमस्ति। किञ्च तमसस्तेजोऽभावरूपत्वे रूपादावप्यन्धकारप्रत्यक्षापत्तिः। अणव इति। परमाणव एव सर्वशक्तिमत्वाद्भेदसंसर्गरूपा वृत्तिर्येषां कार्यभेदस्य सम्बन्धमाधातुं प्रवृत्ताः शब्दादिरूपेण परिणमन्त इत्यर्थः। परमाणूनां विलक्षणसम्बन्धाद्विभिन्नकार्योत्पत्तिरिति भावः। ननु दुग्धपरमाणुजन्यत्वस्य दध्नः स्वीकारे दध्नोऽपि दुग्धत्वापत्तिरतस्तज्जनकपरमाणूनां भेद एवोचित इति चेन्न। शक्तिभेदादेव कार्यभेदात्। यत्तु द्रव्यत्वव्याप्यजातिः परमाणौ नास्तीति तार्किकाः तन्न। तथा सति द्रव्यत्वव्याप्यं यन्मूर्तत्वं तद्व्याप्यस्य पृथिवीत्वादेरपि तत्रानापत्तेः। वक्तृज्ञानस्येति। घट इति जानामीत्यादौ ज्ञानशब्दयोरभेददर्शनादिति भावः। आत्मा बुद्ध्येति। सः। वायुः। उदीर्णः। उद्गतः। वक्त्रमिति। शिरःकपालेनावष्टब्ध ऊर्ध्वगतिमलभमानस्ततः प्रत्यावृत्त्य वक्त्रमेव प्राप्येत्यर्थः। सङ्गीतरत्नाकरेऽपि।

आत्मा विवक्षमाणो हि मनः प्रेरयते मनः।
देहस्थं वन्हिमाहन्ति स प्रेरयति मारुतम्॥
ब्रह्मग्रन्थिस्थितः सोऽथ क्रमादूर्ध्वपथे चरन्।
नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयति ध्वनिमिति।

विवक्षमाणः वक्तुमिच्छन् आत्मा अन्तःकरणं मनस्संज्ञकं

प्रेरयति तं मनः देहस्थमग्निं ताडयति स वह्निर्वायुं प्रेरयति स वायुरूर्ध्वं गच्छन् आघातेन मुखादिषु ध्वनिं जनयति। असङ्गोह्य- यं पुरुष इति श्रुतेरकर्तृस्वरूपस्यात्मनः प्रयोजकत्वासम्भवादाह। अन्तःकरणमिति। अन्तःकरणपरिणामपरावृत्तिरूपा बुद्धिरिति भावः। वाक्यविषयस्यान्तःकरणगतत्वाभावादाह। संस्काररू- पेणेति। एतदभिप्रायेणैव सूक्ष्मरूपेणावस्थानमित्युच्यते। एका- ङ्गुलं देहमध्यमग्निस्थानं ततो नवाङ्गुले चतुरङ्गुलो देहस्य कन्द इति ब्रह्मग्रन्थिरिति चोच्यते। उद्यन्। उद्गच्छन् ॥ ५१ ॥

(क० टी०) अत एव द्वितीये ऽन्यामपि तदुक्तिं वक्तुं तद्घटकत- या प्रासङ्गिकमाह। छायेति। एवम्। अणुपरिणामरूपाणि। तत्र बी- जमाह। सर्वेति। अत एवाह। भेदेति। भेदसंसर्गरूपावृतिर्येषां ते। छायेति। चतुर्णां द्वन्द्वस्य भावशब्देन षष्ठीतत्पुरुषः। तदुक्तेः। हर्युक्तेः। प्रागुक्ताविरोधायाह। परेति। तत्तदिति। वाद्यादीत्यर्थः। प्रकारान्तरे- णाप्यविरोधायाह। कैश्चिदिति। मतान्तरासत्त्वे एतदुक्तिरधिकेति स्पष्टमेव। षण्णां तत्त्वस्य निर्विवादत्वादाह। मध्यमेति। कर्मणि घञित्याह। शास्त्रेष्विति। इतिस्तदर्थसमाप्तौ। किञ्च।

अथायमान्तरो ज्ञाता सूक्ष्मो वागात्मना स्थितः।
व्यक्तये स्वस्वरूपस्य शब्दत्वेन विवर्तते॥

ज्ञानावृत्तिविशिष्टमन्तःकरणं समनोभावमापद्य तेजसा पाक- मागततेजसा जाठरेण पाकं दाकं वायुमाविशति प्राणमथासौ समुदीर्यते असौ सवृत्तिमनोयुतः प्राणः। तदाह।

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसा सो ऽपि पच्यते॥

तद्धर्मेण दाहेन दाहवशादेव विभज्य स्वात्मनो ग्रन्थीन् श्रुति- रूपः पृथग्विधेति श्रुतिरूपैर्ध्वनिरूपैः सहेति शेषः। प्राणो वर्णा- नभिव्यज्य वर्णेष्वेवोपलीयत इति तेनोक्तम्। प्राणः सवृत्तिकम- नोरूपान्तःकरणयुतः। एतावतैव ज्ञानस्य शब्दत्वमिति बोध्यम्। आह। आत्मेति तात्पर्यार्थम्। आदावविरोधायाह। मारुत एवेति।

युक्तम् । प्रेरितम् । मूर्द्धेति । वेगात् वृत्तः वक्रं प्राप्येति शेषः । वक्रेति । उक्तयत्नसहायेन जिह्वाग्रादिस्पर्शपूर्वकतत्तत्स्थानाभिघातेनेत्यर्थः ॥ ५१ ॥

वर्णेषु पौर्वापर्यं बौद्धम् । तदुक्तं परःसंनिकर्ष इति सूत्रे भाष्ये उच्चरितप्रध्वस्तानां सन्निकर्षः पौर्वापर्यं चानुपपन्नमित्याशङ्क्य बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ताधीरस्तन्वन्नीतिः शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात्पौवार्पर्यम् । बुद्धिविषयमेव शब्दानां पौर्वापर्यम् । य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थे ऽयं शब्दः प्रयोक्तव्यः अस्मिंश्च शब्दे ऽयं तावद्वर्णास्ततोऽयं ततो ऽयमिति । तन्वन्नीतिः सकलविषयव्यापिनी बुद्धिः धीरः पण्डितः कर्ता बुद्धौ अन्तःकरणे चेष्टाः कण्ठताल्वाद्यभिघातव्यापारजन्यशब्दान् प्रतिबिम्बितान् कृत्वा शब्देन सहितान् तद्वाच्यानर्थान् बुद्धिरूपे देशे दृष्ट्वा तत्रैव पौर्वापर्यव्यवहारं कुर्यादित्यर्थः । बुद्धिविषयमित्यस्य बुद्धिस्थशब्दविषयमेवेत्यर्थः । तत्र वक्तृदेशेनैव शास्त्रप्रवृत्तेस्तस्यैव धर्मफलश्रवणाच्च वक्तृबुद्धिस्थत्वमुपपादयति । य इति । अस्मिन्नर्थे इति । एतदर्थमेव बुद्ध्याद्यर्थदर्शनमप्युक्तम् । श्लोके पौर्वापर्यमित्युपलक्षणम् । अयमिति बुद्ध्युपारूढस्वमात्रश्रव्यसूक्ष्मोच्चारणव्यङ्ग्यशब्दपरामर्शः । अन्यथा इदमः प्रत्यक्षपरामर्शकत्वादेतदनुपपत्तिः । शब्दः प्रयोक्तव्यः परप्रत्यक्षयोग्यस्थूलोच्चारणरूपेण प्रयोगेणाभिव्यङ्क्तव्यः । अस्मिन् शब्दे इत्यस्य व्यञ्जनीये इति शेषः । यत्तु बुद्धिगतपौर्वापर्यस्य वर्णेष्वारोप एतद्भाष्यार्थ इति तन्न । तद्वदेव त-

द्बुद्धीनामप्युत्पन्नविनाशितया प्रत्यक्षपरामर्शकेद-मादिघटिताभिलापाभिलप्यमानस्य पौर्वापर्यस्य तत्रा-प्यसम्भवात् । प्रकृतिविकृतिभावो ऽप्यन्तःकरणस्ये-कारबुद्धिमपहाय यकारबुद्धिकरणादुपपद्यत इति स्था-निवत्सूत्रे भाष्ये स्पष्टम् । अयं च शब्दस्तत्तत्प्राणिहृद-यदेशावच्छिन्नाकाशदेशस्थः सर्वसमष्टेर्विराजो हृदय-रूपवाह्याकाशदेशस्थश्च । स च लाघवादेक एव वि-भुः । यथैकत्र श्वेतद्रव्ये रूपं व्यापकं तथास्याप्याकाश-देशस्थस्य तथात्वमुचितम् । एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतो सर्वयागेष्वङ्गं भवतीति सरूपसूत्रे भाष्यात् । प्रादुर्भूतो ऽभिव्यक्तः । स एव कत्वादिनाभिव्यक्तः श्रोत्रग्राह्यः पदादिरूपेण तु बुद्धिग्राह्य इत्यणुदित्सूत्रे भाष्ये स्पष्टम् । तत्र हि श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेश इत्युक्तम् ॥ ५२ ॥

(कु॰टी॰) उच्चरितेति । क्रमोत्पन्ना अपि वर्णा यदि ति-ष्ठेरन् तदा स्यात्पौर्वापर्यमत उक्तं । प्रध्वस्तानामिति । उच्चरितप्र-ध्वंसित्वं चोच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्व-म् । नष्टविद्यमानयोः सम्बन्धासम्भवात्सन्निकर्षो न सम्भवति नापि संहितेति भावः । ननु पूर्वकालोत्पन्नः पूर्वः परकालोत्पन्नः पर इति न कथं चित् पौर्वापर्यम्भव इति चेत्सत्यम् । यदि कालिकं पौर्वापर्यं गृह्येत तदा पूर्वपरयोर्युगपत्स्थित्यभावादिको यणची-त्यादिसंहिताकार्यासम्भवः । बुद्धिकल्पित एव सर्वः पौर्वापर्यस-न्निकर्ष इत्याह । बुद्धौ कृत्वेति । बुद्धौ अन्तःकरणे । चेष्टाः । शब्दान् कृत्वा । प्रतिविम्बितान् कृत्वा । अन्तःकरणस्य स्वच्छतया वा स्वशब्दरूपापत्त्यान्तःकरणवृत्तित्वेन प्रतिभानादिति भावः । श

ब्देन सह वाच्यानर्थान् बुद्धिरूपे देशे दृष्ट्वा तत्रैव पौर्वापर्यव्यवहारं कुर्यादित्यर्थः । तत्त्वन्नीतिरिति । तननं तत् सा अस्ति यस्या सा तत्वन्ती सकलविषयव्यापिनी एतादृशी नीतिर्बुद्धिर्यस्य स तत्त्वन्नीतिः । क्वचित्तन्त्रन्नीतिरिति पाठः। तत्र तन्वती सकलविषयव्यापिनी बुद्धिर्यस्येत्यर्थः । भाष्यकारः कारिकार्थमाह । बुद्धिविषयमिति । तदेवोपपादयति । य एष इति । सदसद्विवेचनी बुद्धिः प्रेक्षाबुद्धिः । अन्तःकरणे इति । अन्तःकरणमेव निश्चयरूपवृत्तिदशायां बुद्धिसंज्ञां लभते। प्रतिबिम्बितानिति।अन्तःकरणवृत्तित्वमप्रतिभातानित्यर्थः । तत्रैव । बौद्धशब्दे एव । बुद्धिपौर्वापर्यस्य निराकरिष्यमाणत्वादाह । बुद्धिस्थेति । वक्तुर्देशेनैवेति । वक्तृबुद्धिस्थमुद्दिश्यैवेत्यर्थः । बाह्यशब्दे प्रक्रियाया असम्भवादिति भावः । तस्यैव । वक्तुरेव । धर्मफलश्रवणादिति । शास्त्रफलधर्मश्रवणादित्यर्थः । एतदर्थमिति । शब्दप्रयोगस्यार्थविशेषनियन्त्रितत्वाद्बुद्धौ अर्थदर्शनमप्युक्तमित्यर्थः । उपलक्षणमिति । पूर्वोक्तस्य बोध्यबोधकभावस्यापीत्यर्थः । अयमितीति । बुद्ध्युपारूढत्वेनैव श्रवणीयं यत्सूक्ष्ममुच्चारणं तेन व्यङ्ग्यः शब्दो भाष्यस्थेनेदंशब्देन परामृश्यत इत्यर्थः । अन्यथेति । बौद्धशब्दपरामर्शे इत्यर्थः । परेति । परबोधानुकूलोच्चारणेन व्यञ्जनीय इत्यर्थः । व्यञ्जनीये इति । वर्णानां शब्दव्यञ्जकत्वमेवेति भावः । तद्वदेवेति । वर्णवदेव वर्णबुद्धीनामप्यनित्यतया प्रत्यक्षपरामर्शकेनेदंशब्देन विषयीकरणासम्भवादित्यर्थः । मन्मते तु व्यङ्ग्यशब्द इदमा परामृश्यत इति भावः । ननु इकारादीनां बुद्धिस्थत्वे कथं तस्य यकाराद्यादेशबुद्धिरत आह । प्रकृतिविकृतिभावो ऽपीति । सत्कार्यवादे कार्यकारणयोरभेदाद्बुद्धिस्थत्वेन रूपेण प्रकृतित्वं बाह्यरूपेण विकृतित्वं तथेहापि स्पष्टमिति का-

र्यविपरिणामादिति तत्र समाहितत्वात् । कार्या बुद्धिः तस्या विपरिणाम इत्यर्थः ।

अयं च शब्द इति । ध्वनिव्यङ्ग्यतया वाचकत्वेन स्वीकृत इत्यर्थः । समष्टेरिति । वनमित्याकारिका एकताबुद्धिः समष्टिः मायादिभुवनान्तविराट्पुरुषस्य शरीरं स्थूलदेहसमष्ट्या विराडुच्यते विराजो हृदयदेश एव ह्याकाश उच्यत इत्यर्थः । देशस्थश्चेति । व्यापकत्वादुभयदेशस्थ इत्यर्थः । स चेति । शब्दश्चेत्यर्थः । यथैकत्रेति । यत्र तु भिन्नावयवावच्छेदेन रूपभेदस्तत्र रूपमव्याप्यवृत्त्येवेति भावः । एतेन तदर्थं चित्ररूपस्वीकारोऽपास्तः ।

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।

इति स्मृतिविरोधात् । किञ्चैवं सुरभ्यसुरभिकपालारब्धघटस्य निर्गन्धत्वमेव वाच्यम् । तथा च गन्धम्प्रति पृथिवीत्वेन हेतुत्वस्य व्यभिचारः । तथेति । रूपादिवच्छब्दस्यापि व्याप्यवृत्तित्वं न्याय्यम् । यथा हि व्यापकस्यापि रूपस्य चक्षुस्संयोगसमानाधिकरणस्यैव प्रत्यक्षमेवं देशान्तरे शब्दप्रत्यक्षतेति भावः । इन्द्रशब्द इति । मीमांसकैश्चतुर्थ्यन्तशब्दातिरिक्तया देवताया अस्वीकारात् । शाब्दिकमतेऽपि शब्दार्थयोरभेदाद्देवतारूपत्वं मन्त्रस्य विग्रहवत्त्वं स्वीकृत्य तु देवतानां कर्माधिकार उक्त उत्तरमीमांसायां शब्दानामर्थपरत्वस्यौत्सर्गिकत्वात्प्रयोगसमवेतार्थस्मृतावेव तात्पर्यं नाज्ञातदेवताविग्रहादावपीति तु मन्त्राधिकरणस्याशयः । भाष्यादिति । जातिरेव शब्दार्थ इत्युपक्रम्य एक एवेन्द्रशब्दः सर्वेषु यागेषूपकरोतीत्युक्तत्वात् । एतच्च शब्दस्य व्यापकत्व एव युज्यते । कत्वादिनेति । ध्वनिगतकत्वादेस्तत्रारोपात् । पदादिरूपेणेति । पदे वर्णाभावाद्बुद्धिपरिकल्पितपदत्वमिति भावः । भाष्ये कथमिदं स्पष्टमत आह । तत्र

हीति। श्रोत्रोपलब्धिरिति। श्रोत्रे एवोपलब्धिर्यस्येत्यर्थः। श्रोत्रोपलब्ध्या च शब्दस्याकाशदेशत्वं प्रतिपादितम्। कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रत्वादाकाशदिशो नातिरिक्तत्वमित्याभिप्रायेण देशशब्दप्रयोग आकाशे बोध्यः। यदि तु शङ्खादीनामेव गुणः स्यात्तदानिष्क्रियस्य शब्दस्य श्रोत्रपर्यन्तं गमनं न सम्भवति श्रोत्रस्य वा तत्पर्यन्तं गमनं न सम्भवतीति श्रोत्रसम्बन्धाभावात्प्रत्यक्षं न स्यात्। भाष्यस्थविशेषणत्रयेण रूपत्रयं दर्शयति। तत्रेत्यादिना। तार्किकमतं दूषयति। अन्यथेति। कदम्बपुष्पवत् दशदिक्सञ्चारिणो दश शब्दा उत्पद्यन्ते ते च श्रोत्रेण सम्बद्धा गृह्यन्त इत्यर्थः। आदिना वीचीतरङ्गन्यायः। तद्यथा वीचिः प्रथममुत्पन्ना वीच्यन्तरं जनयति एवं शब्दो ऽप्याद्यः शब्दान्तरं जनयति, तदपि शब्दान्तमित्येवं श्रोत्रसम्बन्धो भवति। तत्प्रत्यक्षानुपपत्त्येति। आद्यशब्दस्य श्रोत्रसम्बन्धाभावादिति भावः। ननु एकशब्दत्वे अतिदूरस्थस्यापि प्रत्यक्षापत्तिरत आह। तत्रेति। यथा तार्किकमते अतिदूरपर्यन्तं न शब्दोत्पत्तिस्तथास्मन्मते ऽभिव्यक्तिरपि नेत्यर्थः। अत एव। शब्दस्य व्यापकत्वादेव। स्वं श्रोत्रं तेन श्रोत्रेण॥ ५२॥

(क० टी०) प्रागुक्तपूर्वपक्षसिद्धान्तभूतार्थे सर्वत्र मानमाह। तदुक्तमिति। प्रागुक्तं सर्वमित्यर्थः। कथमुक्तमित्याशङ्कायां विशेषमाह। उच्चरीति। सन्निकर्षः संहितासंज्ञोपयोगिपौर्वापर्यमकालव्यवायम्। संहितेति न्यासान्तरे तदुपयोग्याशङ्क्येति एकैकवर्णवर्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानां एकैकवर्णवर्तिनी वाक् न द्वौ युगपदुच्चारयति गौरिति यावदुकारे वाग्वर्तते नौकारे न विसर्गे च यावदौकारे न गकारे न विसर्गे च यावद्विसर्गे न गकारे नौकारे न्ये ऽच्चोच्चरितप्रध्वंसिनः खल्वपि वर्णा उच्चरितः प्रध्वस्त इति अथापरः प्रयुज्यते वर्णो वर्णस्य सहाय इत्य

नेनेति शेषः । अथ तद्वर्णध्वंसानन्तरमपरो वर्णः प्रयुज्यते तावतापि स पौर्वापर्यादिव्यवहारेण वर्णान्तरस्य सहाय इति शेषशेषार्थः । उक्तमिति शेषः । किं तदाह । बुद्धाविति । तन्वञ्चिति । तन्वती विषयान्व्याप्नुवती नीतिर्यस्य सः । तत्त्वदिति पाठे तननं तत् सास्ति यस्याः सा तत्त्वती सकलविषयव्यापिनी नीतिर्बुद्धिर्यस्य स इति स एवार्थः । ये गत्यर्थास्ते ज्ञानार्था इति । नीतिर्बुद्धिस्तदुभयसाधारणमर्थमाह । सकलेति । रणाद्युपयोगिधैर्याद्युपयोगादाह । यं पण्डित इति । कर्त्ता । प्रयोक्ता श्रोता च । अनेककाला अनेकाः क्रिया इत्यर्थे पौनरुक्त्यात् तज्जन्यत्वात्ताच्छब्द्यमित्याह । कण्ठेति । अत एव तत्करणासम्भवात् । कृत्वेत्यस्य लक्ष्यार्थमाह । प्रतीति । शब्देनेत्यस्यानर्थक्यादेराह । सहेति । आर्थिकमाह । तदिति । बुद्धावित्यस्यार्थमाह । बुद्धीति । अन्तःकरणेत्यर्थः । अत्र मध्यमणिन्यायेनान्वय इत्याह । तत्रैवेति । तद्देशे एवेत्यर्थः । प्राग्वदाह । व्यवेति । तदनन्तरं तेषां शब्दानामर्थानां चैतच्छब्दोत्तरमयं शब्द एतद्वर्णोत्तरमयं वर्ण एतत्क्रियोत्तरमियं क्रियेत्येवं रूपं तं शास्त्रे लोके च कुर्यादित्यर्थः । । नन्वेवं बुद्धिविषयमिति व्याख्यानमनुपपन्नं षष्ठीतत्पुरुषे पुंस्त्वौचित्यात्, बहुव्रीहौ तस्य शब्दे विषयकत्वेन बाधादत आह । बुद्धीति । तात्स्थ्यात्ताच्छब्द्यमिति भावः । बुद्धेः साकाङ्क्षत्वादाह । तत्रेति । शब्देष्वित्यर्थः । विशेषग्रहणे बीजमाह । वक्तुर्देशेनैवेति । तस्यैव । वक्तुरेव । शास्त्रस्य धर्मरूपस्य फलेत्यर्थः। एकः शब्द इत्यादिश्रुतेरिति भाव । नन्विदमाधिकं श्लोके पौर्वापर्यस्यैवोक्तत्वादत आह । एतदर्थमेवेति । अन्यथा तदानर्थक्यं स्पष्टमेव । अपिना शब्ददर्शनसमुच्चयः । नन्वेवमग्रे न्यूनतात आह । श्लोके इति । अत एव सन्निकर्षोपपत्तिरपीति भावः । इतिः । इत्यनेन । मात्रपदेन परव्यवच्छेदः । तथाच मध्यमास्थनादांश एव विवक्षितः । अन्यथा । परादिस्थग्रहणे । अथ पौर्वापर्यमाह । अस्मिन्निति । अत एवाह । व्यञ्जेति । प्राचोक्तं खण्डयति । यत्त्विति । तद्वदेव । वर्णवदेव । पूर्वहेतुना भाष्ये युगपदुपलम्भस्यापि निरस्तत्वात् बुद्धिरत्र प्रत्यक्षं नान्तःकरणमित्याह । न बुद्धीनामिति । आदिना देशादि । तत्रापि । बुद्धिष्वपि । अपिर्वर्णस्यै-

च समुच्चये । एवं प्रागपि । नन्वेवं कथमिको यणित्यादौ वर्णानां प्रकृतिविकृतिभावो ऽतआह । प्रकृतीति । एवश्च न वर्णनाशः किन्तु बुद्धिविपरिणाममात्रमिति भावः । स्थानिवदिति । सर्वे सर्वपदादेशा इत्यादिनेति भावः । वक्ष्यमाणभाष्याविरोधायर्थमाह । अयञ्चेति । प्रागुक्तः स्फोटात्मेत्यर्थः । तत्तत्प्राणीति । अनेन हिरण्यगर्भस्यापि सङ्ग्रहः । विनिगमनाविरहादाह । सर्वेति । अनेन ध्वन्यात्मकशब्दस्यापि सङ्ग्रहः । तस्य प्रत्यक्षत्वायाह । स चेति । तदुभयदेशस्थशब्दश्चेत्यर्थः । लाघवमुभयत्र हेतुः । नन्वेवमनेकत्वापत्तिरिति कथं प्रागुक्तमेकत्वमत आह । एक एवेति । नानात्वे गौरवस्यैकत्वे दोषाभावस्य चोक्तत्वादिति भावः । युक्तं च विभुत्वमित्याह । यथैकेति । सर्वसम्बन्धादिति भावः । व्यापकम् । तद्यापकम् । आकाशदेशेति बहुव्रीहिः । सर्वसम्बन्धादाश्रयस्य व्यापकत्वाच्चेत्यर्थः । अत्र भाष्यसम्मतिमप्याह । एक इति । यद्यपि भाष्ये एकस्यानेकाधिकरणस्य युगपदुपलम्भे दत्तमादित्यदृष्टान्तमेककर्तृकस्य तस्यासम्भवात्संखण्ड्यैवं तर्हीन्द्रवद्विषयस्तद्यथा इन्द्रो ऽनेकस्मिन् क्रतुशते आहूतो युगपत्सर्वत्राङ्गं भवति एवमाकृतिर्युगपत्सर्वत्र भविष्यतीत्युक्तं तथापि इतीन्द्रेत्यत्र साकाङ्क्षत्वाद्वाक्यस्यैइन्द्र इत्यादेरिन्द्रशब्द आहूतः प्रादुर्भूतः सर्वत्राङ्गमिति विशेष इति युगपत् शब्दप्रादुर्भावे ऽव्ययीभावे कृते वतिप्रत्ययः कस्याप्यनेक इति वाक्यशेषः । एकस्यापीन्द्रशब्दस्य यथानेको यागोऽङ्गित्वेन विषय एकबोद्धृज्ञानविषयश्च एकदेशावच्छिन्नानेकयागेषु तथा दर्शनसम्भवात्, तथा एकस्या अपि जातेरनेको विषय आश्रयतयेत्यर्थः । इन्द्रशब्दस्य प्रादुर्भाव इत्यर्थेन प्रादुर्भावविषयेन्द्रशब्दरूपा तद्बोध्या वैका देवता व्रीह्यादिद्रव्यवदङ्गतां प्रतिपद्यत इत्यर्थ इत्यभिप्रेत्याह । इन्द्रशब्द इत्यादि । शतशब्दोबहुपरः । आह्वानफलमाह । प्रादुरिति । नित्यत्वादाह । अभीति । अयञ्चेत्याद्युक्तार्थे भाष्यान्तरमपि मानमिति सूचयन्नाकाशदेशत्वे मानमाह । स एवेति । आकाशदेशस्थ एवेत्यर्थः। आदिना वाक्यम् । बुद्धिरन्तःकरणमेव । उक्तामिति । अस्य स्वावित्याद्यकारस्य वर्णसमाम्नायस्थाकारतो भेदेनानण्त्वात्सवर्णाग्राहकत्वमाशङ्क्यावर्णस्यैकत्वात्सिद्धमिति समाधिप्रघट्टके एकत्वे एकस्य पुंसो यु-

गपदनेकदेशेषूपलम्भो न स्यात् उपलभते त्वकारमेको द्रष्टानेकाधिकरणस्थमादित्यदृष्टान्तेनेति एकत्वनित्यत्वे एवेत्याशङ्क्योक्तरीत्यादित्यदृष्टान्तं संखण्ड्य शब्दस्याकाशरूपैकाधिकरणत्वेनानेकाधिकरणत्वमेवायुक्तमित्याशयेनाकारमप्यनेकाधिकरणस्थं नोपलभते किं कारणं यत इत्युक्तोक्तमित्यर्थः। अत एव तदग्रे एकं च पुनराकाशमित्युक्तम्। तत्र श्रोत्रेत्यस्य श्रोत्रे एवोपलब्धिर्यस्येत्यर्थः। करणक्तिनन्तेन समानाधिकरणबहुव्रीहिर्वा। एतद्विशेषणफलं तु शब्दस्याकाशदेशत्वप्रतिपादनम्। न च दिश एव श्रोत्रत्वात्कथं तत्रोपलब्ध्याकाशदेशत्वसिद्धिरिति वाच्यम्। कर्णशष्कुल्यवच्छिन्ननभस आकाशप्रदेशविशेषस्य श्रोत्रत्वात्। चक्षुरादिवच्छोत्रस्यापि भूतत्वावश्यकत्वात्। दिगनतिरिक्तमेवाकाशमिति तत्त्वात्। नन्वेवमप्यतेजोंशगतमठादिरूपस्य तेजश्चक्षुर्ग्राह्यत्ववदनाकाशदेशगतस्यापि शब्दस्याकाशात्मकश्रोत्रग्राह्यत्वं किमसम्बद्धं तद्ग्राहकं सम्बद्धं वा। नाद्यः। रामेश्वरादिप्रदेशावच्छिन्नशब्दस्यापि श्रवणापत्तेः। अन्त्ये ऽपि किं श्रोत्रस्य विषयदेशगमनात्सम्बन्ध उत शब्दस्य श्रोत्रदेशगमनात्। नोभयम्। उभयोरपि निष्क्रियत्वेनागमनात्। दूरदेशस्थशब्दाग्रहणं तु दूरत्वादिदोषस्य प्रतिबन्धकत्वाच्छोत्रदेशे अभिव्यक्तेस्तथाच तस्माकाशदेशदेशत्वमभ्युपेयम्। तथासति तद्वदेव तस्यापि व्यापकत्वेन श्रोत्रदेशे ऽभिव्यक्तस्य तेन ग्रहः। नन्वेवमनेनैव बुद्धिविषयत्वरूपबुद्धिनिर्ग्राह्यत्वामिति तत्पुनरुक्तमिति चेन्न। आशुतिरोधीयमानानेकवर्णवत् घटकलशादिशब्दग्रहणसम्भवदर्शनाय तदुक्तेः। तस्य च पूर्वपूर्वध्वन्युत्पादिताभिव्यक्तिजनितसंस्कारपरम्परासहकृतान्त्यवर्णबुद्ध्या निःशेषतः स्वरूपतो ऽर्थतश्च ग्राह्य इत्यर्थः। एवञ्च तादृशसंस्कारविशिष्टान्तःकरणसंयुक्तेन तादृशसंस्कारविशिष्टेन श्रोत्रेणान्त्यवर्णसम्बद्धेन वर्णसमुदायप्रतिबिम्बवदखण्डस्फोटरूपपदादिप्रत्यक्षमिति तात्पर्यम्। नन्वेवं सर्वदा शब्दोपलम्भः स्यादत उक्तम्। प्रयोगेणेति। प्रयुज्यते इति प्रयोगो वर्णस्तेनानाभिव्यक्त इत्यर्थः। अत एवोक्तमाकाशेति। एकं चेति। एवञ्चैकत्राम्रफले एक एव यथा रूपरसगन्धादिस्तथा तदाश्रयस्यैकत्वाद्भुतः शब्दो ऽप्येक एव तत्रैव तस्योपलम्भ इति भिन्नदेशोपलम्भ एवासिद्ध इति तात्पर्यम्। नन्वेकत्वे ऽयं पूर्वो ऽयं परो ऽयं देवगृहो ऽयं

राजगृह इत्यादिभेदावभासः कथमिति चेन्न । देशभेदेन प्रतिभासस्य भिन्नदेशावस्थितपुरुषोदीरितव्यञ्जकवर्णकृतत्वादौपाधिको भेदस्तु आकाशस्येव न शब्दस्याप्येकत्वे बाधकः। एवं संसर्गानित्यतापि तस्यैवास्यापि न बाधिका। तस्यापि नीलं नभ इत्यादिसंसर्गानित्यताप्रतीतेरिति तात्पर्यम् । अत्र शब्द इत्येकवचनेन स्फोटस्यैकत्वमखण्डत्वं च ध्वनितम् । तदेतत्सर्वमभिप्रेत्य निष्कृष्टमाह । तत्रेति । तयोर्मध्ये इत्यर्थः।अन्यथा तत्स्थस्य विभोस्तस्यानङ्गीकारे सर्वत्र भेदस्यौपाधिकस्यैव सत्त्वेन तस्यैव च व्यवहारोपयोगित्वेनौपाधिकभेदेन भेदस्य दुर्वारत्वेन पृथिव्याः सुघ्नादिदेशभेदेन भेदवदाकाशस्यापि घटादिभेदेन भेदादाविति यावत् । आदिना वीचीतरङ्गन्यायः। तत्रेति । शब्देत्यर्थः । ननु विभुत्वे रामेश्वरादिप्रदेशावच्छिन्नशब्दस्यापि श्रवणापत्तिरत आह । तवेति । फलबलकल्प्यत्वरूपयुक्तेरन्यत्र दूरत्वस्य प्रतिबन्धकत्वस्य च तुल्यत्वादिति भावः । उक्तं पोषयति । अत एवेति । तत्स्थत्वेन तत्त्वादेवेत्यर्थः । स्येति।अन्यथातिप्रसङ्ग उक्त एव । उक्तन्यायेन तदुपपादनेऽपि तत्र तत्त्वाभाव एवेति भावः ॥ ५२ ॥

१*तत्र श्रोत्रोपलब्धित्वं कत्वादिनाभिव्यक्तत्वम् । पादादिरूपेण तु बुद्धिनिर्ग्राह्यत्वम् । स च प्रयोगेण वैखरीरूपेणाभिज्वलितः स्वरूपरूषितः कृत इत्यर्थः । अन्यथा कदम्बमुकुलादिन्यायेनानन्तशब्दजशब्दानां तत्प्रागभावध्वंसानां च तत्प्रत्यक्षानुपपत्त्या कल्पने गौरवं स्यात् । तव किञ्चिद्दूरदेशपर्यन्तमुत्पत्तिवन्ममाभिव्यक्तिरपि तावद्दूरपर्यन्तमेवेति न दोषः । अत एव कर्णशष्कुल्यवच्छिन्ननभोरूपश्रोत्रेण तद्ग्रहः । स्वसमवेतशब्दस्यैव तेन ग्रहात् ॥ ५२ ॥*

आकाशस्य शब्दगुणकत्वसाधनम् । ननु आकाशदेशः शब्द इत्यसङ्गतम्? आकाशसत्त्वे मानाभावात् । न च शब्दगु-

---

१** एतच्चिन्हान्तरितो ग्रंन्थः १९२ पृष्ठे १४ पङ्क्त्यग्रे योजनीयः ।

णितया तत्सिद्धिः। शब्दस्याकाशगुणत्वासिद्धेः। स्पर्शवद्द्रव्यविशेषगुणत्वस्यैव शब्दे ऽङ्गीकारात्। न चाश्रयाद्द्रव्यभावितयाश्रयादन्यत्रानुपलम्भापत्तिः, तादृशनियमानङ्गीकारात्। तत्राप्यन्यदेशावच्छिन्नाकाशाश्रयस्य कर्णशष्कुल्यवच्छिन्न उपलम्भात्। न च द्रव्यग्राहकेन्द्रियग्राह्यविशेषगुणयोगित्वमेव स्पर्शवत्त्वमिति वाच्यम्। तस्य नियमस्य स्ववासनाकल्पितत्वात्। अत एव भाष्ये ऽप्याकाशदेश इत्येवोक्तं न त्वाकाशगुण इति चेन्न।

आधारशक्तिः प्रथमा सर्वसंयोगिनामयम्।
इदमत्रेति भावानामभावानां च कल्पते॥
व्यपदेशस्तमाकाशनिमित्तं तु प्रचक्षते।
कालात् क्रियाविभज्यन्ते आकाशात्सर्वमूर्त्तयः॥
एतावानेव भेदो ऽयमभेदोपनिबन्धनः।

इति हरिणैव समाधानात्। इदं नक्षत्रचक्रमत्र तिष्ठति अत्रैतदभाव इति निर्दिष्टवस्तुविषये पृथ्व्यादेराधारसम्भवेन तदाधारस्यैवाकाशसंज्ञकत्वात्। एवं च पृथ्व्यादीनामपि परमाणुद्वारा स एवाधार इति सर्वभावानामाधारशक्तिराकाशाश्रया। आधारशक्तिरयमिति तु शक्तिशक्तिमतोरभेदादुक्तम्। एवं चाधारशक्त्यैवान्यथानुपपन्नयाकाशसद्भावावगमः। इदमाकाशस्याधारत्वं सिद्धस्वभाववस्तुविषयम्। साध्यस्वभावाक्रियाविषयं तु कालस्याधारत्वमित्याह। कालादिति। जन्मस्थितिनिरोधेषूपकुर्वन् कालः क्रियाधार इति। एतच्चोपरिष्टा-

त्स्फुटीभविष्यति। मूर्तिपदं क्रियातिरिक्तसर्वपदार्थबोधकम्। अयम्भेदः आकाशः काल इति भेदः। एतावानेव व्यावहारिक एव। ननु किं तर्ह्ययं निर्निबन्धन एव नेत्याह। अभेदेति। भेदरहितं यद्ब्रह्म तदुपनिबन्धनं वस्तुभूतं यस्य स इत्यर्थः। ईश्वर एव तत्तदाधारत्वविशिष्टस्तत्तत्संज्ञां लभत इत्यर्थः।

अखण्डः काल इति मते तस्यातिरिक्तत्वखण्डनमिदं बोध्यम्। एवं च सर्ववस्त्वाधारदेशत्वेन शब्दस्यापि तद्देशत्वे श्रोत्रोपलब्धिगुणेन भाष्ये उक्तम्। कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रत्वेनेन्द्रियाणामसम्बद्धविषयाग्राहकतया तत्तद्भूतसम्बद्धगुणस्य च तत्तदिन्द्रियग्राह्यतया चाकाशदेशस्थत्वमेव शब्दस्येत्याशयात्॥ ५३॥

(कुं. टी.) शब्दाश्रयतयातिरिक्तं द्रव्यमाकाशमिति तार्किकमतं निराकरोति। न चेति। असिद्धेरित्यत्र हेतुमाह स्पर्शेति। स्पर्शवतः पृथिव्यादिचतुष्टयस्य विशेषो वायुस्तस्य गुणः शब्द इत्यर्थः। पृथिव्यामनुष्णाशीतस्पर्शस्वीकारस्तु त्वाचप्रत्यक्षे स्पर्शस्य हेतुत्वानुरोधात्। अत्र वैशेषिकाः। शब्दो न स्पर्शवतो विशेषगुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वककत्वात्, यो हि पृथिव्यादेर्गुणः सोऽग्निसंयोगजन्यः, अथवा समवायिकारणगुणपूर्वकः न च शब्दस्तथा। नापि वायुगुणः आश्रयनाशजन्यनाशप्रतियोगित्वाभावादिति वदन्ति। तान्निराकरोति। न चायावद्द्रव्येति। यावद्द्रव्यं सकलद्रव्यम्, तथाच पृथिव्यादिगुणस्य स्वाश्रयमात्रवृत्तितयान्यत्र प्रत्यक्षानापत्तिरित्यर्थः। तादृशेति। गुणिनिष्ठत्वमेव पृथिव्यादिगुणस्येति नियम-

इत्यर्थः। अनङ्गीकारादिति। पुष्पसौरभस्य वायुनानयनदर्श-नात्। न च तत्र पुष्पावयवो ऽप्यायातीति वाच्यम्। पुष्पस्य ल-घुत्वापत्तेः। आश्रयात्। वायोः। अन्यत्र। आकाशे। यावद्द्रव्यभावि-तयेति त्वपपाठः। आश्रयनाशजन्यनाशप्रतियोगित्वं यावद्द्रव्य-भावित्वमिति हि तार्किकाणां प्रसिद्धिस्ततश्चाश्रयादन्यत्रेत्य-क्षरास्वारस्यम्। भाष्यस्थविशेषणत्रयेण रूपत्रयं दर्शयति। तत्रे-त्यादिना। तार्किकमतं दूषयति। अन्यथेति। कदम्बपुष्पवद्द-शदिक्सञ्चारिणो दश शब्दा उत्पद्यन्ते ते च श्रोत्रेण सम्बद्धा गृह्यन्त इत्यर्थः। आदिना वीचीतरङ्गन्यायः। तद्यथा वीचिः प्रथम-मुत्पन्ना वीच्यन्तरं जनयत्येवं शब्दो ऽप्याद्यः शब्दान्तरं जन-यति तदपि शब्दान्तरमित्येवं श्रोत्रसम्बन्धो भवति तत्प्रत्यक्षाऽनु-पपत्त्येत्याद्यशब्दस्य श्रोत्रसम्बन्धाभावादिति भावः। नन्वेकश-ब्दत्वे ऽतिदूरस्थस्यापि प्रत्यक्षापत्तिरत आह। तत्रेति। यथा ता-र्किकमते ऽतिदूरपर्यन्तं न शब्दोत्पत्तिस्तथास्मन्मते ऽभिव्यक्तिर-पि नेत्यर्थः। तवापीति। देशान्तरे उत्पन्नस्य शब्दस्य देशान्तरे ऽप्युपलम्भात्तार्किकाणामपि गुणमात्रनिष्ठत्वानियमो नेत्यर्थः। द्रव्यग्राहकेति। चक्षुषा घटग्रहणानन्तरं संयुक्तसमवायेन तद्गुण-प्रत्यक्षाद्गुणिनोः समानेन्द्रियग्राह्यत्वमेवेत्यर्थः। स्ववासनेति। श्रोत्रेणाकाशस्याग्रहणे ऽपि तद्गुणस्य शब्दस्य ग्रहणादिति भावः। आकाशदेश इति। आकाशदेशावच्छेदेत्यर्थः। आधारशक्ति-रिति। अस्य पूर्वार्धे तु।

आकाशमेव केषां चिद्देशभेदप्रकल्पनात्।

इति। केषां चिन्मतं संयोगिभेदेनाकाशस्य नानात्वादा-काशमेवाधिकरणमित्यर्थः। सर्वसंयोगिनामिति। अयम्भावः। यथा नक्षत्रादीनामधिकरणमाकाशं तथा पृथिव्यादिस्थानां

रथादीनामपि मुख्यमधिकरणमाकाशं, समवायिनां तु स्वाश्रयद्वारा परमाणौ विश्रामः, परमाणूनां चाकाशमेवाधिकरणमित्ययमाकाशः सर्वेषामाधारशक्तिमान्। अत्रैव लोकप्रसिद्धिमपि प्रमाणयति। इदमत्रेतीति। इह पक्षी नेह पक्षीति प्रतीत्या आकाशस्यैवाधारत्वात्। यत्तु आकाशस्यातीन्द्रियतया इह नक्षत्रमिति प्रतीतेर्विषय आलोक एवेति तन्न। इहालोक इति प्रतीत्यनापत्तेः। व्यपदेश इति। अयं यो व्यवहारस्तस्य निमित्तमाकाशमित्यर्थः। आकाशस्य सर्वाधारत्वं यदुक्तं तत्सिद्धविषयं साध्यस्वभावविषयं तु कालस्याधारत्वमित्याह। कालादिति। काल एव क्रियाया भेदक इत्यर्थः। कालाकाशादिभेदो व्यवहारिक एव वास्तविकस्त्वभेद एव। निबन्धनम्। निमित्तम्। विभज्यते इति। भेदेन व्यवह्रियत इत्यर्थः। सर्वमूर्तयः। सर्वपदार्थाः। पदार्थसत्तासत्तयोर्विभाजक आकाश एवेत्यर्थः। निर्दिष्टेति। निर्दिष्टं यन्नक्षत्रादि तन्निरूपितमाधारत्वं पृथिव्यादेर्न सम्भवतीत्यर्थः। सर्वाधारत्वं घटयति। एवं चेति। पृथ्व्यादीनामेव परम्परया परमाणौ विश्रान्तिः परमाणूनां चारधार आकाश एवेत्यर्थः। इदमिति। पूर्वोक्तव्यवहारसिद्धमित्यर्थः। साध्यस्वभावेत्यस्य विवरणं क्रियेति। जन्मस्थितीति। आद्यक्षणसम्बन्धो जन्म तत्र काल एव निमित्तमित्यर्थः। निरोधो नाशः।

आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः॥

इति। केचित्क्रियात्मकं कालमिच्छन्ति तान्निराकरोति। क्रियाधार इति। अयं घटो भवतीत्यादिप्रतीत्या कालस्यैवाधारत्वं न तु सूर्यपरिस्पन्दादेः सूर्यनिष्ठस्य तस्याधारत्वासम्भवादिति भावः। मूर्तिशब्दस्य मूर्तधर्म एव तार्किकाणां प्रसिद्धत्वादाह। मूर्तिपदमिति।

व्यावहारिक एवेति । अत एवोक्तं दीधितौ दिक्कालौ नेश्वराद-तिरिच्येते मानाभावादिति । इदानीं घटस्तदानीं घट इति व्य-वहारभेदस्तु भवतामिव ममाप्यौपाधिक इति भावः । ईश्वर ए-वेति । श्रोत्रमिति। कर्णशष्कुल्यवच्छिन्न ईश्वर एवेति भावः । कार्य-मात्रं प्रति ईश्वरस्य कारणता क्लृप्तैव तत्र समवायित्वमात्रं स्वी-क्रियत इति।न चेश्वरे शब्दसमवायस्वीकारे मनस्संयुक्तेश्वरसमवा-यसत्त्वात्तन्मानसापत्तिरिति वाच्यम् । परकीयज्ञानादिप्रत्यक्षवा-रणाय विजातीयसंयोगस्य हेतुतया ईश्वरे तदभावात् । न चा-काशशरीरं ब्रह्मेति श्रुतेराकाशस्यातिरिक्तत्वाभावे कथं ब्रह्मणो ऽवस्थानमिति चेत्सत्यम् । यथाकाशान्तरमन्तराकाशस्य स्थितिरेवं ब्रह्मणो ऽपि । श्रुतौ तु आकशवच्छरीरमस्येति विवक्षितम् । अ-खण्ड इति।क्षणमासादिरूपस्तु कालो व्यवहारभेदान्यथानुपपत्त्या औपाधिकः कल्प्यत इति भावः।खण्डनमिति।क्षणातिरिक्तो ऽख-ण्डः कालो नास्तीत्यर्थः । सर्वेति । सर्ववस्तुन आधारो य आ-काशस्तदधिकरणकत्वादित्यर्थः । अथवा आकाशरूपो देशः सर्ववस्तुन आधारभूत इत्यतः शब्दस्यापि तद्देशत्वमित्यर्थः। क-र्णशष्कुल्यवच्छिन्नेति । आकाशगुणत्वादाकाशरूपश्रोत्रसम्बद्धस्य शब्दस्य ग्रहणं सिद्धमित्यर्थः।तत्तद्भूतेति।तत्तदिन्द्रियात्मकतत्त-द्भूतेत्यर्थः।एवम्।शब्दस्याकाशाधर्मत्वेसत्येवाकाशात्मकश्रोत्र-सम्बद्धग्रहणं सम्भवतीत्यर्थः। अत्र बौद्धाः चक्षुर्गोलकादौ सति घटाद्युपलम्भाद्गोलकमेव चक्षुरादीत्याहुः । तत्र सांख्याः गोलकं नेन्द्रियं तस्य घटादिदेशे गमनासम्भवात् किं तु तदतिरिक्तम्।तच्च न भौतिकम् । चक्षुषा हि न्यूनपरिमाणं न महत्परिमाणं गृह्यते। न च न्यूनेन महतो व्यापनं सम्भवति न चाप्यग्रहणं सम्भवति अत आहङ्कारिकाणीन्द्रियाणीत्याहुः । एतच्चेद्भूतविकारत्वश्रु-

तिविरुद्धम् । गोलकनिष्ठा शक्तिरिन्द्रियमिति मीमांसकोक्तिरप्य-
युक्ता । गोलकविरहिणां सर्पादीनामपि शब्दानुभवात् । अणु-
त्वमप्ययुक्तम् । सर्वशरीरव्यापिशैत्योपलम्भात् । विभुत्वे सर्वेषां
युगपद्ग्रहणप्रसङ्गान्मध्यमपरिमाणम् ॥ ५३ ॥

(क० टी०) प्रसङ्गादइउण्सूत्रस्थभाष्योक्तौ शङ्कते । नन्वि-
त्यादिना । नैयायिकमतमाह । न चेति । शब्दगुणतयेति पाठः ।
गुणितयेति पाठे नीलरूपवदिति वत्प्रयोगः । वस्तुतस्तु शब्द-
स्य गुणितयेत्यर्थः । शब्दनिष्ठगुणतानिरूपिता या गुणिता
तयेति यावत् । शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रिय-
ग्राह्यजातिमत्त्वात् स्पर्शवत् । घटादावव्यभिचाराय चक्षु-
रिति । आत्मन्यव्यभिचाराय बहिरिति । रसत्वादावव्यभिचाराय
जातिमदिति । इति तत्र गुणत्वे सिद्धे शब्दो विशेषगुणः लौकिकप्र-
त्यासत्त्येन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयो-
ग्यतारहित्ये च सति गुणत्वव्याप्यजातिमत्त्वात् रूपवत् । प्रभा-
त्वेनाव्यभिचाराय गुणत्वेति । गुरुत्वत्वेनाव्यभिचारायायाद्यसत्य-
न्तम् । संख्यात्वेनाव्यभिचाराय द्वितीयसत्यन्तमिति विशेषगु-
णत्वसिद्ध्याग्रिमानुमाने स्वरूपासिद्धिनिरासे सिद्धे, शब्दः सम-
वेतः गुणत्वात्तद्वदिति, तत्र समवेतत्वे सिद्धे परिशेषानुमाने हे-
तौ विशेष्यासिद्धिनिरासे सिद्धे विशेषणासिद्धिनिरासाय स्वी-
क्रियमाणेन शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिका-
रणकत्वाभावे सत्यकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात् सुखवत् ।
पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम । पटरूपादौ व्यभि-
चारवाणायाकारणगुणपूर्वकेति । जलपरमाणुरूपादौ व्यभिचार-
वारणाय प्रत्यक्षेति । इति पृथिव्यादिचतुष्टयाश्रितत्वे निरस्ते न
स दिक्कालमनो गुणः विशेषगुणत्वात् रूपवदिति कालादित्रितया-
श्रितत्वे निरस्ते, न स आत्मविशेषगुणः बहिरिन्द्रिययोग्यत्वात्तद्वत् ।
अत्र मनोभिन्नेन्द्रियं बहिरिन्द्रियम् । एतेनात्मगुणग्राहकेन्द्रियत्वं
तत्त्वं, तच्च मनस्यपि तेनापि रूपादिग्रहणादित्यपास्तमित्यात्मा-
श्रयत्वे निरस्ते ऽर्थान्नवमस्य शब्दाधिकरणस्य द्रव्यस्याकाशा-

ण्यस्य, शब्दः वाय्वाद्यष्टद्रव्यान्यद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादिति परिशेषानुमानेन सिद्धिरिति भावः । असिद्धेरिति । उक्तानुमानस्य बाधस्वरूपासिद्धिभ्यां पराहतत्वात् । तथाच विशेषगुणत्वं सुतरां नेति भावः । तदेवाह । स्पर्शवद्द्रव्येति । पवनेत्यर्थः । पवनावयवेषु सूक्ष्मशब्दक्रमेण पवने कारणगुणपूर्वकशब्दोत्पत्तेरवचनं प्रागुक्ते ऽनुमाने स्पर्शवद्वायुगुणत्वस्य तत्र सत्त्वेन तदभावसाधने बाध इति भावः । कारणेत्युक्त्या तदघटितहेतोरसिद्धिः सूचिता । अत्र बाधकमाह । न च यावद्द्रव्येति । स्वाश्रयनाशजन्यनाशप्रतियोगित्वेनेत्यर्थः । आश्रयात् । वायोरन्यत्राकाशे । दृष्टं चेत् । गन्धादौ । तादृशेति । आत्मविशेषगुणेषु आश्रयादन्यत्रानुपलम्भे ऽपि यावद्द्रव्यभावित्वाभावात् । एतेनायावद्द्रव्यभावित्वेन वायुविशेषगुणत्वासम्भव इति नैयायिकोक्तमपास्तम् । बाधकान्तरमाह । न च द्रव्येति । स्पर्शवद्द्रव्येत्यर्थलभ्यं वाक्यादित्रयग्राहकत्वक्चक्षुर्ग्राह्यत्वस्य तदीयरूपस्पर्शयोर्वायुग्राहकत्वक्ग्राह्यत्वस्य तदीयस्पर्शे सत्त्वेन शब्दस्य वायुविशेषगुणत्वे त्वक्ग्राह्यत्वस्य तत्राभावान्न तस्य तद्गुणत्वमिति तथैव वाच्यमिति भावः । तस्येति । आत्मन्यपि तस्य सत्त्वात्तद्ग्राह्यगन्धादिविशेषणयोगित्वस्यापि तत्र सत्त्वाच्चेति भावः । तस्य तत्त्वे भाष्याविरोधो ऽपीत्याह । अत एवेति । तस्य तद्गुणत्वादेवेत्यर्थः । एवव्यावर्त्यमेवाह । न त्विति । असाधारणान्यथानुपपत्तिप्रदर्शनाय व्युत्क्रमेणास्यार्थमाह । इदमित्यादिना । भावांशं प्रदर्श्याभावांशमाह । अत्रैतदिति । आकाशप्रदेशविशेषे नक्षत्रचक्राभाव इत्यर्थः । वस्तुनक्षत्रचक्रं प्रथममाह । एवं चेति । तदन्यथानुपपत्त्या तत्सिद्धौ च प्रथमेत्यस्यार्थमाह । परमेति । एवेनाधारान्तरकल्पतद्व्यवच्छेदः । सर्वसमित्यस्यार्थमाह । सर्वेति । सर्वपदार्थानामित्यर्थः । आकाशेत्यस्य लिङ्गव्यत्ययेनान्वयादाह । आकाशेति । एवेन सर्वसंयोगिनां प्रथमाधारशक्तिराकाशनिमित्तेति इदमत्रेत्यनेन यो भावानां सतामभावानां च व्यपदेशः कल्पते तं तु तमपि आकाशनिमित्तं तन्निमित्तकं प्रचक्षते मुनयः कथयन्तीति वाच्यार्थः सूचितः । नन्वेवमस्येत्युचितमत आह । आधारेति । प्रकृतं तात्पर्यार्थमाह । एवं चेति । तस्या अन्याधारत्वाभावे चेत्यर्थः । निरोधो नाशः । अत एव ततः क्रियाविभागः । उपरि-

ष्टात्। धात्वर्थवादे। अनेन कथं तस्य तत्त्वमिति शङ्का समाहिता। ननु परिच्छिन्नपरिमाणानामेव मूर्तित्वेन प्रागुक्तविरोधस्तत्राह। मूर्तीति। खण्डनमिति। न त्वाकाशातिरिक्तत्वखण्डनमिति भावः। भाष्याभिष्टपरमप्रकृतमाह। एवं चेति। आकाशसिद्धौ चेत्यर्थः। आधारदेशत्वेनेति कर्मधारयः। तद्देशत्वमिति बहुव्रीहिः। श्रोत्रोपेति। श्रोत्रजन्योपलम्भरूपतन्निष्ठगुणेनेत्यर्थः। भाष्याशयमाह। कर्णेति। वक्ष्यमाणादिपरमेत्वेनाह। तत्तादिति। गन्धादौ तत्तत्सम्बद्धे पार्थिवघ्राणेन्द्रियादिग्राह्यत्वस्य प्रसिद्धत्वादिति भावः॥ ५३॥

श्रोत्रस्यां ह- केचित्तु तन्न श्रोत्रं तस्य सच्छिद्रे नित्यतया रो-
ङ्कारिकत्वम्। गादिना नाशाभावेन बाधिर्यानापत्तेः। न च धर्मविशेषविशिष्टनभः श्रोत्रं तस्य च धर्मस्य रोगादिनाभिभव औषधेन च तदुद्भव इति वाच्यम्। लाघवेन नभोधिष्ठानकधर्मविशेषस्यैवाहङ्कारिकस्य श्रोत्रत्वौचित्वात्। एवमन्यान्यपि घ्राणादीनि तदैक्यरूप्याय पृथ्वीजलवायुतेजोधिष्ठानकान्येव। अत एव योगीन्द्रियाणामत्यन्तदूरदेशस्थविषयोपलब्धिजनकत्वं पृथ्व्यादिविकाराणां तावद्दूरदेशगमनासम्भवात्। अहङ्कारस्य तु अन्तःकरणपरिणामत्वादन्तःकरणस्य चाधुनातिबहुदूरदेशगमनानुभवात् तद्विकाराहङ्कारविकाराणां तत्सम्भवात्। योगस्तु प्रतिबन्धकतमोनिवर्तक एवेत्यग्रे निरूपयिष्यामः। तत्तद्ग्राह्यगुणाधिष्ठानानि च तानि भूतानि। तेषु च ते गुणा अनुद्भूताः। तत्तद्गुणसामानाधिकरण्यात् पृथ्व्यादिगतगुणग्रहणमिन्द्रियैः। एवं च श्रोत्रमेव चित्तवृत्तिसहकृतं स्ववृत्तिपरम्परया शब्ददेशमागतं शब्दं गृह्णाति। अत एव तत्तद्देशवृत्तित्वेन शब्दप्रतीतिः।

यद्वा अणूनां सर्वशक्तीनां सर्वदेशव्यापितया तेजो-नभ आदिपरमाणूनां विषयदेशपर्यन्तं तत्तदिन्द्रियस्य तत्तद्विषयौन्मुख्ये तत्तदिन्द्रियरूपेण परिणामात्तत्तद्देशे प्रत्यक्षमिति वदन्ति ॥ ५४ ॥

(कुं०टी०) तन्न श्रोत्रमिति। श्रोत्रस्य नभोरूपत्वे रोगादिना नाशो न स्यादित्यर्थः । लाघवेनेति । धर्मिकल्पनायामुभयकल्पने गौरवादिति भावः । नभोधिष्ठानकेति । कर्णशष्कुल्यवच्छिन्ननभो-निष्ठेत्यर्थः । धर्मविशेषेति । शब्दग्रहणयोग्येत्यर्थः । आहङ्कारिक-स्येति । सात्विकाहङ्कारादिन्द्रियाणीति सांख्यमते इन्द्रियाणां स्वाधिष्ठानभूतवृत्तिगुणग्राहकत्वात् श्रोत्रोपलब्ध्या शब्दस्याका-शदेशत्वम् । घ्राणादीति । नासिकावच्छिन्नपृथिवीधर्मो घ्राण-मित्यादिरीत्येत्यर्थः । यत्तु गन्धग्राहकत्वाद्घ्राणं पार्थिवमिति तार्किकास्तन्नेत्याह । आहङ्कारिकाण्येवेति । अयम्भावः घ्राणा-दिना न्यूनपरिमाणेन महापरिमाणं गृह्यते न महतो व्यापनं स-म्भवति अव्याप्यग्रहणे चातिप्रसङ्गस्तस्माद्भौतिकादतिरिक्तमि-न्द्रियमिति । अत एवेति । घ्राणस्य पार्थिवत्वेन देशान्तरे गमना-भावात्प्रत्यक्षं न स्यादित्यर्थः । तावद्देशेति । अत एव गोलकमेव च क्षुरिति बौद्धमतमपास्तम् । अहङ्कारो ऽहमिति प्रथमाध्यासः स्वप्नावस्थायां नरस्य व्याघ्रत्वाभिमाने सति न नरो ऽहमित्य-भिमानो भवति। अतस्तन्नियमाय नियतविषयव्यापको ऽहङ्कारः स्वीकार्यः स च बुद्धितत्त्वस्य परिणामः । जाग्रत्स्वप्नसुषुप्तिषु श्वासप्रश्वासदर्शनात्सव्यापारं यदनुवर्तते तद्बुद्धितत्त्वम् । अ-न्तःकरणपरिणामत्वादिति । मनोबुद्धिरहङ्कारश्चित्तं चेति च-त्वारि अन्तःकरणानि गर्वरूपवृत्तिविशेषादहङ्कारसंज्ञां लभन्ते ।

तद्विकारेति। अन्तःकरणविकारो यो ऽहङ्कारस्तद्विकाराणामिन्द्रियाणामित्यर्थः। ननु न योगीन्द्रियाणां दूरदेशगमनं किन्तु योगजधर्म एव प्रत्यक्षे सहकारीत्याशङ्क्याह। योगास्त्विति। तमो निवर्तक इति। सुषुप्तौ तमसो वृत्तिप्रतिबन्धकत्वदर्शनात्। ततश्च योगिनामपि इन्द्रियसम्बन्धादेव प्रत्यक्षभूतभविष्यतोरपि सूक्ष्मावस्थासन्निकर्षेण प्रत्यक्षम्। इन्द्रियाणामन्तर्बहिर्भावस्य व्यवस्थितानां स्थिरा अविचालिनो धारणैकाग्र्यलक्षणो योगः। नन्विन्द्रियाणां गुणाश्रयत्वे चक्षुरादिना गन्धादीनामपि प्रत्यक्षापत्तिरत आह। तत्तद्गुणेति। श्रोत्रग्राह्यस्य शब्दस्याश्रय आकाशः शब्दश्चानुभूत इति न सर्वदा प्रत्यक्षं किं तु श्रोत्रशब्दयोः सम्बन्धे सति प्रत्यक्षमित्यर्थः। अनुद्भूत इति। तेन चक्षुरादौ न रूपादिप्रत्यक्षम्। ननु घ्राणस्य सम्बन्धो योगो द्रव्ये ऽस्ति न तु गन्ध इत्यत आह। सामानाधिकरण्यादिति। श्रोत्रमेवेति। अन्तःकरणमेवेन्द्रियद्वारा विषयदेशे गत्वा गृह्णातीत्यर्थः। तार्किकमते मनः संयोगस्यापि ज्ञानहेतुत्वादुक्तं चित्तवृत्तीति। एतन्मते वृत्तिवेरेन्द्रियसन्निकर्षः। अत एवेति। यदि हि श्रोत्रदेशे एव प्रत्यक्षं स्यात्तदा ग्रामान्तरे शब्दः श्रूयत इति प्रतीतिर्न स्यादित्यर्थः। यद्यपि कर्णशष्कुल्यवच्छिन्ननभोरूपश्रोत्रस्य देशान्तरगमनं न सम्भवति तथापि श्रोत्रं परिच्छिन्नपरिमाणमित्युक्तमेव। वीचीतरङ्गादिन्यायेन श्रोत्रगतं शब्दान्तरं गृह्यत इति तु न युक्तम्। भेरीशब्दो मया श्रुत इत्यनुभवविरोधात्। भ्रमादिकल्पने बीजाभावात्। सर्वशक्तीनाम्। सर्वशक्तियुक्तानाम्। नभ आदीति। नभः परमाणूनामेव शब्ददेशे श्रोत्रत्वेन परिणाम इत्यर्थः। परमाणूनामिति। तत्तदिन्द्रियरूपेण परिणामादित्यत्रान्वयः। ननु परमाणूनामेवेन्द्रियत्वे अस-

न्निकृष्टस्यापि प्रत्यक्षापत्तिरत आह । विषयदेशेति । प्रत्यक्षविषयदेशेत्यर्थः ॥ ५४ ॥

(क० टी०) सांख्यमतेन मतान्तरमाह । केचिदिति । तत् । नभः । तस्य । नभसश्छिद्रे । प्रदेशधर्मविशेषेति । तत्तद्रूपविकारेत्यर्थः । अत एव विशेषपदम् । नैवं प्रागुक्तदोष इत्याह । तस्य चेति । लाघवेनेति । विशिष्टे तत्त्वकल्पनापेक्षया विशेषणमात्रे तत्त्वकल्पनस्य लघुभूतत्वात् । उक्तभाष्यादेवाह । नभोधीति । तस्य विकारत्वेन वक्ष्यमाणदोषात्सांख्यमतमाह । आहङ्कारीति । तत्परिणामस्येत्यर्थः । प्रसङ्गादाह । एवमिति । ननु तत्र तथैवास्तामत आह । तदेकेति । श्रोत्रैकेत्यर्थः । सम्भवत्यैकरूप्ये वैरूप्यस्यान्याय्यत्वादिति भावः । आहङ्कारिकत्वे हेतुरयम् । इदं द्रढयति । अत एवेति । तत्रादौ विपक्षे बाधकमाह । पृथ्व्यादीति । अस्यान्यथेत्यादिस्तत्र स्यादित्यन्तश्च अन्यत्र तथाऽदृष्टत्वादिति भावः । अत एवेत्यस्यार्थमाह । अहङ्कारस्येति । ननु तन्मते ऽपि तेषां योगजधर्मप्रत्यासत्त्याऽलौकिकं प्रत्यक्षमित्युक्तमेवेति न दोषो ऽत आह । योगस्त्विति । एवेन तस्य प्रत्यासत्तित्वव्यवच्छेदो गौरवापत्तेस्तदाह । इत्यग्रे इति । नन्वत्र पक्षे भूतत्वं केषां गन्धादीनां गुणत्वं च केषामत आह । तत्तदिति । पृथ्व्यादिरूपभूतानीत्यर्थः । अत्र मते इन्द्रियाणां स्वाधिष्ठानभूतवृत्तिगुणग्राहकत्वनियमादिति भावः । नन्वेवमिन्द्रियाणामपि पार्थिवत्वादिसिद्ध्या तेष्वपि तत्तद्गुणावश्यकत्वेन तेषामपि प्रत्यक्षत्वापत्तिरत आह । तेषु चेति । इन्द्रियेष्वित्यर्थः । अनतिप्रसङ्गायोक्तप्रकारमेवाह । तत्तदिति । नन्वत्र पक्षे श्रोत्रस्य जन्यत्वेन नित्यत्वे एकत्वविभुत्वाभावेन कथं दूरस्थशब्दप्रत्यक्षमत आह । एवं चेति । तस्यान्तःकरणपरिणामाहङ्कारपरिणामत्वे चेत्यर्थः । केवलस्ववृत्तिपरम्परायां मानाभावादाह । चित्तवृत्तीति । तत्र तथात्वादिति भावः । अनेन बाधिर्यापत्तिनिरासः । आगतं सदिति शेषः । नन्वेवं को विशेषो नैयायिकमतादत आह । अत एवेति । तदागमनस्य तत्रैवाङ्गीकारादेवेत्यर्थः । तन्मते तु तथा प्रतीतिर्न स्यादिति भावः । नाहङ्कारपरिणामत्वमिन्द्रियाणां तथा सति तेषां तत्तदधिष्ठानकत्वं क्लेशसाध्यमिति गौरवमित्यतो ला-

घवादणुपरिणामत्वमेव तेषामिति मतमाह । यद्वेति । सर्वशक्तानीम् । तत एव सर्वस्थूलसृष्टेरणूनां शब्दतन्मात्रादिरूपाणाम् । अणवः सर्वशक्तित्त्वाद्भेदसंसर्गवृत्तय इति प्रागुक्तहर्युक्तेः । अत एवाह । सर्वेति । तत्तदधिष्ठानत्वसिद्ध्यर्थमाह । तत इति । तज्जनकानां तेषामित्यर्थः । तत एव तदुत्पत्तेरिति भावः । तत्तान्द्रियरूपेण परिणामादित्यत्रान्वयः । अत एव व्यापकत्वादाह । विषयेति । अनतिप्रसङ्गायाह । तत्तदिन्द्रियस्येति । तत्तादिन्द्रियत्वेनाभिमतस्येत्यर्थः ॥ ५४ ॥

(आकाशदेशत्वसिद्धिः) तन्मते ऽप्युक्तयुक्त्याकाशदेशत्वमेव । किञ्चानन्तश्रोत्रवृत्तिकल्पनापेक्षयानन्तपरमाणुपरिणामकल्पनापेक्षया च तस्यैकस्य कल्पने लाघवम् । तत्तद्देशव्याप्याभिव्यक्तिमतश्च तेन ग्रहणमिति तत्तद्देशवर्तित्वानुभवो न विरुद्धः । यथा चैकस्याप्याकाशस्य घटाकाशो मठाकाश इत्यौपाधिकभेदः, यथा चैकस्यैव चेतनस्यौपाधिको जीवेश्वरभेदो जीवानां च परस्परं भेद एवमौपाधिकभेदं लोकसम्मतमाश्रित्याकृतिग्रहणादिति तत्सूत्रे भाष्ये उक्तम् । किञ्च जातिरपि मास्तु रूपसामान्यादेव स्थूलकृशाल्पमहद्ध्रस्वदीर्घगोघटादिषु गौरित्यादिवत्सर्वत्रैकाकारव्यहारः। अन्यथा संस्थानभेदादनुगतसंस्थानव्यङ्ग्याजातिरपि तत्र न स्यादित्याशयेन रूपसामान्याद्वा सिद्धिमिति तत्रैव भाष्ये उक्तम् । रूपसादृश्यादिति तदर्थः । एतेन वर्णानां गृहीतसङ्केतानां व्यञ्जकत्वमगृहीतसङ्केतानां वा । आद्ये तैरेवोपपत्तौ किं तेन । नान्त्यः । सर्वस्यार्थबोधापत्तेः । तदुक्तं सांख्यसूत्रे प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्द इति । यदि वर्णसमुदायेन तत्प्रतीतिस्तदोक्तरीत्या तद्वैयर्थ्यम् ।

अथ न प्रतीयते तदा ज्ञातस्याप्यप्रत्यायकत्वाद्व्यर्था तत्कल्पनेति तदर्थ इति सांख्योक्तं तदनुसार्युपवर्षोक्तं च स्फोटखण्डनमपास्तम् ॥ ५५ ॥

(कुं० टी०) क्रमेण दूषयति । किञ्चेति । ननु श्रोत्रस्यैकत्वे दूरवर्तित्वानुभवो न स्यादत आह । सव्यापीति । अभिव्यक्तिरेव दूरदेशं व्याप्नोतीत्यर्थः । ननु सकलदेशस्थस्य शब्दस्यैकत्वे तत्र जात्यभावादाकृतिर्गृह्यत इति भाष्यासङ्गतिरत आह । यथा चेति । नभसो जन्यत्वं तैत्तिरीयके प्रसिद्धम् । छान्दोग्ये तु नित्यत्वमुक्तम् । विरोधपरिहारो गौणमुख्यव्यपदेशाभ्यां शारीरकभाष्ये व्यक्तः । जीवेश्वरेति । अन्तःकरणसाहित्यराहित्याभ्यां जीवेश्वरयोर्भेदात् । औपाधिकमिति । ध्वनिगतभेदस्य वर्णेष्वारोपात् । आकृतिग्रहणादिति । अइउण् इत्यादावकाराद्याकृतिर्गृह्यत इत्यर्थः । अन्यथा । सकलसादृश्यग्रहणे । तैरेव । वर्णैरेव । किं तेन । किं स्फोटेन । सर्वस्येति । अगृहीतसङ्केतस्यापीत्यर्थः । यदीति । स्फोटस्य बोधको यदि वर्णसमुदायस्तदा सोऽर्थस्यैव बोधकोऽस्तु किं स्फोटेन, यदि च स न स्फोटबोधकस्तदा अज्ञातस्य स्फोटस्यार्थबोधकत्वासम्भवात् स्फोटो व्यर्थ इत्यर्थः ॥ ५५ ॥

(क० टी०) ननूक्तसिद्धान्तविरुद्धमिह मतद्वयं किमित्याभिहितमत आह । तन्मतेऽपीति । केचिन्मतेऽपीत्यर्थः । उक्तेति । इन्द्रियाणां स्वाधिष्ठानभूतवृत्तिगुणग्राहकत्वानियमरूपेत्यर्थः । एवं च तावन्मात्रांशैक्यमेवेति तद्द्रढयितुमुक्तमिति भावः । नन्वेवमपि केचिन्मतरीत्यापि प्रत्यक्षाद्युपपत्तौ किमिति तत्पक्षत्यागेन तत्पक्षस्वीकारोऽत आह । किञ्चेति । आद्ये आह । अनन्तेति । तस्य । वाचकस्य शब्दस्य । नन्वेवं तस्य श्रोत्रसम्बन्धेन तत्र प्रत्यक्षे तत्तद्देशवर्तित्वानुभवविरोधापत्तिरित्यगत्या गुरूभूततत्पक्षाश्रयणमेव

युक्तमत आह । तत्तदिति । फलवत्त्वेनावश्यकाभिव्यक्तेस्तथैव कल्पनादिति भावः । नन्वेवमानन्त्यव्यभिचारयोरभावे जात्यनुपयोगेनाणुदित्सूत्रभाष्यविरोधापत्तिरत आह । यथा चेति । लोके तथा प्रतीतेराह । लोकेति । एतेन निर्मूलत्वं निरस्तम् । तत्सूत्रे । अणुदित्सूत्रे । इदं चाभिप्रेत्योक्तम् । वस्तुतः सापि मास्त्विति लाघवमेवेत्याह । किञ्चेति । रूपेति । यत इत्यादिः । अर्थदृष्टान्तमाह । स्थूलेति । सर्वत्र । ह्रस्वादिवर्णादिषु । विपक्षे बाधकमप्याह । अन्यथेति । तदनङ्गीकारे इत्यर्थः । एतेनेति । प्रागुक्तसम्भावितसर्वदोषेण पदप्रत्यक्षासम्भवस्योक्तत्वेन चेत्यर्थः । गृहीतेति । तदर्थविशेषणेत्यादिः । व्यञ्जकत्वमित्यस्य स्फोटेत्यादिः । किं तेनेति । तत एवार्थबोधोपपत्त्यातिरिक्ततत्स्वीकारवैयर्थ्यादित्यर्थः । सर्वेति । तद्भिन्नस्यापीत्यर्थः । स्फोटाभिव्यक्तेः सत्त्वादिति भावः । यदीति । सङ्केतग्रहादिति भावः । तदर्थः । सांख्यसूत्रार्थः ॥ ५५ ॥

(अगृहीतसम्बन्धैरपि स्फोटव्यञ्जनम् ।) अगृहीतसम्बन्धैरपि तस्य व्यञ्जनमस्त्येव । अत एवागृहीतार्थकेऽप्येकं पदमित्यनुभवः । अत एव वाचस्पतिमिश्रास्तत्त्वबिन्दौ गकारादतिरिच्यमानमूर्तेः ककारस्याभावादिति स्फोटवादिमतमुपन्यास्थन्नित्यलम् । परे तु अवर्णादीनामेकत्वं नित्यत्वं विभुत्वं च तदवयवकपदादेरपि तत्त्वम् । कण्ठताल्वाद्यभिघातस्तद्व्यञ्जकः । देशभेदेऽपि पटादीनां देशघटितसन्निवेशाभेदवत्कालभेदेऽपि तद्घटितानुपूर्व्या अभेदः ।

प्रत्यक्षप्रत्यभिज्ञानाद्वर्णैकत्वं प्रतिष्ठितम् ।
वर्णात्मकं पदं तच्च तद्भेदान्न भिद्यते ॥

इत्युक्तेः ॥ ५६ ॥

(कुं० टी०) अगृहीतेति । सङ्केताग्रहेऽपि पदत्वानुभवादित्यर्थः । अवर्णादीनामिति । सर्वत्राकारो विभुत्वादेक एव

एवं वर्णान्तरमपीत्यर्थः । तदवयवकेति । आकारादिघटितपदस्यापि नित्यत्वादित्यर्थः । नन्वकारादेर्नित्यत्वे सर्वदा तदुपलम्भः स्यादत आह । कण्ठताल्वादीति । देशभेदे ऽपीति । यथा ऊर्ध्वाधोदेशावच्छिन्नस्याकृतिविशेषस्य संस्थानतया प्रतिव्यक्ति देशभेदे ऽपि न संस्थानभेद एवं पदे कालघटितानुव्यां न भेद इत्यर्थः । प्रत्यक्षप्रत्यभिज्ञानात् । सो ऽयं ककार इति प्रतीतेः ॥ ५६ ॥

(क० टी०) नन्वेवमपि तदुक्तकोटिमते काभिमता सापि दुष्टत्वात आह । अगृहीतेति । वर्णैरित्यर्थः । अपिना तत्परिग्रहः। एवञ्चोभयमपि सम्मतम । तस्य । स्फोटस्य । नन्वेवं प्रागुक्तदोषापत्तिरेवान्यथा नैष्फल्यमपि व्यक्तेरत आह । एवेति । तैस्तस्य व्यञ्जनसत्त्वादेवेत्यर्थः । एतेन काव्यादिश्रवणे तत्तदर्थैरगृहीतसम्बन्धस्यापीदमेकं पदमिदमेकं वाक्यमित्यादिस्फोटप्रतीत्यापत्तेरन्त्यपक्षो न युक्त इत्यपास्तम् । तैरेव यथा नोपपत्तिस्तथा प्रागुक्तमेव । एवं यत्राद्यस्वीकारस्तत्र पदादिप्रत्यक्षमर्थावबोधश्च यत्र द्वितीयस्वीकारस्तत्र भावे ऽपि तस्य तत्सङ्केतग्रहे उभयमन्यत्र पदादिप्रत्यक्षमात्रमेवेति न प्रागुक्तदोषो नापि नैष्फल्यमिति भावः । एवं साधिते वेदान्तिसम्मतिमप्याह । अत एवेति । स्फोटस्यातिरिक्तस्य सत्त्वादेवेत्यर्थः । स्यादेतत्, अनवयवमेव वाक्यं वाचकमित्युक्त्वा वर्णा एवानुभूयन्ते न तदतिरिक्तं पदादीत्याशङ्क्य पदं वाक्यमिति चानुसंहारबुद्धावभिन्नस्य वस्तुन उपारोहात्तदतिरिक्तमिति समाधाय नेयमभिन्नबुद्धिर्नानावर्णगोचरा एकत्वनानात्वयोरेकत्रासमवायादिति तदुपपाद्य न चावर्णात्मनो ऽतत्समवायिनो वा वाक्यस्य कुतस्तदुपरागवती प्रख्येति वाच्यम् । तदतिरिच्यमानमूर्तीनां परमार्थसतां वर्णानामभावादिति तत्र तैरुक्तम् । किञ्च प्रागुक्ताइउण्सूत्रभाष्ये शब्द इत्येकवचनोक्तिस्वारस्यैनैकस्यैवाद्यध्वनिमारभ्यान्तजातध्वन्यन्तेन व्यङ्ग्यता लभ्यत इति स्फोटस्याखण्डत्वमेकत्वं च लभ्यते इति स्पष्टमेवाक्षरमार्मिकाणाम् । न च तत्प्रागुक्तमतसिद्धातिरिक्तपदविषयकमिति भ्रमितव्यम् । अकारमपि नोपलभते इत्युपक्रमविरोधादिति

दिक् । तदाह । इत्यलमिति । बाह्यवैखरीरूपमखण्डस्फोटपक्षमाह । परे त्विति । अन्ये । मीमांसकानुसारिण इत्यर्थः । एकत्वमिति । प्रत्येकमिति भावः । तावन्मात्रेण विवादादाह । तदेति । तत्त्वम् । धर्मत्रयाक्रान्तत्वम् । कण्ठाद्यभिघातरूपजनकत्वं तस्या न तु तज्जनकत्वमिति भावः । ननु वर्णानामेकत्वेऽपि न पदादेरेकत्वं कालघटितानुपूर्वीभेदात् तथाचानन्त्यव्यभिचारसत्त्वमेवात आह । देशेति । तत्र हरिसम्मतिमाह । प्रत्यक्षेति । समाहारद्वन्द्वः । तच्चेत्यादितृतीयवाक्यार्थः । चेन वाक्यसमुच्चयः । तदभेदात् । वर्णाभेदात् । तथाचास्य तत्र तात्पर्यमिति भावः ॥ ५६ ॥

(शब्दानित्यत्वम्) दिनान्तरानुभूते ऽधुनानुभूयमानस्य सोऽयमिति प्रत्यभिज्ञया तावत्कालं स्थिरत्वसिद्धेस्तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यतीति न्यायात्पराभिमताशुविनाशित्वव्यतिरेके सिद्धे नित्यत्वपर्यवसानम् । सर्वदेशेषु तदुपलम्भाद्विभुत्वम् । लाघवाच्चैकत्वम् । आनुपूर्वीघटकमव्यवहितोत्तरत्वं चैतत्पक्षे उत्पत्त्यनवच्छिन्नस्वज्ञानाधिकरणकालोत्पत्तिकज्ञानविषयत्वम् । यथात्यन्तरागवतः कामिनीसाक्षात्कारस्थले ज्ञानधाराकल्पने गौरवादेकत्वं तद्वत् ज्ञानामप्येतद्विषये स्थिरः ॥ ५७ ॥

(कुं० टी०) व्यतिरेके । अभावे । ननु वर्णानां विभुत्वनित्यत्वे च घकारे तादृशाव्यवहितोत्तरक्षणोत्पत्तिकत्वरूपानुपूर्वी कथमत आह । अव्यवहितोत्तरत्वेति । स्वज्ञानेति । उत्पत्त्यनवच्छिन्नो घकारज्ञानाधिकरणीभूतो यः कालस्तत्कालोत्पत्तिकटकारज्ञानम् । प्रथमक्षणस्यापि घज्ञानाधिकरणत्वादुक्तमुत्पत्त्यनवच्छिन्नेति । ननु तृतीयक्षणे ज्ञानस्य नाशात्तृतीयादिवर्णाधिकरणकालस्य कथं पूर्वज्ञानवत्त्वमत आह । ज्ञानानामपीति ।

अयम्भावः धारावाहिकबुद्धिस्थले न ज्ञानभेदः किन्तु यावद्घटस्फुरणं तावद्घटाकारान्तःकरणवृत्तिरेकैव न तु नाना । स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं वृत्तेः स्थिरत्वाभ्युपगमात् । तत्फलितचैतन्यं घटादिज्ञानात्मकमपि तावत्कालिकमेवेति । किञ्च ज्ञानधाराकल्पने अनधिगतार्थविषयकज्ञानत्वं प्रमात्वमिति लक्षणस्याव्याप्तिः ॥ ५७ ॥

(क० टी०) ननु तेषामेकत्वादावेव किं मानमतो व्युत्क्रमेणाह । दिनान्तरेति । प्रत्यभिज्ञायामन्वयाभेदप्रतीत्वेति तदर्थः । व्यावहरिकनित्यत्वे ऽपि वास्तवानित्यत्वाभावादाह । पर्यवेति । नन्वेवं कथमुत्पत्त्यादिघटितमव्यवहितोत्तरत्वमत आह । आनुपूर्वीति । ननु पूर्ववज्ज्ञानभेदे ऽपि तदघटितानुपूर्व्या अभेदे ऽपि ज्ञानस्य क्षणिकत्वेन तदधिकरणकालोत्पत्तिकत्वं ज्ञानान्तरे बाधितमेवेतीदमपि दुर्वचमत आह । यथेति । प्रासादे सा दिशि दिशि वसायथेत्यादाविति भावः । ज्ञानानामपि । स्वभिन्नानामपि । अनतिप्रसङ्गायाह । एतदिति । वर्णादिविषये इत्यर्थः ॥ ५७ ॥

(शब्दस्य स्थिरत्वम्) शब्दबुद्धिकर्मणां क्षणिकत्वमिति तु न युक्तम् । इदानीं जानामि उच्चारिता इति व्यवहारात् । अन्यथा क्षणस्यातीन्द्रियतया इदानीमिति ज्ञानासम्भवः । परस्य तूत्पत्त्यादीनां भेदव्याप्यानां विरोधिनां सत्त्वेन प्रत्यभिज्ञानुत्पत्त्यापत्तेः । न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः । द्वयोर्घटयोरपि सो ऽयमिति प्रत्यभिज्ञापत्तेः । प्रत्यभिज्ञाया व्यक्तिविषयकत्वे बाधकाभावात् । न च गकार उत्पन्न इति प्रतीतिर्बाधिका । श्यामो नष्टो रक्त उत्पन्न इति प्रतीतेः रूपगतोत्पत्तिविनाशारोपेण परम्परासम्बन्धेन वोपपत्तिवत् ध्वनिनिष्ठोत्पत्तेरारोपेण परम्परासम्बन्धेन वा तदुपपत्तेः । वर्णोच्चारणस्थले ऽपि तत्स्थाने

जिह्वाया ईषदन्तरपाते वर्णानुपलब्धेर्ध्वन्युपलब्धेश्चानुभवेन हसितरुदितादौ जिह्वाभिघातवायुकण्ठसंयोगादेस्तज्जनकत्वस्यावश्यकत्वेन च वर्णोत्पत्तौ तदनङ्गीकारे प्रतिबध्यप्रतिबन्धकभावकल्पनागौरवेण च तत्सत्यावश्यकत्वात् । अत एव बहुषु शब्दमुच्चारयत्सु महान् ध्वनिः श्रूयते इति प्रतीतिः । यदि तु स एवायं शङ्खध्वनिरित्यादिप्रत्यभिज्ञया ध्वनीनामपि नित्यत्वं तर्हि तज्ज्ञानकरणीभूतवायुसंयोगनिष्ठं तत् तत्रारोप्यते परम्परया बुध्यत इति वा बोध्यम् । एवमेव शब्दं कुर्वित्यादिव्यवहार उच्चारयेति तदर्थो वा । लोहितः स्फटिक इत्यादावप्यारोप एव न तु परम्परया तत्प्रतीतिः । उक्ते स्वसमवायिसंयुक्तत्वं सम्बन्धः । स्फटिकस्य लौहित्यमित्यत्र स्वसंयुक्तसमवेतत्वं सम्बन्ध इत्युभयोः सम्बन्धत्वकल्पने गौरवात् । वस्तुतः सर्वत्रारोप एवोचितः रसो रूपवानित्याद्यप्रतीत्या परम्परासम्बन्धस्य विशिष्टबुद्ध्यनियामकत्वात् । एवमुदात्तत्वादिकमपि तन्निष्ठमेव तत्रारोप्यत इति नोदात्तादिगुणभेदादनेकत्वं वर्णानाम् । किञ्च प्रागनुपलभ्यमानत्वे सत्युपलभ्यमानत्वादिरूपेणोत्पन्नविनष्टसादृश्येन तत्रोत्पत्तिविनाशयोरारोपः । किञ्च प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्न वर्णेष्वनुभवो वर्णमुच्चारयतीत्येव प्रत्ययात् । उच्चारितत्वं च कण्ठताल्वाद्यभिघातजन्याभिव्यक्तिविशिष्टत्वम् । स्त्रीशुकाद्यनुमापकं तज्जन्यतावच्छेदकवैजात्यं च ध्वनिनिष्ठं वायुसं-

योगनिष्ठं वा वर्णेष्वारोप्यत इति तदुपपत्तिः । तारत्वाद्यपि तन्निष्ठमेव । अत एव भामत्यां तारत्वादिवायुनिष्ठं वर्णेष्वारोप्यत इति देवताधिकरणे ऽभिहितम् । यद्वा तारत्वादयो गुणाः शब्दनिष्ठास्तदाश्रयत्वाच्छब्दस्य द्रव्यत्वम् । आकाशरूपद्रव्याश्रयत्वाद्गुणत्वं च । कस्य चित् कश्चिद्वायुसंयोगस्तारत्वव्यञ्जक अपरस्य तु मन्दत्वव्यञ्जकस्तयोर्विरोधव्यवहारो ऽपि येन वायुसंयोगेन यं प्रति तारत्वं व्यज्यते तम्प्रति मन्दत्वाव्यञ्जनमूलकः परैस्तु कण्ठताल्वाद्यभिघातोत्पन्नस्य केन चिन्मन्दत्वेन ग्रहणं केन चित्तारत्वेन ग्रहणमित्यत्र बीजं निर्वक्तुमशक्यम् । एतदुच्चैरित्यत्र भाष्ये स्पष्टम् । शुकसारिकानवनार्याद्युच्चारणव्यङ्गेषु तत्तदुच्चारितत्वानुमापकानि वैजात्यान्यपि वर्णनिष्ठानीति विजातीयवायुसंयोगव्यङ्ग्यान्येव । प्रकृतिविकारभावस्तु बुद्धिविपरिणामेनैवोक्तरीत्या निर्वाह्यः । अन्यगतोत्पत्तेरन्यत्रारोपे बीजं तु अन्तःकरणस्य रागादिदोष एव । सेयं दीपकलिकेत्यादौ मानान्तरेण नाशसिद्धेः सेयमित्यंशे भ्रमत्वम् । न च नित्यत्वे वायुसंयोगादेः ककारादिप्रत्यक्षत्वं कार्यतावच्छेदकं वाच्यं मम तु कत्वमेवेति लाघवमिति वाच्यम् । अनन्तप्रागभावध्वंसादिकल्पनापेक्षया लघुत्वात् प्रत्यक्षत्वावच्छिन्नविषयतया कत्वस्यैव तत्कार्यत्वावच्छेदकत्वाच्च । न चैवं घटाद्यपि नित्यं स्यात् कपालसंयोगादिकं च व्यञ्जकं भविष्यतीति वाच्यम् । वर्णवादित्यत्र तदग्रहविपरीतग्रहयोरभावेनो-

त्पत्तिप्रतीतेर्विना बाधकं भ्रमत्वायोगात् । किञ्चैतत्कुलालादिव्यापारानन्तरमनुभूयमानस्य तद्व्यापारतः प्रागननुभूतेन घटेन नाभेदप्रत्यभिज्ञा, अत्र त्वेतत्कण्ठताल्वादिव्यापारानन्तरमनुभूयमानस्य ततः प्रागनुभूतेनैवाभेदप्रत्यभिज्ञेति विशेषात् । नित्यत्वे चैषां सृष्ट्याद्यकालोत्पत्तिकत्वं प्रलयकालनाश्यत्वं चेत्येतावदेव । अत एवौत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इत्युक्तं जैमिनिना । औत्पत्तिकशब्देनेदमेव नित्यत्वं वक्तुं शक्यं नान्यादृशम् । एवं मन्त्राधिकरणे उक्तेन शब्दार्थसम्बन्धनित्यत्वेन वेदस्य निरपेक्षबोधकत्वरूपप्रामाण्यं समर्थ्य शब्दार्थसम्बन्धनित्यत्वमयुक्तं शब्दानामनित्यत्वादिति तदाक्षेपसमाधानाय शब्दनित्यतासिद्धान्तकं शब्दाधिकरणमारब्धम् । तच्च वाचकनित्यतापर्यन्तं तात्पर्यमवगमयति न तु वर्णनित्यतामात्रे इति बोध्यम् । अत एवानेककर्तृकोच्चारणविषये ऽप्येकमिदं घटपदमिति प्रत्ययः । एक इन्द्र शब्दो ऽनेकेषु क्रतुष्वाविर्भवतीत्यादिना सरूपसूत्रे भाष्ये स्फुटमेतत् । न हीयमेकत्वधीर्वर्णविषया तेषामनेकत्वात् । वनराज्याद्यप्यतिरिक्तमेव । न चैकार्थबोधहेतुत्वेनैकत्वम् । तेनैकत्वमेकत्वेन चैकार्थधीहेतुतेत्यन्योन्याश्रयापत्तेः । किञ्चार्थबोधाभावे ऽप्येकं पदमित्यादेरप्रसिद्धार्थपदश्रवणे दर्शनादेकबुद्धिविषयत्वेन तु न तत्त्वम् । सर्वोच्चारणविषयेन्द्रशब्दानामेकज्ञानविषयत्वासम्भवात् । न चैकजातीयबुद्धि-

विषयत्वम् । विषयैक्ये बुद्धीनामेकजातीयत्वं तदेकजातीयत्वे न च विषयैक्यमित्यन्योन्याश्रयात् । किञ्चैवमेकः पट इति व्यवहारस्याप्येकबुद्धिविषयतया तत्समूहेनैवोपपत्तौ तत्राप्यतिरिक्तावयव्यसिद्ध्यापत्तिः । यदि तत्रैक इति व्यवहारात्सिद्धिः तर्हि प्रकृतेऽपि समम् । न चैकशब्द इत्यस्य एकजातीय इत्यर्थः । तावच्छब्दकल्पनं तत्र चैकजातिकल्पनमित्यपेक्ष्य तदेकत्वस्यैवोचित्यात् । घटत्वजात्यैक्येन दशसु घटेषु एको घट इति प्रतीत्यापत्तेश्च । एकजातीय इन्द्रशब्द इत्यव्यवहाराच्च । तच्चेह पदं प्रकृतिप्रत्ययविभागवत् प्रकृत्यादिकमपि नित्यमेव यद्वा अखण्डमेव तत् । अन्यथा वर्णानामपि तस्यादित इति शास्त्रबलात् ऋकारादिषु च रेफलृकाराकारेकारादिभागानामनुभवसिद्धत्वाच्च भागवत्त्वे भागानामपि तुल्यन्यायादवयवकल्पनायां परमाणुतुल्यानामवशेषः स्यादिति यैव घटादीनामवयवसमुदायरूपत्वे दुरवस्था सैवात्रापि । एवञ्च पदपदार्थव्यपदेशरहितं निरीहमेव जगत्स्यात् । सावयवत्वे नित्यताभङ्गश्च । वाक्यमपि पदविभागरहितमखण्डमेव वाक्यादपोद्धृत्य पदान्वाख्यायन्त इति भाष्यात् । तत्र क्वचिद्वाक्यस्यैव विभज्यान्वाख्यानं क्वचित्पदस्यैवेति लक्ष्यानुरोधाद्व्यवस्था । न च वर्णेषु नावयवास्तदवभासस्तु तत्तदुच्चारणविशेषव्यङ्गतत्तद्वर्णसमानाकारक्रमिकध्वनिविशेषोपरागोपाधिरिति वाच्यम् । पदे वर्णावभासस्य वाक्ये पदावभास-

स्याप्येवमेवोपपत्तेः। शास्त्रं तु रेखागवयन्यायेने-त्याहुः॥ ५८॥

(कुं०टी०) योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नविभुविशेष-गुणनाश्यत्वमिति तार्किकपरिभाषां निराकरोति। शब्देति। यथा द्वित्वप्रत्यक्षानुरोधादपेक्षाबुद्धेः क्षणत्रयावस्थायित्वं तार्किकैरपि स्वीक्रियते तथेहापीति भावः। इदानीमिति। इदानीं जानामी-दानीमुच्चारिता इति सम्बन्धः। अन्यथेति। इदानीं जाना-मीत्यादेरेतत्क्षणावच्छिन्नज्ञानवानहमित्यादिरर्थः। तथाच क्षणस्येव तन्मात्रवृत्तिज्ञानादेरपि प्रत्यक्षं न स्यादित्यर्थः। यावता समयेन चालितः परमाणुः पूर्वदेशं जह्यादुत्तरदेशमुप-सम्पद्येत स कालः क्षण इति पातञ्जलभाष्यम्। तस्य च क्षण-स्यातिसूक्ष्मत्वादतीन्द्रियत्वम्। निमेषस्य चतुर्थो भागः क्षण इति टीकाकृतः। कर्म तज्जनितविभागादिश्च तदुपाधिः। तदुक्तं वल्लभाचार्यैः।

रवेः स्पन्दक्षणस्तस्य नानाक्षणविशिष्टता।
क्रमो नानाविधोपाधिसम्बन्धः परिकीर्त्यते॥

इति। विभागप्रागभावाद्युपाधिविशिष्टो रवेः स्पन्दः क्षणः केवलस्पन्दस्यानेककालवृत्तित्वादित्यर्थ इति वर्धमानः। ननु रविस्पन्दे कथं क्षणचतुष्टयस्थायित्वव्यवहारः स्वस्य स्वावृत्ति-त्वादत आह। तस्येति। क्रमवद्विभागाद्युपाधिचतुष्कसम्बन्धात्तत्र क्षणव्यवहार औपचारिक इत्यर्थः। यत्तु क्रियात्मक एव काल इति तन्न। महाप्रलये क्रियाभावेन महाप्रलयोत्पत्तिव्यवहा-रानापत्तेः। परस्य त्विति। परमते तूक्त्यैव व्यक्तिभेदेनैवास-म्भवात्सो ऽयमिति प्रतीतिर्न स्यादिति भावः। गत्वावच्छि-

न्नेति । भिन्नव्यक्तौ तु तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक एव भेदो ऽस्ति न सामान्यधर्मावच्छिन्नप्रतियोगिताको ऽपि गकारत्वस्य तत्रापि सत्त्वादिति भावः । द्वयोर्घटयोरिति । तत्रापि घटत्वेन रूपेण भेदाभावादिति भावः । व्यक्तिविषयकत्वे इति । भवन्मते जातिविषयप्रत्यभिज्ञा स्यादिति भावः । श्यामो नष्ट इति । रूपनाशे धर्मिणो ऽपि नाशव्यपदेशात् । जिह्वासंयोगादीनां ध्वनिहेतुत्वं दर्शयति । वर्णोच्चारणेति । यत्र जिह्वासंयोगाद्वर्णस्य नाभिव्यक्तिस्तत्र ध्वन्युत्पत्तिदर्शनाद्वर्णस्थले ऽपि ध्वनिः स्वीकार्य इत्यर्थः । तज्जनकत्वेति । ध्वनिजनकत्वेत्यर्थः । वर्णोत्पत्ताविति । वर्णोत्पत्तिस्थले ध्वनेरनङ्गीकारे तादृशजिह्वासंयोगादीनां ध्वन्युत्पत्तिप्रतिबन्धकत्वं च कल्पनीयं स्यादित्यर्थः । तत्सत्त्वेति । ध्वनिस्वीकारेत्यर्थः । तत्त्रारोप्यत इति । वायुसंयोगनिष्ठमुत्पत्त्यादिकमारोप्यत इत्यर्थः । शब्दं कुर्विति । अत्रापि ध्वनिगतोत्पत्तेः शब्दे आरोप इत्यर्थः । ननु गुणचाक्षुषे चक्षुःसंयुक्तसमवायस्य हेतुतया तदभावात्कथं लोहितः स्फटिक इति प्रत्यय इत्यत आह । आरोप एवेति । परम्परामेव दर्शयति । उक्त इति । लोहितः स्फटिक इत्यत्र लौहित्यसमवायिनी या जपा तत्संयोगः स्फटिके । वर्णेष्वप्युत्पत्त्यादिरारोप्यत एव न तु परम्परयेत्याह । वस्तुत इति । रसो रूपवानिति रससमवायिसमवेतत्वस्य रूपे सत्त्वात् । अनियामकत्वादिति । एतेन विशिष्टप्रतीतिनियामकविशेषत्वं सम्बन्धत्वमित्यपास्तम् । किञ्चेति । प्रथमोपलम्भवत्त्वेनोत्पत्तिव्यवहार इत्यर्थः । इत्येव प्रत्ययादिति । उत्पादयतीति प्रतीत्यभावादिति भावः । ननूच्चारणे नित्यत्वापत्तिरत आह । उच्चारितत्वं चेति । स्त्रीशुकेति । स्त्रीशुकाद्युच्चारितत्वानुमापकमित्यर्थः । तज्जन्य-

तावच्छेदकेति। स्त्रीशुकादिजन्यतावच्छेदकेत्यर्थः। तदाश्रयत्वादिति। तारत्वाद्याश्रयत्वाच्छब्दस्य द्रव्यत्वमित्यर्थः। नन्वेवं शब्दस्य गुणत्वव्यवहारः कथमत आह। आकाशरूपेति। परैस्त्विति। एतस्य वक्तुमशक्यमित्यत्रान्वयः। मानान्तरेणेति। प्रत्यक्षेण नाशदर्शनादित्यर्थः। गत्वस्यैवेति। प्रत्यक्षविषयताया उत्पादादिति भावः। तदग्रहेति। उत्पत्त्यग्रहेत्यर्थः। विपरीतग्रहः। नित्यत्वग्रहः। प्रत्यस्याद्यगम्यत्वात्कथं धर्मस्य बुद्धिरित्याशङ्क्योक्तम्। औत्पत्तिकस्त्विति। औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशो ऽव्यतिरेकश्चार्थे ऽनुपलब्धेस्तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति सूत्रम्। अस्यार्थः शब्दार्थयोः सम्बन्ध औत्पत्तिकः उत्पत्तिर्भावस्तेनावियुक्तो नित्यः ज्ञायते ऽनेन ज्ञानमुपदिश्यते ऽनेन उपदेशः तस्य धर्मस्य ज्ञाने निमित्तमुपदेशो विधिवाक्ये शब्दो ऽस्य ज्ञानस्यार्थे ऽव्यतिरेको व्यभिचाराभावः प्रकारान्तरेणानुपलब्धेस्तद्विधिवाक्यं धर्मे प्रमाणं ज्ञानान्तरे तस्यानपेक्षत्वात् बादरायणस्यापि सम्मतमेतादिति। शब्दार्थसङ्केतरूपस्य पौरुषेयत्वाद्विधिवाक्यानां तत्सापेक्षत्वेनाप्रामाण्यमिति तत्र पूर्वः पक्षः। शब्दार्थसम्बन्धस्यानादित्वान्न सापेक्षत्वेनाप्रामाण्यमिति सिद्धान्तः। इदमेव। प्रवाहानादित्वरूपमेव। एवमत्रेति। अस्मिन्नधिकरणे एवमुक्तेन नित्यत्वेनेत्यन्वयः। ननु वृक्षसमूहे वनमिति वदेकत्वप्रत्ययस्तत्राह। वनराश्यादीति। अन्यथा भवन्मते ऽप्यवयवापेक्षयाऽवयविनोतिरिक्तत्वं न स्यादिति भावः। विभागवदिति। विभागविशिष्टमित्यर्थः। तत्। पदम्। वर्णानामपीति। भागवत्त्वे इत्यत्रान्वयः। अवशेष इति। परमाणौ विश्रान्तिः स्यादित्यर्थः। दुरवस्थेति। परमाणुपुञ्जात्मकस्य घटस्योत्पाद्यत्वाभावादिति

भावः । किञ्च परमाणूनां निरवयत्वे ऽवयवसंयोगाभावाद्व्य-णुकाद्युत्पत्तिर्न स्यात् । तदुक्तं हरिणा ।

भागानामनुपश्लेषान्न वर्णो न पदं भवेत् ।
तेषामव्यपदेश्यत्वात्किमन्यदुपदिश्यतामिति ॥

अस्यार्थः वर्णभागानामनुपश्लेषान्न वर्ण एकः कश्चित्स्यात्त-दभावे पदं न स्यात् पदाभावे वाक्यं न स्यादिति किं तदेकं वाचकत्वेन व्यवह्रियतेति । पदवद्वाक्यमप्यखण्डमित्याह । वा-क्यमपीति । एवं चाखण्डस्फोटलक्षणः शब्दो वाक्यमिति लक्षणं बोध्यम् । अपोद्धृत्येति । कल्पनया प्रविभज्येत्यर्थः । वा-क्यस्थपदानामपोद्धारेण च वाक्यस्याखण्डता दर्शिता । नन्वेवं वाक्यसंस्कारपक्षासम्भव इत्यत आह । क्वचिदिति । इदमत्र चिन्त्यते । कानि सन्तीत्यादौ युगपत्संस्कारो नोचितः युग-पत्सर्वेषां बुद्धिविषयत्वस्यानुभवविरुद्धत्वात् । तस्माद्वाक्यस्य प्रविभज्यान्वाख्याने वाक्यसंस्कार इत्येवारोपो युक्तः । तदवभा-सस्त्विवति । रेफसदृशध्वन्युपरागात् रेफावभास इत्यर्थः । पदे वर्णेति । वर्णावयववत् पदे वर्णावभासः कल्पित इत्यर्थः । ननुप-दानां नित्यत्वे शास्त्रवैयर्थ्यमत आह । शास्त्रं त्विति ॥ ९८ ॥

(क०टी०) विरुद्धं नैयायिकमतं खण्डयति।शब्देति।अन्यथा । तेषामस्थि-रत्वे । अत एव तत्र क्षणेति विहाय कालेत्युक्तम् । तस्मात्तेषां तत्त्वासि-द्धम । इदमेव द्रढयितुं तदुत्पत्तिवादिमते दूषणमाह । परस्येति । आदि-ना नाशादिः । तदुक्तप्रकारं खण्डयति । नन्विति । जातिविषयत्वं तस्या इति भावः । यद्यप्यत्र पक्षे तदतिरिक्तजात्यनङ्गीकारान्नेदं सुवचम् । न चैवं गत्ववान् ग इति न स्यात् गुणगुणिनोरभेदे ऽपि रूपवान् घट इति वदुपपत्तेस्तथाप्यभ्युपेत्य तत्त्वमाह । द्वयोरिति । अत्र तदभावस्य सत्त्वात् । तथाच व्यक्तिभेदस्यैव तत्र विषयत्वमावश्यकमिति भावः। सो ऽयं ग इत्यादिस्वारस्येनाह । प्रत्यभीति । इतीति । इत्यादीत्यर्थः ।

श्यामो घट इत्यादौ भ्रमत्वमुक्त्वा प्रमात्वमाह । परम्परेति।उत्पत्तेस्तदादेः परम्परया वर्णनिष्ठत्वाभ्युपगमान्न भ्रमत्वं साक्षात्सम्बन्धांशे भ्रम इत्यवशिष्यते तदपि सोऽयमित्यत्र तव व्यक्त्यभेदांशे भ्रमत्ववत्तुल्यम् । ननु वर्णस्थले ध्वनिसत्त्वे एव मानाभावः शङ्काद्यभावेन तदुत्पत्त्यसम्भवश्चात आह । वर्णोच्चारणेति । तत्सत्त्वेत्यत्रान्वयः । ध्वनिसत्त्वेति । तद्विषये इत्यर्थः । इदं दृढयति । अत एवेति । तदुच्चारणमपि वर्णानुपलब्धिसाधकमिति भावः । अन्यथात्र दोषमाह । यदि त्विति । युक्तितौल्यादिति भावः । तथापि निर्वाहमाह । तज्ज्ञानेति । तत् । उत्पत्त्यादिकम् । तस्यास्तद्विषयत्वे बाधकं दोषान्तरमुद्धरति। एवमेवेति। आरोपादिनैवेत्यर्थः । कृधातोः क्रियासामान्यार्थकत्वेन वक्ष्यमाणरीत्या आह। उच्चारेति। नन्वेवं लोहितः स्फटिक इत्यादावाद्ये भ्रमत्वे द्वितीयरीत्या प्रमात्वमपि स्यात्तच्च लोकादिविरुद्धमत आह । लोहित इति। एवव्यावर्त्यमेवाह । न त्विति । उक्ते । लोहितः स्फटिक इत्यत्र । सिद्धान्तमाह । वस्तुत इति । सर्वत्र प्रकृते ऽपि बुद्धिनियामकत्वाभावात्।बुद्ध्या नियामकत्वादिति पाठान्तरम् । तत्र।तद्विषये। बाधकं दोषान्तरमुद्धरति। एवमिति। आदिना उदात्तत्वादि ह्रस्वत्वादि च । तन्निष्ठमेव । ध्वन्यादिनिष्ठमेव । ननु तन्निष्ठमेव तत्तत्रारोप्यते इति को ऽयं कुलधर्मः अन्यघटादिनिष्ठस्याप्युत्पत्त्यादेस्तत्रारोपसम्भवादित्याह। किञ्चेति। आदिनैतद्वैपरीत्यपरिग्रहः । सादृश्येनेति । सर्वत्रारोपे ऽस्यैव बीजत्वादिति भावः । इदं च सर्वं तेषां परीत्योत्पत्तिमभ्युपेत्योक्तम् । वस्तुतः सैव नेत्याह । किञ्चेति । एवेन वर्णमुत्पादयतीति प्रत्ययव्यवच्छेदः । ननूच्चरितत्वमपि कण्ठाद्यभिघातजन्योत्पत्तिविशिष्टत्वमेवेति तावतापि किमत आह । उच्चारीति । नन्वेवं स्त्रीप्रभवो ऽयं शुकप्रभवो ऽयमित्यादिप्रतीतिस्तच्छ्रवणाच्छुकाद्यनुमानं च न स्यात्तस्य तज्जन्यतावच्छेदकवैजात्यधीनत्वादत आह । स्त्रीति । त्यं च । त्यमपि । तदुपेति । तदनुमानाद्युपेत्यर्थः । प्राग्वदेवाह । तारेति । तन्निष्ठमेव । ध्वन्यादिनिष्ठमेव । तत्रारोप्यते इति । अत्रेतरसम्मतिमप्याह । अत एवेति।तेषां तन्निष्ठत्वादेवेत्यर्थः । एवं तारत्वादिर्विरुद्धत्वमभ्युपेत्योक्तम्। वस्तुतस्तदेव नेत्याह ।यद्वेति। निष्ठा । निष्ठाः एवाविरुद्धत्वात् । तदेवाह । कस्य चिदिति। यत इत्यादिः । नन्वेवं तयोर्विरोधव्य-

वहारः कथमत आह । तयोरिति । तारत्वमन्दत्वयोरित्यर्थः । वर्णोत्पत्तिवादिमते दूषणमाह । परैस्त्विति । नन्वेकेनैव वायुसंयोगेन श्रोतृभेदेन तथा व्यञ्जने ऽपि किं मानमत आह । एतदिति । तत्र ह्युच्चैः श्रूयमाण उदात्त इत्यर्थाभिमानेनोच्चनीचस्यानवस्थितत्वात्संज्ञाऽप्रसिद्धिरिति वार्तिकोक्तशङ्कायाः इदमुच्चनीचमनवस्थितपदार्थकं तदेव हि कं चित्प्रत्युच्चैर्भवति कं चित्प्रति नीचैः एवं हि कश्चित्कं चिदधीयानमाह किमुच्चैः रोरूयसे शनैर्वर्ततामिति तमेव तथाधीयानमपर आह किमन्तर्दन्तकेनाधीषे उच्चैर्वर्ततामिति एवमुच्चनीचमनवस्थितपदार्थकं तस्यानवस्थितत्वात्सञ्ज्ञाया अप्रसिद्धिरित्युपपादनं भगवता कृतम् । एतेनोदात्तत्वादिकमपि तथैवेति सूचितम् । स्त्रीशुकादिशब्दे ऽपि एतदनारोप इत्याह । शुकेति । उच्चारणेति । कण्ठताल्वाद्यभिघातेत्यर्थः । ननु तन्मते तज्जन्यतावच्छेदकतया सिद्धवदत्र तत्सिद्धिरेव कथमत आह । विजातीयेति । तेषां स्वत एव भेदात् । व्यङ्ग्यान्येव । व्यङ्ग्यतावच्छेदकान्येव । विशिष्टव्यङ्ग्यत्वाशयवान् । नन्वत्र पक्षे इको यणचीत्यादौ कथं वर्णानां प्रकृतिविकृतिभावो ऽत आह । प्रकृतीति । उक्तेति । अन्तःकरणस्थेकारबुद्धिमपहाय यकारबुद्धिकरणादित्यर्थः । एवं चेदं तुल्यमेवोभयोः उत्पत्त्यादेस्तु सर्वथा आरोप एवेति ध्वनयन्ननतिप्रसङ्गायाह । अन्येति । सादृश्यद्वारेति भावः । नन्वभेदप्रत्यभिज्ञया तत्त्वेतिप्रसङ्गापत्तिरत आह । सेयमिति । मानान्तरम् । प्रत्यक्षम् । सिद्धान्ते शङ्कते । न चेति । वर्णानामिति शेषः । आदिना जन्यत्वपक्षे ध्वनिपरिग्रहः । कत्वमेव । कत्वादिकमेव । आदिना वर्णपरिग्रहः । इदं च गुरुधर्मस्यावच्छेदकत्वमभ्युपेत्य । वस्तुतो ऽत्र तदपि नेत्याह । प्रत्यक्षत्वावच्छिन्नेति । तत्पक्षे तथैव सत्त्वादेवमुक्तम् । उपलक्ष्यत्वं तृतीयार्थः । तदुपलक्षितकत्वादेरित्यर्थः । तथाच तदुपलक्षणं न तु विशेषणमिति न तस्य तत्त्वमिति भावः । तत्रैव शङ्कते । न चैवमिति । तया नित्यत्वेन वायुसंयोगस्याभिव्यञ्जकत्वे इत्यर्थः । स्यादिति सम्भावनायां प्रत्यभिज्ञाया अत्रापि सत्त्वादिति भावः । वर्णवदिति वैषम्ये दृष्टान्तः । नन्वत्र तदभावः स्ववासनाकल्पित एवात आह । किञ्चेति । अनुमानेन नष्टेन चिरकालस्थायित्वेन विद्यमानविषये एव तत्र तत्प्रतीतेर्लोकनिरूढत्वादिति भावः । त्वया

क्षणिकत्वस्यैवाङ्गीकारेणाह। नैवेति। नष्टेनैवेत्यर्थः। एवं चान्यथानुपपत्त्या तयात्र तत्सिद्धिस्तत्र तु देशान्तरकालान्तरदृष्टस्य तत एव पुनर्दर्शनसम्भवेन तदुपपत्त्या न तया तत्सिद्धिरिति भावः। नन्वेषां पारमार्थिकनित्यत्वे ततो द्वैतापत्तिरत आह। नित्यत्वं चैषामिति। एतावदेव। व्यावहारिकमेव। मीमांसकैरपि स्वीक्रियमाणं सम्बन्धनित्यत्वमिदमेव नान्यादृशमिति तत्सम्मतत्वान्न तद्विरोधो ऽपीत्याह। अत एवेति। अस्यार्थं सूचयन्नाह। औत्पत्तिकेति। पारमार्थिकनित्ये एवं व्यवहाराभावाज्जगदुत्पत्तिकालकृत इति तदर्थः। नन्वेवमपि शब्दनित्यत्वं न तेषामभिमतमत आह। एवमिति। उक्तप्रकारेणेत्यर्थः। अत्र सम्बन्धाधिकरणे तयोः सम्बन्धस्य नित्यत्वादेवेत्यनेनेत्यर्थः। एवमग्रे ऽपि। ननु तावता वर्णानां भवतु नित्यत्वं पदादेस्तु कुतस्तत्त्वमत आह। तच्चेति। अन्यथेष्टतत्प्रामाण्यासिद्ध इदमावश्यकमित्याह। अत एवेति। वाचकस्य नित्यत्वादेवेत्यर्थः। अत्र प्रागुक्तमेव दार्ढ्यायाह। एके इति। अर्थानुवादो ऽयं भाष्ये। अत एवेत्याद्युक्तमुपपादयति। न हीयमिति। नन्वेवं कथमेकं वनमित्यादिप्रतीतिरत आह। वनेति। ननु तत्रैकदेशावच्छिन्नत्वस्योपाधेरेकत्वेनौपाधिकी सा प्रतीतिरिति किमर्थं तत्र तत्त्वाङ्गीकार इति चेदस्तु तथा प्रकृते तु नोपाधिसम्भव इत्याह। न चैकेति। तेन एकार्थधीहेतुत्वेन असावयं दोषः। दोषान्तरमाह। किञ्चेति। अप्रसिद्धार्थपदश्रवणे सति सङ्केताग्रहादर्थबोधाभावे ऽप्येकं पदमित्यादेर्दर्शनादित्यर्थः। आदिना एकं वाक्यमेको ऽनुवाक इत्यादिपरिग्रहः। तस्यार्थबुद्ध्युत्तरकालं ग्राह्यत्वादिति भावः। उपाध्यन्तरं निराचष्टे। एकेति। समूहालम्बनात्मकैकधीगोचरघटपटादेरपि तत्त्वापत्तिरिति तु न आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति न्यायात्। अत आह। सर्वोच्चारेति। ज्ञानानां तत्र भेदात्। अभ्युपेत्येति। आद्ये सिंहावलोकनन्यायेन दोषमाह। किञ्चैवमिति। तत्र तत्प्रतीतेस्तथोपपादने इत्यर्थः। तत्समूहेन। तन्तुसमूहेन। उक्ताशयेनैवाह। यदीति। तत्सिद्धिः। अतिरिक्तावयविसिद्धिः। भाष्यस्यान्यथोपपत्त्या नेष्टार्थसाधकत्वमित्याह। न चैक इति। दोषान्तरमाह। घटेति। इदं द्वयमभ्युपेत्योक्तम्। वस्तुतस्तदेव नेत्याह। एकेति। तत्त्वे तु गौणवन्मुख्यो ऽप्युचित इति भावः। अत्रैव शास्त्रानुरोधेन सखण्ड-

त्वमाह। तच्चेदमिति। नित्यमेकं व्यापकं चेत्यर्थः। नन्वेवमनित्यत्वाद्यापत्तिरत आह। प्रकृत्यादीति। लाघवादखण्डत्वमाह। बुद्धेति। प्रकृतिप्रत्ययविभागशून्यमेवेत्यर्थः। विपक्षे बाधकमप्याह। अन्यथेति। वर्णानामित्यस्य भागेत्यत्रान्वयः। दुरवस्था। तदप्रतीत्यादिरूपा। इष्टापत्तावाह। एवं चेति। तदसिद्धौ चेत्यर्थः। कस्याप्यभावादिति भावः। भाष्यादिति। अन्यथापोद्धृत्येति न वदेत्। अपोद्धरणं च कल्पनं तदा तु तेषां स्वरसत एव सत्त्वमिति भावः। तदपि द्वेधेति। तत एव लब्धमित्याह। तत्रेति। अन्वाख्येये इत्यर्थः। क्वचिदिति। कानि सन्तीत्यादावित्यर्थः। क्वचित्। घटमानयेत्यादौ। नन्वेवं वर्णानामप्यखण्डत्वसिद्धौ शास्त्रानुभवविरोधापत्तिरत आह। न चेति। तदेवेत्यनेन विरोधोद्धारः। आदिना प्रकृतिप्रत्ययपरिग्रहः। एतच्छून्यपाठः प्रचुरः। नन्वेवं शास्त्राप्रमाण्यमसङ्गः पदवाक्ययोरखण्डत्वात् शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां व्युत्पादनपरत्वादत आह। शास्त्रमिति। उपपन्नमिति शेषः॥ ५८॥

आकाशवृत्तेः स्फोटस्य श्रोत्रग्राह्यत्वम्। तन्न अनेकवर्णध्वनिकल्पने मानाभावात्। अवर्णानामैक्यमवर्णककारादीनां चानेकत्वमित्यर्धजरतीयस्यान्याय्यत्वात्। तस्मादुक्तरीत्याकाशवृत्तिरेकः स्फोट एव श्रोत्रग्राह्यः। अत एव एको गकार इति प्रत्ययः। कत्वादिकं चाभिव्यञ्जकवायुनिष्ठतत्तत्स्थानाभिघातव्यङ्ग्यम्। कत्वादिवैजात्याक्रान्तैः स्वरूपरूषितस्य भानं तदनाक्रान्तैस्तु ध्वनिरूपेण ककार उत्पन्न इत्यादिप्रत्ययस्तु प्राग्वदेव ज्ञाननिष्ठोत्पत्त्याद्यारोपेण। न च वायुनिष्ठकत्वादेः श्रोत्रेण ग्रहे येन यस्य धर्मो गृह्यते तेन तदपीति न्यायेन वायूनामपि श्रोत्रेण ग्रहणापत्तिरिति वाच्यम्। यद्वृत्तितया धर्मग्रहणं तस्यैव धर्मिणस्तेन ग्रहणस्य चक्षुरादौ क्लृप्त-

त्वात्। स्फोटवृत्तितया च तस्य श्रोत्रेण ग्रहणं न वायुवृत्तितया। रसनादौ रसादिमात्रग्राहकताया दृष्टत्वाच्च। व्यञ्जकगतवैजात्यमादायैव ककारहकारयोर्भेदः। अद्वैतसिद्धान्तविषयसम्बन्धजन्यवृत्तिवैचित्र्येण व्यङ्ग्ये स्वरूपसुखे भेदव्यवहारवत् विशेष्यांशमादायाभेदे ऽपि तत्प्रतीतिर्नापाद्या। उपाध्यनालिङ्गिततत्प्रतीत्यभावात्। देशकालभेदप्रत्ययो ऽप्यौपाधिक एव। स एव च पदादिरूपेणापि व्यङ्ग्य इति बोध्यम्। अत्रापि काल्पनिकः प्रकृतिप्रत्ययविभागः पदे वाक्ये च पदविभागः। भेदेन कल्पिता अपि ते पदवदेव नित्याः। तदुक्तमाद्यन्ताविति सूत्रे भाष्ये नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमिति। वर्णशब्देन प्रकृतिप्रत्ययागमादयः। यद्वा अखण्डान्येव पदानि वाक्यानि च। रेखागवयन्यायेन तदन्वाख्यानार्थं कल्पिते पदादौ प्रकृत्यादिविभागकल्पना पदविभागकल्पना च। इदमप्याद्यन्तावित्यत्र भाष्ये। स्फोट एव कत्वादिना व्यज्यत इत्येओौजिति सूत्रेभाष्ये ध्वनितम्। तत्र हि नरसिंहवज्जात्यन्तरत्वाद्वर्णैकदेशानां वर्णग्रहणेनाग्रहणमिति पक्षे क्लृप्त इत्यत्र कृपो रोल इति लत्वाप्राप्तिमाशङ्क्य अथवोभयतः स्फोमात्रं निर्दिश्यते रश्रुतेर्लश्रुतिर्भवतीत्युक्तम्। तस्यायमभावः वस्तुतो रत्वादिमान्न कश्चित् किं तु अन्यगततत्तद्रूपेण स्फोटस्यावभासमात्रम्। एवं च कल्पत इत्यादावस्याप्रवृत्तिः स्यात्। अतो रेफावभासिस्फोटप्रसङ्गे लकारावभासः स्फोट इत्यर्थः। एवं च सर्वत्र

सिद्धं कृपावपि रेफावभाससत्त्वात् । आकारादौ तु नैव ह्रस्वावभास इति न तत्र ह्रस्वाकारावभासप्रयुक्तं कार्यम् । यत्तु कैयटेन अन्तर्भूतानन्तर्भूतसाधारणी जातिर्निर्दिश्यत इति व्याख्यातं तन्न । तादृशजातिसत्त्वे मानाभावात् । नरसिंहवद्वर्णान्तरमिति स्वोक्तिविरोधाच्च । सादृश्यात्तु प्रत्यभिज्ञेति स्वोक्त्यसङ्गतेश्च । श्रुतिपदास्वारस्याच्च । रजातेर्लजातिरित्यनुक्तेश्च । तादृशी जातिसत्त्वे वर्णैकदेशानामपि तज्जातिमत्त्वेन वर्णग्रहणेन ग्रहणमिति पक्षस्यैव सिद्ध्या ग्रहणपक्षमुक्तमथवा न गृह्यन्त इति पक्षे तत्समाधानपरभाष्यासङ्गतेश्च । अत एवाष्टमे रषाभ्यामिति सूत्रे कैयटः यथाच नरसिंहावयवानां नरत्वसिंहत्वजातियोगाभावात्पुरुषमृगराजाभ्यामेकाकृतियोगाभावः एवं वर्णवर्णैकदेशयोरपीति स्फोटपदस्य च तत्तद्वर्णपदादिरूपेण ताल्वाद्यभिघाताज्ज्ञानविषयो मध्यमावस्थोऽर्थ इत्यलम् ॥ ५९ ॥

(कुं०टी०) परे तु वर्णादीनामेकत्वमित्यारभ्योक्तमतं दूषयति । तन्नेति । अवर्णानामिति । आकाराणां परस्परमैक्यमकारककारयोस्तु परस्परं नैक्यमित्यत्र बीजाभाव इत्यर्थः । ननु वायुनिष्ठं कत्वादि कथं व्यज्यते तत्राह । तत्तत्स्थानेति । कत्वादीति । कत्वादिवैजात्यवता वायुना शब्दस्वरूपस्य भानमित्यर्थः । प्राग्वदेवेति यदुक्तं तत्स्फुटयति । ज्ञाननिष्ठेति । येनेति । इन्द्रियेणेति शेषः । वायूनामपीति । गुणगुणिनोः समानेन्द्रियग्राह्यत्वादिति भावः । रसादिमात्रेति । न तु जलस्यापीत्यर्थः ।

मात्रशब्देन द्रव्यवच्छेदः। रसनादिना रसत्वादेरपि ग्रहणात्। ककारेति। समानस्थानत्वे पीत्यादिः। विषयसम्बन्धेति। अन्तःकरणवृत्तिवैचित्र्यात् ब्रह्मात्मकसुखे ऽपि वैचित्र्यमित्यर्थः। अन्तःकरणस्य सुखात्मना परिणामे तत्तादात्म्यादहं सुखीति प्रत्यय इत्यर्थः। विशेष्यांशेति। कत्वादिविशिष्टतया गृहीतस्य स्फोटस्यैकत्वेऽपीत्यर्थः। तत्प्रतीतिः। ऐक्यप्रतीतिः। ननूपाध्यग्रहे ऐक्यबुद्ध्यापत्तिरत आह। उपाध्यनालिङ्गितेति। स एव। स्फोट एव। पद इति। पदे प्रकृतिप्रत्ययाविभागः कल्पित इत्यन्वयः। पदवदेवेति। प्रकृत्यादयो ऽपि नित्या इत्यर्थः। उभयत इति। स्थानिन्यादेशे चेत्यर्थः। शब्दानामनित्यत्वे ऽपि तद्गता जातिर्नित्या सैव स्फोट इति मतेनाह। रश्रुतेरिति। न कश्चिदिति। वर्णा इति शेषः। अन्तर्भूतानन्तर्भूतेति। कृपो रोल इत्यत्र स्वतन्त्रास्वतन्त्ररेफसाधारणी रत्वजातिः स्थानित्वेनाश्रीयत इत्यर्थः। स्वोक्तिविरोधाच्चेति। दृष्टान्तासङ्गतेरिति भावः। श्रुतिपदेति। श्रवणस्य व्यक्तिविषयकत्वात्। इत्यनुक्तेश्चेति। अन्यथा भाष्यकार इत्थमेवावक्ष्यादित्यर्थः। समाधानपरेति। रश्रुतेर्लश्रुतिर्भवतीत्याकारकेत्यर्थः। पुरुषमृगराजाभ्यामिति। नरसिंहावयवानामित्यनुकृष्टव्यम्। मृगराजः। सिंहः। रपीति। आहेति शेषः। ननु स्फोटे वर्णविभागाभावात् रश्रुतेरिति पूर्वोक्तभाष्यासङ्गतिरत आह। स्फोटपदस्य चेति ॥ ५९ ॥

(क०टी०)आद्ये दोषमाह। अनेकेति। उभयसाधारणं दोषमाह। अवर्णानामिति। प्रागुक्तसिद्धान्तमुपसंहरति। तस्मादिति। ननु विलक्षणवायुसंयोगा एव श्रोत्रेन्द्रियग्राह्याः सन्तु किमेकस्यात्यतिरिक्तस्य कल्पनयात आह। अत एवैक इति। तस्यैकत्वादेवेत्यर्थः। नन्वेवं कथमेकत्वमत आह। कत्वादिकं चेति। स्फोटाभिव्यञ्जकेत्यर्थः। तस्यापि

नित्यत्वमाह। तत्तदिति। नन्वेवं कथं स प्रत्ययो ऽत आह। कत्वादीति। विजातीयैर्वायुभिरित्यर्थः। तदनेति। अत एव विजातीयैस्तैरित्यर्थः। रूषभूषायाम्। तस्य स्फोटस्यैव रूपेण भानमित्यस्यानुषङ्गः। दार्ढ्या- य प्रागुक्तं स्मरति। ककार इति। पूर्वतो विशेषमप्याह। ज्ञानेति। आदिना नाशः। एवं प्रागपि। यद्वृत्तीति। येनेति शेषः। च- स्त्वर्थे। एवं क्लृप्तनियमेन तं नियमं निरस्याद्यव्यभिचारात्स नियम एवनेत्याह। रसनादाविति। नन्वेवमपि ककारहकारयोरै- क्यप्रत्ययापत्तिर्भिन्नत्वप्रतीत्यनापत्तिश्चात आह। व्यञ्जकेति। अद्वै- तेति। विषयबाह्येन्द्रियाणां मिथो यः सम्बन्धः संयोगादिस्तज्जन्यं यत्तत् वृत्तिवैचित्र्यं तेनेत्याद्यर्थः। अन्तःकरणस्य मूलावच्छिन्नचै- तन्यं प्रमाता मध्यावच्छिन्नं चैतन्यं प्रमाणं अग्रावच्छिन्नं चैतन्यं वृत्तिः विषयसुखनिरासाय स्वरूपपदं ब्रह्मस्वरूपसुखे इति तदर्थः। अत एव तन्नित्यमेकविषयसुखं तु स्रगादिविषयसम्पर्केण सत्त्वा- वच्छिन्नान्तःकरणे चेतनप्रतिबिम्बः। अत एव तस्य ज्ञानत्वमनि- त्यत्वं च सैव च वृत्तिरिति भावः। अभेदे ऽपीत्यनेन तस्येष्टत्वं सू- चितम्। तदिति। वर्णेत्यर्थः। अन्यदपि बाधकं निराचष्टे। देशेति। नन्वेवं कथं पदादिप्रतीतिरत आह। स एव चेति। अपिना कत्वादि- समुच्चयः। एकैकविजातीयवायुभिः कत्वादिनैव तस्य व्यञ्जनं क्रमो- त्पन्नैर्बहुभिस्तु तत्तत्पदादिरूपेण व्यञ्जनमिति भावः। सिद्धान्ते स- खण्डपक्षमाह। अत्रापीति। सिद्धान्तपक्षे ऽपीत्यर्थः। नन्वेवं तस्यानि- त्यत्वापत्तिरत आह। भेदेनेति। ननु तत्र वर्णानां तत्त्वमुक्तं न प्रकृत्या- देरत आह। वर्णेति। वर्णस्फोटस्य तत्स्वरूपत्वात्। अथाखण्डपक्ष- माह। यद्वेति। नन्वेवं शास्त्राप्रामाण्यमत आह। रेखेति। तत्। अखण्ड- पदादि। आदिना वाक्यम्। अत एव यथासंख्यमाह। प्रकृत्येति। अत्रापि प्राग्वत् सम्मतिमाह। इदमपीति। तत्र हि अनागमकानां सागमका इति द्वेधा उपपाद्याथवा एकया आनुपूर्व्या अयं शब्दान्तरमुपदिशति प्रकृतिस्ततो बलाद्यार्धधातुकं ततः पश्चादिकारं यस्मिंस्तस्यागम- बुद्धिर्भवतीत्युक्तम्। एतदाह। अस्ति स्तः एधीति। तत्त्वतो रूपार्था- न्वयाभावात्कल्पिताभ्यामन्वयव्यतिरेकाभ्यामेवार्थवत्तामाश्रित्यासत्य- प्रकृतिप्रत्ययोपदेशेन सत्यस्य पदस्य व्युत्पादनं क्रियते रेखागवयेनेव सत्यगवयस्येति कैयटः। अत्र पक्षे वाचकस्यैवानया प्रनाड्या व्यु-

त्पादनम् । उत्तरपक्षे तु कल्पितस्यानेन साक्षात् बोधनं तेन च बोधकस्याखण्डस्य बोधनमिति भेद इत्युद्द्योतश्च । उक्तार्थे सिंहावलोकन्यायेन सम्मतिमाह । स्फोट एवेति । जात्यन्तरेति । समूहस्येति भावः । कैयटोक्तिरियम् । आशङ्क्य । ऋप उः रः ल इति च्छेदेन समाधायेति शेषः । वस्तुत इति । तेषामनङ्गीकारात् । एत्रम् । केवलावभासे च । एवं च सूत्रवैयर्थ्यापत्तिरिति भावः । अतिप्रसङ्गो ऽत्र पक्ष नेत्याह । आकारादाविति । कार्यम् । वाचा तरतीत्यादौ झ्यज्लक्षणष्टनादिकम् । तत्रत्यकैयटं खण्डयति । यत्त्विति । ननु सर्वतो बलीयसीति न्यायेन तत्स्वीकारो ऽत आह । नरेति । अथवा पुनर्न गृह्यन्ते इति प्रतीकं धृत्वेति भावः । तत्रत्यामेवाह । सादृश्यादिति । आदिना तत्त्वासिध्या पृथगनुपलब्धानां वर्णानां समुदाये नास्ति सत्त्वमित्यस्य परिग्रहः । तत्समेति । तत्र सत्त्वाप्राप्तिशङ्कासमाधानपरोक्तभाष्येत्यर्थः । कैयटस्यापि तत्र न निर्भर इत्याह । अत एवेति । मदुक्तस्य तदभीष्टत्वादेवेत्यर्थः । यत्तु प्रागुक्तरीत्या पदादिरूपेणाभिव्यक्तस्यार्थप्रत्यायकत्वात्स्फोटत्वव्यवहार इति तन्नेत्याह । स्फोटेति । तथाच न केवलं स्फुटत्यर्थो ऽस्मादिति स्फोटो ऽपि तु स्फुट्यते यः सो ऽपि स इति भावः । न चैवं वायुसंयोग एव वाचको ऽप्यस्तु शृणोमीत्याद्यनुभवेनातिरिक्तस्य श्रोत्रग्राह्यस्यावश्यकत्वादित्याद्यन्यतो ऽनुसन्धेयम् । तदाह । इत्यलमिति ॥ ५९ ॥

आन्तरस्फोटे भाष्यसम्मतिः । किञ्चैवं द्रुतमध्यविलम्बितासु प्रयत्नभेदेन चिराचिरकालोच्चारणजन्यत्वाद्भिन्नकालत्वभेदयोरापत्तौ ह्रस्वाकारस्यापि भेदे भिन्नकालत्वे चान्यतमवृत्तौ तपरकरणे ऽन्यतमवृत्तावतो भिसो ऽनापत्तेः । स्फोटाङ्गीकारे तु न दोषः । तदभिव्यक्त्यनन्तरं जायमानेन चिरकालेन वैकृतध्वनिना तस्य चिरकालमुपलब्धावपि स्फोटे कालभेदाभावात् । तमेवायं द्रुतमुच्चारितवानन्यो विलम्बितमिति प्रत्यभिज्ञास-

त्वात्। ह्रस्वदीर्घादौ तु नैवमभेदप्रत्यभिज्ञा। एतेन ह्रस्वदीर्घप्लुतैरभिव्यक्तस्फोटे तदुपरागवशाद्यथा तावत्कालत्वारोपस्तथात्रापि स्यादिति परास्तम्। ह्रस्वदीर्घादीनां परस्परमैक्यप्रत्यभिज्ञाभावेन तत्कालत्वारोपे ऽप्युच्चारयित्रालस्यादिकृतस्यास्य वैकृतगतस्य कालत्वोपलब्धिचिराचिरत्वकरस्यारोपे मानाभावात्। आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति न्यायात्। अत एव तिसृष्वपि ह्रस्वो मकार इत्यादिरनुभवः। जन्यत्वे तु वर्णानां क्षणस्थायित्वाभ्युपगमात्कस्य चिरमुपलब्धिः स्यादिति बोध्यम्। तदुक्तं तपरसूत्रे भाष्यकृता वृत्त्यन्तरे ऐसो नापत्तिस्तत्तद्वृत्तिजनकयत्नभेदेन वर्णानां तत्तत्कालत्वस्यैवौचित्यादित्याशङ्क्य एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः कथं यथा भेर्याहन्ता भेरीमाहत्य कश्चिद्विंशतिपदानि गच्छति कश्चित्त्रिंशत्कवश्चिच्चत्वारिंशत् स्फोटस्तावानेव ध्वनिकृता वृद्धिः।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः॥

इति। स्फोटः शब्द इति श्रोत्रेन्द्रियग्राह्यः स्फोटनामा पदार्थः शब्दः ध्वनिस्तदभिव्यक्त्युत्तरं जायमानो वैकृतध्वनिरूपः शब्दस्य चिराचिरोपलब्धिकरत्वाद्गुण उपकारकः। भेरीमाहत्येत्यस्य तं शब्दमुपलभमान इति शेषः। ध्वनिरूपेणापि स्फोट एव गृह्यत इति दृष्टान्तिकोभयसाधारणमाह। स्फोटस्तावानेव-

ति । ध्वानिकृता । वैकृतध्वनिकृता । ध्वनिः स्फोटश्च स्त इति शेषः । शब्दानां सम्बन्धीध्वनिः । वैकृतध्वनिस्तु केषां चिदल्पो ऽल्पकालमुपलब्धिजनकः केषां चिन्महान् बहुकालमुपलब्धिजनको लक्ष्यते । तत्र प्रमाणमाह । उभयं तत्स्वभावतः । सिद्धमिति शेषः । तदुक्तं हरिणा ।

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
स्वभावतस्तु नित्यत्वाद्ध्रस्वदीर्घप्लुतादिषु ॥
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते ।

अभिन्नकालत्वोपकारकं स्वभावतस्तु नित्यत्वादिति । प्राकृतध्वनिशब्देन स्फोटव्यञ्जकमत्रोच्यते ।

स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।

ग्रहणे अभिव्यक्तौ ।

स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ।

स्थितिभेदे चिराचिरोपलब्धिविशेषे ।

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥

इति । शब्दस्याभिव्यक्तेरूर्ध्वं वैकृता ध्वनयो जायन्त इति शेषः । ते तु वृत्तिभेदे द्रुतादिवृत्तिभेदे समुपोहन्ते तत्र कारणानि भवन्ति स्फोटस्तु तैर्न भिद्यत इति तदर्थः । वैकृतत्वं चैषामालस्यादिकृतत्वात् । कैयटो ऽप्यत्र व्यञ्जकशब्दो वैकृतध्वनिपरस्तस्याप्युपलब्धिजनकत्वेन व्यञ्जकत्वव्यवहार इति दिक् । एवं च पदादिरूप आन्तरः स्फोटो वाचक इति सिद्धम् ॥ ६० ॥

(कुं० टी०) वर्णभेदे दोषान्तरमाह । किञ्चैवमिति । भिन्नकालत्वेति । कालभेदवत्त्वे वर्णभेदश्च स्यादित्यर्थः । वैकृतेति । स्फोटस्वरूपमभिव्यज्य पुनःपुनरविच्छेदेन दीर्घकालमुपलभ्यमानो ध्वनिर्वैकृतः । एतेनेति । यथा ह्रस्वाद्यभिव्यक्तः स्फोट एकमात्रादिस्तथा वृत्तिभेदादपि भेदः स्यादित्यर्थः । प्लुतैरिति । ध्वनिरिति शेषः । अत्रापि । वृत्तिभेदेऽपि । उच्चारयितुरालस्यमिति समासः । वृत्तित्रये ऽपि स एवायमिति प्रत्यभिज्ञानान्नारोपसम्भव इति भावः । आरोपे सतीति । गौर्वाहीक इत्यारोपे जडत्वं निमित्तम् । वृत्त्यन्तर इति । यद्वृत्तिमाश्रित्य पाणिनिना सूत्रितं तदन्यवृत्तावित्यर्थः । भेर्याहतेति । यथा प्रयत्नविशेषादुत्पन्नो भेरीशब्दः कश्चिदल्पकालमुपलभ्यते कश्चिच्चिरकालं तथा वृत्तिषूपलब्धीनां कालभेदो विषयस्य त्वभेद एव । ध्वनिः स्फोटश्चेति । व्यञ्जको व्यङ्ग्यश्च शब्दानां व्यङ्गानां सम्बन्धव्यञ्जकत्वेन वैकृतो ध्वनिः स एव महानल्पश्च केषां चिदिति व्यक्तवाचामेवोभयं व्यञ्जकरूपं गृह्यते अव्यक्तवाचान्तु ध्वनिरेव तत्स्वभावतः तत्स्वरूपेणैवेत्यर्थः । ननु ध्वनेरपि शब्दत्वात्कथं शब्दगुणत्वमतो ऽर्थमाह । उपकारक इति । शेष इति तु न तदीयशब्दस्याल्पकालाच्चिरकालाभ्यामुपलम्भात् दृष्टान्तता । ननु भेर्याघातस्थले स्फोटाभावात् स्फोटस्तावानेवेति दृष्टान्तासङ्गतिरत आह । ध्वनिरूपेणापीति । तत्रापि स्फोट एव उच्यत इत्यर्थः । तावानेवेति । नियतकालमेवेत्यर्थः । वैकृतध्वनिकृतेति । चिरकालमुच्चारणात् ध्वन्युपलब्धीनामेव वृद्धिरित्यर्थः । शब्दानां सम्बन्धी ध्वनिरित्यस्यैवार्थमाह । वैकृतध्वनिस्त्विति । इति शेष इति । तथा च स्वरूपतः सिद्धत्वेन प्रमाणान्तरात्तथेष्टत्वं सूचितं न योगिप्रत्यक्षगम्यं चैतदिति भावः । स्फोटस्याभिन्नत्वे ऽपि ध्वनिका-

लभेदेनैव कालभेद इत्याह । स्फोटस्याभिन्नेति । इह आत्मतत्त्वस्य नित्यत्वात् स्फोटानां स्थितौ कालपरिमाणवृत्तेः स्वल्पो ऽपि व्यापारो नास्ति ध्वनिना तु संसृष्टं तस्य स्फोटस्य स्वरूपमुपलभ्यते तस्मात् ध्वनिकालः स्फोटोपलब्धिरूपः परिवर्तते । नन्वेवं ह्रस्वदीर्घप्लुतादिष्वपि ध्वनिरेव कालहेतुरितिदीर्घप्लुतयोरपि तपरस्तत्कालस्येति तत्कालताप्रसङ्ग इत्यत आह। स्वभावतस्त्विति। कैयटे ऽपीति। ध्वनिःशब्दगुण इति भाष्यमुपादाय शब्दस्य गुण उपकारको व्यञ्जकत्वेनेत्यर्थः । इति कैयटे इत्यर्थवैकृतेति अन्यथाध्वनिकृता वृद्धिरिति भाष्यासङ्गतेः । तस्यापीति । प्राकृतध्वानिना उपलब्धस्य स्फोटस्योत्तरकाले वैकृतो ध्वनिरुपलम्भको भवतीति भावः । एवं चेति । स्फोटो द्विविधः आन्तरो वाह्यश्च । तत्रान्तरस्य मुख्यं वाचकत्वमित्यर्थः । वाह्यस्तु जातिव्यक्तिभेदेन द्विविधः ॥ ६० ॥

(क०टी०)तदेवमान्तरस्यैव वाचकत्वं न वाह्यस्य वैखरीरूपस्य जन्यस्य शब्दस्येति व्यवस्थापितम् । तदेव सिंहावलोकनन्यायेन तत्र दृष्टदोषदानपुरस्सरं भाष्यसम्मत्या द्रढयति । किञ्चेत्यादिना बोध्यमित्यन्तेन । एवम् । वाह्यशब्दस्यैव वाचकत्वम् । द्रुतेति । एवं भाष्यवार्तिकप्रयोगात्पूर्वत्र ह्रस्वः ।

अभ्यासार्थे द्रुता वृत्तिः प्रयोगार्थे तु मध्यमा ।
शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बितेति ॥

द्रुतायां वृत्तौ तदुच्चारयति वक्तरि ब्रह्माण्डसम्बद्धा सामृतबिन्दुस्राविणीति योगिप्रसिद्धेर्यस्याः सुषुम्णारन्ध्रनाडिकाया नवपानीयबिन्दवः स्रवन्ति तस्या एव मध्यमायां वृत्तौ द्वादशबिन्दवः स्रवन्ति विलम्बितायां वृत्तौ षोडशबिन्दवः स्रवन्तीति पूर्वपूर्वतस्त्रयो भागा अग्रे अधिका इत्यर्थः । चिराचिरेति । तत्तत्कालावच्छिन्नताल्वोष्ठपुटव्यापारजन्यत्वादित्यर्थः । वर्णानामिति शेषः । आपत्ताविति । ह्रस्वदीर्घादिवादिति शेषः । अत इति । सूत्रानु-

करणं भेदविवक्षा च अनापत्तिरिति पाठः । अनापत्तेरिति पाठे तत्र तदनापत्तेस्तस्य न तत्त्वं किन्त्वान्तरस्यैवेत्यर्थः । तदेवाह । स्फोटाङ्गीति । स्फोटेत्यर्थः । एवमग्रे ऽपि । चिरेति बहुव्रीहिः । ननु तत्रापि कुतो न कालभेदो ऽत आह । तमेवेति । दृष्टान्तं विघटयति । ह्रस्वेति । तदिति । ह्रस्वादीत्यर्थः । वर्णोपरागाभिव्यक्तिजनकयत्नीयकालोपरागेणैव स्फोटस्य भानादित्यर्थः । एतेनेत्यस्यार्थमाह । ह्रस्वेति । वैकृतत्वस्य व्याख्यानमाह । स्यादिति । वैकृतगतस्य । वैकृतध्वनिनिष्ठस्य कालस्य । ननु तत्सत्त्वे कुतो नारोपो ऽत आह । आरोपे इति । ननु तद्वदतदवच्छिन्नत्वेनापि कुतो न स्फोटोपलब्धिरत आह । अत एवेति । तदनारोपादेवेत्यर्थः । अन्यथा ह्रस्वाकार एवायमिति प्रत्यभिज्ञा न स्यादिति भावः । ननु त्वत्पक्षे ऽपि चिराचिरकालोच्चारणजनकत्वाज्जायमानवैकृतध्वनेरुपलब्धीनामेव कालभेदात्त्रैविध्यं वर्णास्तु वृत्तिभेदे ऽप्येकरूपा एवेति कुतो नात आह । जन्यत्वे त्विति । अयम्भावः । उत्पत्तिवादिनो वर्णोत्पत्तिं प्रत्युच्चारणव्यापारस्य कारणत्वात्तत्कालावच्छिन्नोच्चारणेन ह्रस्वदीर्घादेरिव द्रुतावत्कालस्यैवोत्पत्तिः स्यात् । न चानुनिष्पादी ध्वनिरेव तत्कालो न तु वर्ण इति वाच्यम् । विनिगमनाविरहादिति । इदमेव एवं तर्हीत्यादिभाष्योक्तसमाधेर्नित्यातिरिक्तस्फोटाङ्गीकाराश्रयणस्य बीजम् । एवं चात्र परिदृश्यमानकालभेद उपलब्धिवर्ति एवेति तात्पर्यम् । अत्र भाष्यसम्मतिमाह । तदुक्तमिति । प्रागुक्तं सर्वमित्यर्थः । स्वभावत इतीत्यन्तो भाष्यग्रन्थः । तत्तादिति । चिराचिरकालोच्चारणकजनकयत्नभेदेनेत्यर्थः । तत्र तेनेत्याशङ्क्योति । उक्तमित्यन्वयः । प्राकृतध्वनेरत्र तत्त्वासम्भवादाह । तदभीति । स्फोटाभीत्यर्थः । ननु ध्वनिरपि शब्दविशेष एवेति कथं स शब्दगुणो ऽत आह । शब्दस्येति । वक्ष्यमाणभाष्यादाह । तं शब्दमिति । ननु भेर्याघातस्थले स्फोटाभावात् स्फोटस्तावानेवेत्यनुपपन्नमतो दार्ष्टन्तिकाभिप्रायमिदमुपलब्धिसामान्ये दृष्टान्तः । यथा तत्र तस्य ध्वनेस्तावत्तावत्कालमुपलम्भस्तथेहापि तत्तद्वृत्तौ तावत्कालं तत्तदभिव्यञ्जकरूपरूषितत्वे तत्परिच्छिन्नस्यैव स्फोटस्योपलम्भमात्रमित्येतावत्येव दृष्टान्तः । न चैतावता स्फोटभेद इति तात्पर्यमन्यथा दृष्टान्ते ध्वनेरुपलभ्य-

मानस्य भेदो न तथेह वर्णस्य द्रुतादिष्विति वैषम्यात्तदसङ्गतिरेवेति। कैयटासाङ्गत्यं ध्वनयन्नन्यथा व्याचष्टे *ध्वनीति। भेर्याघातस्थलेऽपि स्फोट एव भेरीताडनाभिव्यक्तः श्रोत्रग्राह्य इत्यर्थः। अत एव 'तदनाक्रान्तैस्तु ध्वनिरूपेण' इति प्रागुक्तम्। एवेन तदन्यतद्व्यवच्छेदः। *वैकृतेति। तत्कृतोपलब्धिकालवृद्धिरित्यर्थः। किं तत इत्यत आह *शब्दानामिति। केषां चिदित्यस्यावृत्त्योभयत्रान्वय इत्याह— *केषां चिदिति। अल्पत्वमचिरकालत्वं, महत्त्वं चिरकालत्वं, तेषां चिराचिरोपलब्धिकराल्पत्वमहत्त्ववान् वैकृतध्वनिरेवाल्पत्वादिना लक्ष्यते इत्यर्थः। तत्र *वैकृतध्वनिस्फोटयोः। *शेष इति। न तु तत्र प्रमाणान्तरापेक्षेति भावः। योगिप्रत्यक्षसिद्धं चैतदुभयमिति तात्पर्यम्। कैयटासाङ्गत्येनोक्तार्थे हरिसम्मतिमाह *तदुक्तमिति। *अभिन्नेति। तथाच स्वभावतो नित्यत्वादभिन्नकालस्यापि स्फोटस्य ध्वनिकालानुपातिनः सतः। ध्वनिरत्र द्विविधः। तत्र प्राकृताशयेनोक्तम् *ह्रस्वेति। तत्त्वेन भेदाद्ध्रस्वादिषु तद्विषये भेद इत्यर्थः। तत्त्वमेवोक्तम् *प्राकृतेति। तस्य यः कालः स एव शब्दस्य काल इति व्यवह्रियते इत्यर्थः। आरोपेणेति भावः। ननु ध्वनीनामपि प्राक् नित्यत्वं प्रतिपादितमत आह *प्राकृतेति। तदेवाह *स्फोटस्येति। वर्णाद्यात्मकस्फोटस्येत्यर्थः। *अभीति। तत्तत्कालकत्वेनेति भावः। शब्दस्य- तदात्मकस्फोटस्य। तुस्वारस्याद्वाक्यभेदमाह *ते त्विति। वैकृतध्वनयस्त्वित्यर्थः। नन्वेवं कथमेषां वैकृतत्वमत आह *वैकृतत्वं चेति। नन्वेवं कैयटविरोधस्तेन हि "शब्दानां व्यङ्ग्यानां सम्बन्धी व्यञ्जकत्वेन यो ध्वनिः स एव महान्" इत्यादि व्याख्यातमत आह *कैयटोऽपीति। अत्र *भाष्यपद्यव्याख्यावसरे। ननु तस्य तत्त्वमेव बाधितमत आह *तस्यापीति। वैकृतध्वनेरपीत्यर्थः। जनकत्वेन *उपलब्धिपौनःपुन्यकारणत्वेन। तदुपक्रमेणैव भाष्यप्रवृत्तेः। पौनःपुन्यं चाकरोक्तमत्राविच्छेदेनोपलब्धिधारामात्रेण न तु विच्छिद्य विच्छिद्योपलब्ध्या। तथाचोभयमित्यावृत्त्या योजनीयम्। गृह्यत इति शेषः। तेन व्यक्तवाचामुभयम्, अव्यक्तवाचां वर्णधर्मानाक्रान्तध्वनिरेवेत्यर्थः। ध्वनिपदेन प्राकृतवैकृतावुभावप्युच्येते। ग्रहणकर्मभूतमुभयं तु प्राकृतध्वनिस्फोटरूपम्। वैकृतस्याल्पत्वादि चिराचिरोपलब्ध्यनुमेयमिति बोध्यम्। तदाह *इति दिगिति। समस्तप्रकरणार्थमुपसंहर-

ति *एवं चेति। तत्र पक्षे उक्तदोषे चेत्यर्थः॥ ६०॥

शक्यार्थस्य बौद्धत्वम्। एवं शक्यो ऽर्थो ऽपि बुद्धिसत्तासमाविष्ट एव न तु बाह्यसत्ताविष्टः। घट इत्यत एव सत्तावगमेन घटो ऽस्तीति प्रयोगे गतार्थत्वादस्तीति प्रयोगानापत्तेः। सत्तया विरोधात् घटो नास्तीत्यस्यानापत्तेश्च। मम तु बुद्धिसतो बाह्यसत्तातदभावबोधनाय 'अस्ति' 'नास्ति' इति प्रयोगः। किञ्च, शशशृङ्गं नास्ति, अङ्कुरो जायतइत्यतो बोधानापत्तिः। मम तु बुद्धिसन्नङ्कुरो जायत इत्यर्थः। सा सत्तापि शब्दवाच्येति तद्भावः। किञ्च, इच्छादीनामन्तःकरणनिष्ठतया तत्र विषयस्य सामानाधिकरण्येनैव कारणत्वौचित्येन बौद्धपदार्थसत्ताऽऽवश्यकी। यत्तु वैशेषिकाद्यनुसारिणो विषयतासम्बन्धेन ज्ञानं प्रति तादात्म्येन विषयः कारणमिति वदन्ति। तन्न। तदीयतादात्म्यस्य वृत्त्यनियामकतया सामानाधिकरण्यानिर्वाहकत्वात्। अतीतानागतस्थले सतोरेव सम्बन्धेनैवं सम्बन्धस्य वक्तुमशक्यत्वाच्च। घटादिसामग्र्या अव्यवच्छेद्यावच्छेदकभावसमानाधिकरणदैशिकविशेषणतया देशविशेषे सामानाधिकरण्यं द्रष्टव्यम्। 'शिरसि मे वेदना,' 'अत्र घटः'इत्यादिव्यवहारादाधारतानियामकत्वम्। अवच्छेदकत्वं सप्तम्यर्थ इति तु चिन्त्यम्, अनुशासनाभावात्। सुब्विभक्तौ लक्षणाऽभावस्य भवदीयसम्मतत्वाच्च। द्रव्यरूपादीनामपि द्रव्यदेश एव देश इति बोध्यम्। भ्रमेऽधिष्ठानत्वमपि बौद्धस्यैव न बाह्यस्येति सर्वं समञ्जसम्। अत एव 'उ-

पदेशोऽजनुनासिकः' इति सूत्रे भाष्ये उक्तं 'को देवदत्त' इति प्रश्ने 'अङ्गदी कुण्डली व्यूढोरस्को वृत्तबाहुरीदृशो देवदत्त' इति । तत्र तु एकव्यक्तौ भेदाभावादीदृश इत्यस्यासङ्गतिः । मम तु एतैः शब्दैर्यादृशोऽर्थो बुद्धौ प्रतिभासते तादृशो बाह्य इत्यर्थः । अत्रेदृशतादृशशब्दाभ्यां तत्त्वेन प्रत्यभिज्ञाविषयत्वमुपलक्ष्यत इति बोध्यम् । 'हेतुमति च' इति सूत्रे, 'पङ्क्तिविंशति' इति सूत्रे, मतुप्सूत्रे च भाष्यकैयटयोः स्पष्टमिदम् । गौतमोऽप्यसत एवोत्पत्तिकर्तृत्वं कथमित्याशङ्क्य सूत्रितवान् 'बुद्धिसिद्धं तु तदसद्' इति । तद् कार्यमुत्पत्तेः प्राक् नाशोत्तरं चासदपि बुद्धिविषयतया सिद्धमिति तदर्थः ॥ ६१ ॥

(कुं० टी०) *एवं शक्यो ऽर्थो ऽपीति । यथा आन्तरः स्फोटो निर्विभागो वाचकः एवं वाच्योऽप्यान्तरो निर्विभागः स एव वाक्यार्थः,स च प्रतिभारूप इत्यर्थः । *बुद्धिसत्तेति । बौद्धसत्तायुक्त एवेत्यर्थः । *घट इत्यत एवेति । अत एवोक्तं मतुप्सूत्रे भाष्ये "सर्वो हि पदार्थो न सत्तां व्यभिचरति" इति।तत्र हि भूतभविष्यतो- 'गोमानासीद्', 'गोमान् भविता' इत्यादौ न बाह्यसत्तास्ति किन्तु बुद्धिकल्पितैव, एवं च तद्व्युदासाय बाह्यसत्तापरिग्रहार्थमस्तीति विशेषणं युक्तमिति भावः । *शशशृङ्गं नास्तीति । अत एव 'अत्राभावज्ञाने आहार्यमेव प्रतियोगिज्ञानं कारणम्' इति लीलावतीशिरोमणौ स्पष्टम् । 'अन्यथा नीलं सरोजं भवत्येवेत्यादौ नीलत्वायोगस्य सरोजे अप्रसिद्धत्वात्तद्व्यवच्छेदो न लभ्येत' इति स्पष्टन्तत्रैव । *सामानाधिकरण्येनैवेति । कार्यकारणयोः समानदे-

शस्थत्वानियमादन्तःकरणवर्तिन्या सामग्र्या तत्रैव कार्योत्पादनं युक्तमित्यर्थः। सिद्धे पाकादाविच्छादेर्विरहादसिद्धस्यैव पाकादेरिच्छां प्रति हेतुताया वाच्यतया बुद्धावेव हेतुहेतुमतोः सामानाधिकरण्यमुपपादनीयमिति भावः। *आवश्यकीति। अवश्यभवितरि आवश्यकशब्दः ठगन्तो निपातनात्। वुञन्तस्य तु आवश्यिकेति स्यात्। वाक्यस्यैव हेतुतामभ्युपगच्छतस्तार्किकान्निराकरोति *यत्त्विति। *विषयतासम्बन्धेनेति। अयम्भावः—विषयतासम्बन्धेन चाक्षुषं प्रति चक्षुःसंयोगः कारणं न तु घटचक्षुःसंयोगः। विषयभेदेनानन्तकार्यकारणभावापत्तेः। एवं च घटचक्षुस्संयोगदशायां पटस्यापि चाक्षुषापत्तिः, अतो विषयाणामपि तादात्म्येन हेतुत्वमावश्यकम् । एवं च यदा घट एव चक्षुस्संयोगः तदा पटवृत्तिविषयतासम्बन्धेन विषयघटितचक्षुस्संयोगरूपसामग्र्याः कुत्राप्यभावान्नोक्तदोष इति भावः। वस्तुतस्तु विशेषणज्ञानादिरूपकारणबलादात्मनि समवायेन व्यक्तिवृत्तिविषयतासम्बन्धेनेश्वरज्ञानसाधारणज्ञानत्वेनैव हेतुत्वं कल्प्यते, अन्यथा घटत्वादिप्रत्यक्षस्थले घटेतरावृत्तित्वे सति सकलघटवृत्तित्वरूपघटत्वत्वादिना हेतुत्वकल्पने गौरवादिति बोध्यम्। *तदीयेति। तैः स्वास्मिन्नेव स्वतादात्म्याभ्युपगमात्। *वृत्त्यनियामकतयेति। न हि 'घटो घटवानिति' प्रत्ययो ऽस्ति। *सामानाधिकरण्येति। कार्यकारणघटकस्य तादात्म्यसम्बन्धेन सामानाधिकरण्यस्य प्रत्यासत्तित्वानिर्वाहकत्वादित्यर्थः। *असङ्गतिरिति। कुण्डल्यादिपदैर्देवदत्तस्यैवाभिधानाद्वस्तुद्वयविषयकस्य ईदृशशब्दस्य प्रयोगो ऽसङ्गतः। स्वमते तु अङ्ग्यादिशब्दैर्बौद्धाङ्ग्यादेरुपस्थानात्तादृशो बाह्य इति द्वयोरभेद इत्यर्थः। *गौतमो ऽपीति। तत्र हि—"नासत्सद्" इति पूर्वपक्षसूत्रम्। अस्यार्थः—उत्पत्तेः

प्राक् कार्यं नासत्, असत उत्पत्तौ शशशृङ्गादेरप्युत्पत्तिप्रसङ्गात्। स्याच्च सिकतादावपि तैलम् । नापि सत्, सत उत्पत्तिविरोधादिति। इदानीं घट उत्पन्न इत्यादिप्रत्ययादसत एवोत्पत्तिः । सतस्तूत्पत्तौ पुनरुत्पादप्रसङ्ग इति तत्र समाधिः । ननु असत उत्पत्तावनियमप्रसङ्ग इत्याशङ्क्य समाधत्ते *बुद्धिसिद्धं तु तदसदिति। तदसत्कार्यं बुद्ध्या विषयीकृतं, तथाहि—इह तन्तुषु पटो भविष्यतीति ज्ञात्वा कुविन्दः प्रवर्त्तते, सिकतादौ तु पटो भविष्यतीति न ज्ञायत इति न प्रवर्तते ॥ ६१ ॥

(कु० टी०) एवं वाचकं निरूप्यान्तरत्वप्रसङ्गादाकाङ्क्षितत्वाच्च वाच्यं निरूपयति *एवमिति। वाचकवदित्यर्थः। एवव्यवच्छेद्यमेवाह *न त्विति। *सत्तेति। बाह्यसत्तेत्यर्थः। बाह्यसत्तावदिति द्वन्द्वः। यथासंख्यमन्वयः। न च बाह्यसत्तोपलक्षितस्य वाच्यत्वम्, अतो वर्तमानकालविशिष्टसत्ताबोधनाय अस्तीतिप्रयोगस्तादृश्या एवाभावबोधनार्थं च नास्तीतिप्रयोग इति वाच्यम् । तदुपलक्ष्यस्याभावेनास्य वक्तुमशक्यत्वात्। दोषान्तरमाह *किञ्चेति। *इत्यतः—इत्यादितः। क्वचित्तथैव पाठः। आद्ये विरोधः द्वितीये बाधः, सत्ताया द्वितीयभावविकारत्वात् । *इत्यर्थ इति । एतेन बुद्धिसत् शशशृङ्गं बाह्यरूपेण नास्तीति तदर्थोऽपि सूचितः। *सा—बौद्धी । *तद्भावः—बुद्धिस्थपदार्थाङ्गीकर्त्राशयः। युक्त्यन्तरमाह*किञ्चेच्छेति। आवश्यकेति पाठो मतुप्सूत्रे “नैतयोरावश्यकः समावेशः” इति भाष्ये। अवश्यं भाव आवश्यकः। मनोज्ञादेराकृतिगणत्वाद्, आवश्यक इति निपातनाद्वा वुञ्प्रत्ययः। अव्ययानांभेति टिलोपः। आवश्यकमस्मिन्नस्तीत्यावश्यकः। अर्शआदेराकृतिगणत्वादजिति कैयटात् । अन्यत्र क्वचित्तथोक्तत्वादाह *तदीयेति। अन्यत्रापि तयोः सामानाधिकरण्यायाह*घटादीति। सामानाधिकरण्यार्थमाह *अवच्छेद्येति । मिथ इति भावः। ननु सप्तम्यर्थत्व एवाधारस्य प्रागुक्तसङ्गतिस्तदेव न, मानाभावादत आह *शिरसीति। शिरोनिष्ठाधारतानिरूपिका वेदनेत्यादिबोधः। सिद्धान्ते तु अवच्छेदकतासम्बन्धस्याधारतानियामकत्वा न्न दोष इत्यग्रे स्फुटीभ-

विष्यति । अन्यत्राप्युक्तरीत्यैव सामानाधिकरण्यमाह *द्रव्येति । तत्र युक्त्यन्तरमप्याह *भ्रमे इति । *बौद्धस्यैव-रजतस्य । बौद्धपदार्थाङ्गीकारे भाष्यसम्मतिमाह *अत एवेति । बौद्धपदार्थसत्त्वादेवेत्यर्थः। *क इति। देशान्तरस्थः स कीदृश इत्यर्थः। वृत्तबाहुरित्यग्रे·लोहिताक्षस्तुङ्गनासो विचित्राभरण इति शेषः । तत्र तावत्परमते दोषमाह *तवत्विति । तदनङ्गीकर्त्तुरित्यर्थः । अत एवेत्यस्यार्थमाह *ममत्विति । तदङ्गीकर्तुरित्यर्थः। कैयटोक्तिमाह *एतैरिति । *बाह्य इति । लोके दृश्यमान इत्यर्थः । एतेन बौद्धार्थस्यैव शाब्दबोधे भानमिति दर्शितम् । गुणैः प्रापणमित्यस्योदाहरणत्वेनोक्तमिदम्। तत्र तत्तात्पर्यमाह *अत्रेदृशेति । एवं व्यवहारोऽन्यत्रापीति सूचयन्नाह *तादृशेति। दार्ढ्यायानेकभाष्यसम्मतिमाह *हेतुमतीति । तत्र हि-"इह तु कथं वर्तमानकालता कंसङ्घातयति बलिं बन्धयतीति चिरहते च कंसे चिरबद्धे च बलौ ?। अत्रापि युक्तैव, कथं? ये तावदेते शौभिका नाम एते प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिं बन्धयन्ति। चित्रेषु कथम्?। चित्रेष्वप्युद्गूर्णनिपतिताश्च प्रहारा दृश्यन्ते कंसस्य च कृष्णस्य च। ग्रन्थिकेषु कथम्?। यत्र शब्दग्रन्थगडमात्रं लक्ष्यते। तेऽपि हि तेषामुत्पत्तिप्रभृत्याविनाशाहृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान्प्रकाशयन्ति" इत्युक्तं भाष्ये । "चिरहत इति। चिरप्रवृत्तत्वाद्वध्यघातकभावस्य प्रयोजकव्यापारस्य वर्तमानत्वासम्भवात् । उपसंख्यानारम्भे तु न दोषः । आख्यातस्य वर्तमानत्वादित्यर्थः । शौभिका इति-कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्यायाः । कंसानुकारी नटः सामाजिकैः कंसबुद्ध्या गृहीतः कंसो भाष्ये विवक्षितः । ग्रन्थिकेष्विति । कथकेष्वित्यर्थः । तेऽपीति । तदुक्तं हरिणा—

शब्दोपहितरूपांस्तु बुद्धेर्विषयतां गतान् ।
प्रत्यक्षामिव कंसादीन्साधनत्वेन मन्यते ॥ इति" इति कैयटः ।

"ननु चिरहते कंसे इत्युक्त्या प्रयोजकव्यापारस्य वर्त्तमानकालत्वाभावो नोक्त इत्यत आह—चिरप्रेति । कंसकृष्णयोर्वध्यघातकभावस्य चिरप्रवृत्तत्वेन तत्प्रयोजकव्यापारस्यापि तत्त्वमेवेति भावः । कंसाद्यनुकारिणां-कंसादिसदृशानाम् । भाष्ये-प्रत्यक्षमिति । तादृशेनैव-वासुदेवेनेत्यर्थः। उद्गूर्णाः-उद्यताः। गुरी उद्यमने इत्यस्य

रूपम्। एवं च चित्रलेखका अपि चित्रस्थं कंसं तादृशेनैव(कृष्णेन)घातयन्ति। ग्रन्थिकपदे अत इनीति ठन्। शब्दः कथकमुखोच्चार्यमाणः,ग्रन्थस्तद्धस्तस्थपुस्तकरूपः,गडो मनुष्यसङ्घातः। न तत्र कश्चिदपि कंसादिबुद्धिविषयः। ते ऽपि-ग्रन्थिका अपि। तद्वद्धीः-तदैश्वर्याणि। तानि कथयन्तो ग्रन्थिकाः स्वबुद्धिविषयान्सतो विद्यमानान् कंसादीन् प्रकाशयन्ति। श्रोतृबुद्धौ समर्पयन्तीत्यर्थः"इत्युद्द्योतः।एतेन हन्तेस्तद्धननाभिनये तत्प्रतिपादकग्रन्थकथने वा लक्षणा हन्यते कंस इत्यादावित्यपास्तम्। *पंक्तीति। तत्र हि आरम्भपक्षे प्रागुक्तदोषद्वयपरिहाराय-"समुदाये विंशत्यादयो भविष्यन्ति। किं वक्तव्यमेतद् ? न हि। कथमनुच्यमानं गंस्यते?। सङ्घ इति वर्तते। सङ्घः समूहः समुदाय इत्यनर्थान्तरमिति"भाष्ये उक्तम्। "अस्येत्यनुवृत्त्या परिमाणिमात्रे प्रत्ययलाभो न तु तद्विशेष इत्याह-किमिति। वर्त्तते इति। पूर्वसूत्रे द्वन्द्वनिर्दिष्टस्यापि सङ्घशब्दस्यैव स्वरितत्वादिहानुवृत्तिः। ननु प्राणिसमूहः सङ्घस्ततश्च वृक्षाणां विंशतिरिति न प्राप्नोतीत्याह—सङ्घः समूह इति। सामान्येन प्राणिनामप्राणिनां च समुदायः सङ्घ इत्यर्थः। ननु चोक्तं परिमाणिनि चेत्पुनः स्वार्थे प्रत्ययविधानमिति। नैष दोषः, द्रव्यसङ्घयोर्दशतोः सङ्घे प्रत्ययो निपात्यते न तु द्रव्यसङ्घे। इह द्रव्याणां द्रव्यसङ्घस्य दशतां दशत्सङ्घस्य च पारमार्थिको भेदो नास्ति केवलं बुद्ध्या परिकल्प्यते। बुद्धिव्यवस्थापितार्थनिबन्धनाश्च शब्दा बुद्धिमेवार्थाकारामुपजनयन्तोऽसत्यपि वास्तवे भेदे भेदमवगमयन्ति" इति कैयटः। *मतुप्सूत्रे चेति। तत्र "अथास्तिग्रहणं किमर्थम्। सत्तायामर्थे प्रत्ययो यथा स्यात्। नैतदस्ति प्रयोजनम्। न सत्तां पदार्थो व्यभिचरति। इदं तर्हि प्रयोजनं सम्प्रतिसत्तायां यथा स्याद् भूतभविष्यत्सत्तायां मा भूद् गावो ऽस्यासन् गावो ऽस्य भवितार इति" इति भाष्ये उक्तम्। "अथास्तिग्रहणमिति। सम्भवे व्यभिचारे च विशेषणविशेष्यभावो भवति-यथा नीलोत्पलमिति। सत्तां तु पदार्थो न व्यभिचरति तामन्तरेण पदोच्चारणासम्भवात्तस्या एव सर्वशब्दप्रवृत्तौ कारणत्वादिति प्रश्नः। सत्तायां प्रत्ययो यथा स्यादिति। सत्तायां वर्तमानात्सत्तोपाधिकार्थाभिधायिनः प्रत्ययो यथा स्यादित्यर्थः। न सत्तामिति। यावत् बुद्ध्या पदार्थो न विषयीकृतस्तावत्पदस्य प्रयोगाभावस्तस्मात् बुद्धिसत्तासमाविष्टो ऽर्थो विधिनिषेधज-

ननादिभिः सम्बध्यते- वृक्षोऽस्ति, वृक्षो नास्ति, वृक्षो जायते इति । अत्यन्तासतोऽपि बहिः शशविषाणादीनर्थान् बुद्ध्या विषयीकृत्य शशविषाणादिप्रयोगः। तस्मात् बुद्ध्यारूढोपचरिता सत्ता शब्दप्रयोगाश्रयत्वादव्यभिचारेत्यर्थः । सैव तु बुद्धिसत्ता प्रयोक्तृप्रतिपत्तॄणां बहीरूपतया भासते । यदि तु वृक्षादीनां बाह्यसत्तासमाविष्टं वस्तु वाच्यं स्यात्तदा वृक्ष इत्यतः सत्ताऽवगमादस्तीत्यस्य गतार्थत्वात्प्रयोगो न स्याद् । नास्तीत्यस्य च सत्ताविरोधात्प्रयोगाप्रसङ्गः । अङ्कुरो जायते इति च प्रयोगो न स्यात् । सतो जन्मविरोधात् । उपचारसत्तायान्तु एते दोषा नावतरन्ति बौद्धसत्तासमाविष्टस्य बहिः सत्त्वासत्त्वजननप्रतिपादनायास्ति नास्ति जायते इति प्रयोगाद्" इति कैयटः। अस्तीति प्रकृत्यर्थविशेषणम् । तत्र प्रश्नाशयमाह *सम्भवे इति । तामन्तरेणार्थबोधाय पदोच्चारणासम्भवात्। *तस्या एव। बुद्धिसत्ताया एव । *प्रवृत्तौ–प्रयोगे । न सत्ता प्रकृत्यर्थ इति सत्तायां वर्तमानादित्ययुक्तमतस्तदर्थमाह *सत्तोपेति । प्रकृतेस्तदर्थावृत्ताविति भावः। ननु वर्तमानार्थशत्रन्तप्रकृतिकसत्तापदार्थो न भूतभविष्यतोरिति कथं पदार्थस्तां न व्यभिचरतीत्यत आह *यावदिति । *सम्बध्यतेबहिःसत्त्वासत्त्वादिप्रतिपादनायेति शेषः । नन्वत्यन्तासतः शशविषाणादेः सत्ता व्यभिचरतीत्यत आह *अत्यन्तेति । *उपेति। बौद्धसत्ताया एव मुख्यत्वात् । ननु तस्या न शब्दजबोधविषयत्वं तद्विशिष्टस्य नयनाद्यसम्भवादत आह *सैव त्विति । बहिःसत्तासत्त्वे तु तत्समानाधिकरणतया असत्त्वे तु केवलायास्तस्या एव बहीरूपत्वेन भानम । अत एव घटशून्यादपि गेहाद् घटमानयेत्युक्ते आनयने प्रवर्तते, पश्चात्तदभावनिर्णये वक्तृज्ञानस्यासत्त्वं कल्पयतीति भावः। अन्तःकरणस्य रागादिदोषवशेन तस्या एव तत्त्वेन भानमिति तात्पर्यम् । बाह्यसत्ताया एव प्रयोगनियामकत्वे दोषमाह *यदि त्विति । *सतो जन्मेति । सूक्ष्मरूपेण स्थितस्यैव स्थूलरूपापत्तिर्जन्मेतिमते ऽप्यङ्कुरशब्दोपात्तस्थूलरूपावच्छिन्नस्य सत एव जन्मेति भावः । *उपचेति । उपचारसत्तायां शब्दप्रयोगनिमित्तत्वाश्रयणे त्वित्यर्थः । नन्वेवं बुद्धिसत्तायाः सर्वत्र भानेऽस्तीत्यस्य प्रयोगो न स्यादत आह *बुद्धीति । तया च बाह्यसत्त्वाभावस्य जननस्य चाविरोधादिति भावः । अत एवात्र कैयटोल्लेखः । नैयायिक-

सम्मतमपीदमित्याह *गौतमो ऽपीति । *कथमिति । असत उत्पत्तौ 'तन्तुष्वेव पट' इत्यादिनियमश्च कथमित्यपि बोध्यम् । *सूत्रितवानिति । चतुर्थाध्याये फलपरीक्षायामिति भावः । तदर्थमाह *अपीति । *तदर्थ इति । एवं च बुद्धिविषयतया कर्तृत्वमुपपन्नम् । तन्तुष्वेव पटस्य भविष्यत्त्वेन बुद्धिविषयत्वान्नियमो ऽप्युपपन्नः । तत्रैव बुद्धिविषयता कुत इति चेत्कारणत्वादित्यादि तद्व्याख्याने स्पष्टमिति बोध्यम् ॥ ६१ ॥

जन्मादिसूत्रे वाचस्पतिरप्याह—"चेतनो हि नामरूपे बुद्धावालिख्य घट इति नाम्ना कम्बुग्रीवादिना रूपेण च बाह्यं घटं निष्पादयति । निर्वर्त्यस्यापि घटस्यान्तः सङ्कल्पात्मना सिद्धस्य कर्मकारकत्वं घटं करोतीति । यथाहुः—'बुद्धिसिद्धं तु तदसद्' इति" इति ।

तथा—

चित्तस्य द्रव्यरूपो वृत्त्याख्यः परिणामः इन्द्रियप्रणाल्या निर्गत्य विषयेण संयुज्य सूक्ष्मावस्थारूपविषयवासनावशात्तत्तद्विषयाकारेण परिणमते । न तु तस्यां संयुक्तबाह्यविषयप्रतिबिम्बः । स्वप्नादौ बाह्यविषयासंयोगेन तत्प्रतिबिम्बासम्भवात् । तथाच स्मृतिः—

विप्र पृथ्व्यादि चित्तस्थं न बहिःस्थं कदाचन ।
स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते ॥ इति ।

भ्रमे ज्ञानाकारस्यैव विषये आरोप इति सिद्धान्तात् । सन्निकृष्टं ज्ञानाकारं विहायासन्निकृष्टदूरस्थरजताद्यारोपे मानाभावात् । 'तदा दृष्टमधुना नास्ति' इति स्वरूपतो बाधानुभवस्यानुपपत्तेश्च । चाकचक्यादिविषयदोषवशाच्च चित्तवृत्तेस्तथा परिणामः ॥ ६२ ॥

*जन्मादिसूत्रे इति "जन्माद्यस्य यत" इति सूत्रे इत्यर्थः । अस्य जगतो यतो जन्मादि तद्ब्रह्मेत्यर्थः । ननु संसारस्याना-दित्वात्कथं जन्मन आदित्वमिति चेत् । वस्तुस्वरूपकथनमे-तत् । सर्वं हि वस्तु जनित्वैव स्थित्वा लीयते । *नामरूपे इति । कर्मपदम् । *आलिख्य–विषयीकृत्य । *संकल्पेति । स च मिथ्या-ज्ञानं तच्चेष्टसाधनताज्ञानम् । *कर्मकारकत्वमिति । अन्यथा अनुत्पन्नस्य फलाश्रयत्वासंभव इति भावः । "एवं च जगतो-ऽपि नामरूपाभ्यां व्याकृतत्वात्तत्कर्त्ता चेतनः परमात्माऽस्ती-त्यनुमीयते" इति तद्ग्रन्थः । यत्तु क्रियानिमित्तत्वादेव घटस्य कारकत्वं विषयताश्रयत्वादेव च कार्यत्वमिति । तन्न । अविद्यमाने आश्रयत्वस्याप्यसम्भवात् । घटादीनां बुद्धिस्थत्वमुपपादयति *चित्तस्येति । अयम्भावः–यथा तडागोदकं छिद्रान्निर्गत्य कुल्या-त्मना केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा अन्तःकरणमपि चक्षुरादिद्वारा घटादिदेशं गत्वा घटाद्याका-रेण परिणमते स एव परिणामो वृत्तिरित्युच्यते । तथाच वृत्तिघटयोरेकदेशस्थत्वाद्घटांशे प्रत्यक्षम् । ज्ञानावच्छेदकत्वाच्च वृत्तेरपि ज्ञानत्वव्यवहारः । नन्वन्तःकरणस्य निरवयवतया कथं परिणामरूपा वृत्तिरिति चेन्न । अन्तःकरणस्य द्रव्यत्वेन सावयवत्वात् । *द्रव्यरूप इति । द्रव्यसमानाकार इत्यर्थः । एवं शुक्तिरजतादिस्थले ऽप्यविद्यैव रजताकारेण परिणमते । कथं तर्हि नेदं रजतमित्यनेन लौकिकपरमार्थरजतं निषिध्यत इति वे-दान्तिग्रन्थ इति चेत् । पुरोवर्तिनि रजतार्थिनः प्रवृत्तिदर्शनाल्लौकि-कपरमार्थरजतत्वेनापरोक्षतया प्रतीतस्य कालत्रये ऽपि लौकिक-

१ अर्थानुकरणमेतद् न तु शब्दानुकरणम् एतादृशानुपूर्व्यास्तद्ग्र-न्थेऽनुपलम्भात् ।

(कुं०टी०)परमार्थरजतमिदं न भवतीति निषिध्यत इति तदाशयात्। आन्तरस्य चित्तस्य बहिर्निर्गमनाभावाच्चक्षुरादिद्वारा तद्दर्शयति*इन्द्रियेति। नच अन्तःकरणस्य बहिर्गमने देहस्य निर्जीवत्वापत्तिः। चक्षुरादेरिवान्तःकरणस्य विषयदेशगमने ऽपि देहसम्बन्धाविरोधात्। नन्वेवम् 'अहं सुखी'इतिवद् 'अहं रजतवान्'इतिप्रत्ययः स्यादितिचेन्न। 'अहमिहैवास्मि'इति प्रत्ययस्य विशेष्यतावच्छेदकीभूतैतच्छरीरावच्छेदेनैतद्देशमात्रसंयोगावगाहित्ववदुक्तप्रत्ययस्यापि तत्तावच्छेदेन रजतत्वावगाहित्वेन भ्रमत्वात्। ननु वृत्तेरात्मसमवायितया कथमात्मासमवेतद्रव्यस्य तद्रूपत्वमितिचेन्न। शरीरावच्छेदेन ज्ञानादेरिव शुक्तीदन्त्वादिविशिष्टावच्छेदेन रजतादेरात्मसमवाये बाधकाभावात्। *संयुज्येति। चित्तमिति शेषः। *परिणमत इति। नन्वन्तःकरणस्यापीन्द्रियत्वात्कथं प्रत्यक्षमिति चेन्न। मनस इन्द्रियत्वे मानाभावात्। 'इन्द्रियेभ्यः परं मनः' इति पृथगुपादानात्। 'मनःषष्ठानीन्द्रियाणि' इति गीतावचनं तु 'यजमानपञ्चमा(इडां)भक्षयन्ति'इतिवद्विजातीयेनाप्युपपद्यते। ननु इन्द्रियजन्यत्वाभावात्प्रत्यक्षत्वानापत्तिरिति चेन्न। न हीन्द्रियजन्यत्वं प्रत्यक्षत्वे प्रयोजकम् ईश्वरप्रत्यक्षे ऽव्याप्तेः, किन्तु विषयचैतन्यप्रमातृचैतन्ययोरभेद एव। सांख्यास्तु 'अन्तःकरणस्य स्वच्छत्वात्तत्र घटादीनां प्रतिबिम्बे घटादिबुद्धिर्भवति यथा दर्पणे मुखादि गृह्यते न तु तत्तत्रास्ति, एवं चैतन्यमपि जडेष्वन्तःकरणादिषु सङ्क्रान्तमिव दृश्यते। तत्सङ्क्रमविशिष्टान्तःकरणवृत्तौ सर्वार्थाकारसमर्पणं तादृशवृत्तेरेव' इति वदन्ति, तान्निराकरोति*न तु तस्यामिति। तस्यां—वृत्तौ। *संयुक्तेति। इन्द्रियसंयुक्तेत्यर्थः। *स्वप्नादाविति। सिद्धान्ते तु स्वप्नोपलब्धरथादीनामागन्तुकनिद्रादिदोषजन्यत्वात्प्रातिभासिकत्वम्।

ननु स्वप्ने पूर्वानुभूतरथादेः स्मरणमेवास्त्विति चेन्न । 'रथमद्राक्षम्' इत्यनुभवविरोधेन स्मृतिरूपत्वासम्भवात् । रथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकमेव, तदा सर्वेन्द्रियाणामुपरमात् । *चित्तस्थमिति । १'स्वप्नादावसन्नेव विषयो यथा चित्तस्थः एवमन्यदाऽपीत्यर्थः । प्रत्यस्तमितत्वेऽपि बाह्येन्द्रियवृत्तेर्मनोमात्रेणैव यदाऽऽत्मनो भोक्तृत्वं तदा स्वप्नः । विप्रपृथिव्यादीत्युक्तिर्जडाजडसङ्ग्रहाय' । अन्तःकरणचैतन्यस्यैवानाद्यविद्यावशात्स्वरूपतिरोधाने बाह्यरूपेण भानम् । तदाहुः—

अन्तःकरणधर्मस्य भागा बाहिरवस्थिताः । इति ।

२'अन्तःस्थितस्य करणव्यापारो यस्य तद् अन्तःकरणं चैतन्यं तस्य धर्मा आन्तरपदार्थास्तेषामेव भागा बाह्या इत्यर्थः' । 'न तु बाह्यविषयप्रतिबिम्बः' इति यदुक्तं तदुपपादयति *भ्रमे इति । ३'ज्ञानमत्र चित्तवृत्तिः । तस्या आकारो नाम रजततुल्यपरिणामता सा च सत्यस्थले इव भ्रमस्थलेऽपि भवति । तत्रासतो रजतस्य वृत्तिविषयत्वासम्भवात्प्रातिभासिकरजतमुत्पद्यते । शुक्तिरजतयोस्तादात्म्यमपि च प्रातिभासिकमेव । तथाहि—तत्र देशान्तरीयबाह्यरजतस्येन्द्रियसन्निकर्षाभावान्नाध्याससम्भवः । नापि तत्र रजतोत्पत्तिः सम्भवति रजतावयवानामभावाद् । अतः काचादिदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगाद्रज४ताकाराऽन्तःकरणवृत्तिरुदेति । तथाच काचादिदोषसमवहिता अविद्या रजतादिरूपेण परिणमते इति वेदान्ते । *ज्ञानाकारस्य-

---

१ अयं पाठः कपुस्तके नास्ति ।

२ अयमपि पाठः कपुस्तके नास्ति ।

३ कपुस्तके अत्र 'शुक्तिरजतादिस्थले बाह्य-'इति पाठो दृश्यते ।

४ कपुस्तके उद्भूतेति पाठः ।

रजताकारज्ञानस्य।*विषये—शुक्त्यादौ। "बौ१द्धरजतस्य पुरोवर्तिनि ग्रहः" इत्यस्यायमेवाशयः, पुरोऽवस्थितवस्तुसंयोगेऽन्तःकरणवृत्तेः रजताकारेण परिणामात् । एवं च रजताद्याकारज्ञानस्य शुक्त्यादावारोप इत्यस्यापि वा परिणाम एव पर्यवसानं बोध्यम् । *सिद्धान्तादिति । एतेन 'सन्निकर्षेणापि 'रजतम्' 'इदम्' इत्याकारकशुक्तिरजतयोर्ग्रहणस्मरणात्मकं ज्ञानद्वयमेव जायते न तु शुक्तौ रजतत्वप्रकारकम्(एकं ज्ञानम्)। रजतत्वप्रकारकज्ञानमात्रस्य रजतान्यविशेष्यतानिरूपितप्रकारताकत्वाभावनियमस्य विना बाधकं त्यक्तुमशक्यत्वात् । रजतत्वप्रकारेण शुक्तिविषयकप्रवृत्तावपि नेदन्त्वावच्छिन्नशुक्तिधर्मिकरजतत्वप्रत्यक्षत्वेन हेतुता किन्तु रजतत्वोपस्थितिविशिष्टेनेदन्त्वप्रकारकशुक्तिविशेष्यकत्वेन । इदंधर्मिकरजतत्वप्रत्यक्षं प्रति रजतासंसर्गाग्रहस्य प्रतिबन्धकत्वाच्च । 'नेदं रजतम्' इति प्रत्यक्षसत्त्वे रजतत्वप्रकारकशुक्तिविशेष्यकप्रवृत्त्यापत्तिः,इति प्राभाकरोक्तमपास्तमिति भावः। *सन्निकृष्टमिति। तत्र रजतस्योत्पत्तिर्वा ज्ञानं वा न सम्भवतीति प्रागेवोक्तत्वात्। *रजताद्यारोपे इति। असन्निकृष्टरजतभानस्वीकारे इत्यर्थः ।२ 'ननु दोषस्वभावादेव देशान्तरीयमपि रजतं भासते इत्यस्वरसादाह *तदादृष्टमिति'। *स्वरूपतः—रजतत्वस्वरूपभ्रमे बाह्यरजतस्यैव विषयत्वे तस्य विशेषदर्शनदशायामपि सत्त्वेन 'इदानीं रजतं नास्ति' इति रजताभावावगाहिप्रत्ययो न स्यादित्यर्थः । ननु 'रजतं नास्ति'इत्यस्य रजतबुद्धिर्नास्तीत्यर्थ इति चेद् तर्हि सिद्धं बुद्धेरारोप इति । ननु विषयाभावे कथं चित्तवृत्तेस्तथा परिणाम

---

१ अयं पाठः खपुस्तके नोपलभ्यते ।

२ अयं पाठः कपुस्तके नास्ति ।

इत्यत आह *चाकचक्यादीति । चाकचक्यादिकमेव भ्रमहेतुरित्यर्थः । अत एवोक्तं परमार्थसारे 'रज्ज्वां भुजङ्गहेतौ नच कारणमस्ति' इति । भुजङ्गभ्रमहेतौ (रज्ज्वां)कारणान्तरं नास्ति किन्तु अन्यथाभानात्मिका अविद्यैवेति तदर्थः ॥ ६२ ॥

(कु०टी०)वेदान्तिसम्मतमपीदमित्याह। *जन्मादीति।* चेतनो हीति। नामरूपात्मकं जगत् चेतनकर्तृकमित्यादिः।अत एवेदं तल्लक्षणम्। अस्य दृश्यस्य प्रपञ्चस्य वा जन्मादि जन्मस्थितिनाशा यतो यस्मात् येन यस्मिंश्च तद्ब्रह्मेत्यनुकर्षः । यत इति सर्वविभक्त्यन्ततसन्तानां तन्त्रेण निर्देशः । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' इतिश्रुत्यनुरोधात् । श्रुतौ तृतीयवाक्ये यदिति लुप्तसप्तमीकम् । प्रयन्ति प्रेर्यमाणानि यस्मिन्नभिसंविशन्तीति तदर्थ इति सूत्रार्थः । अस्यावश्यकतामाह *निर्वर्त्येति । न तु विकार्यस्य नापि प्राप्यस्येत्यर्थः। *अत एवेत्यादि । बुद्धावालेखादेवेति तदर्थः । अन्यथा असतः कर्तृत्ववत्कर्मत्वमपि न स्यादिति भावः । अत एवाह *यदाहुरिति । इतीति पाठः । एतेन स्वभावो जगत्कारणमित्यपास्तम्, श्रुतिविरोधात् । य एव कदाचित्सुखी स एव कदाचिद् दुःखीत्यस्य दर्शनाच्च । स्वभावानन्त्यकल्पनापेक्षया चेतनकल्पनस्यैव युक्तत्वादिति भावः । ननु कथं बाह्यरूपेण निष्पत्तिर्बौद्धस्यात आह *तथा हीति। पातञ्जलनये प्रत्यक्षस्थले चित्तवृत्तिरिति शेषः। *विषयेण—तत्त्वाभिमतेन। वेदान्तिमतं खण्डयति *न त्विति । *तस्यां—वृत्तौ। अनतिप्रसङ्गायाह *संयुक्तेति । *विप्रेति। योगवासिष्ठे उपशमप्रकरणे गाधिं प्रति विष्णूक्तिरियम् । व्याख्यातं च गङ्गाधरसरस्वतिना 'हे विप्र पृथिव्यादि जाग्रद्रूपं चित्तस्थं चित्तस्यैव जगन्निदानत्वाद् बहिस्तु नासीदित्यर्थः। अयञ्चार्थः स्वप्नावस्थायां भ्रमावस्थायां मदावस्थायां च सर्वैरनुभूयत एव, स्वप्नादिषु चित्तगतस्यैव प्रपञ्चस्य परिस्फुरणादिति' । ननु स्वप्नादौ तथा सत्त्वेऽपि भ्रमे कथं ? तत्र बाह्यस्यैव समारोपस्य परैरङ्गीकारात तथैवानुभवाच्च । अत आह *भ्रमे इति । भ्रमस्थले इत्यर्थः । अयम्भावः-'इदं रजतम्' इति भ्रमे बौद्धरजतस्य पुरोवर्त्तिनि

ग्रहः । तथाहि–चक्षुर्द्वारा निर्गतान्तःकरणवृत्तेः सावयवद्रव्यरूपतया रजतसंस्कारवत्याः पुरोऽवस्थितवस्तुसम्बन्धे तच्चाकचक्याद्युद्बुद्धसंस्कारवशाद्विषयदेशावच्छेदेन रजताकारः परिणामः । तमादाय च तस्या वृत्तेः सन्निकर्षवशाद्रजताकारविशिष्टेदमाकारता भवति । अग्रे तद्बाधाच्चास्य रजतांशे भ्रमत्वग्रहः । स्पष्टश्चेदं पातञ्जलसूत्रे इत्यग्रे स्फुटीभविष्यतीति । एवव्यवच्छेद्यं दर्शयन् परमते दोषमाह *सन्निकृष्टेति । अनुभवसिद्धेत्यादिः । प्रत्यासत्त्यनङ्गीकारे ऽप्याह *तदेति । ननु विशेषदर्शनात्तदुपपत्तिरिति चेन्न । तावतापि तव तादृशस्वरूपाबाधात् । ननु चित्तवृत्तेस्तथा परिणाम एव कथम्? असंसर्गाद् । अत आह *चाकेति । विषयेत्यनेनेन्द्रियसंस्कारदोषयोर्निरासः। चस्त्वर्थे । प्रतिपादितमिदमनुपदमेव । बौद्धरजताकारस्यास्य बहिरसत्त्वान्नृशृङ्गतुल्यतयाऽसत्ख्यातिरिति केषांचिद्व्यवहारः कणादसूत्रसम्मत एव । परन्त्विदमयुक्तमित्यग्रे स्फुटीभविष्यति ॥ ६२ ॥

एतेन ज्ञानलक्षणासन्निकर्षेण दृष्टे ऽनुभूतरजतप्रकारिका शुक्तिप्रतीतिरित्यपास्तम् । अन्यथोपपत्तेः । तत्तदनुयोगिताप्रतियोगिताऽविशिष्टसम्बन्धस्य कदाप्यनुभवाभावाच्च । सम्बन्धस्य द्विष्ठत्वस्वरूपतया तत्तदनुयोगित्वादिरहितसम्बन्धभानस्यायुक्तत्वात् । तत्तदनुयोगितादिवैशिष्ट्येन ज्ञातस्यैव प्रवृत्त्याद्युपयोगित्वाच्च ॥ ६३ ॥

(कुं० टी०) ननु लौकिकचाक्षुषं प्रत्येव चक्षुःसंयोगादेर्हेतुतया अलौकिकचाक्षुषं ज्ञानलक्षणयैव सिद्धम् । तथाहि–'घटो नास्ति' इत्यत्राभावांशे घटस्य, 'सो ऽयम्' इतिप्रत्यभिज्ञायां तत्तांशस्य, 'सुरभि चन्दनं पश्यामि' इति (उपनीतभाने) सौरभांशस्य भानं न सम्भवति इन्द्रियसम्बन्धाभावात्, अतस्तद्विषयकज्ञानमेव सम्बन्धः, अस्ति च बाह्यरजतज्ञानं शुक्तावपीति मतं निराकरोति *ज्ञा-

नलक्षणेति । 'रङ्गं रजतत्वेन जानामि' इतिप्रतीतेरन्यथाख्यातिः स्वीकार्या, तन्निर्वाहार्थं च ज्ञानलक्षणापि स्वीकार्या, इति तार्किकाः। तन्न। संस्कारस्य तज्ज्ञानजनकता, तज्जनकज्ञानघटितसन्निकर्षहेतुत्वम्, अतिरिक्तसन्निकर्षकल्पना चेति गौरवात्। *अपास्तमिति। अयम्भावः-तत्र 'सौरभं पश्यामि'इतिप्रत्ययानामभावात् विषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नाधिकरणता न सम्भवति तत्कथं तच्चाक्षुषोपपत्तये ज्ञानलक्षणास्वीकारः। 'सौरभं स्मरामि' इतिप्रतीत्या विषयतासम्बन्धेन स्मृत्यधिकरणताया एव तत्र स्वीकर्तुमौचित्यात् । युगपज्ज्ञानद्वये मानाभावे ऽप्येकस्मिन् ज्ञाने स्मृतित्वचाक्षुषत्वोभयसत्त्वे बाधकाभावात् । 'इदं रजतं पश्यामि' इति प्रतीत्या भ्रमस्थले ऽपि लौकिकविषयतास्वीकारस्यावश्यकत्वाच्च । अथ सन्निकर्षादीनामिव दोषस्याप्यन्वयव्यतिरेकाभ्यां प्रत्यक्षहेतुत्वमिति चेत् । एतदपेक्षया तदाकारपरिणामस्यैव लघुत्वात् । ननु विषयगतदोषस्य चित्तवृत्तिनियामकत्वे ऽभ्रान्तपुरुषस्यापि तादृशशुक्तिदर्शने भ्रान्तत्वापत्तिरिति चेन्न । तत्पुरुषीयत्वं निवेश्यैव हेतुहेतुमद्भावस्वीकारात् । जपाकुसुमलौहित्यस्य तु सर्वान्प्रत्येकरूपत्वान्न तत्पुरुषीयत्वानिवेशः । *अन्यथोपपत्तेरिति । चित्तवृत्तिपरिणामेनैव गतार्थत्वात् । किञ्च ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादिप्रत्यक्षोपपत्तावनुमितेरुच्छेदापत्तिः । *तत्तदनुयोगीति । यथा घटभूतलयोः संयोगो घटप्रतियोगिको भूतलानुयोगिको, न तथेहानुभवो ऽस्तीत्यर्थः । घटत्वसामान्यलक्षणा देशान्तरीयघटज्ञानं जनयति ज्ञानलक्षणा तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिः। तथा च रजतत्वज्ञाने प्रातियोगित्वादिप्रतीत्यभावात्सम्बन्धत्वासम्भव इतिभावः। 'सम्बन्धसम्बन्धो न विशिष्टज्ञानविषय'

इति तार्किकमतं निराकरोति *'१सम्बन्धेनेति । संयोगरूपसम्बन्धस्य तुल्यतया 'कुण्डे बदरम्' इतिवत् 'बदरे कुण्डम्' इतिप्रतीतिवारणाय बदरादौ संयोगप्रतियोगित्वादिस्वीकार आवश्यकइति भावः'। * वैशिष्ट्येनेति । यथा भूतलानुयोगित्वेन ज्ञातः संयोग एव प्रवृत्तिहेतुरित्यर्थः ॥ ६३ ॥

(क० टी०) अन्यथाख्यातिरित्यर्वाचीनन्यायवैशेषिकविदुक्तिं खण्डयति*एतेनेति। चक्षुर्जन्यज्ञाने विषयतासम्पादकसंस्कारजनकज्ञानविषयत्वं संसर्ग इति तदाशयः । एतेनेत्यस्यार्थमाह *अन्यथेति । ननु विनिगमनाविरहः उपायस्योपायान्तरादूषकत्वं चात आह *तत्तदिति। आविशिष्टेतिच्छेदः । *सम्बन्धस्य-प्रकृते शुद्धज्ञानस्वरूपस्य । ननु कुतो नानुभवो ऽत आह *सम्बन्धत्वस्येति । तथाच तदभावादेव स नेति भावः । दोषान्तरमाह *तत्तदिति । *ज्ञातस्यैव- सम्बन्धस्य ॥ ६३ ॥

वस्तुतो ज्ञानलक्षणा प्रत्यासत्तिरेव न।अविद्यमानस्य प्रत्यासत्तित्वायोगात्।न च ज्ञानविषयत्वं प्रत्यासत्तिः। ज्ञानविषयोभयस्वरूपा विषयतेतिमते ज्ञाननाशे तस्या वक्तुमशक्यत्वात् । तस्मात् स्मृताविव संस्कार एव प्रत्यासत्तिः । एवं च मदुक्त एव पर्यवसानम् ।

'सुरभि चन्दनं' 'सो ऽयम्' इत्यादि च संस्कारचक्षुस्सन्निकर्षाद्युभयजन्यं ज्ञानान्तरमेवेति न स्मृतित्वानुभवत्वयोस्तत्र सङ्करः ॥ ६४ ॥

(कुं० टी०) ज्ञायमानं सामान्यं न प्रत्यासत्तिरिति मतं निराचष्टे *अविद्यमानस्येति । शुक्तावविद्यमानस्य रज-

---

१ इदं कपुस्तके न दृश्यते केवलं 'तत्तदिति' इति प्रतीकमात्रमेतत्स्थाने वर्तते ।

तस्य सान्निकृष्टत्वाभावेन प्रत्यासत्तित्वासम्भवादिति भावः । अख्यातिवादिनस्त्वत्र ग्रहणस्मरणात्मकं ज्ञानद्वयं वदन्ति, तथाहि—इदमिति पुरोवर्त्तिद्रव्यग्रहणं दोषवशाच्च शुक्तित्वाग्रहे सादृश्यात्संस्कारोद्बोधे दोषवशात्प्रमुष्टतत्ताका रजतस्मृतिः भिन्नयोरपि ज्ञानयोर्भेदस्य विषययोरसंसर्गस्य चाग्रहाद्विशिष्टज्ञानकार्यप्रवृत्तिरेकज्ञानत्वव्यवहारश्चेति । तन्न । प्रवृत्तिं प्रति स्वरूपतो विषयतया संसर्गाग्रहकालिकमिष्टसाधनतावच्छेदकविशिष्टं विषयस्मृतिविशिष्टं पुरोवर्तिविषयकं ज्ञानं कारणं वाच्यमिति गौरवात् । ननु सामान्यलक्षणेत्यादेः सामान्यविषयकं ज्ञानमित्यर्थः । तथाच तद्विषयत्वमविद्यमाने ऽप्यस्तीत्याशङ्कते *न चेति । यत्तु रजतत्वादिना शुक्त्याद्युपनीतभानानुरोधेन ज्ञानलक्षणास्वीकारः, तत्र शुक्तित्वस्य भानाभावेन सामान्यलक्षणया शुक्त्यादिभानासम्भवादिति । तन्न । तत्र दोषस्यैव शुक्त्यादिभासकत्वात् । यदपि सौरभांशे इन्द्रियसन्निकर्षं विना सौरभत्वसामान्यलक्षणया तज्ज्ञानासम्भवाज्ज्ञानलक्षणेति । तदपि न।सौरभादिविषयकोपनीतभानसामग्र्या एव तत्रापि हेतुत्वकल्पनात् । *ज्ञानेति । क्षणिकस्य ज्ञानस्य प्रत्यासत्तित्वासम्भवादिति भावः। *ज्ञानविषयोभयेति। विषयताया ज्ञानस्वरूपत्वे 'घटवद् भूतलम्' इति ज्ञानानन्तरं 'घटविशेष्यकज्ञानवानहम्' इत्यनुव्यवसायापत्तेः। विषयस्वरूपत्वे 'घटवद्भूतलं' 'घटभूतलसंयोगाः' इति ज्ञानयोरवैलक्षण्यप्रसङ्ग इत्यभिप्रेत्योक्तम् *उभयस्वरूपेति । *संस्कार एवेति । रजतत्वासनारूप इत्यर्थः । नातः संस्कारजन्यत्वेन स्मृतित्वापत्तिः । वस्तुतस्तु विषयत्वरूपत्वे ऽपि 'घटभूतलसंयोगा' इत्यत्र संयोगत्वेन संयोगो भासते न तु 'घटवद् भूतलम्' इत्यत्रेत्यत एव वैलक्षण्यम् ।

जात्यतिरिक्तपदार्थस्य स्वरूपतो न भानमिति नियमस्तु प्रकारतांशे न तु सांसर्गिकविषयतायामित्यभिप्रेत्योक्तं *मते इति । ननु ज्ञानलक्षणाऽस्वीकारे सौरभांशे इन्द्रियसंनिकर्षाभावात्कथं तज्ज्ञानम् ? अत आह *ज्ञानान्तरमेवेति । ग्रहणस्मरणात्मकमेकं ज्ञानमित्यर्थः । संस्कारजन्यत्वमात्रेण स्मृतित्वव्यवहारमात्रं तत्र न तु 'स्मरामि' इति (अनुव्यवसायः) । पूर्वानुभूततारूपताया अनुल्लेखात् । अत एव 'सुरभि चन्दनं पश्यामि' इत्येव प्रत्ययः । तार्किकास्तु तत्रोपनीतभानत्वेन व्यवहरन्ति ।

परे तु चन्दनत्वेन सुरभित्वमनुमीयते अन्यथा साध्यविशिष्टपक्षप्रत्यक्षोपपत्तेरनुमानोच्छेद इत्याहुः ।

प्राभाकरास्त्वाहुः—'सो ऽयम्' इति इदमंशे प्रत्यक्षं तत्तांशे स्मरणमिति ज्ञानद्वयम्, एवं 'सुरभि चन्दनम्' इत्यादावपीति । यद्यपि प्रवृत्तिं प्रति विशिष्टज्ञानस्यैव हेतुतया ज्ञानद्वयस्वीकारे प्रवृत्त्यनापत्तिस्तथापि भेदाग्रहसहितं तत् प्रवृत्तिहेतुः अतो दोषान्तरमाह *सङ्कर इति । एतच्चाभ्युपगमवादेन । वस्तुतस्तयोः साङ्कर्ये ऽप्यदोषः । ब्रह्माभिन्नस्य सर्वस्यानित्यतया नित्यत्वघटितजातित्वाभावेन तस्यादोषत्वात् । किञ्च कपिसंयोगतदभावयोरिवैकस्मिन्नपि ज्ञाने ऽवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोः स्वीकारात् ॥ ६४ ॥

(क०टी०)इदं च ज्ञानलक्षणायाः प्रत्यासत्तित्वमभ्युपेत्योक्तम्।वस्तुतः सैव नेति तथोपपादनमयुक्तमेवेत्याह *वस्तुत इति ।दूषणमुद्धरति *न चेति । विषयत्वस्य विद्यमानत्वादिति भावः । विषयताया ज्ञानस्वरूपत्वे 'घटवद् भूतलम्' इत्यादिज्ञाननिरूपितघटादिनिष्ठविषयतानामभेदापत्त्या तज्ज्ञानानन्तरं 'घटप्रकारकभूतलविशेष्यकज्ञानवानहम्' इतिधीवद् 'भूतलप्रकारकघटविशेष्यकज्ञानवानहम्' इतिधीप्रसङ्गः । घटनिष्ठप्रकारताख्यतज्ज्ञानरूपविशेष्यताया घटनिष्ठघट-

त्वप्रकारतानिरूपिततज्ज्ञानरूपविशेष्यताया अभिन्नतया तज्ज्ञानस्य घटत्वप्रकारतानिरूपितघटनिष्ठविशेष्यताशालित्वात् ? । विषयस्वरूपा चेद् 'घटभूतलसंयोगसम्बन्धा' इत्याकारकसमूहालम्बनीयघटादिनिष्ठविषयतानां 'घटवद् भूतलम्' इत्यादिविशिष्टधीनिरूपिततन्निष्ठतासां च तत्तत्स्वरूपत्वेनावैलक्षण्येन तयोर्धियोर्भेदानुपपत्तिरित्यत आह * ज्ञानविषेति । तथाच नोक्तदोषजातमिति भावः । तस्यास्तदतिरिक्तत्वे तु गौरवं दोषः स्फुट एव । तद् ध्वनयन्नाह *तस्मादिति । अन्यथाऽनिर्वाहादित्यर्थः । तस्य च तत्त्वमावश्यकमिति सूचयन्नाह *स्मृताविवेति । भ्रमादावपीति भावः । *एवं चतस्या एव प्रत्यासत्तित्वे च । *मदुक्त एव-बौद्धपदार्थसत्त्वेन तस्यैव तत्र भाने एव ।

नन्वेवं 'सुरभि चन्दनम्' इति धियि स्मृतित्वानुभवत्वयोः साङ्कर्यापत्तिः प्राभाकरमतप्रवेशात् । तथाहि-'इदं रजतम्' इत्यत्र 'इदम्' इति पुरोवर्तिद्रव्यग्रहणं दोषवशेन तद्गतशुक्तित्वाविशेषाग्रहणम् । तज्ज्ञाने च दोषवशतः प्रमुष्टपूर्वानुभवत्वरूपतत्ताका रजतस्मृतिः । तत्र यथा वास्तवरजतविषयम् 'इदं रजतम्' इत्यत्र 'इदम्' इति ज्ञानमिदंपदार्थरजतत्वयोरसंसर्गं न गृह्णाति (तयोः) संसृष्टत्वेनासंसर्गाभावात् , ज्ञानस्यैकत्वाच्च न स्वगतं भेदं गृह्णाति, तथा तत्सादृश्याद्देते भिन्ने अपि ज्ञाने स्वगतभेदं विषययोरसंसर्गं च न गृह्णीत इति विशिष्टज्ञानकार्यप्रवृत्तेरेकज्ञानत्वव्यवहारादेश्च निर्वाहः, अत आह *सुरभीति । अयम्भावः-प्रागुक्तरीत्या ग्रहणात्मकमिदमेकमेव ज्ञानम् । संस्कारस्यापि सहकारितामात्रेण स्मृतित्वव्यवहारमात्रं न तु सा स्मृतिः, पूर्वानुभूततारूपतत्तानुल्लेखात् । अत एव तत्र 'पश्यामि' इत्येवानुव्यवसायो न तु 'स्मरामि' इत्यप्यंशे । चक्षुर्द्वारा निर्गतवृत्तावेव संस्कारवशात्सौरभाकारताया अपि जायमानत्वेन तस्य चाक्षुषत्वात् । 'सोऽयम्' इत्यत्रापि पूर्वानुभूततारूपतत्तोल्लेखे ऽप्यन्यत्सर्वं प्राग्वदवेति तस्याप्राधान्यान्न तथात्वे ॥ ६४ ॥

अत एव 'स्त्रियाम्' इतिसूत्रे खट्वादौ स्तनकेशाद्य-

---

१ इत आरभ्य मूलस्य कुञ्जिकाटीकया राहित्यं वर्तते । तथापि कलाटीकाऽनुरोधेनेदमुपन्यस्तमत्र । उपलब्धमूलसहितकुञ्जिकाटीकापुस्तकद्वितये इदं मूलमपि नास्ति ।

दर्शनेन लिङ्गाभावात्तापो ऽनुपपत्तिमाशङ्क्य-

"असत्तु मृगतृष्णावद् गन्धर्वनगरं यथा ।

असत्तु खट्वावृक्षयोर्लिङ्गं द्रष्टव्यम् । कथं पुनरसल्लिङ्गं शक्यं द्रष्टुम् ? मृगतृष्णावत् । तद्यथा मृगास्तृषिता अपां धाराः पश्यन्ति न च ताः सन्ति, यथा गन्धर्वनगराणि दूरतो दृश्यन्ते उपसृत्य च नोपलभ्यन्ते "इति भाष्ये उक्तम् । अनेन हि स्पष्टमेव भ्रमे बहिस्तद्देशो असत एव भानमुक्तम् ।

हरिणाऽप्युक्तम्—

'यथा सलिलनिर्भासो मृगतृष्णासु जायते ।

जलोपलब्ध्यनुगुणाद्बीजाद्बुद्धिर्जलेऽसति' ॥ इति ।

'बीजं पूर्वपूर्वमिथ्याज्ञानजन्यवासना' इति तद्व्याख्यातारः । व्यवहारदशायां कदापि केनापि तन्मात्रे बाधाननुभवात् "असतो लिङ्गस्य भानम्" इत्येतन्निराकृतमित्यन्यत् ।

भ्रमे यावद्विशेषदर्शनं बहिः सत्त्वेन प्रतीतिस्तु तत्राधिष्ठानगतसत्त्वारोपात् । अत एव "सदसत्ख्यातिर्बाधाबाधाभ्याम्" इति साङ्ख्यसूत्रे उक्तम् । यावद्विशेषदर्शनमबाधस्तदुत्तरं च बाधोऽस्ति ।

प्रपञ्चो ऽप्येवमेव । मृगतृष्णादिदृष्टान्तेन प्रपञ्चस्य शास्त्रे वर्णनात् । तदुक्तं परमार्थसारे शेषनागेन-

'मृगतृष्णायामुदकं, शुक्तौ रजतं, भुजङ्गमो रज्ज्वाम् ।

तैमिरिकचन्द्रयुगवद् भ्रान्तमखिलं जगद्रूपम्' ॥ इति ।

भ्रान्तं भ्रमविषय इत्यर्थः ॥ ६५ ॥

(क०टी०) भाष्यविरुद्धमपि नैयायिकाद्युक्तमित्याह *अत एवेति। तदनङ्गीकारेणोक्तरीत्या निर्वाहादेवेत्यर्थः । आदिना वृक्षादिलौकिकलिङ्गमाह *एतनेति । व्यञ्जकाभावेन व्यङ्ग्यस्याभाव इत्याह *लिङ्गाभावादिति । *आचारः– तत्तल्लिङ्गव्यवहारादिः । *पश्यन्तीति । न च ताः सन्तीति शेषः । अत एवेत्युक्तं स्पष्टयति *अनेन हीति । भाष्येणेत्यर्थः । अन्यदेशे सत्त्वादाह *तद्देशे इति । यद्देशे भासते तद्देशे इत्यर्थः । एवंन सतो भाननिरासः । परमते ऽन्यत्र सत एव भानेनैतद्भाष्यासङ्गतिः स्पष्टैव । तस्मादुक्तरीत्या बौद्धस्यैव भानमिति सिद्धम् । तत्रत्यहरिरपि तथैवेत्याह *हरिणापीति । ननु जलाभावे तत्र तन्निर्भासः कथम् ? अत आह *जलोपेति । तस्मिन्नसत्यपि तादृशाद् बीजाद् बुद्धिरित्यर्थः । नन्वत्र किं तद्बीजमत आह *बीजमिति । "असतो न भानम्" इत्येवं न निराकृतं किन्त्वन्यथेति तद् अभिमतमेव भगवत इति नाग्रिमविरोध इत्याह *एवेति । *तन्मात्रे–लिङ्गमात्रे । रजतत्वांशे इव । *बाधाननुभवादिति । शेषषष्ठ्या समासः। *निराकृतम्–भगवता । तथा च लौकिकलिङ्गाश्रयणेन तत्राप्यन्यत्रेव वास्तव एव तन्निर्वाह इति भावः । नन्वस्तु तत्रान्यथानिर्वाहस्तथापि भ्रमादौ बहिरसत एव भानं दृष्टान्तसिद्धं भगवत्सम्मतमिति कथं तत्र विशेषदर्शनतः प्राग्बहिः सत्त्वेन प्रतीतिरत आह *भ्रमे इति। तत्त्वावच्छिन्ने इत्यर्थः। *यावद्विशेषदर्शनम–तत्पर्यन्तम। एवमग्रेऽपि। *तत्र–भ्रमविषये । इदं समूलयति *अत एवेति। *तत्र–तावत्तदारोपादेवेत्यर्थः । विरोधेन द्वयोर्यौगपद्यासम्भवादुक्तरीत्यैवाह *यावदिति । प्रसङ्गादाह *प्रपञ्चोऽपीति । *एवमेव–सदसत्ख्यातिरेव । तत्रादृष्टचरत्वनिरासायाह *तदुक्तमिति । ननु प्रतीयमाना धर्मादयः कथं न सन्तीत्युच्यत इत्याशङ्क्य न तत्प्रतीतिमात्रेण सत्यत्वं शुक्तिरजतादिषु तत्रासतामसत्यानामपि प्रतीतिदर्शनादित्याह *मृगेति । उषरभूमावूर्ध्वाधरभावेन सूर्यमरीचिसम्बन्धो मृगतृष्णा, तत्राधिष्ठानभूतायामुदकं यथा वासनावशाद्भासमानमपि भ्रान्तं मिथ्या तत्रासदेव, एवं शुक्त्यादावपि । *तैमिरिकः–तिमिराख्यनेत्रव्याधियुक्तस्य चन्द्रे यथा द्वित्वमसदेव भासते एवं ब्रह्मण्यखिलं जगद्रूपं पूर्वपूर्ववासनावशादसदेव भासते इति सर्वं भ्रमविषयो ऽसदेव जगदित्यर्थः । मिथ्यात्वे विप्रतिपन्नं प्रति विश्वासार्थं

बहुदृष्टान्तोपन्यासः । भावक्तप्रत्ययाभ्रमायाह *भ्रमविषयेति ॥ ६५ ॥

व्यासो ऽपि 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तेः' इति स्वप्नप्रपञ्चस्य मायामात्रत्वं न तु बाह्यसर्गतुल्यत्वमाह । तत्रैव यद्यपि जाग्रत्प्रपञ्चस्यापि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति सूत्रेण मायामात्रत्वमुक्तम्, तथापि 'प्राग् ब्रह्मात्मदर्शनाद्वियदादिप्रपञ्चो व्यवस्थितः स्वाप्नस्तु प्रतिदिनं बाध्यत इति विशेषः' इति भाष्ये उक्तम् । तस्य प्रपञ्चस्यान्यवस्तुत्वाभावः, 'वाचारम्भणं विकारो नामधेयम्' इतिश्रुतेरिति सूत्रार्थः । वाचैव केवलमारभ्यते यतो नाममात्रं न तु वस्तुत इति श्रुत्यर्थः ॥ ६६ ॥

(का०टी०) न केवलं तत्सम्मतमेवेत्याह *व्यासोऽपीति । 'सन्ध्ये सृष्टिराह हि' इत्यनेन पूर्वसूत्रेण तृतीयद्वितीयपादस्थेन जाग्रत्सुषुप्त्योः सन्धौ भवं सन्ध्यम् । दिगादित्वाद्यत् । स्वप्नः । तत्र सृष्टिर्व्यावहारिकीव, हि यतः, श्रुतिरेवमाह 'अथ रथान् रथयोगान्पथः सृजते' इतीत्यर्थकेन कृतपूर्वपक्षनिरासमाह * मायेति । तुः पूर्वपक्षनिरासार्थः । स्वप्नसृष्टिर्मायामात्रं शुक्तिरजतादिवत् । *कात्स्न्र्येन–उचितदेशकालादिसम्पत्त्या बाधाभावेन वा । अनभिव्यक्तस्वरूपत्वादिति पाठः । न हि रथादीनामुचितो देशः स्वप्ने सम्भवति, देहान्तर्नाडीप्रविष्टमनोऽवच्छिन्नसाक्षिभिन्नस्य (तदानीम्) असत्त्वात्, नाप्युचितः कालोऽस्ति, घटिकामात्रवर्तिनि स्वप्ने ऽनेकसंवत्सरसाध्यसंसरणस्य दर्शनात् । तस्मात्प्रातिभासिक एव स्वप्नप्रपञ्च इत्यर्थः । तुतात्पर्यमाह *स्वप्नस्येति । मात्रव्यावर्त्यमेवाह *नत्विति । नन्वेतावता तस्य तत्त्वे ऽपि बाह्यस्य तत्त्वं नाभिमतं, तस्य किञ्चित्स्वोक्तिविरुद्धमपीदमत आह *तत्रैवेति । व्यासीये एवेत्यर्थः ।*उक्तमिति । एवं चाद्यदोषोद्धारे ऽपि द्वितीयदोषः (तदवस्थः) एवेति भावः । तमप्युद्धरति

*तथापीति । *ब्रह्मात्मदर्शनात्–ब्रह्मस्वरूपदर्शनात् । *विशेष इति । तथाचैतन्मात्रकृतो भेद इति न मिथो विरोधोऽपीति भावः।ननु ब्रह्माभेदे ऽपि जगति लोकदृष्टान्तेन विरोधपरिहारे लौकिकयोः कार्यकारणयोरिव ब्रह्मप्रपञ्चयोरपि समानसत्ताकत्वं स्यादित उक्तम् *तदनन्यत्वमिति । तस्य प्रपञ्चस्य ब्रह्मणो ऽनन्यत्वमारम्भणशब्दादिभ्यः । एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय 'सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्युक्तम् । मृत्पिण्डो मृज्ज्ञानाकारमाह । *वाचेत्यादि । विकारः सर्वो ऽपि वाचाऽऽरभ्यते 'राहोः शिरः' इतिवत् यद्वा वाचः शब्दस्याऽऽरम्भणहेतुर्न तु तत्त्वतो ऽस्ति यतो नामधेयमात्रमेतत् । अत्र नामधेयशब्देन तत्कारणको व्यवहारो लक्ष्यते । व्यवहारमात्रमेतदित्यर्थः । मृदादिकारणेभ्यो भेदाभेदाभ्यामनिर्वचनीयत्वात् , भेदे सत्कार्यवादहानिः,अभेदे कारणव्यापारवैयर्थ्यम्, उत्पत्तेः पूर्वमसत्स्वभावं नरविषाणवत्पश्चात्तु सदित्यस्याप्ययुक्तत्वान्नीलरूपस्य पीतरूपत्वे इवैकस्योभयस्वभावत्वे विरोधात् , मृदित्येव सत्यम् । सत्यत्वं च मृदः स्वविकारापेक्षया । तथा सत्यज्ञानादिरूपत्वेन ब्रह्मणि ज्ञाते विकारो ऽप्यसत्यो ब्रह्मैव सत्यमिति ज्ञानम् । एवं ज्ञाने ऽपि यथा मृदपेक्षया विकारमिथ्यात्वज्ञाने ऽपि व्यवहाराय तदुपादानं भवति,एवं व्यवहाराय सर्वोपादानमिति बोध्यम्, अन्यथाऽसंगतिः। न हि मृन्मात्रज्ञानात्तत्तद्वैशेषिकरूपेण सर्वज्ञानं भवति। एतेन तत्तद्वैशेषिकरूपेण सर्वज्ञानमिति वेदान्त्येकदेश्युक्तमपास्तम् । आदिना 'एतदात्म्यमिदं सर्वं यदयमात्मा' 'ब्रह्मैवेदं सर्वम्' इत्यादिश्रुतिपरिग्रहः । आसां च श्रुतीनां न ब्रह्मप्रपञ्चयोरभेदे तात्पर्यं सदसतोरभेदायोगात् किन्तु प्रपञ्चे भिन्नतत्त्वाभाव एवेति बोध्यम् । अनेकतत्त्वत्वे एकविज्ञानेन सर्वविज्ञानं न केनापि रूपेणोपपादयितुं शक्यम् । वेदान्तानां ब्रह्मणि तात्पर्यं न वेति सन्देहः,प्रवृत्तिनिवृत्त्यविषयत्वान्नेति पूर्वपक्षः,प्रवृत्त्याद्यविषयत्वे-ऽपि षड्विधलिङ्गवशादस्त्येव तात्पर्यं तत्रेति सिद्धान्त इति । तदेतदभिप्रेत्याह *तस्येत्यादि । समुच्चित्यद्योतकतया एवकेवलयोः प्रयोगः । सर्वथा तस्यातत्त्वाय तदाश्रयणम् । अत एव मात्रमित्यादि। एतदेव सर्वं बोधयितुं श्रुतौ ब्रह्मणो जगदुपादानत्वेन व्यवहारो मृदादिदृष्टान्तेन । कार्यापेक्षया कारणस्यैव सत्यत्वं कार्यं तु व्य-

वहारमात्रमिति बोधयितुं श्रुतौ दृष्टान्तो ऽप्यनुमानप्रमाणसिद्ध एव न लोकसिद्धः । आद्यन्तयोर्मृद एवोपलब्धेस्तस्यास्तद्विकारात्सत्यत्वानुमितिर्बोध्या । इदमनुपदमेव स्फुटीभविष्यति ॥ ६६ ॥

अत एव च 'अनन्यत्वेपि कार्यकारणयोः कार्यस्य कारणात्मत्वं न तु कारणस्य कार्यात्मत्वम्' इति "न तु दृष्टान्तभावात्" इति सूत्रे भाष्ये । कार्यस्य वस्तुत्वाभावादिति तदाशयः । मायामात्रमिति मात्रपदेनानिर्वचनीयोत्पत्तिवादमपि निराकरोति । न च "न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान्पथः सृजते" इति स्वप्नविषयश्रुत्युक्तसृष्ट्यसंगतिरिति वाच्यम् । 'उपक्रमे रथाद्यभावः श्रुत्योक्त इति सृष्टिवचनं भाक्तम्' इति भाष्येणैव समाधानात् । किंच 'नास्य रथादिग्रहणाय चक्षुरादीनि सन्ति रथादिनिर्वर्तने वा कुतो निमेषमात्रेण सामर्थ्यं दारूणि च न सन्ति तस्मान्मायामात्रं स्वप्नदर्शनम्' इति, 'तादृशमपीष्टानिष्टसूचकम्' इति च भाष्ये स्पष्टम् । अत्रान्तःकरणपर्यन्तं नष्टवृत्तिकत्वाच्चक्षुरादीनि न सन्तीत्युक्त्या विशिष्टज्ञानाध्यासो दर्शितः । सामग्रीव्यतिरेकाच्चानुत्पत्तिं वदता शुक्तिरजतादिस्थले ऽप्यनुत्पत्तिः सूचिता ॥ ६७ ॥

(कृ० टी०) भाष्यसम्मतमपीदमेवेत्याह *अत एव चेति । तस्यान्यवस्तुत्वाभावादेवेत्यर्थः । इतीत्यस्योक्तमिति शेषः । द्वितीयाद्यपादस्थमिदम् । तत्रैव 'अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्' इति पूर्वसूत्रेण सतो ब्रह्मणः कारणत्वमप्यसमञ्जसम् अपीतौ प्रलये तद्वत् कारणवत् कार्याणामपि सत्त्वप्रसङ्गादित्यर्थकेन कृतपूर्वपक्ष-

वृषकम् । *न त्विति । उक्तं तु न युक्तम् । सतः असदुत्पत्तौ दृष्टान्तसत्त्वादिति सूत्रार्थः । उक्तामापत्तिं प्रतिबन्द्या समाहितवान् "स्वपक्षे दोषाच्च" । असत्कारणतावादे ऽपि दोषो ऽयं समानः । कालादेः सहकार्यन्तरस्याऽऽश्रयणेन परिहारो ऽपि समान इत्यर्थः।अत्रान्यथा व्याख्यानं तु तृतीयसूत्रासामञ्जस्यादयुक्तमिति बोध्यम् । भाष्याशयमाह *कार्यस्येति । सौत्रमात्रपदसाफल्यमाह *मायेति । *वादमपि-वेदान्तिसम्मतम्। *निरेति।व्यास इति शेषः।इदं त्वनुपदमेव स्फुटीमविष्यति। *नचैवम्–तस्य मायामात्रत्वे। *रथयोगाः–तद्ग्राहकाः । *सृष्ट्यसमिति । सृजत इत्युक्तेत्यर्थः।*श्रुत्योक्तः–श्रुत्यैवोक्तः । अयम्भावः–एषा स्वाप्नसृष्टिर्माययैव केवलम्,जाग्रद्विषयसर्वपुरुषसाधारण्येनार्थक्रियाकारित्वेन स्थिरत्वेन चानभिव्यक्तस्वरूपत्वात् । यद्यपि व्यवहारसृष्टिरपि मायैव तथापि दृष्टोत्पादकविनाशकसामग्रीकल्पनाद्वारैवैषा मायाशक्तिः द्वितीया तु मनआदिसापेक्षतच्छक्तिरिति । ते च स्वाप्नाः पदार्थाः मनःपरिणामः । बाहिरनुपलभ्यमानाकारा बुद्धिवृत्तिरेव भ्रमः व्यवहारदशायाम् । शुक्तिरजतमपि शुक्त्यवच्छिन्नान्तःकरणपरिणाम एव । स चोक्तरूपः । अस्य सूत्रस्य च स्वाप्नवत् जाग्रत्प्रपञ्चे ऽपि ब्रह्मापेक्षया तुच्छत्वप्रतिपादनं फलम् । स च स्वप्नः शुक्तिरजतं यथा सत्यहर्षादिजनकम् एवं व्यावहारिकशुभाशुभसूचकः । एवमेव व्यावहारिकं श्रुत्यादि परमार्थसत्यब्रह्मबोधकमिति बोध्यम् । जातस्वप्नसृष्टेर्नाशो परमेश्वरस्याभिध्यानसङ्कल्प एव सुषुप्तिकाले बोध्य इति । भाष्यान्तरमप्यत्र साधकत्वेनाह *किञ्चेति । लौकिकज्ञानसामग्र्यभावमाह *नास्येति । उत्पत्तियोग्यकालो नेत्याह *रथादिनिर्वर्तनेवेति । उत्पादकसामग्र्यपि नेत्याह *दारूणि वेति । नन्वेवं स्वप्नस्य सत्यशुभाशुभसूचकत्वं कथम ? अत उक्तम 'सूचकश्च हि श्रुतेराचक्षते तद्विद' इति। रजतस्य सत्यहर्षादिजनकत्ववदसत्यस्यापि तस्य सूचकत्वमविरुद्धमिति तात्पर्यम्। तदाह *तादृशमपीति भाष्योक्तेरिति पाठः। तत्सूचितमन्यदप्याह *अत्रेति। स्वप्ने इत्यर्थः। अत एवादिपदं सार्थकम् । तत्र तदाह *चक्षुरादीति । अन्यदप्याह *सामग्रीति । कालादीत्यर्थः ॥ ६७ ॥

तथा चतुर्थे ऽपि भाष्ये 'मृत्पिण्डादिदृष्टान्तैर्हि

सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयति शास्त्रम् अतः सृष्टिवाक्यानि नोत्पत्त्यादिपराणि किं त्वैकात्म्यावगमपराणि' इति। सत इत्यस्याद्यन्तयोः सत्त्वेन मध्ये ऽपि सत्त्वानुमानेन कालत्रयाबाध्यत्वरूपं सत्यत्वम्, प्रपञ्चस्य त्वाद्यन्तयोरसत्त्वेन मध्ये ऽपि असत्त्वानुमानेन कालत्रयबाध्यत्वरूपमनृतत्वमित्यर्थः । मध्ये कदाचित्सत्त्वेन प्रतीतिस्तु भ्रम एवेति तदाशयः । उत्पत्त्यादीनां भ्रमविषयाणामेव तत्रानुवाद इति विकारत्वादिप्रतीतिरपि भ्रम एवेति तत्तात्पर्यम् ।

मृत्पिण्डादिदृष्टान्तस्य चायमर्थः—एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावादि मृदात्मकमिति विज्ञातं भवतीति ।

"यथा च तक्षोभयथा" इतिसूत्रेऽपि भाष्ये "स्वाप्नो विकारो वासनामय एष न तु पारमार्थिको ऽस्ति" इति । यथा तन्त्रान्तरे घटादिप्रपञ्चस्य पारमार्थिकत्वं तथा तत्रापि न स्वाप्नस्येत्यर्थः । अस्माकं तु व्यावहारिको ऽपि प्रपञ्चो दीर्घस्वप्न एवेति बोध्यम् ।

"तदनन्यत्वम्–" इतिसूत्रे भाष्यम् "यथा च मृगतृष्णोदकादिनामूषरादिभ्यो ऽनन्यत्वं दृष्टादृष्टस्वरूपत्वात् एवमस्य प्रपञ्चस्य ब्रह्मव्यतिरेकेणाभावः" इति । "सर्वव्यवहारस्य प्राग् ब्रह्मात्मविज्ञानात्सत्यत्वं स्वप्नव्यवहारस्येव प्राक् प्रबोधाद्" इति च, "अविभागे ऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो-

ऽपि भागव्यवहारः स्वप्नवद्व्याहृतः" इति चान्यत्र भाष्ये ॥ ६८ ॥

(क०टी०) अन्यदपि तन्मानमाह *तथेति । *इत्यस्य-इत्यादेः । *सत्यत्वम्—ब्रह्मणः । अत एवाह *कदाचिदिति । दोषवशादिति भावः । *तदाशयः—भाष्याशयः । एवमग्रे ऽपि । *तत्र-सृष्टिबोधकासु 'आत्मन आकाशः सम्भूतः' इत्यादिश्रुतिषु । प्रागुक्तरीत्यैव *मृत्पिण्डादीति । *अर्थः-अभिप्रायः । परमार्थत्वं विकारापेक्षया । अन्यदपि मानमाह *यथाचेति । नन्वेवमसङ्गत्वे कर्तेत्युक्तकर्तृत्वासङ्गतिरिति शङ्कानिरासार्थमिदं सूत्रं द्वितीयाध्यायद्वितीयपादस्थम । यथा तक्षा वास्याद्युत्कर्षापकर्षादिभिरुत्कर्षादिमान्, यथा वा तत्सान्निधाने तक्षणादिक्रियावान् तदभावे तदभाववान्, एवं जीवो बुद्धिरूपोपाधिवशात्कर्ता स्वतस्त्वकर्तेत्यर्थः ।

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।

यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ इति स्मृतेः । 'अकर्ता चैतन्यम्' इत्यादिश्रुतेः, 'कामादिकं मन एव' इति श्रुतेश्चेति भावः । औपाधिककर्तृत्वेनापि शास्त्रार्थवत्त्वमुपपन्नमेव । तदश्लिष्टबुद्धेरपि कर्तृत्वाभावात्केवलाया बुद्धेरकर्तृत्वोक्तिरिति बोध्यम् । ननु स्वमते तत्त्वाप्रसङ्ग एवेति व्यर्थेयमुक्तिरत आह *यथेति । *तन्त्रान्तरे-न्यायादिमते । *तत्रापि-तन्मते ऽपि । एतत्तात्पर्यमाह *अस्माकं त्विति । अन्यदपि तदाह *तदेति । *अदृष्टेति । स्वरूपस्यैवादर्शनादित्यर्थः । अन्यान्यपि तान्याह *सर्वेत्यादि । *ब्रह्मात्मेति । ब्रह्मस्वरूपेत्यर्थः । स्वप्नप्रपञ्चस्य प्रबोधो जागरणं ब्रह्मविज्ञानं च । *अविभागे इति । बहुव्रीहिः । वस्तुत इति भावः ॥ ६८ ॥

यत्त्वनिर्वचनीयं सदसद्विलक्षणं जलादि मृगतृष्णादावुत्पद्यते एवं ब्रह्मणि प्रपञ्चो मृदादौ घटादिः स्वाप्नश्चेति । तन्न । तादृशानिर्वचनीयस्याप्रसिद्ध्या तद्भेदस्य वक्तुमशक्यत्वात् । किञ्च, तस्य सद्भिन्नत्वादसत्त्वम् असद्भिन्नत्वात्सत्त्वमापततीति उभयरूपत्वमे-

षायाति, तत्र सत्त्वमारोपितमिति भेदाभेदयोरिव तयो-र्न विरोधः । धर्मद्वयानाक्रान्तस्य लोकव्यवहारेऽभा-वाच्च ॥ तदुक्तं सांख्यसूत्रे "नासतः ख्यातिर्नृशृङ्ग-वत्" । "नानिर्वचनीयस्य तदभावात्" । "नान्यथा-ख्यातिः स्ववचोव्याघातात्" इति । असतः ख्यातौ नृशृङ्गवच्छुक्तिरजतादेरप्यभानापत्तिः । न च नृशृङ्ग-मित्यादिशब्दतो बोधात्तद्वासनाऽऽवश्यकत्वेन तत्र तेषामपि सत्त्वेन प्रत्यक्षापत्तिः । तद्वासनायाः फल-बलेन शाब्दबोधमात्रजनकत्वेन तदापत्त्यभावात् । नानिर्वचनीयस्येत्यस्यार्थ उक्त एव ।

यद्यप्यन्यथाख्यातिः सौत्रान्तिकस्य, बाह्यशु-क्त्यादौ ज्ञानधर्मरजतादेरध्यास इति तेनाङ्गीकारा-त्, तथापि हट्टस्थरजतादेरारोप इति रीत्या वै-शेषिकैः स्वकीयैः साऽऽद्दता, तदुभयमपि न । तत्र तदसत्त्वेन तद्रूपस्य सन्निकर्षाभावेन 'असन्न भास-ते सन्निकर्षाभावाद्' इति स्वसिद्धान्तव्याघातात् । किं च, विशेष्यविशेषणानुयोगिकत्वप्रतियोगिकत्वावि-शिष्टसंबन्धस्य त्वयाप्यसत एव भानाङ्गीकारात्तदग्र-हेऽसंसर्गाग्रह एव पर्यवसानमिति विशिष्टभ्रमवा-चकस्यान्यथाख्यातिरितिवचसो व्याघातात् ।

किञ्च ।

ज्ञानस्यार्थव्यभिचारित्वे ज्ञानेनार्थसिद्धिरिति स्व-वचोव्यघातादिति दिक् ॥ ६९ ॥

(क०टी०) वेदान्तिमतं खण्डयति *यत्त्विति । अन्याहशस्ये-त्यस्य वक्ष्यमाणत्वादाह *सदसदिति । 'यतो वाच' इति श्रुते-

ब्रह्मणि तत्त्वाभावादाह *अनिर्वचनीयेति । ननु सत्त्वेन ब्रह्म असत्त्वेन नृशृङ्गादि तत् प्रसिद्धमेव अत आह *किञ्चेति । यत इति शेषः । *तस्य—जलादेः सर्वस्य । ननु विरोधादिदं दुर्वचमेवेति तथैव वाच्यम् अत आह *तत्रेति । तयोर्मध्ये इत्यर्थः। तादृशपदार्थस्यान्यस्य सत्त्वे ऽत्र सर्वत्रैवं सुवचं तदेव नेत्याह *धर्मेति । अत्र मानमाह *तदुक्तमिति । *अभानेति । अप्रत्यक्षेत्यर्थः। *तत्र-बुद्धौ । *तत्-प्रत्यक्षम् । एतेन दृष्टान्तासङ्गतिः परिहृता । 'नान्यथा'-इति व्याचष्टे *यद्यपीत्यादि । वेदबाह्योक्तत्वात्तदप्रमाणमेवेति न तत्खण्डनोपयोग इति शङ्काशयः । प्रकारभेदमाह *हट्टस्थेति । *स्वकीयैः-वैदिकैः । *सा-तदिष्टा । एवं च तत्खण्डनोपयोगस्तदाह *तदुभेति । वचःशब्देन सिद्धान्त इत्याह *तत्रेति । ज्ञाने रजतासत्त्वेन रजतरूपसंनिकर्षाभावेत्यर्थः। वचः प्रसिद्धमित्याह *किञ्चेति । *तदग्रहे-तादृशसम्बन्धग्रहे । एवेन विशिष्टबुद्धिनिरासस्तदाह *विशिष्टेति । ननु तस्यापि स एवार्थोऽस्तु अत आह *किञ्चेति । तत्रैवेति भावः । एतेन ज्ञानसन्तानस्यैवात्मत्वमिति, ज्ञानरूपात्माकारस्य रजतस्य ख्यातिरित्यर्थकात्मख्यातिरिति वैभाषिकादिमतमप्यपास्तम् । तदाह *दिगिति ॥ ६९ ॥

परमार्थसारेऽपि ।

त्रिगुणा चैतन्यात्मनि सर्वगतेऽवस्थितेऽखिलाधारे ।
कुरुते सृष्टिमविद्या सर्वात्मा स्पृश्यते तया नात्मा ।

सृष्टिं तद्भ्रममित्यर्थः । तदप्युक्तं तत्रैव ।

रज्ज्वां भुजङ्गहेतौ प्रभवविनाशौ यथा न स्तः ।
जगदुत्पत्तिविनाशे न च कारणमस्ति तद्वदिह ॥ इति ।

भुजङ्गहेतौ, भुजङ्गभ्रमहेतौ । नच कारणमस्तीति । किं त्वन्यथाभानात्मिका ऽविद्यैव सेत्यर्थः । किञ्च, अनिर्वचनीयोत्पत्तौ घटादिना मृदादेरिव ब्रह्मणो ऽपि विकारित्वापत्तिः । भ्रमविषयेण तु न विकारित्वम् । कामुककृतैः कान्ताविषयैः—

सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम्—

इति विकल्पैः कान्ताया विकारित्वाभावात् ।

वस्तुतो मृदि घटादिविकारो भ्रम एव न तु कोऽपि पदार्थ इति "तदनन्यत्वम्—" इति सूत्रेणोक्तम् । किञ्च । प्रसिद्धसामग्रीव्यतिरेकेऽपि यया सामग्र्या शुक्त्यादौ रजताद्युत्पत्तिस्तया सामग्र्या विषयासत्त्वेऽपि तदसन्निकर्षेऽपि ज्ञानाङ्गीकारेऽपि न बाधकम् । किञ्च, अनिर्वचनीयोत्पत्तौ तस्य तस्य तादृशरजतत्वाद्याश्रयत्वेन तज्ज्ञानस्य भ्रमत्वानापत्तिः, तस्य तदवृत्तिधर्मप्रकारकत्वाभावात् । न च रजतत्वमेवानिर्वचनीयम् आश्रयस्तु शुक्तिरेवेति न दोषः । त्वयाऽपि जातेर्वारं वारमुत्पत्त्यनङ्गीकारात् । किञ्च जातेरिव तदाश्रयत्वस्यापि तादृशस्य शुक्तौ सत्त्वेन पूर्वोक्तदोषतादवस्थ्यम् । तदुक्तं योगसूत्रे "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" इति । विपर्ययइति लक्ष्यम् मिथ्याज्ञानमिति लक्षणम्, तद्विवरणमतद्रूपेति, तद्रूपप्रतिष्ठत्वाभाववत् । यद् ज्ञानप्रतिभासि रूपं रजतत्वादि तदाश्रयत्वाभाववद्विशेष्यकमित्यर्थ इति मिश्राः ॥ ७० ॥

(कं०टी०) भगवतोऽपि भेदः सम्मत इत्याह *परेति । ननु त्रैगुण्यसङ्गबद्धश्चेदात्मा तर्हि विकारी स्यादत आह *त्रिगुणेति । सत्त्वरजस्तमोभिस्त्रिगुणा अविद्या सृष्टिं सृष्टिभ्रमं कुरुते जनयति । क ? *अखिलाधारे—समस्तप्रपञ्चाधिष्ठाने । *सर्वगते— । पूर्णे अपरिच्छिन्ने । *अवस्थितेनित्ये । 'आकाशवत्सर्वगतश्च नित्य' इति श्रुतेः । अत एव सर्वात्मा आत्मा तया भ्रमविषयसृष्ट्या न स्पृश्यते इत्यर्थः । तेन न विकारित्व-

प्रसक्तिरिति भावः। "नात्मानं स्पृशति" इति श्रुतेः। उपयुक्तमाह *सृष्टिमिति। *तदपीति। भ्रमविषय एव सृष्टिर्न तु सत्त्वं तस्या इतीत्यर्थः। रज्ज्वां भुजङ्गभ्रमहेतौ उत्पत्तिविनाशौ यथा न स्तो भुजङ्गस्यैवाभावात् तद्वदिह परमार्थविचारे जगत उत्पत्तिविनाशयोर्न किञ्चित्कारणमस्तीत्यर्थः। कारणत्वमपि भ्रमविषय एव सत्यत्वादिवदिति भावः। भ्रमविषयकारणत्वमेव "यतो वा इमानि" इति श्रुत्यादयो ऽनुवदन्तीति न तद्विरोधः। तत्तात्पर्यमाह *किन्त्विति। सिंहावलोकनन्यायेन तत्र दोषान्तरमाह *किञ्चेति। *ब्रह्मणो ऽपीति। प्रपञ्चेनेति भावः। सिद्धान्ते तु नायं दोष इत्याह *भ्रमेति। *विषयैः-विषयकैः। *सुप्तेति। इदमप्यभ्युपेत्योक्तमित्याह *वस्तुत इति। *नन्विति। एवं च तद्दृष्टान्तेनात्र तत्त्वापादनमयुक्तमेवेति भावः। तद्रीत्या दोषान्तरमाह * किञ्चेति। *तथा-तथैव। दोषान्तरमाह *किञ्चानिर्वचनीयेति। *तस्य-रजतभुजङ्गादेः। तदसम्भवादाह *तादृशेति। अनिर्वचनीयेत्यर्थः। व्यावहारिकतद्वृत्तद्विशिष्टस्यैवोत्पत्तेः। अन्यथा तत्पदवाच्यतापि न स्यादिति भावः। *तस्य-ज्ञानस्य। *तदवृत्तीति। शुक्त्याद्यवृत्तीत्यर्थः। इमं दोषमुद्धरति *न चेति। *त्वयापि-अनिर्वचनोत्पत्तिवादिना वेदान्तिनापि। तन्मते ब्रह्मातिरिक्तस्य जन्यत्वादाह *वारं वारमिति। भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायेनाह *किञ्च जातेरिति। *तादृशस्य-अनिर्वचनीयस्य। पूर्वत्र रजतत्ववत्। *पूर्वोक्तेति। तस्य भ्रमत्वानापत्तिरूपेत्यर्थः। पतञ्जलिसम्मतमपि नेदमित्याह *तदुक्तमिति। भ्रमनिरासायाह *विपर्येति। "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः" इति प्रागुद्देशात्। तत्र प्रकृतोपयोगान्मिश्रोक्तमेव व्याख्यानमाह *तद्रूपेति। अश्राद्धभोजीतिवत्तस्य तद्रूपाप्रतिष्ठामित्यर्थेनेदं लब्धम्, तदर्थमाह *यदिति। वस्तुतस्तु अतद्रूपः अस्वसमानाकारो यो बाह्यो विषयस्तत्प्रतिष्ठं तद्विशेष्यकमित्यर्थः। भ्रमस्थले ज्ञानाकारस्यैव सदसद्रूपस्य विषये समारोप इत्यादि प्रागुक्तमिति बोध्यम्।

केचित्तु मिथ्यात्वे हेतुगर्भविशेषणमतद्रूपेत्यादि-न विद्यते तद्रूपस्य ज्ञानाकारस्य प्रतिष्ठा चिरस्थितिर्यत्र अग्रेतनबाधज्ञानबाध्यत्वादित्यर्थः। तेन विकल्पतो ऽस्य भेदो ऽप्युक्तः। स च 'शब्द ज्ञानानुपाती' इत्यादिना तत्रैवोक्तः। शब्दः शब्दप्रयोगस्तज्जन्यं

ज्ञानं च ते अनुपातिनी यस्य सः । बाधाबाधकालाविशेषेण तदुभयजनको वस्तुशून्यः प्रत्ययो विकल्प इति तदर्थः । विपर्ययस्तु नैवम्, 'नेदं रजतम्' इति बाधोत्तरं शब्दप्रत्यययोरभावादित्याहुः ॥ ७० ॥

व्यासस्यापीदमेव च मिथ्याज्ञानमभिप्रेतम्, तेनान्यतल्लक्षणानुक्तेः । सांख्यदूषितानिर्वचनीयख्यातेरपि तत्सूत्रानारूढत्वाच्च । तेन सांख्योक्तसदसत्ख्यातेरेव तदभिमतत्वं लक्ष्यते । किञ्च, शुक्तिरजतस्थले ऽधिष्ठानज्ञानेन तन्नाशो वाच्यः । न च तस्य वस्तुनाशकता दृष्टा । अत एव गौतमादिभिरुत्पत्तिस्तत्र नोक्ता । अन्यथा घटादिवत्तत्राप्युत्पत्तिमेव वदेयुः । शुक्त्यादि समवायिकारणं चाकचक्यादि असमवायिकारणं दोषो निमित्तकारणमिति वक्तुं शक्यत्वात् । अन्यथाख्यातिरित्येव चोक्तं तदीयैः । अन्यथाख्यातिरित्यनेन प्रकारस्यान्यत्र सत्त्वं सूचितम् । तत्सम्बन्धो ऽप्येवमेव, तदनुयोगिकत्वमप्येवमेवेति सूचितम् । संयोगसमवाययोः सम्बन्धत्वस्यानुयोगित्वादिभाननियतत्वात् ॥ ७१ ॥

(क०टी०)व्याससम्मतमपीदमित्याह *व्यासेति । *इदमेव–योगसूत्रलक्षितमेव । अनिर्वचनीयोत्पत्त्या तत्स्वरूपमपि तस्य नेष्टमित्याह *सांख्येति । तत्ख्यातेन न्यायेन यत्त्वित्यत्र दोषान्तरमाह *किञ्चेति । *न च–नहि । अवस्त्वज्ञाननाशकत्वसत्त्वादाह *वस्त्विति । गौतमादिसम्मतापि सा नेत्याह *अत एवेति । उक्तदोषगणादेवेत्यर्थः । *गौतमादिभिः–तैरपि उत्पत्तिवादिभिः । तदेवाह *अन्यथेति । दोषगणो यदि न स्यादित्यर्थः । *तत्रापि–शुक्तिरजतादावपि । ननु न दोषगणसत्त्वहेतुका तदनुक्तिः किन्तु कारणसामग्र्यभावमूलिकेत्यत आह *शुक्त्यादीति । ननु तद्वदनुक्त्याऽन्यदपि तेषामनिष्टमत आह *अन्यथेति । तथोक्तेस्तात्पर्यमाह *अन्यथेति । *अन्यत्र–भातदे-

शादन्यत्र हट्टस्थरजतादौ । तथाच नासत एव ख्यातिर्नाप्यनिर्वचनीया ख्यातिरिति तदाकूतम् । किञ्चिदप्यत्रानिर्वचनीयं नेत्याह *तत्सम्बन्धइति । प्रकारसम्बन्धो ऽप्यन्यत्र सन्नेवेत्यर्थः । एवं सम्बन्धसम्बन्धेऽपीत्याह *तदन्विति । अन्यत्र सन्नेवेत्यर्थः । नन्वेतज्ज्ञाने न मानमत आह *संयोगेति ॥ ७१ ॥

बुद्धिसद्रा तद्, भ्रमप्रकारत्वमेव मिथ्यात्वम् । 'रजतं पश्यामि' इत्यनुव्यवसायो ऽपि दोषवशाच्चाक्षुषत्वांशे भ्रम एव । न च दोषस्य रजतज्ञानत्वं त्वया कार्यतावच्छेदकं वाच्यं तद्वरं रजतत्वमेव लाघवात्तथोचितमिति वाच्यम् । उत्पत्तिनाशकल्पनापेक्षया प्रमास्थले क्लृप्तस्य तस्यैव तत्त्वौचित्यात् । अत एव "ब्रह्मदृष्टिरुत्कर्षाद्" इत्यधिकरणे भाष्ये "प्रत्येत्येव हि केवलं शुक्तिकां रजतमास्ति" इत्युक्तम् । 'मुग्धे ऽर्द्धसम्पत्तिः' इति सूत्रे भाष्ये ऽपि 'न हि स्वच्छः स्फटिको ऽलक्तकसंयोगादस्वच्छो भवति भ्रमत्वादस्व च्छत्वाभिमानमात्रस्य' इत्युक्तम् । तव व्यावहारिकप्रातिभासिकयोः सदसद्विलक्षणत्वाविशेषेण भेदस्य वक्तुमशक्यत्वात् । विशेषदर्शनबाध्यत्वमपि तुल्यम् । तदुक्तं परमार्थसारे ।

ज्वलनाद् धूमोद्गतिभिर्विविधाऽऽकृतिरम्बरे यथा भाति ।
तद्वद्विष्णौ सृष्टिः स्वमायया द्वैतविस्तरा भाति ॥ इति ।

अत्र भातीत्येवोक्तं न तूत्पद्यते इति । आकाशे जलरेखावद्, शिलायामङ्कुरवद् विविधाकृतेस्तत्र स्व-

१ इदं भाष्यं "न स्थानतोऽपि परस्य-" इति सूत्रे विद्यते सामीप्यात् "मुग्धे-" इति सूत्रस्थत्वेन व्यपदेश इति बोध्यम् ।

रूपायोग्यत्वेनासम्भवात् । स्वमायया वासनास्वरूपया ॥ ७२ ॥

एवं तत्खण्डनप्रसङ्गेन परमतमुक्त्वा प्रागुक्तमेव सिद्धान्तमतं तत्राह *बुद्धीति । *तत्-रजतत्वादि । अत्र बीजमुक्तमेव । नन्वेवं कथं मिथ्यात्वमत आह *भ्रमेति। नन्वेवमनुव्यवसायस्तद्वदत्र न स्यात्तस्याभावादत आह *रजतमिति । अनिर्वचनीयोत्पत्तिवादी शङ्कते *न चेति । *अपेक्षयेति । लाघवेनेति शेषः। अक्लृप्तकल्पनाप्रयुक्तगौरवमपि नेत्याह *प्रमेति । *तस्यैव-ज्ञानत्वस्यैव । इदमेवभगवत्संम्मतं न तदित्याह *तदुक्तमिति । नन्वेवं विश्वादीनां भ्रमत्वमुक्तं तत्किमधीनको ऽयं भ्रम इत्यत आह *ज्वलनादिति । ज्वलनहेतुकधूमोद्गमनैर्नानाविधा आकृतिर्नीलश्वेतादिरूपाऽम्बरे पुरोवर्त्याकाशे ऽसत्यपि यथा भाति तद्वद् विष्णौ सृष्टिर्द्वैतविस्तरा नामरूपादिविस्तरा सत्त्वस्थिरत्वादिरूपेण भातीत्यर्थः । *नन्विति । तथा चेदमेवाभिमतं न तत् । तत्रान्यदृष्टान्ते पूर्वं हेतुमाह *आकाशे इति । *तत्र-आकाशे । *असम्भवादिति। उत्पत्तेरसम्भवादित्यर्थः । तेन तस्या असत्त्वं सूचितम् । प्राग्वदाह *वासनेति । एतेन विष्णुसंज्ञकशुद्धचैतन्यमेवाधिष्ठानमित्युक्तम् । स्वमाययेत्यस्य स्वस्मादुद्गतमाययेत्यर्थः । दृष्टान्तबलेन तथैव लाभात् । अन्यथा विष्णुमाययोः कः सम्बन्धः स्याद्येन विष्णुमायेत्युच्येत । न चाश्रयाश्रयिभावस्तस्यासम्बन्धत्वात् । सम्बन्धमूलको हि सः । तन्मूलकसम्बन्धान्तराभावाच्च । न च स्वस्वामिभावः सम्बन्धः । 'चतुर्भिः प्रकारैः स्वं भवति क्रयणादपहरणाद्याच्ञाया विनिमयाच्च' इति "षष्ठीशेषे" इति सूत्रे भाष्योक्तेस्तदन्यतमाभावेन तदसम्भवादिति दिक् ॥ ७२ ॥

श्रीहर्षेणाप्युक्तम् 'परकीयरीत्येदमुक्तम्—'अनिर्वचनीयत्वं विश्वस्य पर्यवस्यति' इति । वस्तुतस्तु वयं सर्वप्रपञ्चसत्त्वासत्त्वव्यवस्थापननिवृत्ताः स्वतः सिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भारमवलम्ब्य चरितार्थाः सुखमास्महे । ये तु स्वपरिकल्पितसाधकदूषणव्यव-

स्थया विचारमवतार्य तत्त्वं निर्णेतुमिच्छन्ति तान् प्रति ब्रूमो न साध्वीयं भवतां विचारव्यवस्था । भवत्कल्पितव्यवस्थयैव व्याहतत्वादिति' ।

'सत्त्वासत्त्वव्यवस्थेति । तदन्यतरव्यवस्थेत्यर्थः । भारम्, प्रातिभासिकप्रपञ्चभारम् । अनिर्वचनीयत्वं निर्धार्य सत्त्वासत्त्वान्यतररूपेणानिर्वचनीयत्वं न तु सदसद्विलक्षणत्वम्' इति तद्व्याख्यातारः ॥

अत एव भागवते उक्तम्—

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः॥इति ।

यद् विनाप्यर्थमात्मन्यधिष्ठाने प्रतीयेत, यच्चात्मरूपे न प्रतीयेत तत् प्रत्ययाप्रत्ययरूपमात्मनो मायां विद्यात् । यथा आभासो द्विचन्द्रादिः, यथा च तमो राहुर्ग्रहमण्डले सन्नपि न प्रतीयते इत्यर्थः । असदर्थप्रकाशनस्यैव मायात्वादेवमेव युक्तम् ।

यदुक्तं बृहन्नारदीये—

नासद्रूपा न सद्रूपा माया नैवोभयात्मिका ।
अनिर्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी ॥ इति ।

तस्यायमर्थः—व्यवहारकाले सत्त्वेन प्रतीतेर्न केवलमसद्रूपा । प्रतिक्षणं परिणामितया प्रतीतेर्बाधदर्शनाद्विशेषदर्शनबाध्यत्वाच्च न केवलं वास्तवसद्रूपा । अत एव वास्तवोभयरूपा ऽपि न, विरोधाच्च । अत एवानिर्वाच्या सत्येवासत्येवेति निर्धार्य वक्तुमशक्या । तर्हि किमुभयविलक्षणा ? नेत्याह—मिथ्याभूता, प्रतिभासमात्रविषयत्वात् । सनातनी—भ्रमपरम्पराज-

नकपरम्पराकवासनारूपेणेति । तस्मादारोपितं सत्त्वं परमार्थतस्त्वसत्त्वमित्येव युक्तम् ।

तदुक्तम्—

यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् । इति ॥७३॥

(क०टी०) श्रीहर्षस्यापि न सा सम्मतेत्याह *श्रीहर्षेणापीति । किमुक्तं तदाह *अनिर्वचनीयत्वमिति । सदसद्विलक्षणत्वमित्यर्थः । विरोधाद्बाधेनोभयव्यवस्थापनासम्भवादाह *तदन्यतरेति । *केवले—शुद्धे । तस्याप्यर्थमाह *अनिर्वचनीयत्वमिति । प्रपञ्चस्येति शेषः । अवलम्ब्येत्यस्यार्थः *निर्धार्येति । अनिर्वचनीयत्वं व्याचष्टे *सत्त्वासत्त्वेति । अन्यदपि तदाह *अत एवेति । तदभावादेवेत्यर्थः । *भागवते—तत्रापि द्वितीयस्कन्धे चतुःश्लोक्याम् । आत्मरूपमधिष्ठानरूपम् अधिष्ठानभूतम् । *आत्मनो—मम । विधिं प्रति भगवदुक्तिरियम् । अर्थं विना प्रतीतौ दृष्टान्तमाह *यथा आभास इति । सतो ऽप्रतीतौ तमाह *यथा चेति । नन्वनेन मायानिरूपणं क्रियते 'यथात्ममायायोगेनेत्यनेन तस्या अपि पृष्टत्वाद्वक्ष्यमाणोपयोगित्वाच्च" इति श्रीधरोक्तेः कथं प्रकृतोपयुक्तत्वमत आह *असदर्थेति । एवेनान्यव्यवच्छेदेन द्वितीयपरिग्रहोऽपि सूचितः। भवन्मते त्विदमसङ्गतमेव स्यात्तदाह *एवमेवेति । उक्तसिद्धान्तविरोधात्परिहरति *यदुक्तमित्यादिना । परमार्थतस्तदभावादाह *व्यवेति । वक्ष्यमाणोपपत्तये आह *केवलमिति । एवमग्रेऽपि । पररीत्या आह *प्रतीति । स्वरीत्या आह *बाधेति । नाशादिनेतिभावः । तत्त्वमाह *विशेषेति । ब्रह्मसाक्षात्कारेत्यर्थः । व्यावहारिकसद्रूपत्वे इष्टापत्तेराह *वास्तवेति । एवमग्रे ऽपि । *अत एव-प्रत्येकं तत्तद्रूपत्वाभावादेव । तत एव दोषान्तरमाह *विरोधाच्चेति । *अत एव—उक्तदोषादेव । ब्रह्मवदतत्त्वादाह *भ्रमेति । तत्परम्पराजनिका परम्परा यस्या वासनायास्तद्रूपेणेत्यर्थः । तत्तात्पर्यं ब्रुवन्नुपसंहरति *तस्मादिति । तस्य तादृशोभयरूपत्वे मानान्तरं स्फुटमाह *तदुक्तमिति । मनुनेतिशेषः । यत्तदिति । *अव्यक्तं—प्रधानम् ।

तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते । इति ।

अस्योत्तरार्धः । तद्विसृष्टस्तेन प्रधानेन विसृष्टः तन्मयत्वात्तच्छरीरस्य तद्विसृष्ट इत्युच्यते इति मेधातिथिः ॥ ७३ ॥

"ईश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये" इति भाष्यस्याप्ययमेवार्थः । अविद्याऽत्र वासनारूपा । "प्रकृतैतावत्त्वं हि प्रतिषेधति" इति सूत्रे "अथात आदेशो नेति" इति श्रुतिव्याख्यावसरे "पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधति उत्तरो वासनाराशिम्" इति भाष्योक्तेः। ईश्वरस्यात्मभूते इत्यनेनारोपितसत्त्वेत्युक्तम्। अविद्याकल्पिते इत्यनेनासत्त्वमुक्तम् । एवमेव "अविद्याकल्पितेन नामरूपलक्षणेन भेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदं पारमार्थिकेन रूपेण सर्वव्यवहारातीतम्" इति भाष्यमपि व्याख्येयम् । तत्र अविद्या पूर्वतनसंस्काररूपा । व्याकृतं स्थूलम्। अव्याकृतं तज्जन्यसंस्कारः अस्थूलम् । "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः" इति सूत्रे भाष्ये "जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्को ऽविद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते" इति । तत्र पूर्वप्रज्ञाशब्देन प्रतिपत्तव्यदेहविषय उद्बुद्धसंस्कारः । वक्ष्यति तत्रैव "कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं जलूकयोपमीयते" इति । कर्मोपस्थापितः स्वकृतोद्बुद्धसंस्कारेण बुद्धिविषयः कृत इत्यर्थः । एवमेव एवंजातीयकमन्यदपि भाष्यं व्याख्येयम् ।

कौर्मे ऽपि—

विप्र पृथ्व्यादि चित्तस्थं न बहिःस्थं कदाचन ।
स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते ॥ इति ।

अत्र न कदाचनेत्युक्त्या व्यवहारदशायामपि तथात्वमेवोक्तम् । चित्तशब्देन ईश्वरोपाधिरपि । "नेह नानास्ति किं चन" इत्याद्या श्रुतिरपि बहिः सर्वप्रकारसत्तामनारोपितां निषेधति ॥ ७४ ॥

(क०टी०) भाष्यान्तरविरोधं परिहरति *ईश्वरस्येति । इवेन वस्तुतोऽतत्त्वं सूचितम् । *अन्यत्वम्–अतत्त्वम् । *अयमेव–प्रागुक्त एव । नन्वविद्या जीवोपाधित्वेन प्रसिद्धा न च तत्कल्पिते ते, अत आह *अविद्येति । अत्रेत्यनेनान्यत्रान्यथात्वमपि सूचितम् । अत्र मानमाह *प्रकृतैतेति । नन्वीश्वरश्चैतन्यमात्रमित्ययुक्तम्, "अथात आदेशो नेति नेति" इति श्रुत्या तस्यापि निषेधावगमादिति शङ्कानिरासार्थं तृतीयाध्यायद्वितीयपादस्थमिदम् । "ततो ब्रवीति च भूय" इति सूत्रशेषः । "द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च" इत्युपक्रमस्य तदुक्तेः । प्रकृतं यन्मूर्ताद्युपाधिरूपं तदेतावत्त्वं तत्परिच्छिन्नत्वं सा श्रुतिः प्रतिषेधति, न तु चैतन्यरूपमपि । मूर्तं तेजोऽबन्नामकं भूतत्रयं स्थूलं प्रत्यक्षम्, अमूर्तं वाय्वाकाशात्मकं भूतद्वयं परोक्षम्, इतिशब्दस्य नेतिनेतीत्यत्रत्यस्य प्रकृतपरामर्शकत्वात् । च यतः । ततो निषेधानन्तरम् । भूयः पुनर्वदति श्रुतिः—"प्राणा वै सत्यं तेषामेष सत्यं स वा एष महानज आत्मा ऽजरो ऽमृतो ब्रह्मेति" इत्यर्थः । यदि सर्वथा ऽभाव एव स्यात् तदा तस्य सत्यत्वमात्मत्वं चायुक्तं स्यात्, अभावस्यासत्तारूपत्वात् ।

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य सन्ततो भावस्तस्मादात्मेति कथ्यते ॥

इत्यात्मलक्षणाभावाच्चेति भावः । स च "यतो वाचो निवर्तन्ते" इत्यादिश्रुत्या ऽव्यक्तत्वेन कथनाल्लौकिकबुद्धिवृत्त्यविषय इति बोध्यम् । श्रुतौ चावशब्द एवार्थः । रूपद्वयोपन्यासानन्तर्यमथशब्दार्थः । ब्रह्म-

णो वक्तव्यत्वेन परिशेषो ऽतःशब्दार्थः । *आदेशः उपदेशः । सूत्रे हिः प्रसिद्धौ । वीप्सादिनिरासायाह *पूर्वेति । प्राग्वदाह *एवमेवेति । विशेषं वक्तुं प्रागुक्तमपि स्मर्तृभेदादाह *कौर्मेऽपीति । व्याख्यातमिदम् । तमेव विशेषमाह *अत्रेति । *तथात्वमेव-चित्तस्थस्फुरणमेव । न्यूनतां निराचष्टे *चित्तेति । मायेत्यर्थः । श्रुतिविरोधं परिहरति *नेहेति । आन्तरानिरासायाह *बहिरिति । सूक्ष्मस्थूलरूपतया भेदादाह *सर्वेति ॥ ७४ ॥

अत एव वाचस्पतिमिश्रा अपि अध्यासभाष्यव्याख्यायामाहुः—

'मृगतृष्णाजलादि न सत्, नासत्, नापि सदसत्, विरोधादित्यनिर्वाच्यमेव मरीचिषु तोयमास्थेयम् । असच्च परमार्थतोयमिव भासते । अत एव पूर्वदृष्टमिव । तत्त्वतस्तु न तोयं न च पूर्वदृष्टं किंत्वनिर्वाच्यमनृतम् । देहादिप्रपञ्चो ऽप्यनिर्वाच्यो ऽपूर्वो ऽपि मिथ्याप्रत्ययोपदर्शित एव चिदात्मन्यध्यस्यते । चिदात्मा तु श्रुत्यादिगोचरः सत्त्वेनैव निर्वाच्यः' इति ।

अस्यार्थः—न सत् बाधयोगात् । नासत् असतश्चाक्षुषाद्यनुभवविषयत्वाभावात् । नापि सदसत्, अनारोपितोभयात्मकम् अनारोपितोभयरूपत्वस्य विरुद्धत्वात् । अनिर्वाच्यमेव-आरोपितसदसत्त्वान्यतरधर्मेण निर्धार्य वक्तुमशक्यम् । तदाह-अनृतमनिर्वाच्यमिति । अनृतम्-असत् । अनिर्वाच्यत्वमुक्तरीत्याऽनृतत्वेनैव निर्धार्य वक्तुमशक्यत्वात् । यद् अध्यस्यते तद् अनृतमनिर्वाच्यमित्यर्थः। अपूर्वः-ज्ञानात्पूर्वमविद्यमानः । तदाह-मिथ्याप्रत्ययोपदर्शित एवेति । मिथ्याप्रत्ययशब्देन तज्जन्यः सं-

स्कारः। अत एवाध्यस्यत इत्येवोक्तं न तूत्पद्यते इति । अध्यस्यत इत्यस्य इत्युच्यते इति शेषः । उपदर्शनस्यैवाध्यासत्वात् । निर्धार्य वाच्यत्वाभाव एवानिर्वाच्यत्वमिति ध्वनयन्नाह–सत्त्वेनैव निर्वाच्य इतीति ।

सदसद्विलक्षणत्वस्यानिर्वाच्यत्वपदार्थत्वे तदुत्पत्त्यङ्गीकारे चापूर्व इत्युक्त्यसंगतिः, अत्रैवकाराधिक्यं च । एवं चासत एवारोपितसत्त्ववतः पुरोवर्त्तिनि कल्पनात्संनिकर्षो ऽपि तादृशः सूपपादः । सन्निकर्षादिना चित्तादिदोषवशाज्ज्ञानमित्युपपादितम् ।

एवमध्यासो ऽपि अनिर्वाच्य एव । तदुक्तं तैरेव–"तं केचिदन्यत्रान्यधर्माध्यास" इति भाष्यावतारणे 'स चायमध्यासो ऽनिर्वचनीयः सर्वेषामेव संमत' इति । "नानिर्वचनीयस्य ख्यातिः" इति सांख्योक्तं तत्खण्डनं तु सदसद्विलक्षणमुत्पद्यते ऽनिर्वचनीयमिति बाह्यैकदेशिमतसिद्धस्य न तूक्तानिर्वचनीयवादस्य । इदमेवानिर्वचनीयत्वं सदसत्ख्यातिशब्देन तेनोक्तमितिबोध्यम् ॥ ७५ ॥

(क०टी०) आरोपितायाः स्वीकारादाह *अनारोपीति । तदुक्तहेत्वर्थमाह* अनारोपीति । स्वरीत्या आह *आरोपितेति । बहुव्रीहिः । पाठक्रमादार्थक्रम इति न्यायेनाह *अनृतमनिर्वाच्यमिति । तथैव व्याचष्टे *अनृतमिति । नन्वेवं निर्वाच्यत्वमेवायातमत आह *निरिति । *उक्तेति । चाक्षुषाद्यनुभवविषयत्वेनेत्यर्थः । तात्पर्यार्थमाह *यदध्यस्यत इति । साक्षात्तदभावादाह *तज्जन्यइति । *अत एव–तदुपदर्शितत्वादेव । उक्तरीत्यैवाह *इत्युच्यते इतीति । *निर्धार्येति । अन्यतररूपेणेत्यादिः । इतिरर्थसमाप्तौ । इतीतीति पाठः । तस्य तदनभिमतत्वमाह

*सदसदिति । इत्याद्युक्तीत्यर्थः । क्वचित्तथैव पाठः । अत्र सत्त्वेनैवेत्यत्र व्यावर्त्याभावात्तस्योभयविलक्षणत्वात् । नन्वेवं तेनासंनिकर्षात्कथं ज्ञानमत आह *एवञ्चेति । तस्य सदसद्रूपत्वे चेत्यर्थः *तादृशः—सदसद्रूपः । तस्य फलमाह *सन्निकर्षादिना—आदिना तत्सन्निकर्षपरिग्रहः । प्रसङ्गादन्यदप्याह *एवमिति । प्रपञ्चादिवदित्यर्थः ।*अनिरिति ।उक्तरूपतत्त्ववानेवेत्यर्थः । अत्रमानमाह *तदुक्तमिति । तदप्युक्तमित्यर्थः । *तैरेव—वाचस्पतिमिश्रैरेव । तत्राध्यासभाष्यव्याख्यायां *तं—स्मृतिरूपं परत्र पूर्वदृष्टावभासं पूर्वोक्तम् । अध्यास इत्यस्य इति वदद्भिरिति शेषः । नन्वेवमनिर्वचनीयत्वेष्टत्वे सांख्योक्ततत्खण्डनविरोधोऽत आह *बाह्येति । श्रुत्यादिबाह्येत्यर्थः । अत एव तेनैकवाक्यतापीत्याह *इदमेवेति । उक्तमेवेत्यर्थः । *तेन—"सदसत्ख्यातिर्बाधाबाधाभ्याम्" इति सांख्यसूत्रेण ॥ ७५ ॥

परमार्थसारे ऽपि ।

सत्यमिव जगदसत्यं मूलप्रकृतेरिदं कृतं येन ।
तं प्रणिपत्योपेन्द्रं वक्ष्ये परमार्थसारमिदम् ॥ इति,
प्राणाद्यनन्तभेदैरात्मानं संवितत्येन्द्रजालमिव ।
संहरति वासुदेवः स्वविभूत्या क्रीडमान इव ॥ इति च ।

कृतमित्यस्य दर्शितमित्यर्थः । संवितत्येत्यस्य दर्शयित्वेत्यर्थः । अन्यथाऽऽत्मनो विकारित्वापत्तिः । स्वभूत्या वासनारूपया । सत्यमिवेतीवेन तस्यारोपितत्वं स्पष्टमेवोक्तम् । यद्वा पूर्वपूर्ववासनावशात्तत्त्वेनापि प्रतीतिः । व्यवहारकालमात्रे तत्प्रतीतिः सत्यमिवेत्युक्तम् ।

एतेनासतो भाने बौद्धमतप्रवेश इत्यपास्तम् । तेन तत्रारोपितसत्त्वस्याप्यनङ्गीकारात् । आत्मनस्तेनानित्यत्वाङ्गीकाराच्च ॥ ७६ ॥

(कृ० टी०) अन्यदपि मानमाह *परमार्थेति । अथ शास्त्रस्य प्रचयगमनादिफलाय स्वेष्टदेवताप्रणामरूपं मङ्गलमाचरन् परमार्थसाराख्यं ग्रन्थं वक्तुं प्रतिजानीते *सत्यमिव । *कृतम्-अनेन जगति सत्त्वस्थिरत्वादिकमपि भ्रम इति दर्शितम् । एतत्सर्वं भगवतोऽन्तर्यामिणः सत्यसङ्कल्पतया सङ्कल्पान्नानुपपन्नम् । "मायां तु प्रकृतिं विद्याद्" इति श्रुतेः । "विष्णोर्माया जगद्रूपम्" इति च वक्ष्यति भगवान् । परमोऽर्थो ब्रह्मात्मैकत्वलक्षणः । मुमुक्षुप्रार्थ्यत्वात् । स एव सारः, आनन्दरूपत्वात् । "रसो वैस" इत्युक्तेः । *प्राणादयः-आदिना सृज्यस्रष्टृपाल्यपालकसंहर्तृसंहार्यतत्साधनादि । तद्रूपैरनन्तभेदैरात्मानं स्वस्वरूपं सङ्क्षिप्तविस्तारेण दर्शयित्वा परिपाल्य तद्दर्शनमुपसंहरति, यथा ऐन्द्रजालिकः पुरुषो मन्त्राक्षरादिभिः स्वशक्तिभिरात्मानमेव अजगरादिरूपेन्द्रजालरूपेण दर्शयित्वा पुनः संहरति आत्मानं प्रापयति तद्वत् । "इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतेः । ईयते इत्यस्य ज्ञायते इत्यर्थः । *स्वभूतया-अविद्यया । *क्रीडमान इव-यथा बालकः प्रयोजनाभावेऽपि यत्किञ्चिन्निर्माय पुनः संहरति तद्वत् । तदुक्तं व्यासेन "लोकवत्तु लीलाकैवल्यम्" इति । एवञ्च भ्रमाधिष्ठानतया वासुदेवः सिद्धः, आवश्यकश्चेति भावः । *लीलास्वभावः-अत्राविद्यावासुदेवस्वभावः । कृतमित्यादेस्तत्पक्षसाधकत्वादाह *कृतमिति । विपक्षे प्रागुक्तमेव बाधकमाह *अन्यथेति । तथात्वे चेत्यर्थः । *तस्य—सत्यत्वस्य । आरोपाभावेनैवाह *यद्वेति । *तत्त्वेनापि—सत्यत्वेनापि । नन्वेवम् इवासङ्गतिरत आह *व्यवहारेति । मात्रपदेन परमार्थकालव्यवच्छेदः । आश्रयवत्तस्यापि तथैव भानमिति भावः । एतेनेत्यस्यार्थमाह *तेनेति । *तत्र-प्रपञ्चे । अपिर्वास्तवसत्त्वसमुच्चायकः । भेदकान्तरमाह *आत्मन इति । *तेन—बौद्धेन ॥ ७६ ॥

परमार्थसारे ऽपि—

अमलः सकृद्विभातश्चैतन्यात्मा खवद्व्यापी ।
सर्वविकल्पनहीनः शुद्धो बुद्धो ऽजरो ऽमरः शान्तः ॥

इत्यात्मरूपमुक्तम् । श्रुतिषु च स्पष्टमेव तथोक्तम् । विकल्पनं नामरूपे । इदमुपलक्षणम् । उत्पत्तिविनाशबहिष्ट्वादिकमपि सत्यत्वेनारोपितमीश्वरेण, तस्य सत्यसङ्कल्पत्वात् । सृष्ट्याद्यकाले चैष सङ्कल्पस्तस्य । यद्वा तत्तत्सामग्रीभ्रमस्तत्तद्विषयभ्रमे कारणमिति तद्गतकार्यकारणभावस्य तद्विषये ऽनादिवासनावशादारोपितात्वेवोत्पत्तिनाशावारोपितत्वमपलप्य काणादसांख्याभ्यामुक्तौ । तत्र सांख्यस्यापि सूक्ष्मतन्मात्रेभ्यः परमाण्वादिक्रमेणैव स्थूलभूतोत्पत्तिरभिप्रेतेति योगवृत्तौ स्पष्टं निरूपितम् ।

तस्माद् भ्रमरूपा स्थूला ऽविद्या, वासनारूपा चाव्यक्तपदवाच्या सूक्ष्माऽविद्या । व्यवहारकाले स्थूलाविद्यायाः सा कारणमिति तस्या एव कारणत्वेन निर्देशः 'अव्यक्तं कारणम्' इत्यादौ ।

एतत्सृष्टौ तज्जन्मानुपलम्भात्तस्या नित्यत्वोक्तिर्नेया ॥ ७७ ॥

(क० टी०) नन्वत्रेष्टापत्तिरतआह *परमार्थेति । देहादेरनात्मत्वं यथा तथा दर्शयति *अमल इति । न विद्यते मलमज्ञानकार्यलक्षणं यस्य सः । "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः । *सकृद्विभातो-विभात एव । "सकृद्विभातम्" इति श्रुतेः । *चैतन्यात्मा—चैतन्यस्वरूपः । "प्रज्ञानं ब्रह्म" इति श्रुतेः । *खवद्व्यापी-तद्वदपरिच्छिन्नः । विकल्पन्ते यैस्ते विकल्पना विशेषास्तैर्हीनः । "निर्विकल्पं निरञ्जनम्" इति श्रुतेः । तेन निर्विकल्पकज्ञानरूपप्रमाविषयः । सविकल्पकं तु भ्रम एवेति भावः । एतेन भेदवादः सत्य इति परास्तम् । *शुद्धः-पापरहितः । "शुद्धमपापविद्धम्" इति श्रुतेः । *बुद्धः-बोधस्वरूपः । "विज्ञानं ब्रह्म" इति श्रुतेः । दुर्वि-

ज्ञेयत्वेन दार्ढ्याय पुनःपुनः कथनान्न चैतन्यबुद्धशब्दयोः पुनरुक्तिदोषः । *अजरोऽमर इति भावविकाररहितत्वोपलक्षणम् । *शान्तः–निष्प्रपञ्चः । "शिवमद्वैतम्" इति श्रुतेः । पौनरुक्त्याभावः पूर्ववदित्यर्थः । अपिसमुच्चयमेवाह *श्रुतिषु चेति । उक्तरूपास्वित्यर्थः । *तथोक्तम् नित्यात्मस्वरूपमुक्तम् । चेन स्मृतिपुराणादिसमुच्चयः । न्यूनतां निराचष्टे *इदमिति । सत्यत्वस्यारोपितत्वमित्यर्थः । प्रपञ्चे इति शेषः । उक्तरीत्या वस्तुतस्तत्र तदसत्त्वादिति भावः । तत्र बीजमाह *तस्येति । सर्वत्र वस्तुतोऽसत्त्वायाह*सृष्ट्याद्येति । प्रागुक्तपक्षान्तररीत्यैव मतान्तरमाह *यद्वेति । स्वमते एतत्सत्त्वादाह *तत्तदिति । *तद्गतेति । भ्रमगतेत्यर्थः । तस्यानादिवासनावशाद् भ्रमविषये आरोपितावेतावित्याद्यर्थः । ननु सांख्येन नैवमुक्तमत आह *तत्रेति । तयोर्मध्ये इत्यर्थः । *परेति । तस्यापि तन्मते जन्यत्वादिति भावः । उक्तमेव विशदयन्नुपसंहरति *तस्मादिति । *सा–सूक्ष्मा ऽविद्या । अत्र मानमाह *तस्या एवेति । सूक्ष्माविद्याया एवेत्यर्थः । व्याख्यातमिदम् । नन्वेवं कथं नित्यत्वं तस्या अपि जन्यत्वादित्याह *एतदिति । तदीयसृष्टावित्यर्थः ॥ ७७ ॥

उपनिषद्भाष्ये "अजाम्–" इति श्रुतौ अजामित्यस्य यौगिकत्वेन जन्माभावपरतया व्याख्यानमप्येवमेव नेयम् । संस्काराणामपि त्रिगुणत्वात् लोहितशुक्लकृष्णगुणत्वम् तस्याः, समूहाभिप्रायेण चैकवचनं बोध्यम् । वासनारूपैव च सा मूलप्रकृतिरित्युच्यते ।

अनिर्वचीयोत्पत्तिवादिभिरपि स्वसमानाधिकरणस्यावच्छिन्नवृत्तिकान्यात्यन्ताभावस्य प्रतियोगित्वरूपं मिथ्यात्वं वदद्भिः स्वीकृतमेव वस्तुनोऽसत्त्वम् । अन्यथाऽभावपदे विरोध्यर्थत्वान्नञः प्रतियोगिसामानाधिकरण्यं तस्य वक्तुमशक्यम् ।

प्रतियोग्यसामानाधिकरण्यस्यैव तत्र विरोधपदार्थत्वात् ।

मम तु स्वप्रतिभाससमानाधिकरणेत्थाद्युक्तमेव भ्रमविषयत्वं मिथ्यात्वम् ।

ध्वनितं चेदं देवताधिकरणे कल्पतरुणा—

"भ्रमात्संस्कारतोऽप्यन्या मण्डूकमृदुदाहृतेः ।
अविद्याऽनादिभावात्मा मता वाचस्पतेरिह" ॥

इत्यनेन । अत्र वाचस्पतेर्मतेत्यनेन सूत्रभाष्यकृतोर्भ्रमतत्संस्काररूपैवाविद्येति मतं सूचितम् । इह—देवताधिकरणे । अनेन वाचस्पतेरप्यन्यत्र तत्पक्षाभिनिवेशः सूचितः ।

वस्तुतो यथा मण्डूका मृदो निःसरन्तीत्युदाहरणमपि वासनासमूहस्याविद्यात्वेन समूहादेकैकस्य निःसरणेनोपपन्नम् ॥ ७८ ॥

(क०टी०) एवमन्यत्रापि न तद्विरोध इत्याह *उपेति । *एवमेव—एतत्सृष्टौ तज्जन्मानुपलम्भेनैव । ननु सा चेदियमेव तर्ह्यस्याः संस्काररूपत्वेन कथं त्रैवर्ण्यं श्रुत्युक्तमत आह *संस्कारेति । नन्वेवं तेषां बहुत्वात्कथं तत्रैकवचनमत आह *तस्या इति । उक्तरूपाविद्यायाः इत्यर्थः । सांख्याविरोधमाह *वासनेति । एवेन द्वितीयाव्यवच्छेदः । *सा—अविद्या । अनिर्वचनीयत्वस्वरूपभेदेऽपि मदुक्तं प्रपञ्चाद्यसत्त्वं तेषामपि संमतमेवेति न तदंशे भेद इति तदंशे ऐक्यमेवेत्याह *अनिर्वचेति । अस्य हेतुगर्भं विशेषणमाह *स्वेति । प्रतियोगीत्यर्थः । अधिष्ठानावच्छिन्ना वृत्तिर्यस्येदृशम् यत्तोऽन्यसदभावस्येत्यर्थः । अनिर्वचनीयोत्पत्त्या वस्तुत्वे ऽपि असत्त्वमित्यर्थः । कथमित्याशङ्कायामाह *अन्यथेति । तस्यासत्त्वानङ्गीकारे इत्यर्थः । *नञ इति पूर्वान्वयि । *तस्य—अभावस्य । ननूभयमप्य-

स्त्वत आह *प्रतीति । *तत्र-अभावघटके नञि । ननु तर्हि मिथ्यात्वभेदो ऽपि तत्र स्वमतादत आह *मम त्विति । स्वसमानाधिकरणेतिपूर्वोक्तलक्षणे स्वपदार्थमाह *स्वप्रतिभासेत्यादि । यत्तदुक्तं तदेव भ्रमविषयत्वरूपं मिथ्यात्वमिति तदंशेऽपि न भेद इत्यर्थः । वासनारूपैवाविद्येत्यत्र तदीयसंमति मप्याह *ध्वनितामिति । *इदम्-सैवासत्येत्येतत् । *भ्रमात्-संस्कारजात् । अत एवाह *संस्कारतो ऽपि । अविद्यातः प्रपञ्चोद्भवे मृदो मण्डूकभवनं दृष्टान्तः । तेन यथैकस्या एव मृदो ऽनेकमण्डूकास्तथा-अविद्यातः प्रपञ्चः । इदं च तस्या अतिरिक्तत्वे एव संगच्छते । भ्रमाणां चानेकत्वादेकतो ऽनेकस्य प्रत्येकं भवनासंभवादिति भावः । ध्वनितत्वं विशदयति *अत्रेत्यादिना । *रूपैवेति । एतदन्यतररूपैवेत्यर्थः । *अन्यत्र -एतदधिकरणभिन्ने । *तदिति । उक्तेत्यर्थः । इदमप्यभ्युपेत्य । वस्तुतो ऽत्रापि न तदुपयोग इत्याह *वस्तुत इति । प्रत्येकं तथात्वे तत्त्वासंभवादाह *समूहस्येति ॥ ७८ ॥

सनत्सुजातीयभाष्ये भगवत्पादैरप्युक्तं 'मोहो-मृत्युः' इति पद्ये "मोहो मिथ्याज्ञानमनात्मन्यात्माभिमानः । अनेनाग्रहणान्यथाग्रहणात्मिका ऽविद्या सूचिता" इति । अग्रहणमात्मस्वरूपाग्रहणं तन्मूलकमिथ्याज्ञानात्मिकेत्यर्थः ॥ ७९ ॥

(क०टी०)तस्यास्तत्त्वे मानान्तरमप्याह *सनदिति । *पद्ये इति । तद्घटितपद्ये इत्यर्थः । तच्चैवम्—

उभे सत्ये क्षत्रियाद्यप्रवृत्ते मोहो मृत्युः संमतो यः कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि सदा प्रमादामृतत्वं ब्रवीमि ॥ इति ।

अस्यार्थः-अन्धप्रश्ने सनत्सुजातोक्तिः-ये प्रागुक्ते मृत्योरस्तित्वनास्तित्वे उभे हे क्षत्रिय आद्यप्रवृत्ते य आदिसर्गस्तमारभ्य प्रवृत्ते । यद्वा क्षत्रियाद्य क्षत्रियप्रधान प्रवृत्ते प्रवर्त्यमाने । ननु कथं तयोर्मिथो विरुद्धयोः सत्यत्वमत आह-मोहो मृत्युरिति । भवेदयं विरोधस्तयोर्यदि परमार्थरूपो मृत्युः स्यात् किन्तु यो मोहो मिथ्याज्ञा-

ज्ञानमनात्मन्यात्माभिमानः स मृत्युः केषां चित्कवीनां संमतः, अहं-मिथ्याज्ञानस्यापि कारणमात्मानवधारणमात्माज्ञानं मृत्युं जनन-मरणादिसर्वानर्थबीजमहं ब्रवीमि । तथा सदा प्रमोदं स्वाभाविकरूपेणावस्थानममृतत्वं ब्रवीमि इति ।

एतेन "क्षत्रियैतस्य विद्धि मोहान् मृत्युः संमत"ति पाठं धृत्वाऽन्यथा व्याख्यानं नीलकण्ठीयमपास्तम् ।

केषां चित्संमतं तत्स्वरूपमाह *अनात्मनीति । भाष्यवाक्ये द्वन्द्वभ्रमनिरासायाह *अग्रहणमिति ॥ ७९ ॥

द्युभ्वाद्यायतनाधिकरणे च "देहादिष्वनात्मसु 'अहमस्मि' इत्यात्मबुद्धिरविद्या" इति भाष्ये उक्तम् । अध्यासभाष्ये ऽपि "विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः, इत्यतस्तयोरध्यासो मिथ्येति भवितुं युक्तम्" इत्यनेन मिथ्याभूतेनालीकेनाध्यासेन सकललोकशास्त्रव्यवहारानुपपत्तिरिति पूर्वपक्षं कृत्वा "तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेन अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य "अहमिदम्" "ममेदम्" इति नैसर्गिको ऽयं लोकव्यवहारः" इति सिद्धान्तितम् । तस्यैव चाध्यासस्य प्रहाणायाध्यात्मशास्त्रमिति तदर्थः । एतच्चाग्रे भाष्ये एवोपपादितम् । अध्यस्येत्यस्यैव विवरणं सत्यानृते मिथुनीकृत्येति । सत्यं ब्रह्म । न ऋतमनृतमसत् । ए-

१ इत आरभ्य अग्रे " योगसूत्रेऽप्युक्तम् " पर्यन्तं पाठः केवलमूलपुस्तके खसञ्ज्ञके नास्ति ।

तत् पदार्थमात्रे । तत्र, सत्यं ब्रह्म विशेष्यम्, अनृतमुपाधयो विशेषणम् ॥ ८० ॥

(क०टी०) मानान्तरमाह *द्युभ्वेति । प्रथमाध्यायतृतीयपादाद्यसूत्रम्—"द्युभ्वाद्यायतनं स्वशब्दाद्" इति । द्यौश्च भूश्च द्युभुवौ ते आदी यस्य । "यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः" इत्याथर्वणिकश्रुत्युक्तस्य तस्यायतनं ब्रह्मैव। "स्वशब्दात्"। स्वस्य परब्रह्मणो वाचको य आत्मशब्दस्तस्मात् । "तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुः" इति तदुत्तरार्द्धश्रुतावात्मशब्दश्रवणादित्यर्थः। *च-अपि । नित्यानुभवविषययुष्मदर्थो विषयः, विषयी त्वस्मदर्थो नित्यानुभवस्वरूपः तयोर्दाह्यदाहकवन्मिथो विरुद्धयोर्जातिव्यक्तित्वादेरभावान्न तादात्म्यं तदाह *तम इति । विरोधफलमाह *इतरेतरेति । भावस्तत्तादात्म्यं तयोरप्रतीतावित्यर्थः । नन्वेवमपि चैतन्यजाड्यादीनामितरेतरभावः स्यात्तथा च तद्धर्मप्रमित्या तत्संस्कारात्तदध्याससिद्धिरत आह *तद्धर्माणामपीति । विरोधादन्यत्राद्दष्टत्वाच्चेति भावः । *इति-अभेदप्रमित्यभावात् । *अतः-तत्फलाभेदसंस्काराभावात् । *तयोरध्यास इति । अस्मत्प्रत्ययगोचरविषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषये ऽध्यास इत्यर्थः । पूर्वपक्षतात्पर्यमाह* मिथ्येति । अत एवाह* आलोकेनेति । *तथापीति । असङ्गस्वप्रकाशात्मनि अध्यासायुक्तत्वस्यालङ्कारत्वे ऽपीत्यर्थः । अनेन प्राक् यद्यपीति शेषः सूचितः । अध्यासस्वरूपलक्षणमाह *अन्यो ऽन्यस्मिन्निति । जाड्यचैतन्यादिधर्माणामत्यन्ताविवेकाद्धर्मिणोरपि तत्सिद्धिरिति, तेषां यौ धर्मिणौ तादृशावहंकारात्मानौ तयोरितरेतरभेदाग्रहेणान्योन्यस्मिन्नन्योन्यतादात्म्यमन्योन्यधर्मांश्चाध्यस्येत्यर्थः । अतः सो ऽयमिति प्रमाया नाध्यासत्वम्, तत्र कालभेदेन कल्पितभेदे ऽप्यत्यन्तभेदाभावात्। एतदर्थमेवात्यन्तेत्युक्तम् । अन्यस्मिन्नन्यावभास इत्युक्ते प्रतिमायां देवतादृष्टेरपि तत्त्वापत्तिरतः अन्योन्यस्मिन्नित्युक्तम् । नच धर्मितादात्म्याध्यासेन धर्माध्यासे सिद्धे धर्मांश्चेति व्यर्थमिति वाच्यम् । अन्धत्वादेरिन्द्रि-

यधर्मस्य धर्म्यध्यासास्फुटत्वे ऽप्यन्धो ऽहमिति स्फुटो ऽध्यास इति ज्ञापनार्थत्वात् । तृतीयया तस्य तत्र कारणत्वमुक्तमिति न तदभावप्रयुक्तस्तदभावः । अभानप्रयुक्ततदभावाभावायाह* अयमिति । अज्ञः कर्ता मनुष्योऽहमित्याद्यनुभवसत्त्वादध्यासो ऽस्ति । *इत्यतो-ब्रह्मात्मैक्ये विरोधाभावेन विषयप्रयोजनयोः सत्त्वादित्यर्थः । *तदर्थः-सिद्धान्ततात्पर्यार्थः । *एतच्च-प्रागुक्तं च सिद्धान्तरूपम् । अपौनरुक्त्यायाह* अध्यस्येत्येति । एतेनान्यथात्रानन्दगिरिरामानन्दादिव्याख्यानमपास्तम् । अनृतशब्दस्य प्रसिद्धवाक्परत्वनिरासायाह *न ऋतमिति । *एतत्-असत्त्वम् । विवरणफलमाह* तत्रेति । मिथुनीकरणे इत्यर्थः ॥ ८० ॥

ऐतरेयोपनिषदि "सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च" इत्यादिना "यच्च स्थावरम्" इत्यन्तेन स्पष्टमेवैतदुक्तम् । एष प्रज्ञानात्मेति, व्याख्यातम् । विशेष्यांशस्यैव च नामधेयं भवति । न हि 'घट' इति घटत्वस्य नामेति कश्चिदभ्युपैति ।

श्रुत्यन्तरे ऽपि-"भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म चैतद्" इत्यत्र भोग्यजडवर्गस्य ब्रह्मत्वमुक्तम् । तच्चोक्तरीत्यैव ।

"तदनन्यत्वम्" इति सूत्रे ऽपि भाष्ये उक्तम्-"प्राक् चात्मावगतेरव्याहतः सर्वो लोकव्यवहारः सत्यानृतविषय" इति । इदं च "मिथ्याज्ञाननिमित्त" इति प्रतीके 'मिथ्याज्ञानमध्यास' इति व्याचक्षाणैः "लोकव्यवहार" इति प्रतीके 'लोकानां व्यवहारः स चायमहं ममेदम्' इति च व्याचक्षाणैर्वाचस्पतिमिश्रैः स्पष्टीकृतम् । सर्वानर्थमूलत्वाद्

"इदं मम" "अहमिदम्" इत्येव व्यवहारः साक्षादुक्तः । स च व्यवहारमात्रस्योपलक्षणम् । नैसर्गिक इत्यनेन पूर्वपूर्वभ्रमजन्य उत्तरोत्तरः संस्कारस्ततश्चोत्तरभ्रम इति सूचितम् । तत्र देहादावहमित्यध्यासः शुद्धविषय एव,'जडचेतनयोर्विषयविषयिणोरन्योन्यस्मिन्नन्योन्यात्मकतामध्यस्य'इति भाष्योक्तेः । न चाध्यस्यमानस्य मिथ्यात्वेन ब्रह्मणो ऽपि मिथ्यात्वापत्तिः । अध्यासविषयस्य मिथ्यात्वमित्येव नियमात् । स च क्वचिदध्यस्यमानस्य क्वचिदधिष्ठानस्य तत्त्वेनोपपपन्नः ।

यत्त्वेतद्दोषभिया संसृष्टात्माध्यास इति कैश्चिदुक्तं तन्न । उक्तभाष्यास्वारस्यात् ॥ ८१ ॥

(क०टी०) अत्र मानमाह* ऐतरेयोपेति । *एतानीति । "संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश" इति अव्यवहितप्रागुक्तानीत्यर्थः । एता अन्तःकरणवृत्तय उपलब्धुरुपलब्ध्यर्थत्वाच्छुद्धप्रज्ञानरूपस्य ब्रह्मण उपाधिभूतास्तदुपाधजनितगुणनामधेयानि भवन्ति न स्वतः साक्षादिति भावः । *इत्यादीति । आदिना "पञ्चमहाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानि इमानि च क्षुद्रमिश्राणीव बीजानि इतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च" इत्यस्य संग्रहः । एष इत्यस्य व्याख्या*प्रज्ञेति । तद्रूप आत्मेत्यर्थः । अनेन नानात्वं वारितम् । नन्वेतावतापि कथं तत्स्पष्टत्वमत आह *विशेष्यांशेति । विशेषणांशे मानमाह *श्रुत्यन्तराणीति । तदेवाह *भोक्तेति । *मत्वा-बुद्ध्यारूढं कृत्वा । *अत्र भाष्योक्तश्रुतौ । *उक्तेति । तत्र विशेषणत्वादेवेत्यर्थः । तत्संमत्य-

न्तरमाह* तदन्येति । तस्यैव तद्विवरणं न पृथगित्यत्र मानमाह* इदञ्चेति । व्याख्यानव्याख्येयभावरूपं चेत्यर्थः । अन्यथा तस्यापि निमित्तत्वं वदेत् । ननु व्यवहारानेकत्वादयमेव किमित्युदाहृतो ऽत आह *सर्वानर्थेति । तत्रापि बीजं सूचयन्नाह *साक्षादिति । न्यूनतां निराचष्टे* सचेति । *ततश्च–तस्माच्च । *तत्र–तेषां मध्ये । प्रागुक्तमेवाह *अन्योन्यस्मिन्निति । द्वितीये शङ्कते* नचेति । तस्याप्यध्यासाङ्गीकारात् । *विषयस्य–विषयविषयिणोरित्युक्तघटकस्य । एवेन विषयिव्यवच्छेदः । *स च–अनियमश्च । द्वितीये आह *क्वचिदिति । आद्ये आह *क्वचिदिति । *तत्त्वेन–मिथ्यात्वेन । वेदान्तिमतं दूषयति *यत्त्विति । *एतत्–मिथ्यात्वेति । तथा च तत्त्व इष्टापत्तिरिति भावः । *उक्तेति । अन्योन्यस्मिन्नितीत्यर्थः । ततोऽक्षरमर्यादया तदप्रतीतेरिति भावः ॥ ८१ ॥

यत्तु अध्यासः किंनिमित्तकस्तत्राह–मिथ्याज्ञाननिमित्त इति । मूलकारणाविद्यारूपभावपदार्थनिमित्तक इत्यर्थः । तच्च लोकव्यवहार इत्यस्य विशेषणम् । लोक्यते 'मनुष्यो ऽहम्' इति मन्यत इति लोकः ज्ञानोपसर्जनो ऽर्थाध्यासः तद्विषयो व्यवहारः । अध्यस्यमानार्थविषयो व्यवहार इति ज्ञानाध्यासो ऽत्र व्यवहारः । स चोक्ताविद्यानिमित्तक इति, सा चाविद्या संस्कारकालकर्मादिरूपेण परिणताऽध्यासनिमित्तमिति ।

तन्न । त्रयाणामप्यध्यासपदार्थत्वेनाध्यस्य मिथुनीकृत्येति क्त्वाप्रत्ययानुपपत्तेः । न च वस्तुतो ऽभेदे ऽप्यपौर्वापर्ये ऽपि विशेषणभेदेन वस्तुभेदं परिकल्प्य तत्प्रतिपत्तिक्रमेण पौर्वापर्यं च परिकल्प्य तदुपपत्तिरिति वाच्यम् । भेदकविशेषणानुपलम्भात् । प्रतिपत्तिक्रमाननुभवाच्च । रूढेर्योगा-

पहारकत्वेन लोकव्यवहारपदयोर्यथाकथंचित्स्वाभिमतयोगेनाध्यासपरतया व्याख्यानस्यानौचित्याच्च । तादृशव्याख्यानं विना भाष्यानुपपत्तेरभावाच्च । किं च ज्ञानाध्यासो यथा–प्रतिमादौ देवताद्यध्यासो, यथा वा ऽसन्निकृष्टे पर्वतादौ भ्रमात्मकवन्ह्यनुमितौ विषयस्यासत्त्वेन यो ऽध्यास इति वदन्ति नव्याः । तर्हि सर्वत्र तथैवास्तु किमनेन द्वैविध्येन । किं चातिरिक्ताविद्याया अपि संस्कारादिरूपेण परिणामद्वारा कारणत्वेन लाघवात्, क्लृप्तसंस्कारादृष्टैरेवोपपत्तौ तत्कल्पने मानाभावाच्च ॥ ८२ ॥

आनन्दगिरिरामानन्दाद्युक्तिं खण्डयति *यत्त्विति । मिथ्या च तद् अज्ञानं चेत्यर्थः । बहुव्रीहिरग्रे । तदाह *मूलेति । तस्योपादानत्वेऽपि संस्कारकालकर्मादिनिमित्तपरिणामित्वेनाध्यासनिमित्तत्वमिति निमित्तपदम् । स्वप्रकाशासङ्गात्मनि कथमविद्यासङ्ग इति शङ्कानिरासार्थं मिथ्यापदम् । *तच्च—उक्तार्थकपदं च । *व्यवहारः–अभिमानः । तदाह *ज्ञानेति । अर्थोपसर्जनेत्यादिः । तथा चानेन द्विविधोऽध्यासो दर्शितः । निमित्तपदलब्धमुक्तमेवाह *सचेति । द्विविधश्च । *त्रयाणाम्—अध्यासमिथुनीकरणलोकव्यहारपदानाम् । *अध्यासेति । बहुव्रीहिः । आद्योक्तिं खण्डयति *नचेति । *तदिति । क्त्वाप्रत्ययस्येत्यर्थः । अभ्युपेत्याप्याह *रूढेरिति । रथन्तरादौ दृष्टेनेति भावः । स्वरसतस्ततस्तदलाभादाह *यथेति । अत एव रूढेरिति न्यायसंचारः । एतेन वैषम्यात्तदप्राप्तिरित्यपास्तम् । ननु सर्वतो बलीयसीत्यन्यथानुपपत्तिरिति न्यायात्तथा अत आह *तादृशेति । ज्ञानाध्यासस्यार्थोपसर्जनत्वमेव नेत्याह *किञ्चेति । पूर्वमधिष्ठानसंनिकर्षताऽग्रे तु सापि नेत्याह *यथा वेति । एतेनाध्यासव्यक्तिभेदात् पूर्वपूर्वस्योत्तरोत्तरं प्रति संस्कारद्वारा तत्त्वात्तदुपपत्तिरिति रामानन्दोक्तमप्यपास्तम् । अत्र तत्खण्डनस्य युक्तत्वे ऽपि कश्चिदंशो न युक्तः । अत एव तत्रास्वीयत्वध्वननाय *व-

दन्ति नव्या इत्युक्तम् । तस्य च दीक्षितादय इत्यर्थः । अतः स्वसिद्धान्तं प्रतिपादयितुं प्रसङ्गात्तत्रापि दोषमाह *तर्हीति । अतिरिक्तायास्तस्यास्तत्त्वस्वीकार इत्यर्थः । *सर्वत्र–अध्यासे ऽपि । नन्वेवं निमित्तपदघटितभाष्यविरोधो ऽतो द्वैविध्ये दोषान्तरमाह *किञ्चेति । *संस्कारादीति । आदिना कालादिपरिग्रहः । एवं च साक्षात् तस्या नैव कारणत्वमन्यत्रापीति भावः । इदमप्यभ्युपेत्योक्तम् । वस्तुतः सैव नेत्याह *क्लृप्तेति । एतेन वैपरीत्यं निरस्तम् । *तत्कल्पने–अतिरिक्ताविद्याकल्पने ॥ ८२ ॥

मिश्रव्याख्याने तु अध्यस्येत्यनेनानन्तर्यलाभे ऽपि तस्य निमित्तत्वालाभात् तदुक्तिः । भ्रमरूपाध्यासेन कथं व्यवहार इति शङ्कापनयनाय च तदुक्तिः । मिथ्याज्ञानविषयेण रज्जुसर्पादिना भयपलायनादिव्यवहारवत् सर्वो ऽपि व्यवहारस्तन्निमित्तक इत्याशयः । किं च सर्वसंमताध्यासविषये "को ऽयमध्यासो नाम, स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इति प्रश्नोत्तरवत्सर्वासंमताविद्याविषयप्रश्नोत्तरानुपलम्भेन सा न भाष्यसंमता । पूर्वदृष्टस्य परस्यावभास इत्यर्थः । परत्रेत्युक्तेः परस्येति लब्धम् । अवसन्नो भासो ऽवभासः । उत्तरकालिकबाधेन तस्यावसादात् । पूर्वदृष्टत्वं च संस्कारद्वारोपयोगि, तच्च जन्मान्तरीयमपि । तदाह–स्मृतिरूप इति । स्मृतिसदृश इत्यर्थः । संस्कारजन्यत्वेन च तत्सादृश्यं न तु स्मृतिरेव, पूर्वानुभूतत्वरूपतत्ताऽनुल्लेखात् । एतच्च विवेचयिष्यते । अनेन च संस्कारो ऽध्यासनिमित्तमित्युक्तमेवेति तदाकाङ्क्षाऽभावेन तदंशे ऽपि प्रश्नोत्तराभावः ॥ ८३ ॥

नन्वेवं सिद्धान्ते तद्विशेषणवैयर्थ्यमेवात आह *मिथ्येति । *प्रागुक्ते—मिथ्याज्ञानमध्यास इत्यत्रेत्यर्थः । ननु शब्दतो ऽलाभे ऽप्यर्थतो लाभ एवात आह *भ्रमेति । *तदुक्तिः—मिथ्येतिविशेषणोक्तिः । तत्तात्पर्यमाह *मिथ्येति । अकारच्छेदेन तदतिरिक्तत्वे तदसङ्गतिरूपमेव दोषान्तरमितः सा तदभिमतेति शङ्कानिरासायाह *किञ्चेति । सर्वसंमतेत्यादिविशेषणद्वयेन वैपरीत्यमुचितमिति सूचितम् । *सा अतिरिक्ताऽविद्या । एवमग्रे ऽपि । तद्दर्शनमाह *पूर्वेति । स चेत्पूर्व एव तर्हि नाध्यासत्वमत आह *परस्येति । ननु तस्य लाभ एव नेति तथैवास्तु अत आह *परत्रेति । मध्यमपदलोपिसमासमुक्त्वाऽर्थदार्ढ्यायान्याग्रहणाय चाह *अवेति । अवसादो नाशः । दर्शनस्य तदानीमसत्त्वादाह *पूर्वेति । विनिगमनाविरहादाह *तञ्चेति । *तदाह—संस्कारद्वारकत्वमेवाह । इवगर्भबहुव्रीहिलब्धार्थमाह *स्मृतिसदृश इति । यथाश्रुतार्थं खण्डयति *नन्विति । रूपशब्दोऽभेदार्थः । तस्य निमित्तं तन्निमित्तम् ॥ ८३ ॥

अग्रे चाध्यासातिरिक्ताऽविद्या न काचिदिति सूचयितुमेव "तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति ब्रुवते" इत्युक्तम् । भावरूपायाः कारणाविद्याया अतिरिक्ताया भाष्यसंमतत्वेऽध्यासमपीति ब्रूयात् । "तमेतमेवंलक्षणम्" इत्यक्षरस्वारस्येनात्र "अहं मम" इत्यध्यास एवाविद्या । "वासुदेवः सर्वम्" इति विद्यायां तस्यैव विरोधित्वात् । रागद्वेषमोहादिवासनास्तु वासनापदेनैव वाच्याः । मायात्वं तु साधारणम् । तत्राप्यविद्यापदप्रयोगस्तु अध्यासत्वसामान्याद्गौण इति लभ्यते । अत एव "उपपद्यते चोपलभ्यते च" इति सूत्रे भाष्ये उक्त ईश्वरस्य वैषम्यकारणत्वमित्यर्थः । "न चाविद्या केवला वैषम्यकार-

णम् । तस्या एकरूपत्वात् । रागद्वेषवासनाक्षिप्तकर्मापेक्षत्वे तु तस्या ईश्वरस्यापि तदपेक्षत्वाद्वैषम्यहेतुत्वमुपपन्नमिति । एकरूपत्वादित्यस्य "अहं मम" इत्यध्यासरूपाविद्यायाः सर्वेषामेकरूपत्वादित्यर्थः । तत्तत्प्राणिकर्मवशाद् बीजाङ्कुरन्यायेनानादिपूर्वपूर्ववासनयैव घटादिभ्रमरूपां सृष्टिं स करोतीति बोध्यम् ॥ ८४ ॥

अन्यदपि मानमाह *अग्रे चेति । उक्तमित्यत्रान्वयः। *एवं लक्षणमिति । आक्षिप्य समाहितमुक्तलक्षणलक्षितमित्यर्थः । *कारणेति।मूलेत्यादिः । अत एव पण्डिता इत्युक्तिरपि सफला । ततो ऽन्यदपि किञ्चिल्लभ्यते इत्याह *तमेतमिति। अस्य लभ्यते इत्यत्रान्वयः। *अत्र-साध्ये । तत्पदस्य योगरूढत्वमित्याह *वासुदेवइति । *तस्यैव-'अहं मम' इत्यध्यासस्यैव । एवेनेतराध्यासनिरासः । नन्वन्यत्रापि तत्त्वस्येष्टत्वादेवासङ्गतिरत आह *रागेति । एवेनाविद्यापदनिरासः । नन्वेवं मायात्वमपि तत्रैव स्यात्तच्च नेष्टम् अविद्यापदप्रयोगादत आह *मायेति । अध्यासवासनासाधारणमित्यर्थः । अविरोधायाह *तत्रापीति । तद्वासनास्वपीत्यर्थः । *अत एव—तस्यैव तत्त्वस्य मुख्यत्वादेवेत्यर्थः । ननु "न कर्माविभागादिति चेन्नानादित्वाद्" इति पूर्वपक्षसूत्रोक्तं संसारस्यानादित्वं कुतो ऽत आह *उपेति । संसारस्यानादित्वमुपपद्यते अन्यथाऽकस्मादेव सृष्टयङ्गीकारे मुक्तस्यापि पुनर्जन्मप्रसङ्गात् , पूर्वसृष्टिसादृश्यानुपपत्तेश्च तस्य तत्त्वं श्रुतिस्मृत्योरुपलभ्यते चेत्यर्थः सूत्रस्य परैरुक्तस्तन्निरासायाह । *ईश्वरेति । "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति" इति ततः प्रागुक्तत्वादिति भावः । इदमुपपादयति *नचेति । *तस्याइति पूर्वान्वयि । नन्वेवं कथं भेदो ऽत आह *तत्तदिति । अनवस्थानिरासायाह *बीजाङ्कुरेति । *सः—ईश्वरः । तदन्यवासनानामपि तत्त्वे तु तासामनेकरूपत्वात्तदसङ्गतिः स्पष्टैवेति भावः ॥ ८४ ॥

किं च "तत्तु समन्वयाद्" इति सूत्रे "साध्यश्चे-

न्मोक्षो ऽभ्युपगम्येत अनित्य एव स्याद्" इति भाष्ये उक्तम् । तत्रानित्यत्वं नाश्यत्वमेव । तव तु अजन्याया अविद्याया नाश्यत्ववज्जन्यस्यापि मोक्षस्याविनाशित्वे किं बाधकम् । जन्यत्वनाश्यत्वयोः परस्परव्याप्तेरेव लोके दृष्टत्वाच्च । एवं च जन्याऽविद्या नाश्या चेत्युक्तमेव ॥ ८५ ॥

मानान्तरमप्याह *किञ्चेति । *तत्त्विति । तुः पूर्वपक्षव्यावृत्त्यर्थः । *तत्–ब्रह्म, साक्षात् वेदान्तप्रतिपाद्यम् । *समन्वयात्–साक्षादेवोक्ततात्पर्यवत्त्वात् । उपासनस्य मोक्षं प्रति हेतुत्वानभ्युपगमादुपास्तिविधिशेषत्वेन प्रतिपादने मानाभावादित्यर्थः । तदेवाह *साध्यइति । *तत्र—भाष्ये । अन्यादृशस्य तस्याभावादाह *नाश्येति । विपक्षे बाधकमाह *तवत्त्विति । एवं च भाष्यमसङ्गतमेव स्यादिति भावः । इदमप्यभ्युपेत्योक्तम् । वस्तुतस्तदेव नेत्याह *जन्यत्वेति । तत्पर्यवसितं स्वेष्टमाह *एवंचेति । अनित्यत्वोक्तौ चेत्यर्थः ॥ ८५ ॥

योगसूत्रे ऽप्युक्तम् । "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति ।

व्याससूत्रे ऽपि एतद्विलक्षणाविद्यानुक्तेस्तस्यापीदमेव संमतमिति लक्ष्यते ।

अत एव "पञ्चवृत्तिर्मनोवद्व्यपदिश्यते"इति सूत्रे "परमतमप्रतिषिद्धमनुमतं भवति"इति न्यायेन योगशास्त्रप्रसिद्धाः प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपा मनसः पञ्चवृत्तयः परिगृह्यन्ते" इति भाष्ये उक्तम् ॥८६॥

अन्यदप्याह *योगेति । *अनित्येति । अनित्यादिचतुष्टये क्रमेण नित्यादिबुद्धिरित्यर्थः । तत्र कालनिष्ठाभावप्रतियोगित्वरूपानित्यत्ववति कार्ये नित्यत्वज्ञानम्–यथा ध्रुवा पृथिवी

ध्रुवा सचन्द्रतारका द्यौरमृता दिवौकसः इति । तथा अशुचावप-वित्रे परमबीभत्से काये शुचित्वख्यातिः । तथा दुःखे सुखख्यातिः प्रसिद्धा । अनात्मन्यात्मख्यातिर्यथा–बाह्यस्वदेहस्योपकरणेषु पुत्रध-नादिषु चेतनाचेतनेषु अहंबुद्धिर्ममताबुद्धिर्वा । एतत्कार्यमेव प्रपञ्चः अहं कर्तेत्याद्यभिमानस्यैव धर्माधर्मोत्पत्तिद्वारा ऽखिलजगद्धेतुत्वा-दिति भावः । वेदान्तिसूत्रमूलसंमतापीयमेवेत्याह *व्यासेति । *त-स्यापि–व्यासस्यापि । ननु कथमन्योक्तमन्यस्य सम्मतं गमकाभावे ऽत आह *अत एवेति । तस्यापि तत्संमतत्वादेवेत्यर्थः । *मनोवद् इति । सूत्रार्थः स्पष्टः । *प्रमाणेति । "प्रत्यक्षानुमानागमाः प्रमाणा-नि" "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" "शब्दज्ञानानुपाती व-स्तुशून्यो विकल्पः" "अभावप्रत्ययालम्बनवृत्तिर्निद्रा" "अनुभूत-विषयासम्प्रमोषः स्मृतिः" । एतेनान्यथा व्याख्यानं वृत्त्यादीनाम-पास्तम् ॥ ८६ ॥

"परमार्थसारे ऽपि ।

रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन ।
तद्वद् द्वैतविकल्पभ्रान्तिरविद्या न सत्यमिदम् ॥
एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या ।
न विदन्ति वासुदेवं सर्वात्मानं जना मूढाः ॥ इति ।

एतद्–भ्रान्तिरूपम् । उत्तरार्द्धेन न विदन्त्यनयेति अविद्यापदव्युत्पत्तिर्दर्शिता । एवं च सिद्धं भ्रमस्तत्सं-स्काररूपा चाविद्येति । सा च जन्यैवेति नैकविज्ञा-नेन सर्वविज्ञानप्रतिज्ञाभङ्गः ॥ ८७ ॥

अन्यदप्याह *परेति । नन्वात्मावस्थाश्चेदेतास्तर्हि तद्वत्सत्याः स्युरत आह *रज्ज्वामिति । रज्जुः कालत्रये ऽपि भुजङ्गो न भवति कदाचित् तद्दर्शनाद्भयं भवति तत् केन हेतुना भ्रमरूपाविद्ययेति चेत् तद्वद् आत्मनि *द्वैतविकल्पभ्रान्तिः–अन्तर्याम्यादिभ्रान्तिराविद्या नै तत्सत्यमित्यर्थः । तत्राविद्यापदप्रवृत्तौ निमित्तमाह *एतदिति।भ्रम-रूपवस्त्वेव । अन्धकारम्–रूपकमेतत् । *यदनात्मन्यात्मताभ्रान्त्या।

*सर्वात्मानम्–सर्वस्वरूपं वासुदेवं परमात्मानं न विदन्ति । एवं च न विदन्त्यनयेत्यविद्यापदयोगो दर्शितः । तथा च श्रुतिः "नीहारेण प्रावृता" इति "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति च । सनत्सुजातभाष्ये आचार्योक्तिश्च "अग्रहणान्यथाग्रहणात्मिका अविद्या" इति । इयं स्थूलाविद्या अग्रहणजनकान्यथाग्रहणस्वरूपेति तदर्थः । अन्यथाग्रहणजनकं तु पूर्वपूर्वभ्रमजं संस्कारजालं तत्तत्प्राणिनां भोगजनकमदृष्टं चेति बोध्यम् । तदाह *सङ्क्षेपेणैतदिति । पर्यवसितमाह *एवञ्चेति । उक्तमानसत्त्वे चेत्यर्थः । *भ्रमः–प्रपञ्चः । प्रागुक्तमेवाह *सा चेति ॥ ८७ ॥

परमार्थसारेऽप्युक्तम्—

हिमफेनबुद्बुदा इव जलस्य धूमोद्गमो यथा वह्नेः ।
तद्वत्स्वभावभूता मायैषा कीर्तिता विष्णोः ॥

एनां द्वैतविकल्पभ्रमस्वरूपां विमोहिनीं मायाम् । इति ।

स्वभावभूता तज्जननस्वभावत्वात्तस्य, जलादेः फेनादिजनकत्वस्वभाववत् । आध्यासिकसंबन्धेन तस्या नित्यसंबद्धत्वाद् विष्णौ तत्स्वभावारोप इति बोध्यम् । विमोहिनीमुपाधिस्थस्य स्वस्य ।

तदुक्तं तत्रैव—

विमोहयतीवात्मानं स्वमायया द्वैतरूपया देव इति ।

वास्तवमोहाभावात् इवेति । तेनारोपित एव मोह इति बोध्यम् । अत एव तृतीये "सामान्यात्तु" इतिसूत्रे भगवत्पादैरुक्तम्–"नहि ब्रह्मातिरिक्तं किञ्चिद् अजं संभवति 'सदेव सोम्येदमग्र आसीद्' 'एकमेवाद्वितीयम्' इत्यवधारणात्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाच्च" इति । अत एव "न वियदश्रुतेः" इत्यधि-

करणे वियदादीनामजन्यत्वे "प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य" इति सूत्रेण एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्ग आपादितः। मृत्पिण्डादिदृष्टान्तेन कारणज्ञानेन कार्यस्यासत्यत्वज्ञानमिति हि ततो लभ्यते। तदुक्तम् "अव्यतिरेकाच्छब्देभ्य" इति। "शब्दाच्च" प्रकृतिविकृतिन्यायेनाव्यतिरेकात्प्रतिज्ञासिद्धिरवगम्यत इति तदर्थः। एतेनाकाशस्याजन्यत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्गापादनमभ्युच्चयः, अविद्यानुरोधेन सर्वपदसंकोचस्यावश्यकत्वेनाकाशातिरिक्तपरत्वेनापि तत्संकोचादित्यपास्तम्। किञ्च, तत्रैव "यावद्विकारं तु विभागो लोकवद्" इतिसूत्रेण कार्यत्वस्य भेदव्याप्यत्वबोधकेनाकाशस्येवाविद्याया अतत्त्वबोधनात्। विकारः कार्यं विभागो भेदः। अस्ति ह्याकाशे पृथ्व्यादिभेदः। एवमविद्यायां शुद्धब्रह्मभेदसत्त्वात्कार्यत्वमापतति, ब्रह्मणि तु न किञ्चिन्निरूपितो भेदः अधर्मकत्वेन वैधर्म्यसम्भावनाऽभावात्। "एष एव हि भेदो भेदहेतुर्वा यद्वैधर्म्यम्" इति प्रकाशकाराद्युक्तेः। नच अजन्यं सद् यदविनाशि तदन्यत्वरूपमत्र कार्यत्वं साध्यं पराधीनसत्ताकत्वरूपं वा कार्यत्वं साध्यम्, अविद्याया अजन्यत्वेऽपि ब्रह्मण्यध्यस्तत्वेन पराधीनसत्ताकत्वम्, विनाशित्वाचाद्यमपि तत्रेति वाच्यम्। सामान्यप्रवृत्तसूत्रस्य सङ्कोचेन व्याख्याने मानाभावात्। अविद्याया अजन्यत्वबोधकसूत्रान्तराभावाच्च। आकाशस्याप्यध्यस्तत्वेनान्त्ये तत्रापि जन्यत्वं न सिद्ध्ये-

त। "अजामेकाम्" इति श्रुतिरविद्याया अनादित्वबोधिका,

"अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा" ॥ इति-

भाष्योक्ता संप्रदायविदुक्तिश्च तस्या अजन्यत्वे न मानम् । आद्याया रूपकेणोपपत्तेः । अत एव "अजामेकाम्" इति श्रुतौ 'तेजोऽबन्नानामव्याकृतनामरूपा प्रागवस्था अजारूपकेण निर्दिष्टा' इति भाष्य उक्तम्। अनादित्वमपि परम्परानादित्वेनेति वक्ष्यामः। "अक्षरात्परतः परः" इति श्रुतावविद्याया अक्षरत्वश्रुतेश्च तद् यदि यथाकथं चित् तत्त्वज्ञानात्प्रागनिवृत्तेः, तर्हि अनादित्वमपि तथैवास्तु । नच तस्या जन्यत्वे मूलकारणे ऽनवस्थापत्तिः, ब्रह्मणस्तूपाधिसहकारं विना न जनकत्वम्, अत एव परमाणवादीनां नित्यत्वं परैः स्वीकृतमिति वाच्यम् । वासनारूपाविद्यासहकारेण स्थूलाविद्यायास्तत्सहकारेण च सूक्ष्माविद्याया ब्रह्मजन्यत्वेनानवस्थापत्त्यभावात् ॥ ८८ ॥

"अन्यदप्याह *परेति । अविद्यास्वरूपमेवाह *हिमेति । हिमादयो यथा जलस्य स्वभावाः जलेन सम्बद्धाः, धूमोद्गमो धूमोद्गमहेतुता यथा वह्नेः स्वभावस्तद्वत विष्णोर्माया विष्णुस्वभावभूता विष्णुना स्वभाववन्नित्यसम्बद्धेवेति । *कीर्तिता—एतत्तदन्धकारमित्यत्रेति शेषः । *द्वैतम्—नामरूपे । *विकल्पाः—भेदाः । तद्विषयभ्रमजनिकां जीवान् विमोहयन्तीं *मायाम्—असदर्थप्रकाशिकां वासनारूपाम् । अस्योत्तरार्द्धेन "उत्सृज्य सकलनिष्कलमद्वैतं भावयेद् ब्रह्म"

इत्यनेन "भ्रमविषयद्वैतकल्परूपां तत्कारणवासनारूपां चोत्सृज्य "नेह नानास्ति किञ्चन" इति श्रुतिबलादसत्त्वेन निश्चित्य, सकलेत्यत्रानुस्वारलोपश्छन्दोऽनुरोधात्, सकलं दृश्यं निष्कलमद्वैतं ब्रह्मैवेति भावयेत् आदरनैरन्तर्याभ्यां तथा भावनां कुर्यात्" इत्यर्थकेन तन्निवर्तिका भावनोक्ता । प्रकृताऽनुपयोगादत्र तदनुल्लेखः । तदाह *स्वभावेति । नन्वेवं कथं सा स्वभावभूता अत आह *आद्येति । *नित्येति । व्यावहारिकेत्यर्थः । उपाधिस्थस्य विमोहनमाह *तदुक्तमिति । *तत्रैव-परमार्थसार एव । तदेव दर्शयति * विमोहेति । द्वैतं नामरूपे तदेव स्वरूपं यस्यास्तया स्वमायया आत्मानं उपाध्यवच्छिन्नम् आत्मानं जीवादिकं मोहो मिथ्याज्ञानं तद्वन्तमिव करोति । वस्तुतस्तदभावादिवेति । तेन च स्वस्वरूपाज्ञानं तेषामुपलभ्यते । स्वयमेव ग्रहायां पुरुषमात्मानमित्यस्योत्तरार्द्धं बोध्यम् । तदाह *वास्तवेति । *अत एव-तस्या जन्यत्वादेव । *तृतीये-तद्द्वितीये "परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः" इति पूर्वपक्ष सूत्रेण "अथ य आत्मा स सेतुः" इति श्रुत्या ब्रह्मणः सेतुव्यपदेशेन ब्रह्म सद्वितीयं सेतुत्वात् रामसेतुवद् इत्यनुमानेन ब्रह्मणः परं वस्त्वस्तीत्युक्तौ समाधिमाह *सामान्यात्त्विति । तुः पूर्वपक्षनिरासार्थः । सेतुशब्दो मृदार्वादिमये लोके रूढो नहि तादृशसेतुत्वं ब्रह्मणः किन्तु स यथा जलव्यवस्थापक एवं ब्रह्मणोऽपि सर्वजगन्मर्यादाव्यवस्थापकत्वेन तत्सादृश्यात्तद्व्यपदेश इत्यर्थः । *एकेति । तस्यास्तत्त्वे तु एतद्विरोधः स्पष्ट एव । *अतएव-तस्या जन्यत्वादेव । *न वियदिति । उत्पद्यते इति शेषः । वियद् गगनादि नोत्पद्यते अश्रुतेः छान्दोग्ये भूतसृष्टौ तदश्रवणात् । यद्यपि "आत्मन आकाशः सम्भूतः" इतिश्रुतिरस्ति तथापि सा गौणार्थबोधिकेति पूर्वपक्षसूत्रार्थः । *इत्यधिकरणे-आकाशाधिकरणे । आकाशपदं तत्रोपलक्षणमित्याह *वियदादीनामिति । अजन्यत्वे तेनैव सूत्रेण पूर्वपक्षिते सति तदग्रिमपञ्चमसूत्रमात्रमाह *प्रतिज्ञेति । हानिरिति पाठो न त्वहानिरिति । *भङ्ग इति । एतेनाहानिरिति पाठं कल्पयित्वाऽन्यथा व्याचक्षाणा वृत्तिकारादयः परास्ताः । अविद्याया जन्यत्व एवैतत्सङ्गतिः । अन्यथा तत्र प्रतिज्ञाभङ्गस्यावश्यकत्वेनादोषत्वेनात्र तदापादनासङ्गतिः स्पष्टैव । एकविज्ञानेन सर्वविज्ञानं प्रागुक्तरीत्या नत्वन्यथेति

ध्वनयन्नाह *मृत्पिण्डादीति । *ततः-आपादकसूत्रात् । कथमित्याह *तदुक्तमिति । पूर्वखण्डस्यैव तदापादकत्वमन्वेति तु सिद्धान्तखण्ड इत्याह *अन्वेति । तदाह *शब्दाश्चेति । चस्त्वर्थे । *अन्वेति । ब्रह्मप्रपञ्चयोः, सच 'सदेव' इत्यादिः । "तदैक्षत तत्तेजोऽसृजत" "ऐतदात्म्यमिदं सर्वं" इत्यादिश्च । अनुवृत्तं तत्साकारप्रश्लेषमित्याह *प्रतिज्ञासिद्धेरिति । वेदान्तिमतं दूषयति *एतेनेति । उक्तरीत्या तस्यास्तत्त्वेनेत्यर्थः । अन्यथाह *किञ्चेति । *तत्रैव-आकाशाधिकरण एव । यावादितिसूत्रार्थमाह *कार्यत्वेति । *भेदनिष्ठव्यापकतानिरूपितव्याप्यत्वेत्यर्थः । सूत्रात्तथैव प्रतीतेः । तथा न्यूनानतिरिक्तवृत्तित्वरूपं बोध्यम् । यावद्विकारजातं विभागो दृश्यते लोके घटादेर्विकारस्यैवेति । *तत्त्वेति । कार्यत्वेत्यर्थः । ननु तयोरेवानुल्लेखात्कथमुक्तः सूत्रार्थो ऽत आह *विकारः कार्यमिति । यद्यपि समनियतत्वं तयोस्तथापि कार्यत्वस्य संदिग्धत्वात् भेदस्य प्रत्यक्षत्वात्तेन तदनुमानमित्याशयेनोक्तमुपपादयति *अस्तिहीत्यादि । यथा लोके कार्यकारणभेदः घटे मृद्भेदः मृद्वृत्तिघटत्ववत्त्वेन वैधर्म्यसत्त्वात्, मृदि तु न घटभेदः घटे ऽपि मृत्त्वसत्त्वेन मृदि घटवैधर्म्याभावात्तथाह *एवमिति । शब्दतो ऽनुक्तेराह *आपततीति । वैपरीत्यातिप्रसङ्गं निराचष्टे *ब्रह्मेति । *अधर्मेति । "निष्क्रियं निष्कलं शान्तं निरवद्यं निरञ्जनम्" "अमृतस्य परं सेतुम्" इति, 'साक्षी चेता केवलो निर्गुणश्च' इत्यादि, 'कारणं परमेशानो यः शुद्धो ह्युपचारत' इति च श्रुतिस्मृतिभ्यां तथा बोधनादिति भावः । अभावादित्यकारप्रश्लेषः । तस्य तत्त्वासम्भवादाह *भेदहेतुर्वेति । *प्रकाशेति । काव्येत्यादिः । वेदान्तिमतमाह *नचेति । वृत्तिकारादिमतमाह *परेति । तथाच आकाशादयः तदन्ये पराधीनसत्ताका वा स्वसमानसत्ताकभेदवत्त्वात् घटशरावादिवद् इतिप्रयोगो बोध्यः । सङ्कोचकमपि नेत्याह *अविद्याया इति । अन्त्ये दोषान्तरमप्याह *आकाशेति । किञ्चेत्यादिः । ब्रह्मणीति शेषः । एवं च प्रकृतासिद्ध्या सूत्रासङ्गतिरेवेति भावः । ननु तद्बोधकसूत्रान्तराभावे ऽपि श्रुत्यादिकं तथास्तीति तत्संकोच आवश्यक इत्यत आह *अजामिति । श्वेताश्वतरोपनिषत्स्थेयम् । तत्तात्पर्यबोधकं हेतुगर्भं विशेषणमाह *अवि-

द्येति । स्वापः आवरणमेव । प्रबोधः तद्भङ्गः । निद्रा गाढावरणम् । स्वप्नो ऽल्पावरणम् । यदा "तत्त्वमसि" इत्युपदेशकाले प्रबुध्यते मायानिद्रां त्यजति तदा जन्मलयस्थित्यवस्थाशून्यमद्वैतमीश्वरमात्मतत्त्वेनानुभवतीत्यर्थः । *सा-सा च । तस्यास्तत्त्वे न मानमित्यर्थः । *आम्नायाः-श्रुतेः । अभिहितस्तदर्थः । अत्र भाष्यसंमतिमाह *अत एवेति । तस्यात्रान्यथोपपत्त्या तद्गमकत्वादेवेत्यर्थः । *तेज इति । तेजोजलपृथिव्यादीनां न व्याकृते नामरूपे यया सा प्रागवस्थेत्याद्यर्थः । उक्ताशयेनैवाह *अजेति । द्वितीयोपपत्तिमाह *अनादित्वमपीति । कार्यजननसमर्थस्थूलरूपाविद्यायाः प्रलये ऽभावो न अवश्यं तत्परंपराभ्युपगमात् । सूक्ष्मरूपमादाय तत्त्वे घटादेरप्येवमनादित्वापत्तिर्नचेदं तवेष्टमिति भावः । तस्यास्तत्त्वे दोषान्तरमाह *अक्षरादिति । परत इत्यनेन पुरुषः पर इत्यनेन शुद्धं ब्रह्म । एवं च नाशस्याप्यभावे द्वैतमोक्षाभावयोरापत्तिरिति भावः । अत एवाह *तद्यदीति । अक्षरत्वमित्यर्थः । उच्यते इति शेषः । अक्षरमर्यादया ऽलाभादाह *यथेति । वचने ऽस्यान्वयः । सिद्धान्ते तदुक्तदोषं खण्डयति *न चेति । तथा च तद्धिया तस्या अजन्यत्वमिति तदाशयः । ननु केवलब्रह्मण एव तत्त्वमास्तामिति न सा अत आह *ब्रह्मेति । शक्तिहीनस्य प्रवृत्त्यनुपपत्तेस्तथा च सा दोष एवेति भावः । *अतएव-अनवस्थाभयादेव । सांख्यादिमतसंग्रहायाह *आदीनामिति । *तद्-स्थूलाविद्या । एवं च सोपाधिकस्य तस्यैव मूलकारणत्वेन सा नेति भावः ॥ ८८ ॥

अत एव "प्रकाशादिवन्नैवं परः" इति सूत्रे भाष्ये "मूलप्रकृत्यनभ्युपगमे ऽनवस्थाप्रसङ्गाद्या मूलप्रकृतिरभ्युपगम्यते तदेव नो ब्रह्म" इत्युक्तम् । तच त्वजन्याविद्यायामपि तत्सत्त्वात्तदेव नो ब्रह्मेत्यस्यासङ्गतिः स्पष्टैव । अत्र कार्यत्वमात्रं साध्यं न तु यद्भेदस्तत्कार्यत्वम् । तेन घटानां परस्परं कार्यत्वाभावे ऽपि परस्परं भेदव्यवहारोपपत्तिः । आरोपितघ-

र्भवति भेदो विकारत्वं चास्त्येव। रज्जूरगस्थले आरोपितोरगत्वेनैव रज्जुविकारत्वव्यवहारात्।

किञ्च,

सर्वशक्तिमयो ह्यात्मा शक्तिमण्डलताण्डवैः।
संसारं तन्निवृत्तिं च करोत्यविरतोदयम्"॥ इति-

स्मृतौ शक्तिमण्डलत्वेन मायोक्ता॥

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगद्"॥ इति-

श्रुतौ चाविद्यायाः सावयवत्वमुक्तम्। तेन जन्यत्वमावश्यकम् घटादिवत्। अस्यावयवेत्यत्र सन्धिरार्षः। यद्वा अस्य महेश्वरस्य, मायावयवानामेव च तदवयवत्वम् तद्विशिष्टस्यैव महेश्वरत्वात्। किञ्च सत्तास्फूर्त्यनुरोधेन तस्या ब्रह्मकार्यत्वमावश्यकम्। वासनासमूहरूपाविद्याया अपि योगिनां सत्त्वेन स्फूर्तिसत्त्वात्। किञ्च, चतुर्थपादस्याद्याधिकरणे "तद्धेदं तर्ह्यव्याकृतमासीद्" इति श्रुतेः "इदं व्याकृतं नामरूपं विभिन्नं जगत् प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थमित्यर्थं दर्शयित्वा "परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते। अर्थवती च सा। न तया विना परमेश्वरस्य स्रष्टृत्वं संभवति। शक्तिहीनस्य प्रवृत्त्यनुपपत्तेः। "अविद्यात्मिका हि सा बीजशक्तिः परमेश्वराश्रया" इति भाष्ये उक्तम्। तत्तत्कार्यबीजशक्तीनामानन्त्येऽपि बीजशक्तिरित्येकवचनं जात्यभिप्रायेण। अनेन

हि वासनानामेवाविद्यात्वं स्पष्टमेवोक्तम् । "प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणोऽविद्यया सर्वशक्तियोगः "सर्वज्ञं सर्वशक्तियोगं महामायं च तद्ब्रह्म" इत्यन्यत्रोक्तम् । अत्राविद्ययेत्यस्य पूर्वैतद्विधमिथ्याज्ञानजन्यवासनयेत्यर्थः । शक्तिसमूह एव च महामायेति बोध्यम् । एतेनाविद्याऽजन्या कश्चिद् भावपदार्थो वासनाश्रय इत्यपास्तम् । अतिरिक्ततत्कल्पने मानाभावात् । अत एव प्रपञ्चस्यैककारणकत्वप्रवादनिर्वाहः । स्वजन्यातिरिक्तसहकार्यनपेक्षत्वात् ॥८९॥

अत्र मानमाह *अत एवेति । तादृशस्य तस्यैव तत्त्वाङ्गीकारादेवेत्यर्थः । ननु जीवस्येश्वरांशत्वे जीवगतदुःखेन तस्यापि दुःखित्वापत्तिः पादादिगतदुःखेनाङ्गिनो दुःखित्ववदत आह *प्रकाशादीति । यथा जीवो दुःखी नैवं परमात्मा । यथा सौरश्चान्द्रो वा प्रकाशो नभो व्याप्य वर्तमानो वक्रकाष्ठाद्युपाधिकृतं वक्रभावमापन्नो ऽपि वस्तुतो न तत्त्ववान्, यथा वा घटादिषु गच्छत्सु गच्छन्निवाकाशो वस्तुतो न तथा तद्वदिति सूत्रार्थः । *मूलेति । अनादिभूतेत्यर्थः । *तत्सत्त्वात्—मूलप्रकृतित्वसत्त्वात् । तदर्थमेव तदङ्गीकारात् मम तु ब्रह्मण्येव तादृशे तत्त्वमिति । एतेन घटकतया तथाप्यापत्तिरेवेत्यपास्तम् । सामान्यरूपेणानुगतयोस्तयोः सहकारित्वेन तत्राप्यदोषाच्च । तयोर्निमित्तकारणत्वेनादोषाच्च । ननूक्तरीत्या तादृशकार्यत्वस्यैवासाध्यत्वे ऽपि प्रत्यासत्त्या विशेषकार्यस्य साध्यत्वस्य लाभात्संकोचावश्यकत्वमेवेति तथैवास्तामतआह *अत्रेति । तत्साध्यकानुमाने इत्यर्थः । *मात्रम्—कात्स्न्र्ये । साधकस्य तथैव सत्त्वात् । तत्फलं कथयन् तदेवाह *तेनेति । व्यक्तिभेदमादायेति भावः । ननु तेषां निर्धर्मकत्वेन कथं सोऽत आह *आरोपितेति । प्रपञ्चे इत्यर्थः । अन्यदप्याह *किञ्चेति । *अवीति संसारविशेषणम् । *मण्डलत्वेन—तत्समूहत्वेन । तथा च सावयवत्वं लब्धम् । स्पष्टं तद्बो-

धिकां श्रुतिमाह *मायामिति । *तेन—सावयवत्वेन । नन्वेवमस्या अवेत्युचितमत आह *अस्येति । एतद्दोषभियैवाह *यद्वेति । ननु न साऽवयवो ऽत आह * मायेति । तत् मायामायिनमित्युक्तेः । अन्यदप्याह *किञ्चेति । अविद्यायामिति शेषः । ननु तत्सत्त्वे एव न मानमत आह *वासनेति । अपिना स्थूलाविद्यापरिग्रहः । अन्यदप्याह *किञ्चेति । तस्यैवार्थमाह *विभिन्नामिति । अव्येत्यस्यार्थमाह *परीति । तत्स्वरूपमाह *बीजेति । नन्वधिष्ठानसत्त्वेऽपि फलाभावो ऽत आह *अर्थेति । फलवती चेत्यर्थः । तदेवाह *नतयेति । तन्नाम कथयन्नुपसंहरति *अविद्येति । *सा—प्रागवस्था । *अनेन—भाष्येण । ननु तस्य प्रागुक्तश्रुत्यादिभिः शुद्धत्वप्रतिपादनात्कथं तस्यास्तदाश्रयत्वमत आह *प्रतीति । सर्वशक्तीति महेति च बहुव्रीही । *अन्यत्र—भाष्यान्तरे । ननु तासामेवाविद्यात्वेन कथं भेदोक्तिरत आह *अवीति । ननु विशेषणद्वयेन भेदस्तयोः स्यादत आह *शक्तीति । तथा च व्याख्यानव्याख्येयभावस्तयोरिति भेद इति भावः । वेदान्तिमतं खण्डयति *एतेनेति । अस्यार्थमाह *अतीति । उक्तरीत्यैव तदुपपत्तेरिति भावः । *अत एव—अतिरिक्ततदभावादेव । ननु सिद्धान्ते ऽपि प्रपञ्चजनने तत्सहकारापेक्षणात्तद्भङ्ग एव अत आह *स्वजन्येति । सा च स्वकल्पितैव, मायालये इव तज्जनने ऽपि सहकार्यन्तरानपेक्षणात् । आविर्भावतिरोभावयोरेवोत्पत्तिविनाशपदार्थत्वात् ॥ ८९ ॥

यत्तु "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद्" इति सूत्रे भाष्ये च "ब्रह्मैवोपादानकारणं निमित्तकारणं च" इत्युक्तम् । तस्य स्वसमकक्षनिमित्तकारणाभावे तात्पर्यम् । इतो ऽपि अविद्यायां जन्यत्वमावश्यकम् । अन्यथा प्रतिज्ञादृष्टान्तोपरोधः स्यादेवेति बोध्यम् । अत एव विष्णुपुराणे—

प्रजापतिपतिं विष्णुमनन्तमपराजितम् ।
प्रधानपुंसोरजयोः कारणं कार्यभूतयोः ॥ इति—

स्मर्यते । अजयोरिति रूपकं स्वातन्त्र्यनिराकरणाय । तदूध्वननायैव कारणं कार्यभूतयोरित्युक्तम् । यद्वा, एतत्सृष्टौ तज्जन्मानुपलम्भादजत्वं, पूर्वकल्पान्ते जन्यत्वमादाय कार्यभूतयोरित्युक्तम् । "यत्तत्सूक्ष्ममविज्ञेयम्" इति प्रकृत्य "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति, "अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते" इति च भाष्योदाहृतस्मृत्यन्तरविरोधश्च । एतदुपबृंहणेन सूत्रस्वरसेन चोक्तजातीयश्रुतीनां मदुक्तव्याख्यैवोचिता । तदुक्तं चरके पतञ्जलिना—"आदिर्नास्त्यात्मनः क्षेत्रपारंपर्यमनादिकम्" इति । "प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च" इति प्रघट्टके गीतायां वासनासमूहरूपाविद्याया अव्यक्तशब्देन क्षेत्रत्वोक्तेः ॥ ९० ॥

नन्वेवं स्वजन्यसापेक्षत्वं लब्धं तच्च सूत्रभाष्योभयाविरुद्धमत आह *यस्त्विति । ब्रह्म प्रकृतिरुपादानं चकाराज्ञिमित्तकारणमिति प्रतिज्ञादृष्टान्तयोरनुपरोधात् अगौणार्थत्वात् । छान्दोग्ये "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इति प्रतिज्ञा, तदुपपादकदृष्टान्तः "सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयम्" इत्यादिः प्रागुक्तः । निमित्तस्योपादानाद्भेदे तदसङ्गतिः स्पष्टैवेत्यर्थः । इदमपि प्रकृतिसाधकमित्याह *इतोपीति । अस्मात्सूत्रात् भाष्यादपीत्यर्थः । *उपरोधः-असामञ्जस्यम् । *अत एव-तस्या जन्यत्वादेव । नन्वजयोः कार्यभूतयोरिति मिथो विरुद्धमत आह *अजयोरिति । सादृश्येन पराधीनत्वप्रतिपादनादाह *स्वातन्त्र्येति । नन्वेवं न पुष्टिरपरस्य, किञ्च वैपरीत्यमेवास्त्वत आह प्रागुक्तरीत्या *यद्वेति । तस्या अजन्यत्वे स्पष्टन्दोषान्तरमाह *यत्तदिति । तस्मादित्यस्यार्थसूचनायेदम् । उत्पत्तिवत् लयो ऽपि तत्रेत्याह *अव्यक्तमिति । अत्र स्पष्टमुत्पत्तिलयावुक्ताविति तत्त्वमेव सिद्धम्, तदाह *एतदिति ।

एतत्पोषणेनेत्यर्थः । *सूत्रेति । प्रकृतिश्चेत्यादिसूत्रेत्यर्थः । *उक्तेति । अजापदादिघटितानामित्यर्थः । "अजामेकाम्" इत्यत्रापि पूर्वार्द्धे इवोत्तरार्धेऽप्येवमेव जडत्वोपाधिविशिष्टस्यैव जीवत्वेनोपाधेश्च जन्यत्वेन विशिष्टे ईदृशाजन्यत्वस्यैव वाच्यत्वादिति भावः । तत्र संमतिमाह *तदुक्तमिति । तत्पारम्पर्यमनादि न तु तदिति परम्परानादित्वेनैवानादित्वं न स्वजन्यत्वरूपमित्यर्थः । आत्मातिरिक्तत्वेनाविद्याया अपि क्षेत्रत्वेन तत्रापि पारम्पर्यस्यैवानादित्वं युक्तम् उक्तयुक्तेरिति भावः । नन्वेवमपि क्षेत्रस्य तत्त्वं लब्धं न त्वाविद्याया अत आह *प्रकृतिमिति । *अव्यक्तेति । तदर्थकप्रतिशब्देनेत्यर्थः । प्रकृतिरूपं क्षेत्रं पुरुषरूपं क्षेत्रज्ञमिति तदर्थं तद्व्याख्यातारः ॥ ९० ॥

किं च ब्रह्माण्डपुराणे तस्या ब्रह्मणि लय उक्तः ।

स्थूलं विलाप्य करणे करणं निदाने
तत्कारणं करणकारणवर्जिते च ।
इत्थं विलाप्य यमिनः प्रविशन्ति यत्र
तं त्वां हरिं विमलबोधघनं नमामः ॥ इति ।

करणं महद् । निदानं प्रकृतिः । तत्कारणं प्रकृतिरूपकारणम् । करणकारणवर्जिते ब्रह्मणि । अनेनापि तदतिरिक्तस्य करणकारणसाहित्यं सूचितम् । विलाप्येत्यनेन समूलमुन्मूलनमुक्तं न तु प्रलये इवाविभागेनावस्थानम् । अत्र ब्रह्मणि लयोक्त्या तस्य तदुपादानत्वमुक्तम् । उपादानकारणे एव लयस्य "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इति श्रुत्या बोधनात् । "यस्य हि यत उत्पत्तिस्तस्य तत्र लयो न्याय्यो मृदीव शरावस्य । न च मनसो वायुत्पद्यते" इति शां-

करभाष्याच्च । किञ्च, अनुत्पत्तिकत्वे तस्या नाशानापत्तिः । तदुक्तं न्यायभाष्ये वात्स्यायनेन—"नचानुत्पत्तिधर्मकं किं चिद्व्ययधर्मकं प्रतिज्ञातुं शक्यम्" इति । प्रागभावस्यापि न नाशः । उत्पत्त्यनन्तरं तत्प्राक्कालाभावेन तद्व्यवहाराभावोपपत्तेः । एवं जीवानामप्युपाधिवैशिष्ट्येन जन्यत्वमावश्यकम् । अत एव श्रुतौ लोहस्थाग्नेर्विस्फुलिङ्गा इव जीवा इत्युक्तम् ।

परमार्थसारे ऽपि ।

"एकस्मात् क्षेत्रज्ञाद् बह्व्यः क्षेत्रज्ञजातयो जाताः ।
लोहस्थादिव दहनात्समंततो विस्फुलिङ्गकणाः" ॥

इत्युक्तम् । 'क्षेत्रोत्पत्तिरेव तदुत्पत्तिः' इति तद्व्याख्यातारः । विशेष्यांशमादाय तेषां नित्यत्वोक्तिरपि । किं बहुना घटादेरप्येवमेव जन्यत्वम् । तत्तदाकारादिविशिष्टब्रह्मण एव घटादित्वात् ॥ ९१ ॥

(क० टी०) अन्यदप्याह *किञ्चेति । *महद्-आदिप्रकृतिविकृतिरूपम् । *अनेनापि-करणेत्यादिनापि । *तत्-ब्रह्म । *प्रलये-तदादौ । स्वाशयमाह *अत्रेति । तत्रैव लये भाष्यसंमतिमप्याह *यस्यहीति । *न चेति । नहीत्यर्थः । तथाच न तस्यास्तत्र लय इति भावः । अन्यदप्याह *किञ्चेति । तस्या इत्यस्य मध्यमणिन्यायेनान्वयः । अविद्याया इति तदर्थः । व्ययो नाशः । नन्वेवं प्रागभावस्याजन्यस्य नाशस्यार्वाचीननैयायिकैरङ्गीकारात्तद्विरोधो भाष्यस्य अतो भाष्याशयमाह *प्रागिति । आकाशादिवत्तस्य नित्यत्वात् । नन्वेवं घटाद्युत्पत्तावपि तत्प्रतीत्यापत्तिरत आह *उत्पत्तीति । घटादीत्यादिः । *उपपत्तेरिति । अस्य 'इति तदाशयः' इति शेषः । प्रसङ्गादाह *एवमिति । अविद्यावदित्यर्थः । *अत एव-तेषां जन्यत्वादेव । अस्योभयत्राप्यन्वयः । जीवभेदो ऽप्येवमेवेत्याह *एकस्मादिति । यथा हन्यमानाल्लोहगताद्वन्हेः समंततः स-

मन्तदेशोपाधिका विस्फुलिङ्गाः कणाः पृथगिव जाता इव च भान्ति, तथा एकस्मात् क्षेत्रज्ञाद् अन्तर्यामिणः क्षेत्रज्ञजातयो ब्रह्मादिस्थावरान्ता जाता इव भान्तीत्यर्थः। "यथाऽग्नेः क्षुद्रा विस्फुलिङ्गाः स्फुरन्ति एवमेवैतस्मादात्मनः सर्व एवात्मानो व्युच्चरन्ति" इति श्रुतेः। श्रुतावपि इवेति शेषः। तदभिप्रेत्याह *क्षेत्रोत्पत्तिरिति। *तत्-श्रुतीत्यर्थः। अविरोधायाह *विशेष्यांशेति । *तेषाम्-जीवानाम् । उपसंहरन् सर्वत्रैवमित्याह *किं बह्विति। *एवमेव-उपाधिजन्यत्वेनैव ॥९१॥

तदुक्तं परमार्थसारे ।

"यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्वेषु ।
तद्वत्सकलोपाधिष्ववस्थितो भाति परमात्मा॥ इति।

भाति, विशेष्यतयेत्यर्थः। अत एव "द्रव्यं नित्यम्" इति महाभाष्ये उक्तमित्युपरिष्टाद्वक्ष्यामः। उपाधिसन्निवेशादिशब्दैश्च ब्रह्मैव । पूर्वपूर्ववासनावशात्परमात्मन एवोपाध्यादिरूपेण तद्वैशिष्ट्येन भानात् । अत एव "सर्वशब्दानां ब्रह्मैव वाच्यं वाचकं च" इति हरिणा सिद्धान्तितं संगच्छते । अत एव हिरण्यगर्भस्य कार्यब्रह्मेति व्यवहारः। तथा च "सामीप्यात्तु तद्व्यपदेशः" इति सूत्रे "ब्रह्मसामीप्यादपरब्रह्मण्यपि ब्रह्मशब्दः, कार्यमेव हि ब्रह्म विशुद्धोपाधिसंबद्धं क्वचित्कैश्चिद्विकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमिति स्थितिः" इति भाष्ये उक्तम्। अविद्याया जन्यत्वादेव "सर्वं खल्विदं ब्रह्म तज्जलान्" इतिश्रुतिर्द्वन्द्वगर्भा ब्रह्मातिरिक्तसर्वत्वावच्छिन्नविषये एकरूपा भवति ।

विष्णुपुराणेऽपि ।

ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते ।
ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परम् ॥
विद्याविद्ये च मैत्रेय ज्ञानमेवोपधारय । इति ।

निरुपाधिब्रह्मैव विद्या, सोपाधि तदेवाविद्येति । तदुक्तमाचार्यैः "द्विरूपं हि ब्रह्मावगम्यते नामरूपविकारभेदोपाधिविशिष्टं तद्विपरीतं च सर्वोपाधिविवर्जितम्" इति । अत्रावगम्यते इत्युक्त्या व्यवहारमात्रे ब्रह्मणो विशेष्यत्वमुक्तम् । अन्त्यं तु योगिभिः समाधावववगम्यत इति बोध्यम् ॥ ९२ ॥

(क० टी०) अत्रमानमाह *तदुक्तमिति । ननु लोके सुखादिवैचित्र्यादनुभवसिद्धमात्मनानात्वम्, गौतमादितन्त्रेषु च तथैवोक्तं तत्कथं सर्वगतमेकं ब्रह्म तदेवात्मनेत्युक्तमित्याशङ्क्य तन्नानात्वमपि भ्रम एवौपाधिकं चेत्याह *यद्वदिति । यथा एक एवाकाशस्थो दिनकरस्तत्तज्जलेषु प्रतिहतचक्षुषा उपाधिभेदात्पूर्ववासनावशाच्च नानात्वेन गृह्यते तद्वत्सकलोपाधिष्ववस्थित एक एवात्मा नानात्वेन भातीत्यर्थः । अत एव सुखादिवैचित्र्यमुपपन्नम् ।

"यथा स्वयंज्योतिरात्मा विवस्वानपो ऽभिन्नो बहुधैको ऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो ऽयमात्मा" ॥

इति श्रुतेः ।

"यथा भिन्नजलेष्वेक आदित्यो भासते पृथक् ।
एक आत्मा शरीरेषु भिन्नवद्भासते तथा" ॥ इति—

व्यासस्मृतेश्च । तदाह *भातीति । *अत एव—तस्य विशेष्यतया सर्वत्र भानादेव । *उक्तम्—सिद्धेशब्देतिवार्त्तिकव्याख्यावसरे । *उपरिष्टात्—अत्रैव जातिस्फोटनिष्कर्षप्रस्तावे । ननु तत्तदाकारादिरूपोपाध्यादेस्ततो भेदलाभेन द्वैतापत्तिरत आह *उपेति । श्रुत्यादिस्थैरिति शेषः । उच्यत इति शेषः । नन्वेवं तस्य नित्यत्वापत्तिरत आह *पूर्वेति । तथा च तत्कृतमेव तस्य द्वैविध्यमिति तस्य न तत्त्वमिति

भावः । *अत एव-सर्वबोध्यत्वस्य ब्रह्मण्येव सत्त्वादेव । *अत एव-विशेषणांशमादाय तस्य जन्यत्वादेव । कुत्रासौ अत आह *तथाचेति । तदभिप्रेत्यैव चेत्यर्थः । ननु नपुंसकब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वात्कथमपरस्मिन्प्रयोगो ऽत आह *सामीप्यादिति । तुः शङ्कानिरासे । परमेव ब्रह्म सत्यकामत्वादिगुणयुक्तं कार्यब्रह्मेत्युच्यते । तथा च तत्सामीप्यात्तद्व्यपदेशः, मुख्यासम्भवाल्लक्षणया" प्रयोग इत्यर्थः । *ब्रह्मेति । परेत्यादिः । किं तदपरमित्यत आह *कार्यमेवेति । शुद्धस्योपासनासम्भवात् सर्वस्य ब्रह्मरूपत्वे प्रमाणभूतश्रुत्या अविद्याया जन्यत्वमपि बोधितमित्याह *अविद्याया इति । अत्र सर्वमिति प्रकृतिसाधकं, तज्जेति तत्साधकम् । जं च लं च अन् च जलान् तस्य जलान् । ततो जातं तेन जीवितं तत्र लीनमित्यर्थः । तदाह *द्वन्द्वेति । अन्यथाऽविद्यान्यविषयतया सङ्कोचनीया स्यादिति भावः । तस्य सर्वत्र विशेष्यत्वे मानान्तरमप्याह *विष्णुपुराणे ऽपीति । स्वाशयमाह *निरुपेति । एवमर्थे मानमाह *अत्रेति । अन्येषामनधिकारादाह *अन्त्यमिति ॥ ९२ ॥

परमार्थसारे ऽपि—

विज्ञानान्तर्यामिप्राणविराड्देहजातिपिण्डान्ताः ।
व्यवहारस्थस्यात्मन एते ऽवस्थाविशेषाः स्युः ॥ इति ।

यद्यपि विज्ञानं ब्रह्मैव तथापि नामवैशिष्ट्येनावस्थावत्त्वमुक्तम् । विपरीतं ज्ञानं मायापि विज्ञानमत्र । एते विज्ञानादय आत्मनो भ्रमरूपाः प्रतिभासमात्रविषया अवस्था इत्यर्थः । अनेन सर्वोपाधीनां तद्विशेष्याणां च ब्रह्मरूपत्वमुक्तम् । तदप्युक्तं तत्रैव—

रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन ।
तद्वद्द्वैतविकल्पभ्रान्तिराविद्या न सत्यमिदम् ॥ इति

तदुत्तरार्यया । इदं विज्ञानादि अविद्या वासना-

रूपाविद्यामूलकम्। वासनारूपसूक्ष्मोपाधिवैशिष्ट्येनापि ब्रह्मभानं मननादिपरिपाकवतामस्त्येव। अविद्यायाश्चाध्यासिकसम्बन्धेन परमात्मैवाश्रयस्तवातिरिक्ताविद्याया इव। तदप्युक्तं तत्रैव "त्रिगुणा चैतन्यात्मनि" इति पूर्वोक्तार्यया। भ्रमाधिष्ठानत्वमेव तद्विशेष्यत्वरूपविवर्तोपादानत्वम्। अत एव रज्जौ भुजङ्गो जात इत्यप्रत्ययः। रज्जौ भुजङ्गभ्रमो जात इत्येव च प्रत्ययः। अनादिनिधनं ब्रह्मेत्याद्यश्लोके हरिग्रन्थेऽपि स्पष्टमेतत्, "तत्त्वादप्रच्युतस्य वस्तुनो भेदानुकारेणासत्याविभक्तान्यरूपोपग्राहिता विवर्त्तः स्वप्नविषयप्रतिभासवद्" इत्यादिना। "तत्त्वात्, स्वस्वरूपाद्। असत्यं वस्तुनो बाहिरसत्त्वात्। अविभक्तम्, तदधिष्ठानेन। अन्यद्, वैधर्म्योपलम्भात्। तादृशरूपोपग्राहिता, तद्रूपप्रकारकज्ञानविशेष्यता। तदाह-स्वप्नविषयेति" इति तद्व्याख्यातारः। पयसो दधि तु न विवर्त्तः। तत्त्वात्प्रच्युतेः। स्वर्णादेः कुण्डलादि तु विवर्त एव ॥ ९३ ॥

(क० टी०) अत्र मानान्तरमप्याह *परेति। तान् अवस्थाभेदानेवाह *विज्ञानेति। *ब्रह्मैव-शुद्धं ब्रह्मैव। "विज्ञानं ब्रह्म" इति श्रुतेः। एवेन तस्यावस्थावत्त्वनिरासः। *नामेति। विज्ञानपदवत्त्वेन सोऽप्यवस्थाविशेष इत्यर्थः। *विपरीतमिति। ज्ञानविरोधीत्यर्थः। *माया-अविद्या। *अपिः पूर्वसमुच्चये। *अन्तर्यामी-शुद्धसत्त्वगुणमायारूपाविद्योपाधिः। "एष ते आत्मान्तर्याम्यमृत" इति श्रुतेः। *प्राणः-गुणत्रयोपाधिको ब्रह्मविष्णुरुद्रसंज्ञः उत्पत्तिस्थितिसंहारकृत्। यद्वा प्राणः सूत्रात्मा लिङ्गशरीरसमष्ट्यभिमानी हिरण्यगर्भः। "वायुर्वै गौतम तत्सूत्रम्" इतिश्रुतेः।

प्राणस्तु प्रणवे ज्ञेयो जीविते परमात्मनि।

इन्द्रिये वायुभेदे च बलान्तर्यामिनोरपि ॥ इति-

कोशाच्च । स्थूलशरीरसमष्ट्यात्मको विराट् देहस्तत्राभिव्यक्तः "सहस्रशीर्षा" इत्यादिश्रुतिप्रतिपाद्यः । *-जातिः-देवत्वादिस्थावरान्ता । *पिण्डाः समष्टिव्यष्टिदेहास्तत्राभिव्यक्ता विश्वशब्दवाच्या जीवास्तदुपाधयश्च ।

अन्तो व्यवस्थिते मृत्यौ स्वभावे निश्चये ऽन्तिके इति ।

*आत्मनइति । व्यवहारस्थस्येत्यादिः । व्यवहारकालिकस्येति तदर्थः । विशेषपदार्थमाह *भ्रमेति । तस्य व्याख्या *प्रतीति । रज्जुसर्पवत् भ्रमात्मकप्रतीतिमात्रसिद्धा इत्यर्थः ।

तदुक्तं विष्णुपुराणे—

देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम् ॥ इति ।
ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ इति च ।

स्वाशयमाह *अनेनेति । नन्वेते कुतो भ्रमरूपा अत्र तथा ऽनुक्तेरतआह *तदपीति । तेषां भ्रमरूपत्वमपीत्यर्थः । *तत्रैव-परमार्थसारे एव । व्याख्यातमिदम् । पूर्वपरामर्शादाह *विज्ञानेति । आदिना अन्तर्याम्यादि । स्थूलाया इदमा परामर्शादाह *वासनेति । ननु लोके स्वर्णपदार्थमजानतां कुण्डले स्वर्णत्वज्ञानाभाववद् अस्माकं तदभावात्कथं सूक्ष्मोपाधिवैशिष्ट्येन तद्भानमत आह *वासनेति । अपिना स्थूलोपाधिः । आदिना श्रवणम् । मृद्विवेकज्ञानवतामपि घटादिव्यवहारवत् । एवं चान्येषामभावे ऽपि न क्षतिः । रज्जुसर्पज्ञानवत् स्वस्य प्रपञ्चज्ञानं जानीते इत्यन्यत् । ननु सा चेन्नातिरिक्ता तर्हि को वासनाश्रयः । आत्मा तु न, असम्बन्धाद् अत आह *अविद्यायाश्चेति । इदं तवाप्यावश्यकमित्याह *तवेति । *तदपि—तस्यैव तदाश्रयत्वमपि । *तत्रैव-परमार्थसार एव । व्याख्यातमिदम् । नचैवं रज्ज्वा भुजङ्गविवर्त्तोपादानत्ववत् ब्रह्मणः प्रपञ्चविवर्तोपादानत्वं न स्यात् । अनिर्वचनीयानुत्पत्तावतात्त्विकान्यथाभावाद् अत आह *भ्रमेति । तद्भ्रमरूपविवर्तोपेति समस्तः पाठः । विवर्तस्य तद्रूपत्वात् दृष्टान्तेऽपि तथैवेत्याह *अतएवेति । ई-

दृशस्य तस्याङ्गीकारादेवेत्यर्थः । *प्रत्यय इति । किञ्च रज्जुतत्त्वज्ञानोत्तरं न कदाचिदपि सर्पपदप्रयोगबुद्धी, प्रकृते तु तत्त्वज्ञस्यापि तद्व्यवहारबुद्धी अनुवर्तेते इति वैषम्यम् । एतेन रज्जुर्भुजङ्गस्य विवर्तोपादानमिति निरस्तम् । दोषत्रयात् । कुण्डलप्रतीतिकाले स्वर्णत्वप्रतीत्यप्रच्यववत् भुजङ्गप्रतीतिकाले रज्जुत्वप्रतीत्यप्रच्यवाभावेन तत्त्वस्यायुक्तत्वाच्च । इदं चानुपदमेवोक्तम् । *एतत्—तस्य विवर्तोपादानत्वम् । *तादृशमेवेति । ननु कथं स्पष्टमतस्तद्ग्रन्थमाह *तत्त्वादिति । आदिना मूर्त्तिक्रियाविवर्तौ शक्तिमात्रगतौ विद्याऽऽत्मनि तत्त्वातत्त्वाभ्यामनाख्येयौ । एतद्धि तदविद्याया अविद्यात्वम् । ब्रह्म च सर्वपरिकल्पनाहीनं भेदसंसर्गसमतिक्रमेण सर्वाभिः शक्तिभिः समाविष्टं व्यवहारानुपातिधर्मैः सर्वावस्थास्वनाश्रिताविद्याविद्याप्रविभागरूपं चेत्यस्य परिग्रहः । *बहिरिति । अनेन करणापेक्षयाऽसत्यत्वबोधनद्वारा कारणसत्तापेक्षयाऽल्पसत्ताकत्वस्य कार्ये बोधनद्वारा कारणासमसत्ताकोऽन्यथाभावो विवर्त इत्यपि सूचितम् । मायासत्ताया ज्ञानपर्यन्तत्वेन कार्यसत्तायाश्च मध्यप्रलयेष्वभावेन लक्षणसङ्गतिः । तत्त्वादित्यादेः फलमाह *पयस इति । तदभावादेवाह* स्वर्णादेरिति । मायाया अपि दुग्धस्य दधिभावेनेव न प्रपञ्चरूपः परिणामः किन्तु स्वर्णस्य कुण्डलरूपेणेव । एवंविध एव परिणामो विवर्तपदवाच्यः । अत एव प्रलये पुनरविद्यारूपेण सर्वावस्थानम् । यदि दधिवत् परिणमेत्तदा तस्य पुनर्दुग्धरूपत्ववत् प्रपञ्चस्य मायारूपेणावस्थानं भजेत् । तस्यां यत्संस्काररूपेणावस्थानं तदेव ब्रह्मणि सर्वलयत्वेन व्यवाह्रियत इति बोध्यम् ॥ ९३ ॥

तदुक्तं परमार्थसारे—

यद्वद्देहो ऽवयवा मृदेव पार्थो विकारजातयश्च ।
तद्वत्स्थावरजङ्गममद्वैतं द्वैतवद्भाति ॥ इति ।

अवयवातिरिक्तो ऽवयवी यथा असन्, मृद्विकाराश्च यथाऽसन्तो भान्ति तथा नामरूपवत्त्वमसदेव भातीति तदर्थः । द्वैतशब्देन च द्वाभ्यां प्रकाराभ्या-

मितं ज्ञातं द्वीतं तस्य भावो द्वैतामिति व्युत्पत्त्या नामरूपे उच्येते । तद्राहितं चाद्वैतशब्देन । एवं च द्वैतशब्देन प्रपञ्चस्योक्तिरेव नाम्नः प्रकारत्वे मानमित्यपि बोध्यम् । श्रुतिरपि "विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति । नाममात्रं व्यवहारमात्रं न तु तन्त्रान्तरेष्विव वस्त्वस्तीति तदर्थः । चेतनसन्निधानमात्रेण देहेन्द्रियमनःसु क्रियादर्शनात् । तस्य प्रेरकत्वादि आरोपितमेव, जनकत्वादि च । तदुक्तं भाष्ये "जीवेश्वरयोरैक्यात्प्रवर्त्यप्रवर्त्तकत्वमनुपपन्नम् । न । अविद्याप्रत्युपस्थापितनामरूपमायावशेन तदुपपत्तेः"। अविद्या संस्काररूपा । माया स्थूलरूपा । न च सन्निधानमात्रेण प्रवर्त्तकत्वे सन्निधिनित्यत्वात्प्रवृत्तिनित्यत्वप्रसङ्ग इति वाच्यम् । सन्निधिनित्यत्वेऽपि मायिकत्वेन परिहारादिति ।

"न तु दृष्टान्तभावाद्" इति सूत्रे ऽपि भाष्ये उक्तम् "यथा स्वयं प्रसारितमायया मायावी कदापि न संस्पृश्यतेऽवस्तुत्वाद् एवं परमात्माऽपि संसारमायया न संस्पृश्यते । मायामात्रं ह्येतद् यत् परमात्मनोऽवस्थात्रयात्मनाऽवभासनं रज्ज्वा इव सर्पादिभावेन" इति । अत्रावस्थात्रयेत्युपलक्षणम् । अनेन हि सर्वस्य जनकत्वादेरवभास एव, न वस्तु किञ्चिदस्तीति स्पष्टमेवोक्तम् । अनादिवासनावशाद् भ्रमविषयमेव तद् "यतो वा"इत्यादिश्रुतयो ऽनुवदन्ति । "यतो वा" इति श्रुत्या सर्वस्य जनकत्वपालकत्वलयस्थानत्वैस्तादृशैरेव ब्रह्मणस्तटस्थलक्षणं बोध्यते । कालत्रयसत्ताप्र-

तिपादनेन तद्बोधितकालत्रयाबाध्यत्वरूपं स्वरूपलक्षणमपि बोध्यते । "सत्यं ज्ञानम्" "आनन्दम्" इत्यादिश्रुतयो ऽपि शुद्धचित्तं प्रति "नेह नानास्ति" इत्यादिश्रुतिसहकारेण धर्मत्यागेनाद्वैतं शुद्धं ब्रह्म बोधयन्ति । कणादादयो ऽपि मायिकत्वेन मिथ्याभूतत्वेन ब्रह्मरूपत्वेन च स्वज्ञातस्य प्रपञ्चस्य बोधनीयशिष्याधिकारानुसारेण मायिकत्वाद्यपलप्य ब्रह्मरूपत्वेन ज्ञातपरमाण्वादिभ्यः सृष्टिम्, समवायादीनां पदार्थत्वं चातीन्द्रियदृशा ज्ञात्वोक्तवन्तः, तत्र तदुक्तपदार्थानां शुष्कतर्कबलेनान्यथाकरणं तेषां खण्डनं चायुक्तमेव। असत्सु भासमानेष्वर्थेषु ऋष्यनुसारेणैव कल्पनाया औचित्यात् ॥ ९४ ॥

(क०टी०) हर्युक्तौ मानमाह *तदुक्तमिति । असत्यादिरूपप्रकारकज्ञानविशेष्यत्वमित्यर्थः । मायेत्यनेन देहादेरसत्त्वमेव प्रतिभासशरीरस्योक्तम् । तदेव दृष्टान्तेन द्रढयति *यद्वदिति । देहोऽवयवातिरिक्तो नास्त्येव, अवयव एव स तदतिरिक्तो व्यवह्रियते प्रतिभासते च । यथा च पार्थाः—पृथुशब्दः पृथिवीवाची, तत्सम्बन्धिनो विकाराः मृदेव नातिरिक्ताः सन्ति प्रतिभासन्ते व्यवह्रियन्ते च तद्वत् स्थावरजङ्गममद्वैतं ब्रह्मैव न ततो भिन्नं, परं तु द्वैतवन्नामरूपवद्भातीत्यर्थः । नतु तत् सत्यमिति भावः । "वाचारम्भणं" इतिश्रुतेः । "ज्ञानस्वरूपम" इतिस्मृतेश्च । तदाह *अवयवेति । भातीति शेषः । ननु कथं द्वैतशब्देन नामरूपलाभादि अत आह *द्वैतेति । ननु लोके ऽर्थस्यैव भानविषयतया प्रसिद्धत्वेन तस्य अस्तु प्रकारत्वम्, शब्दस्य तु कथम् अत आह *एवं चेति । तथा तस्य व्युत्पत्तौ चेत्यर्थः । तदसत्यत्वे श्रुतिरपि मानमित्याह *श्रुतिरपीति । ननु ब्रह्मणो निष्क्रियत्वेन "पृथग् आत्मानं प्रेरितारं च मत्वा" इति "भोक्ता" इति च प्रागुक्तश्रुत्यादौ कथमात्मनः प्रेरकत्वादिव्यवहारो ऽत आह *चेतनेति । मात्रपदेन तत्र क्रियाव्यवच्छेदः । अत्र मानमाह *तदुक्तमिति । तयोर्भिन्नाधिकरणत्वात्तयोरैक्या-

त्त्वमनुपपन्नमिति यत् तन्नेत्यर्थः । उभयोक्तेर्भेदमाह *अविद्येति । तथा च तयोर्भेदेन तयोर्भेदात्तत्त्वोपपत्तिरिति भावः । *नित्यत्वेति । तथा च प्रलयो न स्यादिति भावः । *मायिकत्वेनेति । तत एव तस्य तत्त्वेन कदाचिद्विभागेनाप्यवस्थानमिति नोक्तदोष इत्यर्थः । अनेन प्रेरकत्वं तस्य तादृशं स्पष्टमेवोक्तम् । जनकत्वादि तादृशमित्यत्रापि संमतिमाह *न तु दृष्टान्तेति । 'सूत्रे ऽपि भाष्ये उक्तम्' इति पाठः । परिणामदृष्टान्तमुक्त्वा विवर्तदृष्टान्तमाह *यथेति । *कदापि–कालत्रयेऽपि । *अवस्थेति । अनादिमाययेतिप्रागुक्तजगज्जन्मास्थितिलयरूपावस्थात्रयेत्यर्थः । न्यूनतां निराचष्टे *अत्रेति । तेनावशिष्टभावविकारपरिग्रहः । स्वाशयमाह *अनेनेति । भाष्येणेत्यर्थः । नन्वेवं श्रुतिविरोधस्तया हि ब्रह्मणि वास्तवजनकत्वादिप्रतिपादनादत आह *अनादीति । निदिध्यासनपरिपाकवता ज्ञातं ब्रह्मणि तद् भ्रमस्वरूपमेव जनकत्वादि अन्यस्य वैराग्यसिद्धये ता अनुवदन्तीत्यर्थः । प्रसङ्गादाह *यतो वेतीति । अस्य बोधद्वयेऽन्वयः । *तादृशैरेव–भ्रमरूपैरेव । *तटस्थेति । ज्ञेयतानवच्छेदकं सद् यद् इतरव्यावृत्तिबुद्धिजनकं तत् तटस्थलक्षणम् । यथा शाखोर्द्धदेशत्वं चन्द्रस्य, काकवत्त्वं च देवदत्तगृहस्य । नहि तत्र तेन रूपेण ज्ञेयता विवक्षिता प्रष्टुः । तच्चात्र सर्वोपादानत्वम् । ज्ञेयतावच्छेदकं सद्यद् इतरव्यावृत्तिबुद्धिजनकं तत् स्वरूपलक्षणम् । यथा सत्यज्ञानत्वादि । यद्यपि निर्धर्मके ब्रह्मणि तदपि श्रुतिकल्पितमेव, तथापि तस्य श्रवणमननपरिपाके मिथ्यात्वनिश्चये ऽपि प्राक् तदभावेन तेन रूपेण ज्ञेयत्वाक्षतिः । अन्यस्य तु श्रवणमात्रेण तत्त्वनिश्चय इति विशेषस्तदाह *कालेति । तथैवेति भावः । *तद्बोधितेति । कालत्रयसत्ताबोधितेत्यर्थः । अन्यदपि प्रसङ्गादाह *सत्यमिति । "आनन्दम्" इतिश्रुत्यन्तरम् । शुद्धमिति श्रवणमननपरिपाकेन तस्य मिथ्यात्वनिश्चये निर्धर्मकस्याखण्डस्यैतच्छ्रुतितात्पर्यविषयस्य निदिध्यासनाविषयतेति भावः । कणादादितात्पर्यविषयभूतमपीदमेवेत्येकवाक्यतैवेत्याह *कणादेति । आदिना गौतमादयः । आदिना मिथ्याभूतत्वादि । परमाण्वादेर्नित्यत्वायाह *ब्रह्मेति । आदिना तन्मात्रादयः । अन्येषां तत्त्वस्य सर्वसाधारणत्वात्तेषां तत्त्वस्य तैरेवाङ्गीकारादाह *समेति । आदिना विशेषादयः । प्रसिद्धत्वाद्धि

अस्योक्तिः । *तत्र-तथा सति । श्रुत्यादिविरुद्धत्वं शुष्कत्वम् । तत्रत्यस्यार्थं सूचयन्नाह *असत्स्विति । विषयसप्तमी ॥ ९४ ॥

तदुक्तं परमार्थसारे ॥

यद्यत्सिद्धान्तागमतर्कादिषु भ्रमन्ति रागान्धाः ।
अनुमोदामस्तत्तत्तेषां सर्वात्मवादधिया ॥ इति ।

सिद्धान्तप्रतिपादकेषु पाञ्चरात्राद्यागमादिषु भ्रमन्ति 'अयमेव सिद्धान्तः समीचीनः' इति भ्रमन्ति चित्तस्वास्थ्यं च न लभन्ते । तत्तत् तेषां मतं 'सर्वमात्मा' इति वादे या धीस्तया ऽनुमोदाम इति तदर्थः । नचैवंरीत्या सर्वस्य चेतनत्वे सर्वत्र चेतनकार्यं कुतो नेति वाच्यम् । चेतनसन्निधानेन तत्तत्कार्ये जननीये सेन्द्रियद्रव्यस्य कारणत्वात् । तदुक्तं चरके पतञ्जलिना "सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनम्" इति । अत्र ग्रन्थे अग्रे पश्चात्कचिदाधुनिकग्रन्थानुसारेणास्ति लिखितमिति न पूर्वापरविरोधो ऽत्रेत्यलं प्रसक्तानुप्रसक्त्या । प्रकृतमनुसरामः ॥ ९५ ॥

(क०टी०)अत्र मानमाह *तदुक्तमिति । ननु "ब्रह्मैकत्वविज्ञानं मोक्षसाधनम्" इति भगवान्पतञ्जलिः, "प्रकृतिपुरुषविज्ञानं तथा" इति साङ्ख्यः, "ईश्वराभिन्नात्मज्ञानाद्" इति योगगौतमादयः । किञ्च 'ब्रह्मैव सर्वजगत्कारणम्' इति आद्यः, 'प्रकृतेः' इति सांख्ययोगौ, 'परमाणुभ्य' इत्यन्ये । तत्र किम्मतमुपादेयमित्यत्राह *यद्यदिति । *सिद्धान्तेषु—सिद्धान्तवद्भासमानेषु । *आगमः—पाञ्चरात्रादिः । *तर्कादयः—न्यायकाणादसांख्ययोगपूर्वमीमांसाः । तेषु भ्रमपरिगृहीतभेदादिप्रतिपादकेषु शास्त्रेषु प्रतिपादितार्थेषु यद्यत् प्रति यद्यदर्थविषये जगत्कारणमुक्तप्रकारेषु तत्तच्छास्त्रोक्तेषु यथाश्रुतेष्वर्थेषु रागान्धा जना भ्रमन्ति 'इदं मतं समीचीनम्' इति भ्रमन्ति । चित्तस्वास्थ्यं च न लभन्ते रागान्धत्वादेव । वयं तु तेषां तत्त-

न्मतं "सर्वमात्मैव" इति ये वदन्ति तेषां ज्ञानेनानुमोदाम इत्यर्थः । सर्वस्यात्मरूपत्वेन जगत्कारणमात्मैव, प्रकृतिपुरुषविज्ञानाद्यपि आत्मज्ञानमेव। स्थूलारुन्धतीन्यायेन परंपरया ब्रह्मप्रतिपादकत्वाद्वाऽनुमोदाम इति भावः । "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतिः,

रागान्धा हि जनाः सर्वे न पश्यन्ति हिताहितम् ।
तस्माद्रागं न कुर्वीत यदीच्छेदात्मनो हितम् ॥ इति ।
वेदे रामायणे चैतद्भारते च विशेषतः ।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ॥ इति च—

स्मृतिः । येन सकलपुराणशास्त्राणि गृह्यन्त इति तदाह *सिद्धान्तेति । *एवंरीत्या-उक्तप्रकारेण । *सर्वत्र-घटादावपि । कारणसत्तायाः कार्याव्यभिचारित्वादिति भावः । तत्र मानमाह *तदुक्तमिति । *सेन्द्रियमिति । अन्यथा प्रागुक्तरीत्या सर्वस्यापि चेतनत्वेनैतदसङ्गतिः स्पष्टैवेति तदेव तात्पर्यमस्येति भावः ।

नन्वत्र द्रव्यस्य नित्यत्वमुक्तम् अग्रे चानित्यत्वं वक्ष्यमाणमिति मिथो विरोधः । एवमत्र ब्रह्मण एव सर्वसृष्टिरुक्ता पूर्वं तु बिन्दोरिति तथाऽत आह *अत्रेति । *पश्चात्-पश्चादपि । *अस्तीति । वर्त्तमानसामीप्ये लट् । *लिखितमिति भावे क्तः । तथा च मतभेदाशयकत्वान्न विरोधः । उपसंहरति *इत्यलमिति । *प्रकृतम्-अन्तस्थस्यैव बाह्यरूपेणोक्तप्रनाड्या भानमित्येतत् ॥ ९५ ॥

चित्तस्य विषयाकारपरिणाम[१]रूपा वृत्तिश्च इन्द्रियेण सहैव। अत एव रसनेन्द्रियगतपित्तान्वयेन गुडः कटुरिति, नयनगतपित्तान्वयेन च शङ्खः पीत इत्याद्युपपद्यते । सा च भ्रमप्रमोभयरूपा पुरुषे प्रतिबिम्बते इति पुंसो विद्यमानवृत्तिग्राहकत्वम् । प्रतिबिम्बो ऽत्र[२] बुद्धेः परि-

१ 'रूपा वृत्तिः' इति पाठः कुञ्जिकाटीकापुस्तकद्वितये मूले नोपलभ्यते ।

२ ऽत्र 'पुरुषस्य तदवच्छेद्यत्वमेव' ननु । इति पाठः कसञ्ज्ञके मूलपुस्तके ।

णामविशेष एव न त्वादर्शादाविव प्रतिबिम्ब उभयो-रपि नीरूपत्वादान्तरत्वाच्चेत्यन्यत्र निरूपितम् ॥९६॥

(कुं.टी.)*इन्द्रियेण सहैव—इन्द्रियसाहितस्यैव । तेनेन्द्रियदोषसा-हित्याच्चित्तस्य सदोषस्यैव परिणामः । यत्तु[1] दोषविशेषाजन्यज्ञानं प्रत्येव बाधज्ञानं प्रतिबन्धकमिति । तन्न । पित्ततारतम्येन पीतत्व-तारतम्यस्यानुभवसिद्धतया पित्तस्यैव हेतुत्वावश्यकत्वात् । ननु पीतशङ्खाभावात्कथं तद्रूपा वृत्तिरित्यत आह *सा चेति । सा च वृत्तिश्च । नन्विदंवृत्तेः रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे विशि-ष्टज्ञानत्वाभावाद्भ्रमत्वासिद्धिरत आह *भ्रमप्रमेति । शङ्खांशे प्रमा पीतत्वांशे भ्रमः । वृत्तिद्वयप्रतिबिम्बितचैतन्यस्यैकस्य सत्यमि-थ्यावस्तुतादात्म्यावगाहित्वेनैव भ्रमत्वप्रवाद इति भावः । [2]प्रतिबिम्बत इति । अयं भावः—बुद्धिपुरुषयोस्सम्बन्धो नाम भो-ग्यभोक्तृभावरूपः सन्निधिः । नहि व्यापकयोर्नित्ययोश्च त-योरन्यः सम्बन्धोऽस्ति । अयमेव छायापत्तिशब्देन प्रतिबिम्ब-शब्देन चोच्यते । *वृत्तिग्राहकत्वमिति । वृत्तिप्रकाशकत्व-म् । [3]नहि स्वयमप्रकाशिता बुद्धिः परं प्रकाशयितुमर्हति । सातु न स्वप्रकाशा द्रष्टृत्वदृश्यत्वयोर्विरोधात् । *परिणामविशे-ष इति । परिणामस्य प्रतिबिम्बनं नाम पुरुषोपरागः । आ[4]-त्मनो ज्ञानात्मकत्वात्पुरुषे प्रतिबिम्ब उक्तपरिणामविशेषः अ-भिमानात्मकः साक्षिभास्यः । अस्मादेव प्रतिबिम्बरूपादो-

---

१ 'यत्तु–त्वात्' अयं पाठः कुं. टी. पु. खसञ्ज्ञके नास्ति ।
२ प्रति–च्यते पाठोऽयं कुं. टी. कपु. नास्ति ।
३ 'नहि–रागः' कुं. टी. कपु. नास्ति ।
४ आत्म–दिः कुं. टी. खपु. नास्ति ।

चाञ्चित्तपुरुषयोरेकताभ्रमः 'अहं सुखी' 'पश्यामि' इत्यादिः । साङ्ख्यादिमतं निराकरोति *नत्विति। *आदर्शादाविति । तत्र हि प्रतिहतचक्षुर्ग्राह्यत्वं प्रातिबिम्बत्वम् । आदर्शो दर्पणम् । तत्र हि मुखच्छायासादृश्याच्छायान्तरोद्भवो भवति । *उभयोः- बुद्धिपुरुषयोः । *नीरूपत्वादिति । समलस्य हि पदार्थस्य निर्मले प्रतिबिम्बो भवति दर्पणे मुखस्येव.॥ ९६ ॥

(क० टी०) तदेवाह- *चित्तस्येति । *अत एव-तत्सहितस्यैव तदङ्गीकारादेव । अन्यथा चित्तस्य शङ्खपीतत्वाद्याकारतायां मानाभावेन तदनुपपत्तिः स्पष्टैव । एतावतैव चक्षुरादीनां करणत्वव्यवहारः । यद्यपि ज्ञानोत्पत्तिप्रक्रिया ऽत्र शास्त्रे च सूत्रकृदाद्यनुक्ता, वेदान्तशास्त्रेच सूत्रकृदनुक्ता तथापि योगसूत्रभाष्ये वेदान्तसूत्रकृदुक्तत्वात्सैवात्रापि तत्रैव बाध्येति ध्वनयन् तामाह *साचेति । वृत्तिरित्यर्थः । विषयेन्द्रियसंयोगेन क्षारेण वस्त्रमालिन्यस्येव बौद्धतमसो ऽपसारणे निर्मले वाससि कुसुम्भयोगात्तद्वर्णतेव निर्मले बुद्धिसत्त्वे विषयाकारता भवति सैव बुद्ध्यवस्था वृत्तिरित्युच्यते । सा च प्रमाणम्, अनुभवाख्यफलायोगव्यवच्छिन्नत्वादिति भावः । चिज्जडांशभेदेनाह *भ्रमेति । *पुरुष विषयावच्छिन्ने इति । एतावतैव स्वसम्बद्धां विषयोपरक्तां बुद्धिवृत्तिं चेतनो ऽवभासयतीत्यर्थः । तथा च योगसूत्रं "सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोग" इति । "चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्" इति च । "सत्त्वं चित्तम् । अत्यन्तासंकीर्णत्वं च जड़त्वाजड़त्वपरिणामित्वापरिणामित्वादिभिः । प्रत्ययाविशेषश्च प्रतिबिम्बरूपेण । प्रतिसंक्रमः-परिणामः । अप्रतिसंक्रमाया-बुद्ध्या असङ्गायाः । तदाकारापत्तिः-बुद्धिसमानाकारापत्तिः । स्वबुद्धिसंवेदनं स्वबुद्धिवृत्तिज्ञानम् । बुद्धिवृत्त्याविशिष्टः पुरुष" इति तद्भाष्यम् ।

संलक्ष्यते यथा रक्तः केवलः स्फटिको जनैः ।
रञ्जकाद्युपधानेन तद्वत् परमपुरुष इति,

तस्मिञ्चिद्दर्पणे स्फारे समस्ता वस्तुवृत्तयः ।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥ इति च

स्मृतिश्च । ननु को ऽसौ प्रतिबिम्बः ? । न तावन्मुख्यः प्रतिबिम्बः । चाक्षुषे चाक्षुषस्यैव प्रतिबिम्बस्वीकारात्, प्रतिबिम्बस्य तुच्छतया तत्र बन्धानुपपत्तेः, निरवयवे ऽवच्छेदासंभवाच्च । अत एव कस्तूरीप्रतिबिम्बे न गन्धोपलब्धिः । प्रतिध्वनिस्तु न प्रतिबिम्बः किंतु ध्वनिजन्य आकाशगुणः । मूलध्वनयस्तु पृथिव्यादिगुणा एव । एतेन प्रतिबिम्बोऽत्र बुद्धेः परिणामविशेष एवाभिमानात्मकः साक्षिभास्य इत्यपि निरस्तम् । अत आह *प्रतिबिम्बोऽत्रेति । तद्वृत्तिः उपाधीनां सम्बन्धविशेष एवाध्यासिकः प्रतिबिम्ब इति, अवच्छेद इति च व्यवहार्य इत्यर्थः । एवञ्यावर्त्यमुक्तमेवाह *नत्विति । *उभयोः–वृत्तिपुरुषयोः । प्रतिध्वनौ तत्त्वव्यवहर्तृमतेनाह *आन्तरेति । न तु बाह्य इति न दोषः ॥९६॥

पुरुषो ऽपि वृत्तिसम्बन्धात्तद्गतविषयाकारभाक् । वृत्तिश्च तत्सम्बद्धा तत्स्वरूपप्रकाशभाक् *स्वभावात् । तथा च पतञ्जलेः सूत्रे "तदा द्रष्टुः स्वरूपेऽवस्थानम्" । तदा, समाधौ । "वृत्तिसारूप्यमितरत्र" इति । "व्युत्थाने याश्चित्तवृत्तयस्तदविशिष्टवृत्तिः पुरुषः" इति तद्भाष्यम् । पुरुषस्य वृत्तिश्च वृत्त्यवच्छिन्नः पुरुष एव । सारूप्यात्तत्र वृत्तित्वव्यवहारः । तत्सारूप्यात्पुरुषो ऽपि दुःखादिमानिव अकर्ताऽपि कर्तेव अभोक्ताऽपि भोक्तेव यद्भवति स एव पुरुषस्य भ्रमात्मको भोगः, तद्धानिरेव च मोक्ष इति भावः ।

---

* स्वभावादिति पाठः खसञ्ज्ञकमूलपुस्तके कुञ्जिकायुतपुस्तकद्वितये च नोपलभ्यते ।

१ 'तथा च–व्यवहार इत्यर्थः' अयं पाठः हित्वैकं कसञ्ज्ञकं मूलपुस्तकम् अन्येषु उपलब्धेषु पुस्तकेषु नोपलभ्यते । उपलब्धकुञ्जिकाटीकापुस्तकयोरेतद्व्याख्यानाऽनुपलम्भेऽपि केवलं कलायां व्याख्यात इत्ययमत्रोपन्यस्तः ।

अवच्छेदकस्थले प्रतिबिम्बव्यवहारस्तु प्रतिबिम्बसादृश्यात् । यथा रव्यादिप्रतिबिम्बं सोपाधि जलादिधर्मान् चाञ्चल्यादीन् गृह्णातीव तथा अवच्छेद्यमपि तदन्तर्भावात्तद्धर्मानिति ॥ ९७ ॥

(कुं०टी०) *वृत्तिसंबन्धात्—वृत्तिप्रतिबिम्बात् । अयम्भावः-अयःपिण्डस्य दग्धृत्वाभावे ऽपि दग्धृत्वाश्रयवन्हितादात्म्याध्यासाद् 'अयो दहति' इति यथा व्यवहारः तथा विषयाकारपरिणाम्यन्तःकरणैक्याध्यासादात्मनो ऽपि सविषयकत्वमिति । *तद्गतेति । वृत्तिगतेत्यर्थः । *तत्सम्बद्धेति । तत्सम्बन्धात्—पुरुषसम्बन्धात् पुरुषचैतन्याद् वृत्तेः प्रकाश इत्यर्थः । "सत्यं ज्ञानम्" इत्यादिश्रुत्या मुख्यं ज्ञानं ब्रह्मैव, वृत्तेस्तु जडान्तःकरणधर्मत्वेन जडत्वाद्गौणमेव ज्ञानत्वम् । जपाकुसुमस्फटिकयोरिव च सन्निधानादभेदग्रहे सति पुरुषधर्मो बुद्धावध्यस्यत इति भावः ॥ ९७ ॥

(क० टी०) ननु विषयावच्छिन्ने पुरुषे ऽवभास इति, वृत्तेः प्रकाशकत्वमिति चानुपपन्नम्, विषयाकारतया बुद्धौ सत्त्वात् प्रकाशकत्वस्य चेतने एव सत्त्वाच्च अत आह *पुरुषोऽपीति । *तद्गतेति । तद्वृत्तिगतेत्यर्थः । *तत्सम्बद्धा—जायमानैव चेतनसम्बद्धा । अत्र हेतुमाह *स्वभावादिति । अत्रार्थे मानमाह *तथाचेति । नन्वसम्प्रज्ञातावस्थे चित्ते विषयाकारवृत्तिविषयकबोधस्वरूपः पुरुषः केन रूपेण तिष्ठति । किं व्युत्थानवत् प्रकाशरूपः किं तु वृत्त्याख्यदृश्याभावान्न पश्यति, अथवा दशादिक्षये दीपवन्नश्यतीत्याशङ्कायामाह *तदा द्रष्टुरिति । तदेत्यनेन योग्यताबलात्सर्ववृत्तिनिरोधः परामृश्यते । *तदा—असंप्रज्ञातयोगकाले । *द्रष्टुः—चितिशक्तेः पुरुषस्य । *स्वरूपे—निर्विषयचैतन्यमात्रे । आरोपितशान्तघोरमूढरहिते प्रकाशे ऽवस्थानमित्यर्थः । यथा जपापाये स्फटिकस्य अलोहिते स्वस्वरूपे ऽवस्थानम् । एवं च तदा वृत्त्यात्मकदुःखाभावः पुरुषार्थ इति बोध्यम । पुरुषस्य चैतदेव स्वरूपम्, न तु बु-

द्धिवृत्तिविषयकबोधः । तस्यौपाधिकत्वात् । उपाधिनिवृत्तावप्युपहितानिवृत्तेर्न तन्नाशप्रसङ्गः । तत्र चरमासंप्रज्ञाते ऽशेषसंस्कारक्षयात् चित्तेन वृत्तीनां निरोधे औपाधिकरूपनिवृत्तावात्यन्तिकं स्वस्वरूपावस्थानं मोक्ष इति दिक् । एतेन पुरुषस्वरूपमितरत्रेत्यस्य प्रतियोगिरूपं चोक्तं तदाह *समाधाविति । असंप्रज्ञातयोगकाले इत्यर्थः । ननूत्थानदशायामप्यात्मा एवंरूप एव, तदा दुःखित्वाद्यङ्गीकारे परिणामित्वापत्तिः । तथारूपश्च नानुभूयते कुत इत्यत आह *वृत्तीति । *इतरत्र—व्युत्थाने । चित्तेन सह द्रष्टुर्वृत्तौ तदवच्छेदेन सारूप्यमित्यर्थः । व्युत्थाने हि बिम्बप्रतिबिम्बयोर्बुद्धिपुरुषवृत्त्योः सारूप्यमित्यर्थः । तदुक्तं भाष्ये इत्याह *व्युत्थान इति । वृत्तयश्च दीपस्य शिखा इव भङ्गुराश्चित्तस्यावस्थाः परिणामा द्रव्यरूपास्त्रिगुणकार्यत्वात्सुखदुःखमोहाश्रयत्वाच्छान्तघोरमूढाख्याः स्वसंप्रयुक्तार्थाकाराः । तदविलक्षणाश्च पुरुषस्यापि, तस्य दर्शितविषयत्वात् । विषयदर्शनं च स्ववृत्त्यारूढविषयस्य प्रतिबिम्बरूपेण चिति आधानम् । एवं च तत्प्रतिबिम्बान्येव पुरुषस्य वृत्तयः । प्रतिबिम्बनमपि तासु स्वीयत्वाभिमानः । नैतावता तस्य कूटस्थत्वहानिरिति बोध्यम् । सापि नातिरिक्ता । राहोः शिर इतिवत् षष्ठीत्याह *पुरुषस्येति । ननु कथं स वृत्तिरत आह *वृत्तीति । *तत्र—पुरुषे । तत्फलितमाशयमाह *तत्सारूप्यादिति । तादृशवृत्तिसारूप्यादित्यर्थः । *भोग इति । दुःखाव्यवहरणरूपो दुःखभोग इत्यर्थः । *तद्धानिः—तादृशदुःखहानिः पुरुषस्येति भावः । ननु तादृशावच्छेदे कथं प्रतिबिम्बव्यवहारो ऽत आह *अवच्छेदेति । सादृश्यमुपपादयति *यथेति । *अवच्छेद्यम्—पुरुषरूपम् । *तदन्तर्भावात्—उपाध्यन्तर्भावात् ॥ ९७ ॥

तथाच तृतीये द्वितीयपादे व्याससूत्राणि—"अत एव चोपमा सूर्यकादिवत्", "अम्बुवदग्रहणात्तु न तथात्वम्", "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" इति । अत एव यतोऽयमात्मा चैतन्यस्वरूपो निर्विशेषो वाङ्मनसातीतः अतस्तस्योपाधि-

निमित्तामपारमार्थिकीं विशेषवत्तामाश्रित्य श्रुतिषु प्रतिबिम्बोपमोपादीयते इत्यर्थः। नन्वेवमपि प्रतिबिम्ब एव अस्तु अत आह–अम्बुवदिति। जलवद् उपाधीनां पृथग्विप्रकृष्टदेशानां ग्रहणाभावेन न तत्र प्रतिबिम्बत्वमित्यर्थः। केन तर्हि धर्मेण तदुपमा तत्रेत्यत आह–वृद्धिह्रासेति। जलगतं हि रव्यादिप्रतिबिम्बं जलवृद्धौ वर्द्धत इव, तद्ध्रासे ह्रसतीव, तच्चलने चलतीव, तद्भेदे भिद्यत इवेति जलधर्मानुविधायि, नतु परमार्थतः सूर्यस्य तथात्वम्, एवं परमार्थतोऽविकृतमेकरूपमपि देहाद्युपाध्यन्तर्भावात् भजत इवोपाधिधर्मान् वृद्धिह्रासादीनित्येव उभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्याद् अविशेषः प्रतिबिम्बत्वेनापि ब्रह्मण उपाधिषु व्यवहार इत्यर्थः॥ ९८ ॥

(क० टी०) अत्र मानमाह *तथाचेति। तृतीये अध्याये सूत्राणि त्रीणि। *निर्विशेषो ऽयमिति। "अरूपवदेव हि तत्प्रधानत्वाद्" इत्यादिपूर्वसूत्रैस्तथा प्रतिपादितत्वादित्यर्थः। *विशेषेति। भेदमित्यर्थः। जीवेश्वरयोर्वास्तवोऽभेद उपाधिकृतश्च भेद इति भावः। *प्रतीति। सूर्यकादीत्यादिः। प्रतिकृतौ कनिति भावः। तथाच श्रुतिः–

यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा॥ इति,
एक एव तु भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवद्॥ इति च।

ज्योतिःस्वभावो विवस्वानेको ऽपि तत्तत्पात्रगता भिन्ना अपोऽनुगच्छन्बहुधा क्रियते एवमयमात्मा देवः स्वप्रकाशो ऽतः कूटस्थानित्य एको ऽपि भिन्नेषु क्षेत्रेष्वनुगच्छन् उपाधिना भेदरूपः क्रियत इत्यर्थः। औपाधिकभेदे ऽयं दृष्टान्तः, यथा बिम्बप्रतिबिम्बयोरुपाधिकृतो भेदो नानात्वं च वास्तवो ऽभेदस्तथा जीवेश-

योरपीति । नैतावता जीवानां प्रतिबिम्बत्वप्रत्याशा कार्या । *एवमपि–तस्य तत्त्वे ऽपि । *एवेति । अयमात्मेत्यर्थः । दृष्टान्तवैषम्यात् । तथाच कथं तदुपमेति भावः । *जलवदिति । तत्रोपाधेरम्बुनः पृथक् ग्रहणाद् गृहीतभेदेन तत्र भेदव्यवहारो यथेत्यर्थः । *उपाधीति । विप्रकृष्टदेशानामुपाधीनामिवान्तःकरणादीनां पृथक् ग्रहणाभावेन भेदव्यवहारस्यायुक्तत्वादित्यर्थः । अहमित्येव हि बुद्धिभानमिति भावः । *तत्र–आत्मनि । जलरूपोपाध्यन्तर्भावादाह *जलगतमिति ॥ ९८ ॥

वृत्तिजन्यफलं च वृत्तिद्वारा शुद्धचेतने तस्य प्रतिबिम्बनम्, एतदेव प्रकटता । तत्सम्बन्धाच्च परसमवेतक्रियाफलाश्रयत्वाद्विषयस्य कर्मत्वम्, अन्तःकरणद्वारा पुरुषस्य वृत्त्याश्रयत्वात्कर्तृत्वम् । जानातेश्च वृत्तिविशेषे एव शक्तिः । तत्र 'दण्डी' इति ज्ञाने वृत्तिस्थदण्डाऽऽकारेण यः पुरुषस्य सम्बन्धः सा प्रकारता, दण्डत्वनिष्ठश्च सोऽवच्छेदकत्वाख्यप्रकारता, संयोगनिष्ठः स सांसर्गिकी विषयता, पुरुषनिष्ठस्स विशेष्यता । तासां परस्परमवच्छेद्यावच्छेदकभावः परेषामिवास्माकमपि । विषयतात्वं च वृत्त्यनुयोगिकचेतनसम्बन्धाविशेषानिष्ठं सम्बन्धविशेषत्वमखण्डं यत्सम्प्रतिपन्नं तदेव ॥ ९९ ॥

(कुं०टी०) घटं जानातीत्यादौ धात्वर्थो व्यापारो वृत्तिरूपं ज्ञानम्, तज्जन्यफलं प्रकटतेत्याह *वृत्तिजन्येति । *वृत्तिद्वारेति । वृत्तौ सत्यामेव प्रतिबिम्बनादिति भावः । *शुद्धचेतने–ज्ञानस्वरूपे आत्मनि । *तस्य–विषयस्य । *तत्सम्बन्धाच्चेति । वृत्तिसम्बन्धात्तु पुरुषसमवेतव्यापारजन्यफलाश्रयत्वात्कर्मत्वम् । परसमवेता क्रियाह्यत्र वृत्तिरेवेत्यर्थः । *कर्तृत्वमिति । अन्तःकरणप-

रिणामरूपवृत्तेः पुरुषे ऽध्यासात्कर्तृत्वमित्यर्थः। ननु अहमर्थस्यैव ज्ञातृत्वेनात्मनस्तदभावाज्जडत्वापत्तिरिति चेन्न। तस्य ज्ञानरूपत्वेनाजडत्वात् । मोक्षदशायां विषयानवभासात्कथं ज्ञानात्मकत्वमिति चेद् । अर्थोपलक्षितप्रकाशस्यैव ज्ञानत्वात् । ननु ज्ञानात्मकस्य पुरुषस्य ज्ञानाश्रयत्वाभावाज्जानातीत्यादौ कर्तृत्वानापत्तिरत आह *जानातेश्चेति । दण्डीति ज्ञाने दण्डांशे प्रकारत्वमुपपादयति *वृत्तिस्थेति । विषयतानां ज्ञाननिरूप्यत्वाद् वृत्तिस्थेत्युक्तिः । वृत्तिसंयुक्तस्यैव दण्डादेः प्रत्यक्षाद् वृत्तिस्थत्वम् । तत्र दण्डनिष्ठो यः सम्बन्धः स एव प्रकारता। *वृत्त्यनुयोगिकेति । वृत्तिनिष्ठो यश्चेतनस्य सम्बन्धः स एवात्र विषयता । अत एव ज्ञानस्य विषयेण सम्बन्धो विषयता। सा च ज्ञाननिष्ठा विषयविशिष्टज्ञानस्वरूपेति बौद्धाधिकारदीधितिः। एवं च विषयस्य नष्टत्वेऽपि ज्ञानस्य विद्यमानत्वाद्भवति विषयता। तद्धर्मो विषयतात्वमित्यर्थः। *अखण्डमिति । अन्यथा विषयतानां प्रकारताविशेष्यताभेदेन भिन्नतया घटत्वविशिष्टबुद्धिं प्रति घटत्वविषयकज्ञानहेतुतायामेकस्या निवेशे ऽन्यविषयताशालिज्ञानाद्बोधो न स्यात्। तस्माद्विषयतात्वमेकमूरीकर्तव्यमित्यर्थः ॥ ९९ ॥

(क० टी०) वृत्तिजन्यमपि चैतन्यं फलमपि न ततोऽतिरिक्तमित्याह *वृत्तिजन्यमिति। *तद्वत्–तदपीत्यर्थः। *तस्य–विषयस्य। पराभिमतातिरिक्तत्वव्युदासायाह *एवेति ।अयं भावः–अन्तःकरणस्य सावयवत्वाद्विषयेन्द्रियसंयोगादौ तत्परिणामो वृत्तिरूपो नयनादिद्वारा निर्गत्य विषयं प्राप्य तदाकारो भवति। तथा भूत्वा तद्विषयविषयकं तद्विषयावरकमज्ञानं निवर्तयति । ततस्तद्वृत्त्युपहितत्वश्चेतने

---

१ अत–र्थः। कु.टी,कपु.नास्ति।

भवति । इयमेव प्रमा । प्रत्यक्षे त्वयं विशेषः-आवरकाज्ञाननिवृत्तौ तत्तद्वृत्त्यवच्छिन्नचैतन्याविषयावच्छिन्नचैतन्ययोरेककालिकैकदेशस्थत्वाभ्यामैक्याध्यवसायः । अनुमित्यादौ तु व्याप्यदर्शनादिजन्मव्यापकाकारवृत्त्युपहितत्वमात्रं प्रमातृचैतन्ये । तत्र वृत्तिनिर्गमाभावेन वृत्त्यवच्छिन्नविषयावच्छिन्नयोर्नैकदेशस्थतेति न तयोरैक्याध्यासः । वृत्तेर्वृत्त्यन्तराविषयत्वे ऽपि स्वविषयत्वाङ्गीकारात्तस्या अपि प्रत्यक्षत्वम् । तत्र वृत्त्यवच्छिन्नचैतन्यप्रमातृचैतन्ययोरेकदेशस्थत्वेनैक्याध्यवसाय इति । *तदिति । शुद्धचेतनसम्बन्धाश्रित्वत्यर्थः । *कर्तृत्वमिति । तथाचान्तःकरणावच्छिन्नः कर्त्ता, चेतनेन गृहीतभेदस्यैवान्तःकरणस्य वृत्त्याकारपरिणामसमर्थत्वात् । एवञ्च शुद्धचेतनस्य न कर्तृत्वं नापि कर्मत्वमिति भावः । ननु ज्ञानानुकूलव्यापाराश्रयत्वेन कर्तृत्वमिति वाच्यमत आह *जानातेश्चेति । इदमुदाहरणेन प्रतिपादयति *तत्रेति । *तेषाम्—ज्ञानानां मध्ये इत्यर्थः । *पुरुषस्य—चेतनस्य । *सम्बन्ध इति । अवच्छेदकभावः सम्बन्ध इत्यर्थः । क्वचित्तथासेति । दण्डनिष्ठेत्यर्थः । एवञ्चेदमपि सर्वं ततो नातिरिक्तम् इत्याह *विषयतात्वं चेति । *तद्वेति । अतो नातिरिक्ततत्कल्पनाऽपीति भावः ॥ ९९ ॥

न्यायनये तु तत्तद्विषयविशिष्टज्ञानं विशेष्यतादिरूपम्, अतिरिक्तमेव वा तद्[1] । विषयतात्वं तु त्रितयसाधारणमतिरिक्तं स्वीकार्यम् । तत्तद्वृत्त्यारूढाकारस्य बाह्यघटाकाराविभागेनैव ज्ञानविषयता । तादृशाकारकत्वमेव ज्ञाने इच्छादौ च विषयिता ॥ १०० ॥

(कुं० टी०) न्यायनयेत्विति । घटवद्भूतलमित्यत्र घटविशिष्टज्ञानरूपा विशेष्यतेत्यर्थः । विशेष्यतादीनां शुद्धज्ञानस्वरूपत्वे 'भूतलप्रकारकज्ञानवानहम्' इत्यप्यनुव्यवसायाप-

---

१ अति—तद् अयं पाठः कसञ्ज्ञक एव मूलपुस्तके विद्यते कलायाञ्चास्य व्याख्यानं दृष्ट्वा मूलेऽवस्थापितः ।

त्तिः, अतउक्तम् *तत्तद्विषयविशिष्टेति। तथा च घटांशे ज्ञानस्य प्रकारतारूपत्वं भूतलांशे विशेष्यतारूपत्वमिति भावः। अत्र ज्ञानामितीच्छाया उपलक्षणम्, अन्यथा ज्ञानद्वारा इच्छाया विषयतास्वीकारे ज्ञानोपरमे सविषयकत्वं न स्यात्।

यत्तु घटादिविषयकज्ञानजन्यत्वमेव इच्छाया विषयतेति। तन्न। ईश्वरेच्छाया नित्यत्वेनाव्याप्तेः।

वस्तुतस्तु तद्व्यक्तित्वेन सम्बन्धत्वं न सम्बन्धित्वमिति रूपभेदस्यावश्यकतया विषयताया एव ज्ञानतोऽतिरिक्तत्वं न्याय्यम्।

*त्रितयेति। विशेष्यताप्रकारतासंसर्गतेत्यर्थः। ननु वृत्तिविषयस्यैव घटादेर्बुद्धिविषयत्वाद् बाह्यस्य कथं तद् अत आह *अविभागेनैवेति। तयोरेकत्वादित्यर्थः॥ १००॥

(क० टी०) एवं स्वमते लाघवमुक्त्वा परमते गौरवमाह *न्यायेति। विशेष्यतादिरूपविषयतानां केवलविषयस्वरूपत्वे, केवलज्ञानस्वरूपत्वे वा दोषस्योक्तत्वात्प्राचां मतेनाह *तत्तदिति। तत् तासां स्वरूपमित्यर्थः। नव्यमतेनाह *अतीति। *तत्-विशेष्यतादि। ननु बौद्धस्यैव शक्यत्वे बाह्यबोधानापत्तिरत आह *तत्तद्वृत्त्येति। एवं विषयिता तत्र नातिरिक्तेत्याह *तादृशेति। तदविभागवदित्यर्थः॥ १००॥

एवं पुरुषोऽपि वृत्त्यारूढः पुरुषे प्रतिबिम्बत इति "अहम्" इति ज्ञानोपपत्तिः। 'आत्मानमात्मना जानामि' इत्याद्युपपत्तिश्च। 'अहम् इति जानामि' इत्याद्युपपत्तिश्च। बिम्बप्रतिबिम्बयोर्वास्तवभेदाभावात्स्वातिरिक्ताप्रकाश्यत्वरूपं स्वप्रकाशत्वं पुरुषस्योपपन्नम्। एतत्सर्वं साक्षिभास्यमिति। तन्निष्ठप्रकारत्वावच्छिन्नतद्वद्विशेष्यताकत्वरूपं प्रामाण्यम-

पि ज्ञानस्य स्वतोग्राह्यमेव । औत्तरकालिकबाधे तु तदंशे भ्रमत्वकल्पनम् । यथा च प्रदीपो रूपादि प्रकाशयन्नात्मानमपि प्रकाशयति एवं ज्ञानमर्थं प्रकाशयदात्मानमपि प्रकाशयति । एवं शब्दोऽपि । ज्ञानशब्दप्रदीपानां त्रयाणामपि स्वप्रकाशत्वात् ॥१॥

(कुं० टी०) *पुरुषे इति । चिच्छायासम्बन्धतो बुद्धिसत्त्वे पुरुषच्छायाऽऽविर्भवतीत्यर्थः । वृत्तिविषयस्य पुरुषस्यापि घटादिवद् दृश्यत्वादिति भावः । *ज्ञानोपपत्तिः—आत्मनो विज्ञानविषयत्वोपपत्तिः । आत्मानं जानातीत्यादौ एकस्यैव कर्तृत्वकर्मत्वोपपत्तिरित्यर्थः ।

ननु आत्मनो ज्ञानकर्मत्वस्वीकारे अनात्मवत् स्वयंप्रकाशत्वानुपपत्तिः, 'न जानामि' इत्यनुरोधेनाज्ञातत्वस्वीकारे च स्वयञ्ज्योतिष्ट्वक्षतिः इति चेत् । सत्यम् । 'अन्यदेव तद्विदितादथो ऽविदितादधि' इति श्रुत्या तस्य ज्ञाताज्ञातविलक्षणत्वात् । 'आत्मानमहं जानामि' इत्यनुभवस्य का गतिरिति चेद् । शुद्धस्यैवाऽऽत्मनः स्वप्रकाशत्वात् । यद्यपि ज्ञानेच्छादीनां सविषयकत्वं स्वभावः तथापि सविषयत्वं विषयसम्बन्धः सच न तात्त्विकः किन्तु आध्यासिकः । उपाधिविशिष्टस्य तु ज्ञानकर्मत्वे ऽप्यविरोधः ।

तदाह *आत्मानमित्यादि । अन्तःकरणविशिष्टं चैतन्यं जीवः, तदुपहितः साक्षी । तत्रेन्द्रियाणां तज्जन्यज्ञानानां चानुसन्धाता यद्यपि प्रमातैव तथापि प्रमातुरप्यनुसन्धानार्थं साक्ष्यभ्युपगमः । साक्षी तु ब्रह्माभिन्नः स्वप्रकाशतया निरपेक्ष एव स्वपराविषयाननुसन्धत्त इति वृत्तिरूपं ज्ञानं तद्गतप्रामाण्यं च विषयः । ननु पुरुषस्यापि ज्ञानाविषयत्वे

स्वप्रकाशत्वभङ्ग इत्यत आह *बिम्बप्रतिबिम्बयोरिति । स्वेनैव प्रकाशो ऽस्य स्वप्रकाशः ।

अयं भावः—घटादीनां प्रकाशको दीपो यथा स्वप्रकाशे दीपान्तरं नापेक्षते एवमर्थप्रकाशकं ज्ञानमपि स्वप्रकाशे ज्ञानान्तरं नापेक्षते । जडवैलक्षण्यं हि ज्ञानत्वमिति न प्रकाश्यत्वेऽपि घटादिवज्जडत्वप्रसङ्गः। अर्थप्रकाशनकाले च प्रकाशकस्याप्रकाशेऽर्थसंवेदनमेव न स्यात् । नहि अप्रकाशितो दीपो घटादिकं प्रकाशयतीति ।

*साक्षिभास्यम्—साक्षिवेद्यम् । *तन्निष्ठेति । घटत्वनिष्ठप्रकारत्वावच्छिन्नघटत्ववद्विशेष्यकत्वमित्यर्थः । *स्वतोग्राह्यमिति । स्वतोग्राह्यत्वं च दोषविशेषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम् । स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेन वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यत इत्यर्थः । इच्छाप्रामाण्यस्य स्वतोग्राह्यत्वाभावादुक्तम् *ज्ञानस्येति । ननु प्रामाण्यस्य स्वतोग्राह्यत्वे ऽनभ्यासदशोत्पन्नज्ञाने ऽप्रामाण्यसंशयानापत्तिरिति चेद् । सत्यम् । तत्र संशयजनकदोषेण प्रामाण्यस्याग्रहात् । अत एव दोषविशेषाभावे सतीत्युक्तम् । अत एवाह *औत्तरकालिकेति । 'इदं ज्ञानमप्रमा' इति बाधानिश्चये तु पूर्वज्ञानस्य भ्रमत्वं कल्प्यत इत्यर्थः । *आत्मानमपीति । एवं च "घटमहं जानामि" इत्यत्र घटो ज्ञानमात्मा चेति त्रयं ज्ञानेन विषयीक्रियते । इदमेव त्रिपुटीप्रत्यक्षं प्राभाकराणाम् । तार्किकाणां तु 'घटविषयकज्ञानवानहम्' इत्यनुव्यवसायेन ज्ञानग्रहः। ननु ज्ञानोत्पादिका चक्षुःसंयोगादिरूपसामग्री कथं ज्ञाने ज्ञानविषयतां जनयेत् धर्मिण एवाभावादिति चेन्न । यथा कपालसंयोगो गुणविशि-

ष्टं घटमुत्पादयति एवं प्रकाशत्वविशिष्टस्य ज्ञानस्योत्पत्तौ बाधकाभावात् । *एवं शब्दोऽपीति । आत्मानमपि प्रकाशयतीति पूर्वेणान्वयः । अत्रैव हेतुमाह *प्रकाशत्वादिति । त्रयाणामपि प्रकाशरूपत्वादित्यर्थः । ज्ञानस्य स्वप्रकाशत्वं चानुव्यवसायाविषयत्वात् ॥ १ ॥

एवं बाह्यज्ञानप्रक्रियामुक्त्वाऽऽन्तरज्ञानप्रक्रियामाह *एवमिति । घटादिवदित्यर्थः । *वृत्तीति । अहमाकारान्तःकरणवृत्तीत्यर्थः ।

अन्तःकरणधर्मसुखादीनामपि तत्तदाकारवृत्त्युपगमेन प्रत्यक्षत्वम् । केवलसाक्षिवेद्यत्वप्रवादस्तु अन्तःकरणेतरेन्द्रियादिप्रमाणव्यापारं विना साक्षिवेद्यत्वमात्रेण । अत एव 'अहम्' इति प्रत्यक्षे ऽहमाकाराऽन्तःकरणवृत्तिः साम्प्रदायिकैरङ्गीकृता । वृत्त्यतिरिक्तान्तःकरणधर्माणामपि साक्षिभास्यत्वे संस्काराणामपि साक्षिभास्यत्वापत्तेः । तथा च तस्यां चेतनस्य पुरुषस्य प्रतिबिम्बः । अत एव चैतन्यभानमप्युपपन्नम् । साक्षात्स्वदर्शने कर्तृकर्मविरोधापत्तेः । चेतनस्य बुद्धौ सम्बन्ध एव चिदाकारता बुद्धेश्च छायापत्तिरित्युच्यत इति । अयमेव च बुद्धिपुरुषयोः सम्बन्धः परस्पराध्यास इत्युच्यते इति भावः । तथा च चेतनसम्बद्धबुद्धिवृत्तिव्याप्यत्वमेव च ज्ञेयत्वं घटादिसाधारणमात्मन्यपीति फलितम् ।

तदेतद्ध्वनयन्स्वप्रकाशत्वमात्मन आह *आत्मानमिति । ज्ञानस्यापि स्वप्रकाशत्वायाह *अहमितीति । ननु बिम्बप्रतिबिम्बयोर्भेदस्य कल्पनात्कथं स्वप्रकाशत्वमात्मनो ऽत आह *बिम्बेति । कल्पितभेदस्य तदबाधकत्वादाह *वास्तवेति ।

अयं भावः—यथा सूर्यो बिम्बरूपेण प्रकाशकः प्रतिबिम्बरूपेण च प्रकाश्यः, एवं पुरुषः स्वरूपेण ज्ञाता स्वसम्बद्धवृत्तिसम्बन्धेन च ज्ञेय इति प्रकारभेदान्न कर्तृकर्मविरोधः । आत्मनस्तद्रूपस्वप्रकाशत्वञ्चानन्यप्रकाशफलोपधानकत्वम् । तदुक्तं योगभाष्यकृता "पुरुष एव तु तं प्रत्ययं स्वात्मालम्बनं पश्यति न तु पुरुषप्रत्ययेन बुद्धिसत्त्वात्मना पुरुषो दृश्यते "विज्ञातारमरे केन विजानीयाद्" इति । 'केन प्रकाशान्तरेण विज्ञातारं

लोको विजानीयादिति श्रुत्यर्थं इति तद्व्याख्यातारः । अत एव चित्तस्यैवात्मत्वं वदतो बौद्धस्य मते "न तत्स्वाभासं दृश्यत्वाद्" इतिसूत्रेण कर्तृकर्मविरोध उपन्यस्तो योगसूत्रकृता। तत्र स्वाभासत्वं स्वगोचरवृत्तिं विना स्वग्राह्यत्वम्। विपक्षे बाधकश्च तां विना साक्षात्स्वभास्यत्वे कर्तृकर्मविरोध इति तदर्थः । आत्मा तु दृश्यभिन्नः द्रष्टृत्वात् । दृश्यत्वं च फलव्याप्यत्वरूपं प्रकाश्यत्वम्। आत्मनो द्रष्टव्यत्वं च वृत्तिव्याप्यत्वमेव, न फलव्याप्यत्वरूपम्। स्वप्रकाशस्य प्रकाशापेक्षाविरहात् । स्वप्रकाशत्वं च फलीभूतचेतनाव्याप्यत्वे सति वृत्तिव्याप्यतया ऽपरोक्षव्यवहारयोग्यत्वं प्रागुक्तरूपमेव । नचैवं तत्र श्रुत्यादीनां प्रामाण्यं न स्यात् प्रमाख्यफलाजनकत्वादिति वाच्यम् । पुरुषनिष्ठाविद्यानिवृत्तेरेव तत्फलत्वात् प्रमाख्यफलाभावे ऽप्यक्षतेरिति ।

ज्ञानस्य स्वप्रकाशत्वमुपपादयति *एतदिति। घटादिकं पुरुषादिकं चेत्यर्थः । तस्मादेव तस्यापि ग्रह इति भावः । एवेन मतान्तरव्यवच्छेदः । इदमप्यबाधितस्थले इत्याह *औत्तरेति । ननु ज्ञानस्य स्वप्रकाशत्वं विरुद्धम् अत आह *यथाचेति । *ज्ञानमर्थमिति । "तमेव भान्तमनुभाति सर्वम्" इति श्रुत्या तथा ऽवगमात् ॥ १ ॥

अत एव ज्ञाने सति 'जानामि न वा' इति संशयस्य, 'न जानामि' इति विपर्ययस्य चाननुभवः। अनुव्यवसायस्य ज्ञानग्राहकत्वे त्वनवस्था। 'घटं जानामि' इतिवत् 'ज्ञानं जानामि' इत्यनुभवाभावाच्च । अभेदे ऽपि कर्मकर्तृभावस्य विषयविषयिभावस्य च स्वप्रकाश इत्यादिव्यवहारानुरोधेन स्वीकारे बाधकाभावादित्यन्यत्र विस्तरः ।

एवं व्याप्याकारवृत्तिप्रतिबिम्बरूपव्याप्यज्ञानोत्तरं, शब्दाकारवृत्तिप्रतिबिम्बरूपशब्दज्ञानोत्तरं जायमानबौद्धव्यापकशब्दार्थरूपतत्तदर्थाकारवृत्तिप्रतिबि-

म्बनमेवानुमितिः शाब्दबोधश्च । शशशृङ्गालीकादिशब्दानां प्रातिपदिकत्वसिद्धिरपि बौद्धार्थवत्त्वेनैवोपपद्यते । "परस्सन्निकर्षः" इति सूत्रे, "स्थानिवद्" सूत्रे च भाष्ये स्पष्टमेतद् ॥ २ ॥

(कुं० टी०) *अत एव—स्वप्रकाशत्वादेव । *ज्ञानेसतीति । 'अयं घट' इत्येवं घटे प्रकाशिते तद्विषयज्ञानस्यापि प्रकाशात् ज्ञानविषयकः संशयादिर्न भवति इत्यर्थः । 'घटविषयकज्ञानवानहम्' इत्यनुव्यवसायेन ज्ञानग्रह इति तार्किकमतं निराकरोति *अनुव्यवसायस्येति । प्रथमज्ञानं द्वितीयज्ञानेन प्रकाश्यं तदपि ज्ञानान्तरेणेत्येवमनवस्थेत्यर्थः । अप्रकाशितस्यानुव्यवसायस्य प्रकाशकत्वासम्भवादिति भावः । *अनुभवाभावाच्चेति । तथाच ज्ञानस्य न ज्ञानग्राह्यत्वम् ।

ननु यत्र विषयतया प्रत्यक्षं तत्पूर्वक्षणे विषयस्य सन्निकर्षस्य चापेक्षणीयत्वात्कथं स्वतोग्राह्यत्वं इति चेन्न । ज्ञानेन्द्रियसन्निकर्षस्य ज्ञानप्रत्यक्षे हेतुत्वानभ्युपगमेन विषयतत्सन्निकर्षाघटिताया एव सामग्रीव्याप्तेरुपगमात् ।

ननु स्वस्यैव कर्तृत्वकर्मत्वे विषयविषयित्वे च कथम् अत आह *अभेदेऽपीति ।

यथा हि तार्किकमते ऽपि 'सर्वं प्रमेयम्' इति ज्ञाने स्वस्यैव विषयता, यथा वा द्रव्यादौ सद्व्यवहारः सत्ताप्रयुक्तः सत्तायां तु स्वातिरिक्तसत्ताऽभावेऽपि सद्व्यवहारः एवं स्वस्यैव विषयविषयिभावो न विरुध्यते । एवं 'स्वात्मानं जानामि' इत्यादावेकस्यैव कर्तृकर्मभावश्च । तार्कि

१ एवं-भावः पाठोऽयं कुं० कपु० नास्ति ।

काणां स्वरूपसम्बन्धस्थल इव स्वस्यापि स्वसम्बन्धित्वसम्भवाचेति भावः।

*व्याप्याकारेति। धूमाकारा या वृत्तिः तत्प्रतिबिम्बनमेव धूमज्ञानम्। तस्माद्बाह्याकारप्रतिबिम्बनमनुमितिः। *व्यापकेति। व्यापकरूपो यः स स पदार्थः, शब्दार्थरूपश्च यः स स पदार्थस्तदाकारा वृत्तिरित्यर्थः। *शाब्दबोधश्चेति। एवं शब्दाच्छाब्दबोधोऽप्युक्तरीत्येत्यर्थः। ननु शशशृङ्गादौ बाह्यार्थाभावात्कथमर्थवत्त्वम् अत आह *शशशृङ्गेति। तदुक्तं हरिणा—

व्यपदेशे पदार्थानां बाह्यसत्तौपचारिकी।
सर्वावस्थासु सर्वेषामात्मरूपस्य दर्शिका॥ इति।

अर्थानां बाह्यानां व्यपदेशे व्यवहारार्थं बाह्यविलक्षणसत्ता बुद्धिसमाविष्टा औपचारिकी आरोपप्रयोजनवती। सर्वास्ववस्थास्वित्यनेन अतीतानागतानामपि बुद्ध्या प्रतिभासो दर्शितः। सर्वेषामित्यनेन शशशृङ्गादिशब्देऽपि तद्बुद्धिकल्पनया व्यवहारात् शब्दार्थसम्बन्धो नित्यो दर्शितः। अत एव बुद्ध्या शशशृङ्गमुद्दिश्य बाह्यसत्ताव्युदासाय नास्तीति प्रयुज्यते॥ २॥

(क० टी०) ज्ञानमात्माश्रयमिति मतेऽपि तत्स्वप्रकाशमेवेत्याह *अत एवेति। तस्य तत्त्वादेवेत्यर्थः। निश्चयस्य, विपरीतज्ञानस्य च तथा सति प्रतिबन्धकत्वात्। अन्यथा तदभावापत्तिरिति भावः। परमते बाधकमाह *अन्विति। किञ्च भवदुक्तानुव्यवसायो विषयग्राहक एव, न ज्ञानग्राहकः, अन्यादृशस्तु नोपलभ्यत इति तस्य तद्ग्राहकत्वमेव वस्तुतोऽसिद्धमिति। अभ्युपेत्यात्र तदुक्तमयुक्तमित्याह *घटमिति। ननु ज्ञानस्य स्वप्रकाशत्वे स्वस्य प्रकाश इत्यर्थकस्य स्वप्रकाशशब्दस्यानुपपत्तिः। क्रियाकर्मभावानुपपत्तेः। जन्या हि क्रिया जनकं

च कर्म । नचैकस्यैवोभयरूपत्वं सम्भवति । बहुव्रीहौ तु कर्तृक-मेविरोधः । एवमभेदे विषयविषयिभावासम्भवः, सम्बन्धस्य सम्ब-न्धिस्वरूपभेदनियतत्वेन विषयित्वग्रहासम्भवाद् । अत आह *अ-भेदेऽपीति । आदिना स्वाभासमित्यादि ।

अयं भावः—तथा सति ईश्वरज्ञानस्य नित्यत्वमते तस्य कर्मजन्यत्वाभावेन तत्कर्मणः कारकत्वानापत्त्या 'ईश्वरः सर्वं जानाति' इत्यभावापत्तिः । निरुपाध्यात्मानं जानतो ऽध्या-त्मविद 'आत्मानं जानाति' इत्यभावापत्तिश्च । तस्मादर्थवि-शेषस्य कर्मकारकादिसंज्ञा वैयाकरणानाम्, तासां च यत्रापि सोऽर्थो नास्ति तत्रापि तदारोपेण स्वीकारात्तच्छास्त्रीयकार्यनिर्वाहेण तद्विरोधस्यादोषत्वम् । एवं ज्ञानज्ञेययोर्विषयविषयिभावः सम्बन्ध इत्यादौ सम्बन्धसम्बन्धस्य षष्ठ्या प्रतीयमानस्यानवस्थाभिया स्वा-श्रयात्मकत्वाङ्गीकारावश्यकत्वेन यत् सम्बन्धज्ञानं तत् सम्बन्धस्व-रूपात्सम्बन्धिनोर्भेद एव भवतीति नियमस्य त्यागात्सम्बन्धिभेदं विनापि विषयविषयिभावाङ्गीकारे बाधकाभावात् । किञ्च यथा ता-र्किकमते ऽन्येषु सत्तासम्बन्धात्सद्व्यवहारः, सत्ता तु स्वयमेव सद्व्यवहारभाक्, नैतावता आत्माश्रयस्तथा ज्ञानं क्रियाकर्मभाव-विषयविषयिभावयोरभावेऽपि स्वत एव सिद्धरूपत्वात्स्वप्रकाश-त्वव्यवहारविषय इति ।

तदाह *अन्यत्रेति । एवं प्रत्यक्षप्रक्रियामुक्त्वा ऽनुमित्या-दिप्रक्रियामाह *एवमिति । प्रत्यक्षवदित्यर्थः । *शब्दार्थे-ति । तदुभयेत्यर्थः । यथासंख्यमत्र बोध्यम् । एवेन तदतिरि-क्तत्वनिरासः । एवं ज्ञानप्रक्रियामुपपाद्य प्रक्रान्तबौद्धपदार्थस्वीका-रस्य फलान्तरमप्याह *शशेति । एवेन गत्यन्तरनिरासः । किञ्च आकाशो न पश्यतीत्याद्यप्युपपन्नम् । बौद्धतत्कर्तृकदर्शनस्य बाह्यतया ऽभावप्रतिपादनादिति बोध्यम् । अत्र मानान्तरमप्याह *पर इत्यादि । *एतत्–बौद्धपदार्थ एव ज्ञानविषय इत्येतत् । तत्र आद्ये तत्सूत्रं तत्सत्त्वे एव सङ्गच्छते ऽन्यथा ऽऽशुविनाशिनां शब्दानां सन्निकर्षो बाह्यो दुरुपपाद एवेत्युक्तम् । अन्त्ये "प्राचीनं ग्रामादाम्रा इत्युपदेशे तस्य सर्वत्राम्रबुद्धिः प्रसक्ता ततो ये क्षीरि-

णो ऽवरोहवन्तः पृथुपर्णास्ते न्यग्रोधा इत्युपदेशेन तत्राम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते । ततः स पश्यति बुद्ध्या आम्रांश्चापकृष्यमाणान् न्यग्रोधांश्चोपाधियमानानित्युक्तम् । आम्रबुद्ध्या इत्यस्य तां सन्त्यज्येत्यर्थः ॥ २ ॥

ईदृशानामप्यन्तःकरणे वासनासत्त्वे शब्दाद्बोध एव मानम् । पूर्वपूर्वबोधैर्वासनाजननाच्च अनादित्वाच्च व्यवहारस्य न दोषः ।

तदुक्तं हरिणा—

यो वाऽर्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः ।
स बाह्यं वस्त्विवति ज्ञातः शब्दार्थः सम्यगिष्यते ॥ इति ।

'अबहीरूपो ऽपि बहीरूपतया ऽध्यस्त' इति पुञ्जराजः । अध्यासे बीजं चान्तःकरणस्य रागादिदोष एव । अत एव बाह्यपदार्थानयनम् उपपन्नम् । यत्र चाभ्यन्तरार्थस्य बाह्यार्थेन संवादः स शब्दः प्रमाणम्, विसंवादे त्वप्रमाणमिति व्यवस्था। एवमेव 'अयं शब्दः प्रमाणं न वा' इत्यादेः 'इदं ज्ञानं प्रमा न वा' इत्यादेश्चोपपत्तिः ॥ ३ ॥

(कुं० टी०) ननु शशशृङ्गादिशब्दे ऽर्थस्य कल्पितत्वात्तत्र वासनासत्त्वे मानाभाव इत्यत आह *बोध एवेति । कथं तत्र वासना जन्यत इति चेत्तत्राह *पूर्वेति । पूर्वकाले ऽपि कथम् अत आह *अनादित्वादिति । *न दोषः—न वासनाऽनुपपत्तिः ।

केचित् शशशृङ्गादिशुक्तिरजतादिविषये बहिरसतोऽपि बुद्धिविषयत्वादसत्ख्यातिरिति व्यवहरन्ति ।

पुरोवर्त्तिनः स्वरूपेण सत्त्वाद्बाह्यरजताकारेण चासत्त्वात् सदसत्ख्यातिरिति साङ्ख्याः ।

ज्ञानसन्तानस्यैवात्मत्वमभ्युपगच्छतां वैभाषिकादीनाम् आत्मख्यातिरिति व्यवहारः ।

रजतत्वेन शुक्तिप्रतीतेरन्यथाख्यातिरिति तार्किकाः ।

*यो वार्थ इति । वाशब्दः पक्षान्तरे । बुध्द्युपारूढस्य शब्दस्य बाह्यवस्तुनिबन्धनो बुध्द्युपारूढो यो ऽर्थः स बाह्यं वस्त्वित्यध्यस्तः सन् शब्दार्थः । यथा आन्तरः स्फोटो वाचकः तथा ऽर्थो ऽप्यान्तर एवेति भावः । नन्वत्राध्यासे बीजाभाव इत्यत आह *रागादिदोष इति । तद्वशादेव प्रवृत्तिरिति भावः । "सुखानुशयी रागः" इति पातञ्जलसूत्रम् । सुखे तत्कारणे वा तृष्णा राग इति तदर्थः । *अत एव–बाह्ये अध्यासादेव । *संवादः—ऐक्यम् । *एवमेवेति । संवादित्वासंवादित्वाभ्यामेवेत्यर्थः । ज्ञाने संवादो नाम यथार्थविषयकत्वम् । *प्रमाणमिति । बाह्यार्थसंवादीत्यर्थः ॥ ३ ॥

(कु० टी०) ननु शशशृङ्गादीनां बाह्यत्वाभावेन तद्वासनायां किं मानमत आह *ईदृशानामिति । अबाह्यानामपि तेषामित्यर्थः । नन्वेवमपि तज्जनकं किम् अत आह *पूर्वेति । नन्वेवमप्याद्यबोधे दोषोऽत आह *अनादित्वादिति । व्यवहारदशायामिति भावः । *योवेति । वाशब्दः समुच्चये । बाह्यवस्तुनिबन्धन इति पाठः । बाह्यवस्तु निबन्धनं संवादिरूपं यस्य । निर्मूलत्वं निराचष्टे *अध्यास इति । *अतएव—रागादिदुष्टान्तःकरणेन बाह्यान्तरार्थयोः संमुग्धत्वेनैव ग्रहणादेव । नन्वेवं सर्वस्यापि शब्दस्य प्रामाण्यं स्यादत आह *यत्रहीति । संशयबीजकोटिद्वयमपीदमेव नत्वन्यत् इत्याह *एवमेवेति ॥ ३ ॥

नलादिपदेभ्यो ऽपि बौद्धाकारविषयक एव

बोधः । स च बौद्ध आकारः सामान्यत एव, अवयवसंस्थानगतविशेषाग्रहात् ।

तेषां शक्तिग्रहोऽपि वक्तृमुखात्तदीयगुणसमृद्ध्यादिश्रवणानन्तरं तादृशगुणसमृद्ध्यादिविशिष्टे सामान्यतो बुद्ध्या गृहीतआकारे एव । 'हेतुमति च' इति सूत्रे भाष्ये "कंसं घातयति" इत्येतदुपपादनावसरे "तेषामुत्पत्तिप्रभृत्याविनाशादृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति" इत्युक्तेः ॥ ४ ॥

(कुं० टी०) ननु नलादिशब्दानामाधुनिकत्वात्तत्र कथं वासना कथं वा बौद्धबाह्ययोरध्यास इत्यत आह *नलादीति । *बौद्धेति । अस्ति हि आकारविषयिणी वासना अनादिः । ननु अज्ञातस्य आकारोऽपि कथं बुद्धिस्थ इत्यत आह *सचेति । सामान्याकारस्य सर्वत्रानुमानादिना बुद्धिस्थत्वादिति भावः । *तेषाम्—नलादिपदानाम् । *शक्तिग्रहोऽपीति । बुध्या गृहीते आकारे इत्यत्रान्वयः । *व्युत्पादनावसर इति । चित्रपुस्तकादौ हि प्रतिकृतिरूपस्य प्रयोज्यप्रयोजकभावाध्यवसायात्कंसं घातयतीति सिद्धम् । यदा तु कंसाद्यनुकारेण सादृश्यान्नटानां तद्रूपताप्रतीतिः तत्र प्राथमिकेषु कथमिति तत्र प्रश्नः । *तेषामुत्पत्तीति । कंसादीनाम् ऋद्धीर्व्याचक्षाणाः कथका बुद्धिविषयान् प्रकाशयन्ति त्रिकालातीतानां बहिरसत्त्वात् बुद्धिगोचरतया विद्यमानान् प्रकाशयन्ति । तथा च कथकैः श्रोतरि कंसाद्याकारप्रत्ययजननाद् बुद्धिवासुदेवेन कंसं घातयतीति प्रयोजकत्वोपपत्तिः । तथा च सूत्रेणैव सिद्धत्वाद्वार्तिकं नारब्धव्यमिति भावः । एवं च बुद्धिविषयसत्त्वयैव सर्वोऽपि व्यवहार इति फलितम् ॥ ४ ॥

तस्य फलान्तरमप्याह *नलादीति । *आकारः–बाह्यत्वेनाभिमतः । शक्तिग्रहपदार्थोपस्थितिबोधानां समानप्रकारकत्वात्तं विना तदसम्भवात्तद्याचष्टे *हेतुमतीति । *तेषाम्–कंसादीनाम् । *आचक्षाणाः–पौराणिकाः । सत्त्वं बुद्धिविषयत्वेनेत्याह *बुद्धीति । अत एव नृत्यदर्शनं पुराणश्रवणं च कृतवतां दर्शनाद्यर्थं गच्छतोऽन्यान्सामाजिकान्प्रति 'गच्छ हन्यते कंसो' 'गच्छ घानिष्यते कंसः', 'किन्तेन, हतः स' इत्यादिव्यवहारः । अन्यथा चिरहते कंसे हन्यते इत्यादिव्यवहारानुपपत्तिरेव । हन्तेस्तद्धननाभिनये तत्प्रतिपादकग्रन्थकथने वा लक्षणेति तु न युक्तम् । बौद्धकंसस्य बौद्धकृष्णेन बौद्धहननमित्येवमन्यथैवोपपत्तेरिति भावः ॥ ४ ॥

तदुक्तं हरिणा—

शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन्साधनत्वेन मन्यते ॥
बुद्धिप्रवृत्तिरूपं[1] च समारोप्याभिधातृभिः ।
अर्थेषु शक्तिभेदानां क्रियते परिकल्पना ॥ इति ।

प्रत्यक्षमिति मननक्रियाविशेषणम् । इन्द्रियजज्ञानाभावादिवेति । अर्थेषु बाह्येषु । बौद्धमेवैकस्य शक्तिनानात्वं बाह्ये ऽध्यस्यते दृश्यज्ञानविषययोरभेदाध्यासात् । अत एव देशान्तरस्थं देवदत्तं काश्यां शृण्वतस्तं च तत्र पश्यतोऽपि 'देवदत्तोऽत्र नास्ति' इत्यतो धीः सामान्येन बौद्धाकारेण, अस्य विजातीयतया संमुग्धत्वेनाग्रहात् । 'अयं स देवदत्त' इत्युपदेशोत्तरं सामान्यरूपोऽपि बौद्ध आकारो विशेषरूपेण विवर्तते ॥ ५ ॥

(कुं० टी०) *शब्दोपहितेति । शब्दसमर्पितबुद्धिविषया-

---

१ कलाऽनुरोधी कखमूलपुस्तकयोः 'प्रवृत्तं रूपम्' इति पाठः ।

कारानित्यर्थः । *साधनत्वेनेति । बुद्धिविषयवधादेरित्यर्थः । तदेवं बुद्ध्या व्यवहारमुपपाद्यैकस्यापि वस्तुनः शक्तिनानात्वं बौद्धमित्याह *बुद्धीति । बुद्धेः प्रवृत्तिर्व्यापारः परिच्छेदलक्षणः तस्या रूपमाकारः अविद्यया भासमानस्तमर्थेषु बाह्येष्वध्यस्य तेषां शक्तिनानात्वं कल्प्यते । तथाच बौद्धशक्तिभेद एव बाह्यशक्तिभेदः । एवं च क्रियाभेदाद्वस्त्वेव नानाशक्तिकमवधार्यते । *क्रियाविशेषणमिति । इन्द्रियनिमित्तेन ज्ञानेन परिस्फुटार्थमवधारयतीत्यर्थ इति भावः । इवार्थमाह *इन्द्रियजेति । इन्द्रियजन्यमिदं ज्ञानं न भवतीति हेतोः प्रत्यक्षमिवेति इवशब्दः प्रयुक्त इत्यर्थः । *दृश्येति । बाह्येत्यर्थः । *ज्ञानविषयः—बौद्धः । *अत एव—बौद्धसामान्याकारे शक्तिग्रहादेव । 'देशान्तरे वर्तते' इत्यपरिचितं देवदत्तं श्रुतवतः काशीस्थपुंसः काश्यां देवदत्ते सत्यपि 'काश्यां देवदत्तो नास्ति' इति वाक्याद्बोधो भवत्येव । बुद्धिस्थस्य सामान्याकारस्य बाह्याकारे ऽध्यासाभावादित्यर्थः । *संमुग्धत्वेन—अभिन्नत्वेन । *अस्य—काशीस्थस्य । ननूपदेशात् 'सोऽयम्' इति बुद्धिः कथम् अत आह *अयं स इति । *विजातीयेति । एतच्च संमुग्धत्वे हेतुः । मोहश्चाज्ञानम् । तथाच मोहाद् द्वयोराकारयोर्नैक्यग्रह इत्यर्थः । *सः—देशान्तरस्थः । अयमेवेत्यर्थः । *बौद्ध इति । तत्रोपदेशानन्तरं बौद्ध आकारो बाह्यरूपो भवतीत्यर्थः । *अतीतनलादीति ।

अतीतनलादिविषये नलत्वादिप्रकारकः शक्तिग्रहो न सम्भवति, नलत्वादिना पूर्वमज्ञातत्वात् किन्तु प्रमेयवानित्येव प्रमेयप्रकारकः । प्रमेयवानित्यनुभवे प्रमेयत्वेन नलत्वविशिष्टस्यापि पूर्वमनुभवोऽस्ति । एवं चादृष्टविशेषस्य प्रमेयत्वांशे उद्-

---

१ विजाती—त्यर्थः पाठोऽयं कुं० कपु० नास्ति ।

बोधकत्वाकल्पनेन केवलचैत्रत्वविशिष्टस्मरणमिति प्राञ्चः ।

तन्न । 'जातिमान्' इति अनुभवोत्तरं 'घट' इति स्मरणापत्तेः । नहि तत्र कस्योद्बोधकत्वमस्ति कस्य नेत्यत्र नियामकमस्ति । अतस्तत्र संस्कारधाराकल्पनेनैव स्मृतिरिति नव्याः ॥ ९ ॥

(क० टी०) *शब्दोपेति । तज्जन्यप्रतीतिविषयानित्यर्थः । *साधनत्वेन-कर्मकारकत्वादिना । *बुद्धिप्रवृत्तम्-बुद्ध्यारूढम् । प्रत्यक्षस्य कंसादिविशेषणत्वे प्रत्यक्षानित्युचितम् अत आह *प्रत्यक्षमितीति । अत एव इवः सफल इत्याह *इन्द्रियेति । *एकस्य—कंसादेः । *ज्ञानेति । बुद्धीत्यर्थः । अतएवेत्यस्यार्थमाह *सामेति ॥ ५ ॥

एतेनातीतनलादिभाविचैत्रादिवर्तमानप्रासिद्धासन्निकृष्टवस्तुगोचराः संस्कारा अनादयो धारारूपेण विशिष्य बोधानुपपत्त्या कल्प्यन्ते, तैः स्मृतेष्वर्थेषु शक्तिग्रहो बोधश्चेति नैयायिकनव्योक्तमपास्तम् । विशिष्यबोधरूपहेत्वसिद्धेः । विशिष्य गृहीतसङ्गतिकानामिव तद्दर्शने पदस्मरणापत्तेश्च । पदप्रकारकबोधस्यैवानुभवाच्च ।

अत एव अज्ञातार्थकेष्विदमेकं पदमिति ज्ञातेषु नलचैत्रगवयादिपदेषु श्रुतेषु क एतदर्थ इति प्रश्न उपमानतल्लक्षणादिना प्रतिवचनं च दृश्यते । अत एव सादृश्याद्युपायेन शक्तिबोधकतया उपमानस्य, प्रसिद्धपदसामानाधिकरण्यात्तत्तद्बोधकतया कोशस्य च प्रामाण्यं व्युत्पादयन्ति ।

नलत्वादिना बोधस्तु तेन रूपेण शक्तिग्रहासम्भवादसम्भवी ।

०विषयकं

एतेन प्रमेयत्वादिरूपेण सर्वानुभवसत्त्वात् तत्र प्रमेयत्वांशस्य अनुद्बुद्धसंस्कारत्वेन मोषे प्रथमतः तत्तज्जात्यादिस्व निर्विकल्पकस्मरणं ततो ज्ञानलक्षणया विशिष्टतत्तत्पदार्थोपस्थितौ तत्र शक्तिग्रहो बोधश्च । ज्ञानलक्षणा च मनःसंयुक्तात्मवृत्तिसंस्कारविषयत्वम् । फलबलकल्प्योद्बोधकवशात्स्मृतेः काचित्कत्वकादाचित्कत्वनियमेन न सार्वज्ञ्यापत्तिरित्यपास्तम् । अनुभवविरुद्धतादृशस्मरणकल्पने मानाभावाच्च । सर्वत्र स्मरणे ऽनुभवसमानाकारत्वस्यैव दर्शनात् ।६॥

*भावीति । नलादिर्योऽतीतः यश्च भावी चैत्रादिः यश्च प्रसिद्धो वर्तमानो ऽपि असन्निकृष्ट इत्येतेषां द्वन्द्वः । *हेत्वासिद्धेरिति । विशिष्य बोधाभावेन तन्मूलकसंस्कारकल्पनाया असम्भवादिति भावः । *गृहीतेति । घटदर्शने घटपदस्मरणवदपूर्वचैत्रादिदर्शने ऽपि तद्वाचकपदस्मरणापत्तेरित्यर्थः । *पदप्रकारकेति । नलपदवाच्यः कश्चिदासीदित्याकारकेत्यर्थः । *एकं पदामितीति । एतादृशो व्यवहार इति शेषः । *ज्ञातेष्विति । तार्किकमते तु नलशब्दे ज्ञाते तदर्थस्यापि ज्ञातत्वात्प्रश्नानुपपत्तिः । *उपमानस्येति । प्रामाण्यमित्यत्रान्वयः ।

तत्र हि—'गोसदृशो गवयपदवाच्यः' इत्युपमानाद् 'गवयो गवयपदवाच्यः' इति शक्तिग्रहः । सादृश्यादीत्यादिना वैधर्म्यपरिग्रहः । यथा अतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्यात् उष्ट्रे करभपदवाच्यताग्रहः ।

*सामानाधिकरण्यात्—वाच्यतया एकार्थवृत्तित्वात् । *शक्तिग्रहासम्भवादिति । नलत्वेन रूपेण पूर्वमनुपस्थितेः । *मोषेअग्रहे । तदंशे ऽन्याप्रकारकस्मृतिं प्रति तदंशेऽन्याप्रकारकत्वेन

तु नानुभवस्य हेतुत्वम्, मानाभावात् । नचैवं जातिमत्त्वादिरूपेण घटाद्यनुभवे ऽन्यांशे उद्बोधकालाभे 'घटः' इति स्मरणापत्तिरिति वाच्यम् । उद्बोधकलाभालाभयोः फलबलकल्प्यत्वात् इति भावः। *तत्तज्जात्यादीति । चैत्रत्वादीत्यर्थः । *निर्विकल्पकमिति । यथा बालानां स्तनपानादाविष्टसाधनतायाः पूर्वानुभूतायाः स्मरणेऽदृष्टविशेष एव नियामकः, तथाऽपूर्वचैत्रत्वादिस्मरणेऽपी· त्यर्थः । *आत्मवृत्तीति । आत्मनिष्ठेत्यर्थः । 'सुरभि चन्दनं पश्यामि' इत्यादौ सौरभाद्यंशे संस्कारस्य या विषयता सैव ज्ञानलक्षणाप्रत्यासत्तिः । सैव सौरभस्मृतौ हेतुरिति भावः। *न सार्वज्ञ्यापत्तिरिति । प्रमेयत्वेन ज्ञानेऽपि विशिष्य ज्ञानाभावान्न सर्वज्ञतापत्तिरित्यर्थः । *तादृशेति । प्रमेयत्वरूपेणानुभवाच्चैत्रत्वरूपेण स्मरणेत्यर्थः । *अनुभवाकारत्वस्यैवेति ।

तथा च पातञ्जलसूत्रम् "जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वाद्" इति । जातिव्यवहितत्वं जन्मान्तरयोगेन । तत्र जन्मान्तराऽनुभूतस्मरणमञ्जनादिना । देशादिव्यवधानं दूरत्वादिना । नच सुषुप्तिदशायामनुभवाभावात् 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इतिस्मरणानुपपत्तिरिति वाच्यम्। एतदर्थमेव निद्राया वृत्तिविशेषत्वस्यैव स्वीकारात् । एतेन ज्ञानसामान्याभावो निद्रेति तार्किकोक्तमपास्तम् ॥ ६ ॥

*गोचराः—एतत्त्रितयगोचराः । तज्जनकाभावादाह *अनाद्य इति । सर्वदा तज्ज्ञानस्य जननादाह *धारेति । *अर्थेषु—नलत्वादिविशिष्टनलादिषु । *बोधश्च—तेषामेव । एतेनेत्यस्यार्थमाह *विशिष्येति । भाव्यादिविषये दोषान्तरमाह *विशिष्येति । घटादीनामित्यर्थः । दर्शन इति शेषः । साधारणदोषान्तरमाह *पदेति ।

एतेन नलादिपदान्नलादिशब्दार्थत्वादिप्रकारक एव शाब्दबो·

धो लक्षणया । नच नलत्वादिविशिष्टे शक्त्यग्रहात्तत्संबन्धरूपलक्षणाग्रहोऽपि कथं ? सामान्यरूपेण तत्रापि शक्तिग्रहसत्त्वादिति तन्नव्योक्तमपास्तम् ।

इदं समूलयति *अत एवेति । सामान्यतस्तथा बोधादेवेत्यर्थः । एवमग्रेऽपि । विशेषजिज्ञासोपपत्तये आह *इदमेकमिति । *तल्लक्षणेति । लम्बकर्णत्वादीत्यर्थः । सामान्यज्ञानस्य विशेषजिज्ञासां प्रति हेतुत्वात् । त्वन्मते तूक्तरीत्याऽऽदावेव विशिष्यैव बोधेन प्रश्नाद्यसङ्गतिः स्पष्टैव । आदिनाऽतिदेशवाक्यार्थज्ञानम् । अन्यथोक्तरीत्यैव तत्रापि निर्वाहे तदप्रामाण्यापत्तिः स्पष्टैव । घटादितुल्यतां निराचष्टे *नलत्वादीति । *एतेन—तथा बोधासम्भवेन । *तत्र—तथानुभवविषये । विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वादाह *प्रथमत इति । आदिना गुणादि । *तत्र-विशिष्टे । *बोधश्च-विशिष्टस्य । ननु जात्यादिज्ञानं कथं तस्य प्रत्यासत्तिः अत आह *ज्ञानेति । चक्षुर्जन्यज्ञाने विषयतासम्पादकसंस्कारजनकज्ञानविषयत्वमित्यर्थः । ननु प्रमेयत्वेन सर्वानुभवे सार्वज्ञ्यापत्तिः अत आह *फलबलेति । देशतः कालतश्चातत्त्वायाह *काचित्कत्वेति । एकदोषस्योक्तत्वाद्दोषान्तरमाह *अनुभवेति । अनुभवविरुद्धत्वे हेतुमाह*सर्वत्रेति ॥ ६ ॥

किञ्च तदंशमोषेऽपि विशिष्य जातानुभवानामेव तथा ज्ञानं भवति नतु कदाचिदपि तथाऽननुभूतानां तथा ज्ञानं ज्ञानलक्षणासहकारेणापि। अनुभवविरोधात् । अन्यथा ब्रह्मणोऽपि तथा स्मरणे ज्ञानलक्षणया तथाऽनुभवे च कृतकृत्यतापत्तिरित्यलम् ॥ ७ ॥

ननु तद्विषयकस्मृतौ तद्विषयकानुभवहेतुतायां व्यभिचारवारणायाव्यवहितोत्तरत्वं वैजात्यं वा निवेश्यमित्यस्वरसादाह *किञ्च तदंशेति । यस्य कस्य चिद्विशिष्यानुभवो जातोऽस्ति तस्यैव ज्ञानलक्षणयाऽपि ज्ञानं भवतीत्यर्थः । *नत्विति ।

तथा ऽननुभूतानां ज्ञानलक्षणया ऽपि न तथा ज्ञानमित्यन्वयः । *ब्रह्मणो ऽपीति । अस्मदादीनां सामान्यलक्षणया ब्रह्मणो ऽप्यनुभवान्मुक्तत्वापत्तिरित्यर्थः ॥ ७ ॥

(कु० टी०) तथा बोधांशे ऽनुभवविरुद्धत्वमाह *किञ्चेति । विपक्षे बाधकमप्याह *अन्यथेति । इष्टापत्तौ श्रवणादेर्योगादेः काशीमरणादेरानर्थक्यापत्त्या तद्बोधकश्रुतिस्मृतिपुराणशास्त्रानर्थक्यापत्तिः, वैषम्ये बीजाभावः, अत एव सार्वज्ञ्यापत्तिश्च । तदाह *इत्यलमिति ॥ ७ ॥

यत्र तु न गुणसमृद्ध्यादिश्रवणं तत्र पदमात्रविषयकमेव ज्ञानम् । अत एव 'पदं श्रुतम् अर्थं तु न जानामि' इति व्यवहारस्तत्र । गुणादिश्रवणोत्तरं तु 'श्रुतो ऽस्ति स न दृष्ट' इति व्यवहारः । अस्य कश्चिदर्थो भविष्यतीति पदत्वहेतुकमनुमानमेव । बौद्धार्थस्य बौद्धेन शब्देनाविभागात्तन्मूलाभेदाध्यवसायेन शब्दादर्थाकारवृत्तौ जायमानायां स्वाकारस्यापि समर्पणमिति शब्दस्यापि विषयता । अत एव शब्दे ग्राह्यत्वग्राहकत्वरूपशक्तिद्वयस्वीकारः । तत्र तात्पर्यवशाद्बहुधा शब्दप्रकारको बोधः । अर्थे[1] बाधे तु गौरित्ययमाहेत्यादौ अनुवादे शब्दविशेष्यकः । अनुकरणे शब्दमात्रविशेष्यकः ।

एवमर्थेनापि स्वाकारसमर्पणे तत एव शब्दाकारस्यापि समर्पणमिति सर्वं ज्ञानं शब्दानुविद्धम् ।

तदुक्तम्—

१ अर्थबाधे इतिपाठः कुं० कखपु० ।

न सो ऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति।

उत्तरार्द्धेनानुव्यवसायः प्रमाणं दर्शितम्। अत एव चक्षुषा दृश्यमानमप्यज्ञातबोधकं पदार्थं 'किमिदमिति न जानामि' इति व्यवहरन्ति। तदुपदेशे च 'ज्ञातम्' इति व्यवहरन्ति॥ ८॥

(कुं० टी०) *बहुधेति। नलादिपदघटादिपदेभ्यो विशेष्यस्यानेकधा भानात्। उपमितौ अयं गवयपदवाच्य इत्यादिना बहुविधत्वात्। *अर्थबाधेत्विति। अर्थस्योच्चारणासम्भवात्। *शब्दविशेष्यक इति। अर्थविशिष्टशब्दबोध इत्यर्थः। *शब्दमात्रेति। तत्रार्थस्य अप्रतीतिरेव। *तत एवेति। शब्दार्थयोरभेदादेवेत्यर्थः। *अनुविद्धमिति। शब्दार्थयोरभेदे शब्दपूर्वकत्वस्यैव न्याय्यत्वात्। *अनुव्यवसायः प्रमाणमिति। प्रत्यक्षे शब्दादीनां विषयत्वासम्भवात्तदुत्तरोत्पन्ने ऽनुव्यवसाये शब्दो विषय इत्यर्थः।[1]तथाचानुव्यवसायस्य प्रामाणिकत्वं दर्शितमित्यर्थः। अनुव्यवसाय एव ज्ञानस्य भानादुक्तम् *उत्तरार्द्धेति। *अत एव–शब्दानुविद्धत्वादेव। *अज्ञातबोधकमिति। न ज्ञातो बोधको वाचको यस्य तम्। शब्दानुविद्धस्यैव भानात् वाचकशब्दाज्ञाने ऽर्थस्याप्यज्ञातत्वव्यवहार इत्यर्थः॥ ८॥

तुरुक्तवैलक्षण्ये। ननु सामान्यतो ऽत्रापि अर्थज्ञानमत-आह *अस्येति। अयं (शब्दः) सार्थकः पदत्वात् घटादिशब्दवत्। नलादिपदं किञ्चिद्वाचकं साधुपदत्वादिति वा। एवेन शब्दत्वनिरासस्तत्र। 'अथैवंशब्दोऽपि' इति शब्दस्य प्रागुक्तं स्वप्रकाशत्वमाह *बौद्धार्थेति। तयोस्तद्रूपत्वादित्यर्थः। *तन्मूलेति बाह्यशब्दार्थयो-

१ तथा—त्यर्थः पाठोऽयं कुं० कपु० नास्ति।

रित्यर्थः। *अतएव-शाब्दे तस्यापि विषयत्वादेव । ऐकरूप्येण सर्वत्र तथाऽसत्त्वादाह *तत्रेति । तस्य तद्विषयत्वे इत्यर्थः । एवं शाब्दे उक्त्वा प्रत्यक्षादावप्याह *एवमिति । तद्वदित्यर्थः । *तत एव अविभागमूलाभेदाध्यवसायादेव । *तदुक्तम्, हरिणा । *प्रत्ययः-विशिष्टज्ञानम् । *शब्दानुगमात्-शब्दविषयकत्वात् । इदमेव तदनुविद्धत्वम् । प्रत्यक्षादौ तदसत्त्वादाह *इवेति । भासत इत्युक्तिस्वारस्यादाह *उत्तरेति । *अतएव—तस्य तदनुविद्धत्वादेव । बाधकः-शब्दः । अन्यथाऽर्थदर्शनसत्त्वेनैतदसङ्गतिः स्पष्टैव । तस्मात्तदंशमादायैवमिति भावः ॥ ८ ॥

एतेन मणिमन्त्रादिन्यायेन तत्पदवाच्यत्वग्रहो विशेषधर्मप्रकारेण ज्ञाने तथा व्यवहारे ऽनुव्यवसाये च हेतुरिति नैयायिकनव्योक्तमपास्तम् ।

मणिमन्त्रादिन्यायेन कारणत्वकल्पनापेक्षयाऽस्मदुक्तस्यैवौचित्यात् । तद्ग्रहे सति स्मृतस्य तस्य भाने बाधकाभावात् । तदर्थं प्रतिबन्धककल्पने गौरवम्, अनुभवविरोधश्च ।

किञ्च,पिकपदशक्तिग्रहवतः 'अयं कोकिल' इत्यनुव्यवसायापत्तिः । तव पिकत्वकोकिलत्वयोरभेदात् । मम तु तत्तत्पदभानान्न दोषः ।

अत एव कणादसूत्रवृत्तिकृद्भिः कीर्तिदिङ्नागादिभिः 'नामसंसर्गविषयकत्वम्' सविकल्पकलक्षणमुक्तम् । पातञ्जलानामपीत्थमेव सविकल्पकलक्षणं संमतम् ।

एतेन ज्ञानं शब्दाननुविद्धमेव, अर्थज्ञानस्य वाचकशब्दाभावात् । अर्थवाचकेनेनिकरणयुक्तेन 'घट इति जानामि' इति तद्व्यवहार इत्यपास्तम् ।

"इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति प्रत्यक्षलक्षणे ऽव्यपदेश्यत्वविशेषणं वदता गौतमेन शाब्दज्ञाने शब्दभानाङ्गीकाराच्च । 'अव्यपादिश्यमानत्वं च व्यपदेशाविषयकत्वम् । व्यपदेशश्चार्थवाचकः शब्द' इति तद्भाष्ये स्पष्टम् ।

एवं चान्यत्र तदभानाग्रहो मुधेति पातञ्जलानामाशयः । "शब्दविषयकत्वेन प्रत्यक्षस्य शाब्दत्वापत्तिः" इति वदता वात्स्यायनेन शब्दजबोधस्य शब्दविषयकत्वमुक्तप्रायमेव । "शब्दविषयकत्वमेव शाब्दत्वम् नतु शब्दजन्यत्वम्" इति तत्रैव वाचस्पतिमिश्रैरुक्तम् ॥ ९ ॥

*मणिमन्त्रादीति ।

अयं भावः—'ह्रदो वह्न्यभाववान्' इतिनिश्चयानन्तरं 'ह्रदो वह्निमान्' इति बुद्धेरनुदयात्तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयः प्रतिबन्धकः । तत्र च ग्राह्याभावानवगाहित्वे ऽपि यथा दाहं प्रति मण्यादेर्विशिष्यैव प्रतिबन्धकता एवं चैत्रत्वादिना विशिष्य शक्तिग्रहाद् बोधादिरित्यर्थः ।

*अस्मदुक्तेति । बौद्धाकारेति प्रागुक्तत्वात् । *तद्ग्रहे—तदर्थग्रहे । *तस्य—शब्दस्य । *बाधकाभावादिति । शब्दार्थयोर्नित्यसम्बन्धित्वात् । पदाभाने दोषान्तरमाह *किं चेति । *नामेति । नामाविषयकत्वं संसर्गविषयकत्वं चेत्यर्थः । चाक्षुषेऽपि नामवैशिष्ट्यमस्त्येव । सुरभि चन्दनमितिवन्नामांशे उपनीतभानसम्भवात् । नामांशे स्मरणं वा । अभावज्ञाने प्रतियोगि-

स्मरणवत् । *वाचकशब्दाभावादिति । पदार्थादिज्ञानस्य शब्दवाच्यत्वाभावादित्यर्थः । तथा च न शब्दानुविद्धं ज्ञानं ज्ञानशब्दयोः सम्बन्धित्वाभावात् । *इतिकरणेति । घटार्थवाचक इतिकरणयुक्तो यो घटादिशब्दः तेन ज्ञानस्य व्यवहार इत्यर्थः । *इन्द्रियार्थेति । इन्द्रियविषयसन्निकर्षेणोत्पन्नमित्यर्थः । यद्यपि मनोरूपेन्द्रियजन्यं सर्वं ज्ञानं तथापीन्द्रियत्वावच्छिन्नजनकता विवक्षिता । मानसप्रत्यक्षे तु मनस्त्वेन जनकता । ईश्वरप्रत्यक्षस्य त्वजन्यत्वेऽपि जन्यप्रत्यक्षस्यैवेदं लक्षणम् । *अव्यभिचारीति । भ्रमभिन्नमित्यर्थः । प्रत्यक्षं विभजते *अव्यपदेश्यमिति । निर्विकल्पकमित्यर्थः । व्यपदेशः शब्दप्रयोगः । स च विशिष्टज्ञानादेवेति व्यपदेशानर्हत्वान्निर्विकल्पकलाभः । *व्यवसायात्मकमिति । विशिष्टज्ञानात्मकमित्यर्थः । शाब्दप्रमाया अप्येकपदार्थेऽपरपदार्थसंसर्गरूपयोग्यताजन्यत्वेनातिव्याप्तिवारणाय *इन्द्रियेति । त्वङ्मनोयोगजन्यानुमिताव तिव्याप्तिवारणाय *अर्थेति । सर्वांशे कामिनीत्याद्यलौकिकप्रत्यक्षे इन्द्रियार्थजन्यत्वाभावादव्याप्तिवारणाय *संनिकर्षेति । चक्षुःकपालसंयोगजन्ये चक्षुर्घटसंयोगेऽतिव्याप्तिवारणाय *ज्ञानमिति । न चैवमप्यात्ममनोयोगजन्यात्मानुमितावतिव्याप्तिरिति वाच्यम् । ज्ञानपदमाहिम्ना विषयतासम्बन्धावच्छिन्नेन्द्रियार्थसंनिकर्षजन्यत्वलाभात् ।

अथ गुडं भुङ्क्ते इत्यत्र गुडत्वस्येव मधुरत्वस्यापि प्रकारतया तत्प्रकारकशाब्दबोधवारणाय तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मप्रकारकशक्तिज्ञानस्य हेतुत्वं वाच्यम् । एवं च घटत्वावच्छिन्नप्रकारताशालिशाब्दबोधं प्रति तादृशशक्तिज्ञानस्य हेतुतया कथं घटशब्दत्वादेः प्रकारतावच्छेदकतया भानं

घटशब्दस्य घटशब्दवाच्ये शक्तिरिति शक्तिग्रहाभावात्। यत्तु सम्बन्धिज्ञानाविधया शब्दस्य भानमिति। तन्न। हस्तिपकशब्दाद्धस्तिनोऽपि बोधापत्तेरिति चेद्। शब्दांशे स्मरणात्मकबोधस्यैवोपगमात्।

*अन्यत्र—शाब्दबोधे। *तदभानेति। शब्दाभानस्याग्रहो व्यर्थ इत्यर्थः। *वात्स्यायनेन—न्यायभाष्यकृता।

तत्र हि—'रूपम्' इति जानातीत्याकारकं प्रत्यक्षं भवति। रूपादिशब्दाश्च विषयनामानि तथा च नामधेयशब्देन व्यपदिश्यमानत्वात्प्रत्यक्षस्य शाब्दत्वापत्तिरित्याशङ्कायामव्यपदेश्यमिति सूत्रांशो ऽवतारितः।

तस्यायं भावः—रूपादिप्रत्यक्षकाले नामधेयशब्दस्य न कोऽपि व्यापारः किं तु व्यवहारकाले रूपमिति जानातीत्यादिः। तस्मादशाब्दं प्रत्यक्षमिति।

*उक्तप्रायम्—अत एव ज्ञानजन्यत्वे सति शब्दज्ञानाजन्यत्वमनुमितिलक्षणमभिधाय मननजन्यतत्त्वज्ञाने नातिव्याप्तिः तत्त्वमसीत्यादिशब्दाविषयकत्वादिति तार्किका अपि वदन्ति। *न तु शब्दजन्यत्वमिति। विषयविधया शब्दप्रत्यक्षेऽतिव्याप्तेः।

यत्तु यत्र विभिन्नविषयकानुमितिसामग्रीकाले शाब्देच्छाबलाच्छाब्दबोधः, तत्र शब्दविषयकत्वासम्भवः। न। 'शब्दशाब्दं जायताम्' इत्याकारकेच्छाया एवोत्तेजकतया तदिच्छाविरहविशिष्टानुमितिसामग्र्याः प्रतिबन्धकत्वात् तत्र शाब्दबोधाभावात्। तदिच्छाया अप्युत्तेजकत्वे तु तत्तदिच्छाभावकूटानां विशेष्यविशेषणभावे विनिगमनाविरहाद्गौरवमित्यर्थ-

इति । तन्न । शाब्दबोधमात्रस्यैव शब्दविषयकतयैकविधेच्छाया एवोत्तेजकत्वात् ॥ ९ ॥

एतेनेत्यस्यार्थमाह *मणीति । औचित्ये हेतुमाह *तद्ग्रहे सतीति । तत्तत्पदवाच्यत्वग्रहे सतीत्यर्थः । *तस्य-शब्दस्य । *तदर्थम्-विशेषधर्मप्रकारकबोधार्थम् । अभ्युपेत्यापि गौरवादिकमाह *किञ्चेति । *कोकिल इति । जानामीति शेषः । *तत्तत्पदेति । अत एवोक्तद्वन्द्वोपपत्तिरपीति बोध्यम् । शब्दानुविद्धत्वं परसंमतमपीत्याह *अतएवेति । शब्दविषयकत्वादेवेत्यर्थः । तेषां बहूनां सत्त्वादाह । *कीर्त्तीति । *नामेति । उभयविषयकत्वमित्यर्थः । अन्यसम्मतिमप्याह *पातञ्जलेति । *एतेन-पातञ्जलादिविरोधेन । *ज्ञानम्—प्रत्यक्षादि । नन्वेवं कथं तद्व्यवहारो ऽत आह *अथैति । दोषान्तरमाह *इन्द्रियार्थेति । ननु कथं ततस्तदङ्गीकारो ऽत आह *अव्यपेति । *एवंच-तथा तदुक्तौ च । *अन्यत्र-शाब्दे । *तदेति । तस्य शब्दाभानस्याऽऽग्रहो ऽभिनिवेश इत्यर्थः । तद्भाष्यादिसङ्गतमपीदमित्याह *शब्देति । तत्पदकृत्यव्याख्यावसरे इति भावः । तदाशयमाह *शब्देति ॥ ९ ॥

स्वंरूपमितिसूत्रे भाष्ये स्पष्टमेतत् ।

तत्र हि—

“न वा एतद्वक्तव्यम् । किं कारणम् । शब्दपूर्वको ह्यर्थे सम्प्रत्ययः । आतश्च शब्दपूर्वो यो ऽपि ह्यसौ नाम्नाऽऽहूयते नाम च यदाऽनेन नोपलब्धं भवति तदा पृच्छति किं भवानाहेति । शब्दपूर्वकश्चार्थस्य संप्रत्ययः । इह शास्त्रे शब्दे सम्भवादर्थेऽसम्भवादर्थस्य निवृत्तिः” इत्युक्तम् । शब्दपूर्वको हीत्यस्य श्रोतुः शब्दज्ञानपूर्वकोऽर्थप्रत्यय इति लोके प्रसिद्धमित्यर्थः । अन्वयमुक्त्वा व्यतिरेकमाह-आ-

तश्चेति । प्रकारान्तरमाह—शब्दपूर्वकश्चेति । शब्दविशेषणक इत्यर्थः । तेनार्थे ऽसम्भवेन कारणत्वेन विशेषणत्वेन चोपस्थिते शब्दे कार्यमिति भावः । चकारेणास्य युक्त्यन्तरत्वमेवोचितम् । "मन्त्रे यजुषीति च च यदुच्यते तत्र मन्त्रशब्दादौ कार्यासम्भवेन मन्त्रादिसहचरिते ऽर्थे भविष्यति" इति भाष्यप्रतीके कैयटेन स्पष्टमेवोक्तम् "साहचर्यं च शब्दानुविद्धस्यैवार्थस्यावगमाद्" इति ।

किञ्च प्रत्यक्षादावपि विषयताभाननियमानिर्वाहाय पदभानमावश्यकम् । यज्ज्ञानं यत्पदादिविषयं तत् तज्जन्यबोधधियाविषयतासमानविषयताकमिति नियमात् ॥ १० ॥

(कुं० टी०) *न वा एतदिति । स्वरूपमिति सूत्रं न वक्तव्यमित्यर्थः । *शब्दपूर्वको हीति । शब्दज्ञानपूर्वको हीत्यर्थः । उपलब्धस्यैव हि शब्दस्यार्थबोधकत्वं न तु चक्षुरादिवत्सत्तामात्रेण बोधकत्वमिति भावः ।

अयमाशयः—अतरङ्गत्वादहेयत्वादसाधारणत्वाच्च स्वरूपमेव मुख्यमर्थः । शब्दार्थयोश्चाभेदाच्छब्दगतैव जातिरर्थ आरोप्यते । अत एवोक्तं हरिणा—

तथा शब्दार्थसम्बन्धाच्छब्दे जातिरवस्थिता ।
व्यपदेशेऽर्थजातीनाञ्जातिकार्याय कल्पते ॥ इति ।

*शब्दपूर्वकश्चेति । शब्दपूर्वको हीत्यर्थः । *व्यतिरेकमिति । शब्दज्ञानाभावे ऽर्थज्ञानाभावादिति भावः । *युक्त्यन्तरत्वमेवेति । 'यतः शब्दपूर्वक' इति पूर्वहेतुतया न व्याख्येयमि-

त्यर्थः। *मन्त्रइति। मन्त्रशब्दादिग्रहणवारणाय अशब्दसंज्ञेति निषेध इत्याशङ्क्य भाष्यकार आह "लक्ष्ये मन्त्रशब्दग्रहणासम्भवादर्थस्य ग्रहणं भविष्यति" इति। कैयटोक्तिमेवाह *साहचर्ये चेति। *यज्ज्ञानमिति। दृष्टं च शाब्दबोधे घटज्ञानं घटपदविषयकम्। *यज्ज्ञानम्—घटज्ञानम्। *यत्पदादिविषयम्—घटादिपदविषयम्। *तद्—घटज्ञानम्। *तत्पदजन्येति। घटपदजन्येत्यर्थः। घटपदजन्यबोधे या विषयता तत्समानविषयताकमित्यर्थः। एवं च प्रत्यक्षेऽपि पदविषयताऽऽवश्यकी। तथाच विषयताऽपि शक्यैवेति भावः। *समानेति। शाब्दबोधे यावन्तो विषयास्ते प्रत्यक्षे ऽपीत्यर्थः॥ १०॥

(क०टी०) *एतत्—स्वरूपमिति। *अर्थस्येति। अर्थबोधकशब्दान्तरस्य निवृत्तिरित्यर्थः। न चार्थज्ञानोत्तरं परं प्रति तद्बोधनाय शब्दप्रयोग इति कथं शब्दपूर्वकत्वमर्थप्रतीतेरत आह *श्रोतुरिति। तदर्थमाह *प्रसिद्धमिति। *तेन—प्रकारद्वयेन। *उपस्थिते—तत्रैव। ननु पूर्वोपसंहार एवायं कुतो नेत्यत आह *चकारेति। अत एव षष्ठ्यन्तोल्लेखो ऽपीति बोध्यम्। निषेधप्रतियोगिज्ञानार्थे न्यायसिद्धस्यापि विध्यंशस्यानुपादानार्थं सूत्रमिति तदग्रे शङ्कितफलान्तरखण्डनपरभाष्यमाह *मन्त्रइति। *कैयटेन—तेनापि। युक्त्यन्तरमाह *किञ्चेति। आदिना अनुमित्यादि। अपिना शाब्दसमुच्चयः। भाननिर्वाहस्यान्यतोऽपि जायमानत्वादाह *नियमेति। *पदेति। सर्वत्रेत्यादिः। ननु 'अन्यद् भुक्तमन्यद्वान्तम्' इति बाधितमिदमत आह *यत्ज्ञानमिति। आदिना वाक्यम्। यथासंख्यमन्वयः॥ १०॥

संनिकर्षादिभिस्तु न व्यवस्था, 'घटो रूपवान्' इतिज्ञानवत् 'घटस्य रूपम्' इतिरूपविशेष्यकज्ञानस्यापि तेन संनिकर्षेण जननात्। घटरूपोभयविषयकज्ञानस्य तत्संस्कारस्य वा पूर्वं सत्त्वेन यदा यज्ज्ञानं पूर्वं

तदा तस्य विशेषणतेत्यप्ययुक्तम् । विशेषणज्ञानस्ये-व विशेष्यज्ञानस्यापि विशिष्टबुद्धिकारणत्वात् । अ-न्यथा 'किञ्चिद्रूपवद्' इत्येव स्यात् न तु 'घट'इत्यादि[2] विशेष्यताग्रहदशायां तदनुत्पत्त्या । किञ्च, यथा विशि-ष्टस्य वैशिष्ट्यमिति बुद्धौ विशेषणतावच्छेदकप्रकार-कनिश्चयस्य कारणत्वेऽपि लाघवाद्विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणमिति कल्प्यते, अत एव निर्वि-कल्पकसिद्धिः, तथा विशिष्टे वैशिष्ट्यमिति वि-शेष्यतावच्छेदकप्रकारकविशेष्यज्ञानस्य कारणता-याः सर्वेषामावश्यकत्वेन विशिष्टबुद्धित्वमेव वि-शेष्यज्ञानस्य लाघवात्कार्यतावच्छेदकमुचितम् । 'घट' इत्यादिविशिष्टबुद्धावपि विशेषणज्ञानवत् नि-र्विकल्पकविशेष्यज्ञानमपि सुलभम् । अत एव 'घट-घटत्वे' इति निर्विकल्पकाकारमाहुः ॥ ११ ॥

(कुं०टी०)ननु यथा संयुक्तसमवायबलाद्रूपस्य प्रत्यक्षं तथा संयुक्तविशेषणताबलादेव विषयताभानं सिद्धं किमर्थं विषयताया वाच्यत्वमत आह *सन्निकर्षादिभिस्त्विति । कदाचिद् रूपस्य विशेषणता कदाचिच्च विशेष्यता भवति तथा प्रकारत्वादीना-मप्यनियमः स्यादिति भावः ।

एतेन पदानां स्वपरत्वे लक्षणैव न शक्तिः, अन्यल-भ्यत्वात् । प्रत्यक्षोपस्थितत्वात् शब्दस्यापि भानमिति तु न युक्तम् । वृत्त्यभावे 'प्रत्ययानां प्रकृत्यर्थान्वित-' इति

---

१ विशेष्यतावच्छेदकरूपेण विशेष्याग्रहदशायां तदनुत्पत्त्या पाठोऽयं कखमूलपु० अधिकः ।

२ विशेष्य-त्पत्त्या इति पाठः नास्ति कखपु० ।

न्यायविरोधात् प्रत्ययार्थान्वयानापत्तेः । अत एव वृत्तिं विनापि पदस्य भानं स्वभावात् । अन्यबोधनेऽतिप्रसङ्गवारणाय वृत्तिरपेक्षिता न तु स्वबोधनेऽपीत्यपि न वक्तव्यमित्यपास्तम् ।

*घटरूपेति । यदा यस्य पूर्वं ज्ञानं तदा तस्य विशेषणतेत्यर्थः । *विशेष्यज्ञानस्यापीति । तथा च विशेष्यस्य पूर्वं ज्ञातत्वे विशेषणत्वापत्तिः । *किञ्चिदिति । विशेष्यरहितमपि प्रतीयेतेत्यर्थः । *न तु घट इत्यादीति । 'रूपवान् घट' इति बुद्धिर्न स्यादित्यर्थः । अत्रैव हेतुमाह *विशेष्याग्रहेति । *तदनुत्पत्त्या—रूपविविशिष्टघटज्ञानानुत्पत्त्या । *विशिष्टस्येति । 'रक्तदण्डवद् भूतलम्' इत्यत्र रक्तत्वविशिष्टदण्डस्य वैशिष्ट्यं भूतले भासते । तत्र रक्तत्वप्रकारकनिश्चयः कारणम् । 'रक्तो दण्डो न वा' इति संशयानन्तरं तदनुदयादिति भावः ।

ननु निश्चयत्वेनैव हेतुत्वे 'रक्तो दण्डो न वा' इति संशयानन्तरं 'रक्तदण्डं संदेह्मि' इति विशिष्टविषयकोऽनुव्यवसायो न स्यादिति चेत् ।

सत्यम् । तादृशानुव्यवसायो दण्डे रक्तत्वाभावावगाही 'दण्डे रक्तत्वं सन्देह्मि' इत्याकारक एव । 'घटवद् भूतलम्' इति विशिष्टबुद्धौ तु विशेषणतावच्छेदकप्रकारकज्ञानमेव कारणं न तु निश्चयत्वगर्भम् । 'अयं घटो न वा' इति संशयानन्तरमपि तादृशबुद्ध्युदयात् ।

ननु 'घटत्वप्रकारकघटविशेष्यकज्ञानवानहम्' इत्यनुव्यवसायबलादस्तु सविकल्पकस्य प्रत्यक्षसिद्धत्वं निर्विकल्पकस्वीकारे तु मानाभाव इत्यत आह *अत एवेति । विशेषणज्ञानस्य कारणत्वादेवेत्यर्थः । घटत्वज्ञानं विना घटत्वप्रका-

रकज्ञानं न सम्भवतीति भावः ।

ननु अन्यथासिद्धत्वाद्विशेषणज्ञानं न कारणमिति चेन्न ।

स्वरूपतो 'घट' इति विशिष्टबुद्धिं प्रति स्वरूपतो घटत्वज्ञानस्य हेतुतया 'जातिमान्' इति बुद्धिं प्रति जातित्वेन हेतुतया विशेषणज्ञानस्य हेतुतासिद्धेः ।

*विशिष्टइति । 'रक्तदण्डः प्रमेय' इत्यत्र रक्तत्वविशिष्टे दण्डे प्रमेयत्ववैशिष्ट्यज्ञानम् । *घटघटत्वेइति । व्यक्तिं विना जातेरभानाद्व्यक्तिरपि भासते । तदुभयसंसर्गस्तु फलबलाद्भासत इति भावः । ननु चक्षुस्संयुक्तसमवायरूपकारणबलात्सम्बन्धस्यापि भानं दुर्वारमिति चेद् एवं तर्हि निष्प्रकारकत्वादेव निर्विकल्पकत्वम् ॥ ११ ॥

(क० टी०) परोक्तिं खण्डयति *सन्नीति । आदिनाऽनुमित्यादिसामग्रीपरिग्रहः । *तेनेति । तथा च विपरीतबोधापत्तिरपीति भावः । तदुक्तं युक्त्यन्तरं खण्डयति *घटेति । कालान्तरे तदभावादाह *तत्संस्कारेति । विशेष्यताऽवच्छेदकरूपेणेत्याद्यपपाठः । *तदिति । विशिष्टबुद्धीति । *अन्यथा–तस्याकारणत्वदशायामित्यर्थः । ननु विशेष्यज्ञानस्य कारणत्वं विशिष्टे वैशिष्ट्यमितिबुद्धावेव परसंमतं सर्वावश्यकं च न विशिष्टबुद्धिमात्रे इति हेत्वासिद्धिरत आह *किञ्चेति । पररीत्यैव तत्सिद्धिरित्याह *यथेति । तयोस्तत्त्वयोः स्वीकारे गौरवेण लाघवादनयोरेव तत्त्वयोः स्वीकार इति भावः । अस्यावश्यकत्वमाह *अत एवेति । तस्य तं प्रति कारणत्वादेवेत्यर्थः । *कारणताया इति । अन्वयव्यतिरेकाभ्यामिति भावः । नन्वेवं 'घट' इत्यादिविशिष्टबुद्धिर्न स्याद्विशेष्यज्ञानरूपकारणाभावादत आह * घट इति । *आहुः—परे ॥ ११ ॥

ये तु निर्विकल्पकं नेच्छन्ति, विशेषणज्ञानकारण-

---

१ कलानुरोधी कखमूलपुस्तकयोः ज्ञानादिकारणत्वं चेति पाठः ।

त्वादिकं च नेच्छन्ति, संनिकर्षेणैव विशिष्टज्ञानमिच्छन्ति तेषां त्वनुपपत्तिरेव ।

घटादिपदजबोधे विषयताभाने तु घटादिपदानां घटत्वविशिष्टे शक्तिरिति शक्तिग्रहो नियामकः । घटत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नेशक्तिरिति तदर्थः । अत एव विषयताविषयको ऽनुव्यवसायः । स्वरूपतो विषये विद्यमानस्य पदार्थस्यानुव्यवसाये भाने तु आम्रफलादिविषयकज्ञानानुव्यवसाये माधुर्यादीनामपि विषयतापत्तिः। कुब्जखञ्जः खञ्जकुब्जः इत्यादौ विषयताभानं विना बोधे[1] विशेषस्योपपादयितुमशक्यत्वाच्च । सम्बन्धस्य स्वरूपसम्बन्धेनैव भानवद् विषयतानां स्वरूपत एव भानं न कयापि विषयतयेति नानवस्था । न च विषयतानां कार्यकारणभावबलादेव बोधः । तद्बोधकारणतानियामकत्वेन शक्तिकल्पनावश्यकत्वात् ॥१२॥

(कुं०टी०)*विशेषणज्ञानेति। युगपद्विशेषणविशेष्येन्द्रियसंनिकर्षेणैव विशिष्टबुद्ध्युत्पत्तौ विशेषणज्ञानहेतुत्वे मानाभावः। एवं च विशेषणज्ञानसंपादकतयाऽपि निर्विकल्पकस्वीकार इति भावः।ननु विशेषणज्ञानहेतुतामतेऽपि स्मरणं प्रति विशेषणज्ञानं न कारणम् विशेषणज्ञानशून्यकाले संस्काराभावादेव स्मरणासंभवात्, तथा च विशिष्टस्मरणमेव कारणमस्तु किं निर्विकल्पेनेति चेत् । अपूर्वचैत्रत्वादिस्मरणाभावेन विशिष्टबुद्धिर्न स्यादिति । *सन्निकर्षेणैवेति । संनिकर्षस्यैव हेतुतामिच्छन्तीत्यर्थः । *अ·

---

१ कुं० कखपु० बोधशब्दाघटितः पाठः ।

नुपपत्तिरेवेति । विशेष्यविशेषणभावेऽनियमापत्तिरित्यर्थः ।

तार्किकास्तु प्रत्यक्षे एव विशेषणतावच्छेदकप्रकारकनिश्चयादेः कारणतां वदन्ति । खलेकपोतन्यायेन तैः शाब्दबोधस्वीकारेण शाब्दबोधादौ पदार्थोपस्थित्यादेरेव नियामकत्वात् ।

ननु विशेषणज्ञानहेतुतयैव गतार्थत्वाद्विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वे मानाभावः । सत्यम् । घटत्वादिनिर्विकल्पकानन्तरं 'घटो नास्ति' इति प्रत्यक्षवारणाय प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वकल्पने गौरवात् ।

ननु पदानुपस्थितस्य विषयत्वस्य भाने हेत्वभावोऽत आह *विषयताभानेत्विति । घटादिवत् घटनिष्ठा विषयता ऽपि भासत इत्यर्थः । *घटत्वानिष्ठेति । एवं च प्रकारत्वादिघटितधर्मस्य वाच्यत्वे प्रकारत्वादीनामपि वाच्यत्वं सिद्धमित्यर्थः । *विषयताविषयक इति । 'घटत्वप्रकारकज्ञानवानहम्' इत्यादिः । *स्वरूपतइति । शक्तिग्रहाविषयस्यापि पदार्थस्य भाने त्वित्यर्थः । *कुब्जखञ्जइति । अत्र कुब्जत्वनिष्ठैव प्रकारता । ननु विषयताभाने तत्रापि विषयत्वान्तरापत्तिरत आह *स्वरूपेति । न तु सम्बन्धान्तरेत्यर्थः । *बलादेवेति । घटत्वप्रकारकशाब्दबोधं प्रतीत्यादिनेत्यर्थः । * तद्बोधेति । घटत्वे प्रकारताबोधार्थं प्रकारतांशेऽपि शक्तिरावश्यकीत्यर्थः ॥१२॥

(क०टी०)परमतं खण्डयति *येत्विति । आदिना विशेष्यज्ञानपरिग्रहः । नन्वेवं विशिष्टज्ञानस्याकस्मिकत्वापत्तिरत आह *सन्नीति । अनुपपत्तिरेव व्यवस्थाभावरूपा । ननु शाब्दे विषयताभाने एवोक्तनियमसिद्धेष्टार्थसिद्धिः, तत्रैव किं मानमत आह *घटादिपदेति । *इति—इत्याकारकः । ननु तस्य घटत्वभाननियामकत्वे ऽपि न विषयताभाननियामकत्वम् अशाब्दत्वात्तस्या अत आह *घटत्वेति ।

ननु यथाश्रुत एव तस्य कुतो नार्थः, अत आह *अत एवेति । तत्र शक्तिग्रहेण व्यवसाये तद्भानादेवेत्यर्थः । तत्र तत्त्वस्यान्यथासिद्धिं निराचष्टे *स्वरूपत इति । अन्यथाऽनुपपत्त्यापि शाब्दे तद्भानमावश्यकमित्याह *कुब्जेति । शब्दादिभानस्य तुल्यत्वादिति भावः । नन्वेवं प्रकारत्वादेरपि विषयताऽन्तरेण भाने ऽनवस्थापत्तिरत आह *सम्बन्धस्येति ॥ १२ ॥

समर्थसूत्रे भाष्ये च जहत्स्वार्थावृत्तिव्युत्पादनावसरे राजपुरुष इत्यादौ वाक्ये राजपदार्थे विद्यमानविशेष्यत्वरूपस्वार्थस्य त्याग इत्युक्तम् । एवं च ऋष्यनुभवसिद्धं विषयताभानं तच्छक्यत्वं च ॥१३॥

(कुं० टी०) *विशेष्यत्वरूपस्वार्थस्येति ।

अयं भावः—राजत्वनिष्ठप्रकारतानिरूपिता या विशेष्यता तदवच्छिन्नो राजपदार्थः । वृत्तौ तु राजपदार्थस्य विशेषणत्वाद्विशेष्यत्वरूपस्वार्थस्य त्यागः । राजरूपार्थस्य तु त्यागाभावान्न तत्प्रयुक्तजहत्स्वार्थत्वमिति ।

*तच्छक्यत्वञ्चेति । विषयतया भानं शक्यत्वं चानुभवसिद्धमित्यर्थः ॥ १३ ॥

(क० टी०) ननु घटत्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्नघटबोधं प्रति घटपदज्ञानं कारणमितिरीत्या सर्वत्र तद्विशिष्टे शक्तग्रहे ऽपि विशेषबोधः सुलभो ऽत आह *समर्थेति । *च-अपि । *इत्यादावित्यस्य त्याग इत्यत्रान्वयः । *वाक्ये-राज्ञः पुरुष इत्यादौ । *इत्युक्तमिति ।

तत्र हि-वाक्याद् वृत्तेर्निष्पत्तिरिति वादिनां मते किं वृत्तिलक्षणमिति प्रश्ने ऽन्यदीयमर्थं यत्रान्यशब्दोऽभिधत्ते आस्कन्दति सा वृत्तिर्यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थो ऽभिधीयत इत्यर्थकम्परार्थाभिधानं वृत्तिरित्युक्त्वा, ननु स्वार्थे वर्त्तमानस्य तत्त्यागं विना कथमर्थान्तराभिधायकत्वमि

त्याशङ्क्यैवं तर्हि जहत्स्वार्थेत्युक्त्वा, पुरुषमात्रस्य तर्ह्यानयनं प्राप्नोतीत्याशङ्क्य सिद्धान्तिनोक्तम्-"नैष दोषः । जहदप्यसौ नात्यन्ताय जहाति । यः परार्थविरोधी स्वार्थस्तं जहाति । तद्यथा-राजकर्मणि प्रवर्त्तमानस्तक्षा स्वकीयं तक्षकर्म जहाति नतु हिक्कितहसितकण्डूयितादीनि । नचायमर्थः परार्थविरोधी विशेषणं नाम, तस्मान्न हास्यति" इति । नात्यन्तायेति । सर्वथा त्यागे ऽनुपादानमेव तस्य स्यादिति भावः । नचायमर्थ इति । यद्यपि वाक्येऽपि राजार्थो विशेषणमेव तथापि तत्तत्पदाद्विशेष्यतयैवोपस्थितेः पदार्थैकदेशतया न विशेषणत्वसम्बन्धप्रतिपादने सामर्थ्यम् । एवं च वाक्ये विद्यमानस्य विशेष्यत्वरूपस्वार्थस्य त्याग इति तदर्थः । विषयतायाः पदाशक्यत्वे तस्याः स्वार्थत्वाभावात्तत्त्यागे ऽपि जहत्स्वार्थत्वोक्तिसम्भवाभावः, "यःपरार्थविरोधी स्वार्थस्तं जहाति" इति भाष्याक्षरासामञ्जस्यं च । परार्थविरोधीत्यस्य हि "राजपदेन परार्थस्य पुरुषरूपार्थस्यास्कन्दने तद्विशेषणत्वेन राजरूपार्थोपस्थितौ राजरूपोऽर्थः स्वतो न विरोधी किन्तु तद्गतविशेष्यत्वमेव विरोधिभूतम्, अतो राजरूपार्थं न हास्यति किन्तु तद्गतविशेष्यतारूपमेव स्वार्थं तदास्कन्दनविरोधिभूतं त्यजति" इत्यर्थ इति ।

*एवं च-तथोक्तौ च । शाब्दे इति भावः ॥ १३ ॥

अत एव "व्यक्त्याकृतिजातयस्तु पदार्थः" इति सूत्रे न्यायवार्तिककृतोक्तम्-"तुशब्दो विशेषणार्थः । किं विशेष्यते? प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वम्" इति । 'प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्य' इति प्रस्तावेऽपि न्यायवार्त्तिककृतोक्तम्-"अनित्यः शब्दः कृतकत्वादित्यनुमाने शब्दस्य सिद्धत्वेन साध्यत्वं न भवतीति प्रज्ञापनीयेत्यादि । नापि शब्देऽनित्यत्वं साध्यम् । कृतकत्वेन हेतुना साध्यस्य योगाभावात् । अनेन परम्परासम्बन्धत्वं दर्शितम् । *किंचानित्यत्वमपि घटादौ सिद्धम् । तस्मादन्यधर्मत्वेन प्रज्ञातस्यानित्यत्व-

* नचानित्यत्वमिति पाठः कुञ्जिकासंमतः, नतु कलायाः संमतः ।

स्य धर्मिणा शब्देन यो विशेष्यविशेषणभावः स साध्यः। स चोभयाश्रयः। धर्मी विशेष्यः धर्मो विशेषणम्" इति। अनेन ज्ञाने विषयताभानं स्पष्टमेवोक्तमित्यन्यत्र विस्तरेण निरूपितम्॥ १४॥

(कुं०टी०) *व्यक्त्याकृतीति। जातिविशिष्टायां व्यक्तौ शक्तिस्वीकारे सम्बन्धांशे ऽपि शक्त्यापत्तिः, विशेष्यविशेषणभावे विनिगमनाविरहापत्तिश्चेति पृथक् तयोः शक्यत्वम्। जातेर्नियतसंस्थानव्यङ्ग्यत्वनियमाभावादाकृतेः पृथग्वाच्यता। *विशेषणार्थ इति। विशेषणं व्यावर्तनम्। किं व्यावर्त्यत इति पृच्छति *किंविशेष्यत इति। उत्तरमाह *प्रधानेति। जात्यादीनां गौणप्रधानभावस्य नियतत्वाभावात्तिसृणामपि पदार्थत्वमित्यर्थः। "तुशब्द एकैकमात्रस्य पदार्थत्वव्यवच्छेदाय। अन्यथा कदाचित्कस्याश्चिदुपस्थितिः स्यात्" इत्यन्यैर्व्याख्यातमत उक्तं *वार्तिककृतेति।

यदा हि भेदविवक्षा विशेषगतिश्च 'गौस्तिष्ठति' इत्यादि तदा व्यक्तिः पदार्थः अङ्गं तु जात्यादीति। यदा भेदो ऽविवक्षितः सामान्यगतिश्च तदा जातिः पदार्थः। यथा 'गौर्न पदा स्प्रष्टव्या' इति। आकारस्य प्राधान्ये तु 'पिष्टकमय्यो गाव' इति।

*प्रज्ञापनीयेति। 'पर्वतो वह्निमान्' इत्यत्र बोधनीयो धर्मो वह्निः तद्विशिष्टो धर्मी पर्वतः। *साध्यः—प्रतिपाद्यः। अनित्यः शब्द इत्यत्रानित्यत्वविशिष्टः शब्दः प्रतिपाद्यते तस्मादनित्यत्वविशिष्टः शब्दः साध्यत इति भावः। अत एव "जिज्ञासितधर्मविशिष्टो धर्म्यनुमेय" इति भगवान् पतञ्जलिः। एतच्च

१ तस्मा—ञ्जलिः पाठोऽयं कुं. कपु. नास्ति।
२ एतच्च—कारः अयं पाठः कुं. खपु. न विद्यते।

"साध्यनिर्देशः प्रतिज्ञा"इति सूत्रस्य व्याख्यानम् । अत एव "प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञा" इति तत्र भाष्यकारः । प्रज्ञापनीयेत्यस्य कृत्यमाह *अनित्य इति । अत्र शब्दस्य सिद्धत्वात्साध्यत्वं न सम्भवति । नापि अनित्यत्वं साध्यं तस्य घटादौ सिद्धत्वात् । नापि शब्दनिष्ठमनित्यत्वं साध्यमित्याह *नापीति । अनित्यत्वं शब्दवृत्तीत्यनुमाने हि अनित्यत्वं पक्षीकृत्य शब्दवृत्तित्वं साध्यं तत्रानित्यत्वरूपे धर्मिणि कृतकत्वरूपहेतोरभावः । *साध्यस्येति । धर्मवत्तया प्रतिपाद्यस्य पक्षस्येत्यर्थः । *योगाभावादिति । तस्मात्प्रज्ञापनीयेत्यादिः । सुष्ठूक्तमिति भावः । *परम्परेति । स्वाश्रयवृत्तित्वेत्यर्थः । कथं तर्हि 'एकं रूपम्' इत्यादौ गुणे गुणानङ्गीकारात्स्वाश्रयसमवायेनैकत्वं रूपे प्रतीयत इति प्रवाद इति चेन्न । तत्र सङ्ख्याऽभावरूपस्यैकत्वस्य स्वीकारात् । *नचेति । घटादौ सिद्धमनित्यत्वमपीह न साध्यं सिद्धत्वादेव हेतोरिति भावः । क्वचित् किञ्चानित्यत्वमपीति पाठः । ननु यदि धर्मः प्रज्ञापनीयस्तदा अज्ञातस्य धर्मस्य कथं विशेषणत्वमत आह *तस्मादिति । *अन्यधर्मत्वेन—घटादिधर्मत्वेन । धर्मधर्मिणोः सामान्यतो ज्ञातत्वेऽपि विशेष्यविशेषणभावरूपविशेषबोधार्थमेवानुमानमिति भावः । *सचेति । विशेष्यविशेषणभावश्चेत्यर्थः । उभयाश्रयत्वे सति यत्सिद्धं तदुपपादयति *धर्मीति । पर्वतादिः । *धर्मः—वह्न्यादिः ॥ १४ ॥

(क० टी०) परसंमतमपीदमित्याह *अतएवेति । तासां तत्त्वाद्वेत्यर्थः । जात्याकृतिव्यक्तयस्त्विति पाठः । सूत्रपाठे तथैवोपलम्भात् । प्रकरणान्तरे ऽपि तेन तथोक्तमित्याह *प्रज्ञेति । अपूर्वबोधनीयेत्यर्थः । साध्यलक्षणमिदम् । विशिष्टान्तविशेषणकृत्यमाह *अनित्य इति । *सिद्धत्वेन—तथाच नापूर्वबोधनीयत्वमिति भावः । यथाश्रुतं निरस्य वैपरीत्यमपि

निराचष्टे *नापीति । *योगेति । साक्षात्संबन्धाभावात् मिथस्तत्त्वस्याभावात् । वह्निधूमादौ कार्यकारणभावादिसंबन्धादेव तद्दर्शनाद् अन्यथाऽतिप्रसङ्गापत्तेरित्यर्थः । नन्वेकाधिकरणवृत्तित्वमेव तयोः सम्बन्धो ऽत आह *अनेनेति । आशयवर्णनमिदं तस्य । *संबन्धानाम्–तत्त्वेनाभिमतानाम् । प्रज्ञापनीयत्वमपि तस्य नेत्याह *किञ्चानित्यत्वमपीति । नचानित्यत्वमपीत्यपपाठः । असम्बद्धत्वात् । उपसंहरति *तस्मादिति । द्वयोस्तत्त्वासम्भवादित्यर्थः । *अन्येति । घटादीत्यर्थः । तस्य पक्षमाह *सचेति । तथाचोभयं पक्ष इति भावः । नन्विदमुक्तसूत्रात्कथं लब्धमत आह *धर्मीति । उभयतात्पर्यमाह *अनेनेति । उभयथोक्तेनेत्यर्थः । *ज्ञाने–ज्ञानसामान्ये । पूर्वस्य शाब्दविषयत्वादन्त्यस्यानुमितिविषयत्वात् ।

नचान्यनिरूपितविशेष्यतयोर्विरोधः, अन्यनिरूपितविशेषणताया अन्यानिरूपिताविशेष्यतया विरोधात् । अतएव नित्यत्वविशिष्टघटत्ववानित्यर्थे नित्यघट इति न साधु । एवं च राजपुरुष इत्यादौ राज्ञि प्रकारतैव न विशेष्यता, राजत्वे प्रकारतावच्छेदकताख्यविषयतैव नतु राजनिरूपिता प्रकारता । पुरुषपदार्थे च राजपुरुषत्वोभयनिरूपितं विशेष्यताद्वयमविरोधात् । नचैवं घटप्रकारकभूतलविशेष्यकप्रत्यक्षस्य 'घटवद् भूतलम्' इति शब्देनाभिलापानापत्तिः । तस्य प्रत्यक्षस्य तज्जन्यबोधीयविषयतासमानविषयकत्वाभावात् । शब्दजबोधे घटवतो भूतले प्रकारत्वादिति वाच्यम् । घटवदित्यंशे घटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यताशालित्वेनादोषात् । नच तच्छब्दीयताद्विशेष्यता संबन्धित्वावच्छिन्ना प्रत्यक्षीया तु भूतलत्वावच्छिन्नेति विशेष इति वाच्यम् । भूतलपदेनापि तद्व्यक्तेरेवोपस्थित्या संबन्धिनिष्ठविशेष्यताया अपि तदवच्छिन्नत्वबोधनाक्षतेः । तस्या अपि भूतलत्वेन समानाधिकरणत्वात् । नचैवं वीरः पुरुष इत्यादौ वीरनिष्ठप्रकारताया अपि पुरुषत्वसमानाधिकरणत्वात्पुरुषत्वावच्छिन्नत्वबोधापत्तिः नच तथा ऽनुभव इति वाच्यम् ।

एकत्रैकरूपेण विशेष्यतावच्छेदकत्वप्रकारतावच्छेदकत्वयोर्विरोधात् । भिन्नपदोपस्थितैकवृत्तिविशेष्यताद्वयस्य तु शब्दा

न्तरोपस्थितसमानाधिकरणधर्मान्तरावच्छेद्यत्वे न कश्चिद्विरोधः । अत एव घटविधेयकानुमितेरप्ययमभिलापः । तत्र भूतलस्य भूतलपदात्पृथगुपस्थितेरपि सत्त्वेन ततो घटविधेयकधियोऽपि सम्भवात् ।

यत्तु घटवता भेदसम्बन्धेन तत्रान्वयधीरिति ।

तन्न । पदद्वयोपस्थाप्यव्यक्त्योरेकत्वेन तयोः सम्बन्धाकाङ्क्षाऽभावात् । अभेदस्य तु न सम्बन्धत्वमित्यग्रे स्फुटीभविष्यतीति दिक् ।

तदाह *इत्यन्यत्रेति । गुरुमञ्जूषादावित्यर्थः ॥ १४ ॥

सर्वत्र शब्दभानमित्ययमर्थः "अथ गौरित्यत्र कः शब्दः" इत्यनेनापि सूचित इत्यग्रे निरूपयिष्यते ।

शब्दार्थयोरविभागादेव पस्पशायाम् "अथ गौरित्यत्र कः शब्दः" इति प्रश्नः । किञ्च तत्प्रघट्टके जात्यादीनां शब्दत्वमाशङ्कितं तद्विविक्तशब्दतत्त्वाज्ञानात् । नचैवमपि गुणादीनां गोशब्दत्वाशङ्का कथम्, तेन शब्देन तेषां तादात्म्याभावादिति वाच्यम् । निरन्तरत्वरूपायुतसिद्धत्ववदवयवविशेषानुगतसामान्यविशेषरूपगुणसमूहस्यैव द्रव्यत्वात् । स्त्रियामिति सूत्रे "द्रव्ये च भवतः कः संप्रत्ययः? गुणसमुदायो द्रव्यम्" इति भाष्यात् । "कं च प्रति अवयवो गुणः? समुदायं प्रति" इति "संख्याया अवयव" इति सूत्रभाष्याच्च । "अयुतसिद्धावयवविशेषानुगतः समूहो द्रव्यमिति पतञ्जलिः" इति पातञ्जलभाष्याच्च । गुणपदेनावयवा धर्माश्च । अत एव व्रीहिषु प्रोक्षणजन्यसंस्कारस्यांशत्वावयवत्वादिना व्यवहारः समन्वयसूत्रे भामत्याम् । समुदायसमुदायिनोश्च परस्परं भेदाभेदाभ्युपगमः । अत एव 'मृद्धटो' 'मृदि घट'

इत्याद्युपपद्यते गुणगुण्याद्योरिव । अत एव 'घटः शुक्लः' 'घटे रूपं, गन्धः, स्पर्श' इत्याद्युपपद्यते । अत एव गुणाश्रयो द्रव्यमिति परे वदन्ति । अयुतसिद्धावयवविशेषानुगत इत्युक्तेर्वनादीनां नातिरिक्तद्रव्यत्वम् । निरन्तरावयवस्वरूपायुतसिद्धत्वाभावात् । विजातीयावयवविभाग एव तन्नाशकः । भूयोऽवयवावच्छेदेन चक्षुस्संयोगश्च तत्प्रत्यक्षे कारणम् ॥ १५ ॥

(कुं०टी०) *तद्विविक्तेति । जात्यादिव्यतिरेकेण द्रव्यस्यानुपलम्भादित्यर्थः । शब्दशब्दार्थयोरभेदाध्यासेऽर्थगतजातेरपि शब्दत्वसम्भवादिति भावः । *कथमिति । एकस्मिन्नेव फले पूर्वरूपनाशेन रूपान्तरोत्पत्तौ 'तदेवेदं फलम्' इति प्रत्यभिज्ञया गुणव्यतिरिक्तस्यैव द्रव्यस्य न्याय्यत्वात् इति भावः । 'गुणसमूहो द्रव्यम्' इति पक्षे समूहस्य शब्दवाच्यत्वेऽवयवस्यापि शब्दवाच्यत्वात् शब्दत्वमिति भावः । *अवयवविशेषेति । अयुतसिद्धा ये अवयवास्तदनुगतो यः सामान्यविशेषरूपगुणसमुदायः स एव द्रव्यमित्यर्थः । अयुतसिद्धत्वमपृथग्भावेनानुभूयमानत्वम् ।

अयम्भावः—पृथिव्याः सामान्यं कठोरत्वम्, जलस्य स्नेहः, वह्नेरुष्णता, वायोर्वहनशीलता, आकाशस्य सर्वतो गतिः । शब्दस्पर्शरूपरसगन्धाश्च पृथिव्यादीनां विशेषास्तत्समूहो द्रव्यम् । तत्र समूहमात्रं न द्रव्यमिति बोधयितुमुक्तम् *अयुतसिद्धेति । एतस्यैव विवरणम् *निरन्तरस्वरूपेति । यथा हि शरीरादीनामवयवा अयुतसिद्धा नैवं वनादीनामवयवा अयुतसिद्धा इति न तेषां द्रव्यत्वम् । गुणानामपि रूपादि सामान्यं शुक्लादिर्विशेष इति । *कः सम्प्रत्ययइति । किमात्मकं द्रव्यं भवान् मन्यत इत्यर्थः । *गुणसमुदायो द्रव्यमिति ।

[1]सत्त्वरजस्तमसां गुणानां परिणामविशेषाः शब्दादयः पञ्च रागाः सत्त्वाद्यात्मका एव तत्सङ्घात एव घटादिकं नतु तद्व्यतिरिक्तमवयविरूपमस्तीति सांख्यसिद्धान्तः । शतशः[2] छिन्नस्यापि पशोः रूपरसगन्धादिव्यतिरिक्तस्य कस्य चिद्वस्तुनोऽनुपलम्भाद् गुणानां समुदाय एव द्रव्यम् । तत्र प्रत्येकाभिप्रायेण गुणव्यवहारः समुदायाभिप्रायेण द्रव्यव्यवहारः । लोहकार्पासयोर्गुरुत्वभेदस्तु समूहकृत एव न द्रव्यभेदकृतः । "तस्य भावः' इति सूत्रे भाष्येऽपि द्रव्यगुणयोर्भेदव्यवहारः समूहसमूहिकृत एवेति भावः । तत्र समूहसमूहिनोरभेदात्तद्ग्रहो द्रव्यम्, व्याकरणे तु गुणशब्देन धर्ममात्रमुच्यते ।

तदुक्तम् हरिणा—

संसर्गिभेदकं यद्यत्सव्यापारं प्रतीयते ।
गुणत्वं परतन्त्रत्वात्तस्य शास्त्रे उदाहृतम् ॥ इति ।

संसर्गिण आधारस्य भेदकं सव्यापारमवच्छेदकरूपेण प्रतीयते तस्य गुणत्वम् । लोके हि परतन्त्रो गुण इत्युच्यते । तदाश्रयो द्रव्यमिति वैशेषिकपारिभाषा । इह तु सर्वनामपरामर्शयोग्यत्वं भेद्यत्वं वेत्यादि द्रव्यलक्षणम् । अत एव द्रव्यं पदार्थ इति पक्षः । अत एव च समानाधिकरणशब्दस्य समानद्रव्यवचनतया सर्वरस इत्यत्र समासः ।

नन्वेवं "विप्रतिषिद्धं चानधिकरणवाचि" इत्यत्रापि गुणादीनां निषेधात् शीतोष्णं सुखदुःखमित्यत्रैकवद्भावो न प्राप्नोतीति चेन्न । तत्र वचनसामर्थ्यात्प्रसिद्धद्रव्यग्रहणात् ।

"वोतो गुणवचनाद्" इत्यत्र गुणोपसर्जनद्रव्यग्रहणाज्जा-

---

१ सत्त्व-सिद्धान्तः पाठोऽयं कुं,खपु. नास्ति ।
२ शतशः-भावः अयं च पाठः कुं.कपु.नोपलभ्यते ।

त्यादिविशिष्टग्रहणे प्राप्ते "सत्त्वे निविशते" इति परिभाषा आश्रिता ।

"गुणवचनब्राह्मणादिभ्य" इत्यत्र समासादिभिन्नत्वं गुणत्वमिति वार्तिकसमयः । "तृतीयातत्कृतार्थ" इत्यत्र खण्डादिरेव गुणः ।

त्रिगुणा रज्जुरित्यत्र समवायवचनो गुणशब्दः । गुणशब्देनावयवानामपि ग्रहणात् । तत्समुदायोऽपि द्रव्यमिति व्यवस्थापयति *कश्च प्रतीति । किञ्च समुदायघटकत्वाद्रूपादयोऽप्यवयवा इत्यभिप्रेत्याह *अयुतसिद्धेति । एतदभिप्रेत्यैवाह *गुणपदेनेति । *भामत्यामिति ।

तत्र हि 'निरवयव' इति शारीरकभाष्यप्रतीकमुपादाय 'व्रीहीणां खलु प्रोक्षणेन संस्काराख्योंऽशो यथाऽनुमन्यते नैवं ब्रह्मणि कश्चिदंशः क्रियाधेयोऽस्ति' इत्युक्तम् ।

ननु गुणसमुदायस्यैव द्रव्यत्वे स्वस्यैवाधाराधेयभावासम्भव इत्यत आह *समुदायसमुदायिनोरिति । *अत एव गुणाश्रय इति । समूहसमूहिनोर्भेदस्यापि स्वीकारादयमपि व्यवहार इत्यर्थः । *नातिरिक्तेति । वृक्षसमूह एव वनं नातिरिक्तमित्यर्थः । ननु अवयवसमुदायस्यैव द्रव्यत्वे तन्नाशः कथमत आह *विभाग एव तन्नाशक इति ।

अत एवासमवायिकारणनाशात्कार्यनाशः, न तु समवायिकारणनाशात् । परमाणूनां नित्यत्वेन द्व्यणुकनाशानापत्तेरिति तार्किकाः ।

ननु सम्पूर्णस्याप्रत्यक्षे घटादेः प्रत्यक्षं न स्यादत आह *भूयो वयवेति ॥ १९ ॥

(क० टी०) प्राक् प्रतिज्ञातमेवाह *शब्देति । उक्तरीत्येति भावः ।

अन्यथा कोटिद्वयानुपस्थित्या तदसङ्गतिः स्पष्टैव । साधकान्तरमप्या-
ह *किञ्चेति । *तादिति । अर्थतो भिन्नेत्यर्थः । *एवमपि-प्रश्न-
स्यार्थे शब्दत्वाशङ्कायाश्चोक्तरीत्योपपत्तावपि । *सिद्धत्व वदिति
मतुप् । तस्यैव तत्त्वे हेतुमाह *स्त्रियामिति । *द्रव्येचेति विषय-
सप्तमी । किमात्मकं द्रव्यं भवान्मन्यत इत्यर्थः । 'स्त्रीत्वं कस्य गुणः;
द्रव्यस्य' इत्युक्त्वेदमुक्तं तत्र । नन्वेतावता विशेष्यांशो लब्धो न
विशेषणांशोऽत आह * कश्चेति ।

तत्र हि पञ्चावयवा इत्यादौ वारणाय "अवयवे वर्तमानाद्विधा-
ने ऽवयविनि प्रत्यय" इत्युक्ते 'पञ्च पशवयवा देवदत्तस्य' इत्यत्रा-
तिव्याप्तिवारणाय "अवयवशब्दो ऽयं गुणशब्दः । अस्येति वर्तते ।
तेन यं प्रत्यवयवो गुणस्तास्मिन्नवयविनि प्रत्ययेन भवितव्यम्"
इत्युक्तेदमुक्तम् । अवयवारब्धे एवावयविशब्दप्रयोग इति तदाश-
येन तेन तदनुगतस्तत्समूह एवावयवीति ध्वनितामिति भावः ।

नन्वेवमपि स्पष्टं न लब्धम् अत आह *अयुतेति । सर्व-
सङ्ग्रहायाह *गुणेति । *अत एव-धर्माणां तेन ग्रहणादेव ।
आदिना अङ्गत्वम् । *समेति । "तत्तु समन्वयात्" इति सूत्रे ।

तत्र सामान्यं नाम घटे घटव्यक्तिरूपघटपरमाणुमत्त्वम् । रूपक्रि-
यादीनामप्येतन्मते द्रव्यत्वात्तत्तद्व्यक्त्यनुगमोऽस्त्येव । रूपरसगन्ध-
स्पर्शशब्दानां तत्तन्मात्ररूपतया द्रव्यत्वं स्पष्टमेव । गुरुत्वाद्यपि प्रकृ-
तिपरिणामत्वात्तथा । तेषां गुणत्वव्यवहारस्तु 'घटे रूपम्' इत्यादि-
व्यवहारकल्पिताश्रितत्वेन रूढः । परोपकारकत्वाच्च तेषाम् । व्य-
क्तित्वं च व्यज्यते ऽनयेति व्युत्पत्तेः । सैव चानुगताकारप्रतीतिजनि-
का । इदमेवाभिसन्धाय त्यक्तभेदा व्यक्तय एव जातिरिति मतमाहुः ।
शब्दादितन्मात्रैः प्रथमं परमाणूनामेवोत्पत्तिः । पश्चात्परमा-
णुक्रमेण महापृथिव्याद्युत्पत्तिः । परमाणुद्वारैव तन्मात्राणां कार्योपादा-
नत्वमिति तेषां सिद्धान्तात् । तत्र पार्थिवपरमाणुस्तन्मात्रपञ्च-
कावयवकः । जलपरमाणुर्गन्धतन्मात्रं विहाय चतुरवयवकः । एवं
तेजोवाय्वाकाशपरमाणवस्त्रिद्व्येकावयवकाः । विशेषास्तु शब्दरूपा-
दिपरमाणवः । तेषां भेदत्यागश्च घटजनकशक्तिमत्त्वेनैक्यारोपात् ।
न च परमाणूनां सावयवत्वेऽनन्तावयवत्वेन मेरुसर्षपयोः परिमाण-
साम्यापत्तिः । अनन्तक्षणघटितयोरवान्तरकल्पयोरिवानन्तपरमा-

एवारब्धमेरुभूगोलयोरिव चानन्त्यविशेषाद्विशेषोपपत्तेः, प्रकृतौ विश्रमाच्चेति तद्भावः।

ननु किं तयोः परमतवद्भेद एवाभेद एव वा, अत आह *समुदायेति। *इत्याद्युपपद्यते इति। आदिना वृक्षे शाखा, तन्तूनां पटः, आम्राणां वनम्, कर्मधारयेणाम्रवणमित्यादिपरिग्रहः। गुणगुण्यायोरित्यादिना क्रियाक्रियावतोर्जातिव्यक्त्योश्च परिग्रहः। *अतएव—तयोस्तादात्म्यघटकभेदाङ्गीकारादेव। एवमग्रेऽपि। नतु परमतरीत्या सर्वथा भेदेन। ननु समूहस्य द्रव्यत्वे वनस्याव्यतिरिक्तद्रव्यत्वापत्तिरत आह *अयुतेति। निरन्तरत्वरूपायुतेति पाठः। तदवयवानामित्यादिः। वनादेर्युतसिद्धावयवकत्वादिति भावः। नन्वेवं यत्किञ्चिदवयवविनाशादपि तन्नाशापत्तिरत आह *विजातीयेति। परमते चतुर्विधसंयोगस्य तत्र कारणत्वे गौरवादाह *भूयोऽवयवेति।

अत्रेदं बोध्यम्—कार्यमात्रं च स्वकारणेन तत्तच्छब्दव्यवहाराविषयेण सूक्ष्मरूपेण सहैवानुगतमिति नासदुत्पादः। अभिव्यक्तिलक्षणं कार्यमेव च तत्सत्ताऽनुमापकम्। असदुत्पादे सर्वत्र सर्वाभिव्यक्त्यापत्तेः। नच सर्वदाऽभिव्यक्त्यापत्तिः। निमित्तकारणसहकारेणैव वर्त्तमानावस्थारूपप्रादुर्भावाङ्गीकारात्। मुद्गरपातादिना कपालादिरूपधर्मान्तरोदये चातीतावस्थारूपतिरोभावः। अतीतानागतावस्थे च ध्वंसप्रागभावौ। अनागतावस्थारूपप्रागभावस्य चाभिव्यक्तिहेतुत्वान्नातीतव्यक्तेः पुनरुत्पत्तिः। 'घटो नष्टः' 'घटो वर्त्तमानः' 'घटो भविष्यति' इति त्रिष्वपि कालेषु घटानुगतिदर्शनादपि तत्सत्ताऽनुमानम्। अविद्यमाने विषयतादीनामप्यनुपपत्तेश्च। अभिव्यक्तेरभिव्यक्तिस्तु उत्पत्तेरुत्पत्तिवद् अभावे ऽभाववत्तत्स्वरूपैवेति नानवस्था। अभिव्यक्तेः सूक्ष्मावस्थाऽपि वस्तुसूक्ष्माऽवस्थैव न ततो ऽतिरिक्ता। कचिद् अङ्कुरादिरूपाभिव्यक्तिरेव शालिनिष्पत्तिरुक्ता 'वृष्टश्चेद्देवो निष्पन्नाः शालय' इत्यादौ। अङ्कुरावस्थायामेव शालित्वारोपो ऽवश्यंभावित्वप्रतिपादनाय। ,नच निष्पन्नाश्चेद् भुज्यन्तामभिव्यक्तिर्हि प्रतीक्षणीया' इति भाष्ये उक्तम्। तत्राभिव्यक्तिः स्थूलरूपेण बोध्या। कार्यस्यानागतावस्थैव च कारणेषु शक्तिरित्युच्यते। तस्याः शक्तेर्यावत्

हकारेण कार्यजनकता। तत्र सर्वत्र तच्छक्तिमत्त्वोपचारः। स्पष्टं चेदं सर्वं पातञ्जलभाष्यादौ। "तस्यभाव" इति सूत्रे च भाष्ये ध्वनितमिति। अतिरिक्तावयविवादिना ऽप्यवयवानामनपलापात्। तदपलापे तदाधारताऽनुपपत्तेः॥ १५॥

तदतिरिक्तो ऽवयवी तु नोपलभ्यते, ग्रावसमुदायस्थल इव। किञ्च तस्यातिरिक्तत्वे रूपगुरुत्वादेद्वैगुण्यस्योपलम्भापत्तिः। अवयविनो रूपराहित्ये ऽप्रत्यक्षत्वापत्तिः। नच अन्त्यावयवपरमाणूनामतीन्द्रियत्वेन तदाश्रितगुणाप्रत्यक्षत्वापत्तिरिति वाच्यम्। रथाङ्गानां प्रत्येकं कार्यासामर्थ्ये ऽपि विलक्षणसमुदायभावे कार्यकरत्ववदुपपद्यते। एवं च गोशब्दे तत्समूहाभेदेन तत्समूह्यभेदोऽपि सिद्ध इति भावेन गुणादीनां गोशब्दत्वाशङ्का। लिङ्गसंख्यान्वयि द्रव्यं, सर्वनामपरामर्शयोग्यं द्रव्यमिति तु स्वशास्त्रव्यवहारोपयोगीति बोध्यम्। 'गुणो नाम स' इत्युक्तराशयस्तु गोशब्देनानुद्भूतभेदावयवानुगतसमूहेनैव तादात्म्यं न तु तदवयवैरपीति। तत्र "भेदः प्रतिभासमात्रकल्पितत्वेनाध्यस्तः 'राहोः शिर' इतिवत्। अभेदस्तु व्यावहारिकः" इति वाचस्पतिमिश्राः। अन्ये तु उभावपि व्यावहारिकौ। 'स्वर्णं कुण्डलम्' 'स्वर्णस्य कुण्डलम्' इति च व्यवहारात्। एतद्व्यवहारान्यथाऽनुपपत्त्यैव तयोःक्वाचिदविरोधस्याप्यङ्गीकारात्।

अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका।
पिनष्टि दृष्टवैमत्यं सैव सर्वबलाधिका॥ इति—

श्रीहर्षोक्तेः। किञ्च, स्वर्णत्वरूपेणाभेदस्य कुण्डलत्व-

रूपेण भेदस्य स्थितिरित्यविरोधः । सामानाधिकरण्यं चैकार्थबोधकत्वमेव प्रकारविशेषानपेक्षोऽभेदस्तु भेदेन विरुद्धः । प्रतिभासकल्पितत्वेऽपि यावद्व्यवहारं ब्रह्मज्ञानतः प्राक् शुक्तिरजतवत्तद्व्यवहारानपगमेन व्यर्थपरिश्रमत्वात् । 'राहोः शिर' इत्यत्रानेकावस्थायुक्तराहोरेकावस्थायुक्तशिरसोऽवयवत्वेन तत्रापि व्यावहारिकभेद एव ॥ १६ ॥

(कुं.टी.)सामान्यविशेषरूपगुणसमुदायाश्रयो द्रव्यमिति मतं दूषयति *तदतिरिक्त इति । *ग्रावः—पाषाणः । यथा तत्समूहाश्रयीभूते पाषाणातिरिक्तन्नोपलभ्यते एवमित्यर्थः । *द्वैगुण्यस्येति । अवयवावयविगुरुत्वाभ्यामिति भावः । नन्ववयवरूपेणैव निर्वाहादवयविनो न रूपवत्त्वमिति न तद्द्वैगुण्यापत्तिरत आह *अवयविन इति । अवयविनोऽतिरिक्तत्वाभावे अप्रत्यक्षत्वापत्तिं शङ्कते *नचेति । अनवस्थाभयात्परमाणूनामवयवा न स्वीक्रियन्त इत्यभिप्रेत्याह *अन्त्यावयवेति । *उपपत्तेरिति । परमाणूनामतीन्द्रियत्वे ऽपि तत्समूहस्य प्रत्यक्षे बाधकाभावः । पिशाचसमूहस्तु न दृश्यते तत्र विलक्षणसंयोगाभावादिति भावः । *गोशब्देनेति । गोशब्दस्य समूहाभिन्नत्वे सिद्धे समूहिना रूपादिनाऽप्यभेदः सिद्ध इत्यर्थः । *इतिभावेन—इत्याशयेन । ननु गुणसमुदायस्यैव द्रव्यत्वे सर्वरस इत्यत्र समानाधिकरणलक्षणः कर्मधारयो न स्याद् अधिकरणशब्दस्य द्रव्यवाचित्वाद्, अत आह *लिङ्गसङ्ख्येति । *सर्वनामेति । 'इदम्,' 'तद्' इति परामर्शयोग्यं वस्तु द्रव्यम् । तेन स्त्रीत्वस्यापि स्त्रीत्वेन योगात् स्त्रीता इति तत्प्र-

---

१ अत्र भेद इतिच्छेदः, भेदेनेत्यत्राभेदेनेति पाठः कुञ्जिकासंमतः कलानुसारीच ऊर्ध्वमुपन्यस्तः ।

त्ययसिद्धिरिति भावः। *अनुद्भूतेति । अनुद्भूतावयवभेदत्वता समूहेनैव तादात्म्यमित्यर्थः। *नतु तदवयवैरपीति। नतु समूहा-वयवैरूपादिभिरपीत्यर्थः । 'तदभिन्नाभिन्नस्य तदभिन्नत्वम्' इति न्यायस्तु यत्र स्वाभिन्नद्वारकः स्वस्वरूपानुगमस्तद्विषयः। यथा-परमकारणकार्योपादानके परमकारणाभेदः । अत एव सुखदुः-खयोर्नाभेदः। एवं च गुणसमूहस्यानुद्भूतावयवभेदस्य वाच्यत्वेऽपि समूहिनां तत्तद्रूपेणावाच्यत्वान्न शब्दत्वमिति भावः। *अ-ध्यस्त इति। परमार्थदशायां वस्तुमात्रस्यासत्यत्वात् व्यवहारद-शायां यत् सत्यत्वं तद्व्यावहारिकमित्युच्यते। यत्तु व्यवहारदशा-यामप्यसत्यं तत् प्रातिभासिकमित्युच्यते । *व्यावहारिकइति ।

अयं भावः—'सत्यं चानृतं च सत्यमभवद्' इति तैत्तिरी-यकश्रुतौ सत्यस्य ब्रह्मणः सत्यानृतोभयतोक्ता । तत्र सत्यत्वं व्यावहारिकसत्यतया स्पष्टेः, व्यवहारसत्यविलक्षणं च भ्रमस्थले रजतादिकं प्रातिभासिकं जायत इत्यवश्यं स्वीकार्यमिति ।

*उभौ—भेदाभेदौ । *तयोः—भेदाभेदयोः । ननु ज्ञानस्य स्वप्रकाशत्वे स्वस्यैव विषयाविषयिभावः कथमत आह *अन्यथा-ऽनुपपत्तिश्चेदिति । विषयविषयिणोरभिन्नत्वदर्शनविरोधरूपदृष्ट-वैमत्यमन्यथाऽनुपपत्तिःपिनष्टीत्यर्थः। ननु दृष्टविरोध एवानुपपत्तिं कुतो न बाधत इत्यत आह *सैवेति। अन्यथाऽनुपपत्तिरेव स-र्वतो बलवती दृष्टविरोधं निराकरोतीत्यर्थः । *किञ्चेति ।

अयं भावः—'सुवर्णं कुण्डलम्' इत्यत्राभेदे आत्यन्तिके अन्य-तरस्य द्विरवभासप्रसङ्गः, भेदे चात्यन्तिके गवाश्वादिवत्सामाना-धिकरण्यासम्भव इति ।

---

१ अध्य-च्यते पाठः कुं. कपु. नास्ति ।

*स्वर्णत्वरूपेणेति । स्वर्णत्वरूपसामान्यधर्मविवक्षायामित्यर्थः । तदुक्तं भामत्यां 'कार्यरूपेण नानात्वमभेदः कारणात्मना' इति ।

युक्तश्चैतत् । सर्वथा अभेदे कार्यकारणभावासम्भवात् । नचैवं "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्याधिकरणविरोधः । उपादानव्यतिरेकेणोपादेयं नास्तीति तदर्थात् । *इत्यविरोध इति । भेदाभेदयोराविरोध इत्यर्थः । ननु विभिन्नरूपेणोपस्थित्यभावेऽपि भेदस्यैवासम्भव इत्यत आह *सामानाधिकरण्यंचेति । *तेन–अभेदेन । *एकार्थेति । भिन्नप्रवृत्तिनिमित्ताश्रयैकार्थेत्यर्थः । *प्रकारेति । नीलो घट इत्यत्र नीलत्वघटत्वरूपप्रकारविशेषापेक्षो भेदो नतु विशेष्यस्यापि भेदः, अभेदेन विरोधादित्यर्थः । *प्रतिभासेति । कल्पितस्यापि भेदस्य व्यवहारदशायां सत्त्वमस्त्येवेत्यर्थः । *व्यर्थपरिश्रमादिति । व्यावहारिकत्वस्य सम्भवेनाध्यस्तत्वकल्पनस्यान्याय्यत्वादित्यर्थः ॥ १६ ॥

(क० टी०) परमतं खण्डयति * तदतीति । तत्समूहातिरिक्त इत्यर्थः । दोषान्तरमाह *किञ्चेति । तस्यावयविनस्तत्समूहातिरिक्तत्वे इत्यर्थः । तत्समूहनिष्ठरूपाद्यपेक्षया भिन्नावयविनिष्ठरूपादेर्भिन्नत्वादिति भावः । नन्ववयवी रूपगुरुत्वादिरहित एवात आह *अवयवीति ।

नच रूपरसादिपरावृत्तौ तस्य समूहस्यान्यत्वात्प्रत्यभिज्ञाऽनुपपत्तिः । कस्य चिदवयवसमूहस्यानुगतस्यापि सत्त्वेन तदुपपत्तेः । यद्वा, आकृतिनिबन्धना सा । बाल्ययौवनादिभिन्नेषु चैत्रादिशरीरेषु तत्प्रत्यभिज्ञानवत् । गुरुत्वप्रतीतिरप्यव-

१ ननु–चेति पाठोऽयं कुं.कपु.नास्ति ।

२ व्यर्थपरिश्रमत्वादिति । प्रातिभासिकत्वकल्पनस्य निरर्थकत्वादित्यर्थः । पाठोऽयं कुं.कपु.अधिकः ।

यवानुगतगुरुत्वसमुदायविषया दशपाषाणगतगुरुत्वप्रतीतिवत् । नन्ववयविनोऽतिरिक्तत्वे परमाणोरमहत्त्वेनातीन्द्रियत्वे ऽपि तद्रूपस्य ततो भिन्नस्योद्भूतत्वेन प्रत्यक्षत्वमिष्टं तदत्र न स्यात्तस्य तदभेदादित्याशयेनाह *न चेति ।

समूहस्य तैर्भेदाभेदाङ्गीकारेणोक्तरूपस्य समूहस्यातीन्द्रियावयवकस्यैन्द्रियकत्वे बाधकाभावः । एकस्य तण्डुलस्य क्षुत्प्रतिघातासमर्थत्वे ऽपि तत्समुदायस्य तत्समर्थत्वदर्शनादित्याशयेनाह *रथाङ्गानामिति । तस्मादुक्तविधगुणसमूह एव द्रव्यम् । अत एव स न केवलावयवरूपः, तद्विलक्षणजलाहरणादिव्यवहारकारीच । द्विविधो ऽपि समुदायो द्विविधः । कश्चिच्छब्दानुपस्थितभेदावयवानुगतः कर्मधारयेण 'वृक्षवनम्' इति यथा । कश्चित्तु शब्दोपस्थितभेदावयवानुगतः यथा-'उभये देवमनुष्या' इति, 'सहस्रतन्तुकः पट' इति चेति बोध्यम् ।

ननु तस्य द्रव्यत्वे ऽपि तयोस्तत्त्वे ऽपि च शङ्का न समाहितेति "अन्यत् भुक्तमन्यद्वान्तम्" इति न्यायापत्तिरत आह *एवञ्चेति । तत्समूहस्य द्रव्यत्वेन तयोस्तदङ्गीकारे चेत्यर्थः । *भावेन-आशयेन । इदं च द्रव्यलक्षणं लौकिकं न शास्त्रीयमित्याह *लिङ्गेति । *अत एव-शास्त्रीयप्रक्रियाव्यवस्थासिद्धिरिति भावः । गोशब्दस्यानुद्भूतेति पाठः । ननु भेदाभेदयोर्विरुद्धत्वात्कथं सामानाधिकरण्यम, अत आह *तत्रेति । तयोर्मध्ये इत्यर्थः । अध्यस्तत्वस्वरूपमाह *प्रतीति । मात्रपदेन व्यावहारिकत्वनिरासः । कार्यनिर्वाहायाह *राहोरिति । एवं च न विरोध इति भावः । *मिश्रा इति । भामत्यामिति भावः । नन्वेवं विरुद्धयोस्तयोः कथमेकत्र स्थितिरत आह *एतादिति । उक्तद्विविधेत्यर्थः । सर्वत्रानतिप्रसङ्गायाह *क्वचिदिति । तथा व्यवहारविषये इत्यर्थः । नन्वनुपपत्त्यापि कथं दृष्टविरुद्धसाधनमत आह *अन्यथेति । *दृष्टविरुद्धत्वं नाशयति—तदविरोधं सम्पादयति । इदंच विरोधमभ्युपेत्योक्तम् । वस्तुतः स एव नेत्याह *किञ्चेति । नन्वेवम् उभयत्रोभयसत्त्वात्कथं 'स्वर्णं कुण्डलम्' इति सामानाधिकरण्यं विशेषणभेदाद् अत आह *सामेति । एवेन विशेषणैक्यनिरासः । 'नीलो घट' इत्यादौ तथैव

सत्त्वादिति भावः । नन्वेवं तौ विरुद्धाविति प्रवादोच्छेदापत्तिरत आह *प्रकारेति । अभेदस्त्विवति छेदः । अयमेवात्यन्तिकाभेद इत्युच्यते । *विरुद्धः-विरुद्ध एव । ब्रह्मणीति भावः । नच गन्धपृथिवीत्ववत्प्रकारविशेषानपेक्षावपीमावेकत्रास्तामिति वाच्यम् । एकत्रैव घटे 'घटो' 'न घट' इति बुद्ध्योः समावेशापत्तेः । ननु मिश्रीकरीत्यैवोपपत्तौ किमिति भेदस्य व्यावहारिकत्वमत आह *प्रतीति । अनपगमे ऽस्यान्वयः । *तदिति । भेदेत्यर्थः । प्रातिभासिकस्य तु प्रतिभासकाले एव सत्ता नान्यदेति तदसङ्गतिरेव स्यादिति भावः । *व्यर्थेति । प्रातिभासिकत्वकल्पनायामित्यर्थः । नन्वेवं मिश्रोक्ततदुदाहरणस्य का गतिरत आह *राहोरिति । आरोपितानेकावस्थाभिः समुदायरूपत्वस्याप्यारोप इति भावः । एवेन प्रातिभासिकत्वनिरासः । इदमपि कैयटानुरोधेनोक्तम् ॥१६॥

वस्तुतस्तत्र विकल्पात्मकमेव ज्ञानम् । "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति तल्लक्षणं पतञ्जल्युक्तम् । शब्दज्ञानजन्यो बाह्यवस्तुशून्यो विकल्प इति तदर्थः । किंञ्च, शब्दप्रयोगं तज्जन्यज्ञानं चानुपताति तज्जनको बाह्यवस्तुशून्यो वृत्तिविशेषो बाधाबाधकालाविशेषेण सदैव जायमानो विकल्प इत्यर्थः । अनेन वक्तुः शब्दप्रयोगजनकमानसज्ञानस्यापि विकल्पत्वमुक्तम् । विपर्ययेतु बाधोत्तरं शब्दप्रत्यययोरभावान्न तेन गतार्थता ।

हरिणाऽप्युक्तम्-

अत्यन्तासत्यपि स्वार्थे ज्ञानं शब्दः करोति हि । इति ।

अत्यन्तेत्यस्य बहिरित्यादिः । ज्ञानमवष्टभ्य श-

---

१ किञ्च-त्यापितदर्थः पाठः कु० कस्य पु० मूले नोपलभ्यते न तरां व्याख्यानमस्य तस्यां टीकायाम् । केवलमूलपुस्तकद्वितये तमुपलभ्य कलायां व्याख्यानं चास्य दृष्ट्वा ऽयमत्रावस्थापितः ।

ब्दः स्वप्रयोगं करोतीत्यपि तदर्थः । अत एव "पुरुषस्य चैतन्यम्" इति तदुदाहरणं पातञ्जलभाष्ये दत्तम् । नहि तस्मादस्य कश्चिद्विशेषः ।

"व्यपदेशिवद्" इत्यस्यायमर्थः– मुख्यव्यवहारविषये यथा शास्त्रीयं कार्यं तद्वत् मुख्यसम्बन्धाद्यभावेऽपि कार्यमिति ।

स्वर्णकुण्डलस्थले देशकालैक्ये ऽपि न्यूनाधिकमूल्यदर्शनेन व्यावहारिकभेदो ऽप्यवश्यं स्वीकार्यः । नहि प्रातिभासिकेन तदुपपत्तिः । शुक्तौ प्रातिभासिकरजते सर्वथा मूल्याभावादित्यपि कश्चित् ।

राहोः शिर इत्यादाववस्थाकल्पितो ऽवयवावयविभाव इति तु न युक्तम् । बोद्धॄणामनेकावस्थाविशिष्टस्य तत्त्वेन राहुपदादबोधात् ।

अतएवेयायेत्यादो "इकारस्य प्रथमावयवत्वं कथम्" इत्याशङ्क्य "लोकविज्ञानात्सिद्धम्" इत्युक्तं भाष्ये । लोकवदेव शास्त्रे ऽविचारितमणीयो व्यवहारः ।

किञ्च, अस्य विकल्पात्मकज्ञानजनकत्वे वस्तुसिद्ध्यनापत्तिः । विषयभेदेन विषयताऽङ्गीकारे तु अन्त्यः ।

केचित्तु शब्दाभेदेऽपि विकल्पेन व्यवहारः शास्त्रीयकार्यनिर्वाहश्च । यथा–"अद्यतने ऽप्यनद्यतनो ऽस्ति"

---

१ 'किञ्च—प्रयुक्तामिति' पाठो ऽयं कुं. कखपु. मूले नोपलभ्यते । तस्यां व्याख्यानमप्यस्य नास्ति । केवलमूलपुस्तकद्वितये चेममुपलभ्य कलायां व्याख्यानं च दृष्ट्वा ऽत्रायमवस्थापितः ।

इति लङ्विधायके भाष्ये प्रयुक्तमिति तदाशय इत्याहुः ॥ १७ ॥

(कुं०टी०)*शब्दज्ञानानुपातीति । एतच्च पातञ्जलसूत्रम् । शब्दजन्यज्ञानानन्तरं वस्तुतत्त्वमनपेक्ष्य जायमानोऽध्यवसायो विकल्प इति तदर्थः । ननु शब्दज्ञानजन्यत्वे शब्दप्रमाणत्वापत्तिरत आह *वस्तुशून्य इति ।[1]क्वचिदभेदे भेदमारोपयति क्वचिच्च भिन्नानां[2]मभेदम् । तथाच भेदस्य अभेदस्य च वस्तुतोऽभावान्न प्रमाणत्वमिति भावः । ननु वस्तुशून्यत्वे भ्रमत्वापत्तिरत आह *शब्दज्ञा[3]नानुपातीति । व्यवहाराविसंवादान्न भ्रमत्वमिति भावः । एवं च नरशृङ्गादिश्रवणानन्तरं निर्विषया या वृत्तिर्भवति सा विकल्पः । *पुरुषस्य चैतन्यमिति । 'पुरुषस्य चैतन्यं स्वरूपम्' इत्यत्र पुरुषचैतन्ययोरभेदेऽपि भेदव्यवहारः कल्पित एवेत्यर्थः । *तस्मात्—राहोः शिर इत्यस्मात् । *अस्य—'पुरुषस्य चैतन्यम्' इत्यस्य । [4]ननु 'राहोः शिर' इत्यत्रावयवावयविभावोपपादने व्यपदेशिवद्भावेन राहुरवयवीति प्रवादासङ्गतिरत आह *व्यपदेशिवदिति । *मुख्यव्यवहारविष-

---

१ पाठः क्वचि-भावः कुं. कपु. नास्ति ।

२ अभेदे भेदस्योदाहरणं मूलकार एव 'पुरुषस्य चैतन्यम' इति अनुपदं दास्यति । भेदे अभेदस्य तु नरशृङ्गमिति । नरशृङ्गयोर्भिन्नत्वेऽपि विशिष्टाभेदः नरविशिष्टाभिन्नं शृङ्गमिति ।

३ तथा च शब्दज्ञानानुपातीति विशेषणाभावे सद्वस्तुशून्येत्यर्थः स्यात्, तथाच भ्रमेऽतिव्याप्तिः । शब्दज्ञानानुपातीति विशेषणे दत्ते तु तन्महिम्ना सदसद्वस्तुशून्येत्यर्थान्न भ्रमेऽतिव्याप्तिरिति भावः ।

४ ननु-षष्ठ्यादि पाठोऽयं कुं. कपु. नास्ति ।

ये-'देवदत्तस्य हस्त' इत्यादौ । *शास्त्रीयं कार्यम्-षष्ठ्यादि । *मुख्यसम्बन्धेति । मुख्यः सम्बन्धो भेदनिबन्धनस्तदभावेऽपि भेदव्यवहार इत्यर्थः । *शुक्ताविति । प्रातिभासिकरजतं चाविद्यापरिणामः । प्रातिभासिकत्वं च प्रतिभाससत्तानियतसत्ताकत्वम् । *तत्त्वेन—राहुत्वेन ।

अयं[1] भावः-'राहोः शिर' इत्यत्र व्यावहारिकभेद एव । अत एव प्रकृतिविकृत्योरपि भेदाद् 'भक्तिर्ज्ञानाय कल्पते' इत्येतदर्थं "क्लृपि संपद्यमानेच" इति वार्तिकम् । स्वर्णशब्दस्य विकाराघटित एव निरूढत्वात् 'स्वर्णस्य कुण्डलम्'इत्यादौ षष्ठी । स्वर्णत्वजातेरनुस्यूतत्वाच्चाभेदोऽपि । सर्वथा अभेदेतु दधिदुग्धयोः रसभेदः कार्यभेदश्च न स्यात् । दुग्धस्य लवणादियोगनिषेधेऽपि दध्नो निषेधाभावात् । "व्रीहिभिर्यजेत" इत्यत्र व्रीहिनिष्ठानामेव पुरोडाशसाधनत्वेऽपि प्रोक्षणावघातादीनां व्रीहिसंस्कारत्वाद् व्रीहीणामपि करणतेति ।

*लोकवदेवेति । यथा हि प्रमेयत्वरूपसम्बन्धिभेदाभावेऽपि 'प्रमेयत्वे प्रमेयत्वम्' इति व्यवहारः, यथा वा स्वरूपसम्बन्धस्य सम्बन्धिरूपत्वम्, एवमिहाभेदे ऽपि सम्बन्धो व्यवह्रियत इत्यर्थः ॥ १७ ॥

(क० टी०) इदमपि कैयटादिमतेनोक्तम् । भाष्यमते त्वारोपानुपयोग एवेत्याह *वस्तुत इत्यादि । *तत्र—राहोः शिर इत्यत्र । एवेनाहार्यज्ञाननिरासः । भाष्यसम्मतं मिश्रोक्तमर्थमाह *शब्देति । स्वोक्तमर्थमाह *किञ्चेति । शब्दश्च तज्जन्यज्ञानं च ते अनुपातिनी यस्य स इति विग्रहः । तदाह * शाब्देति । *तदिति । उभयेत्यर्थः । *मानम्-प्रत्ययः । एतत्फलमाह * अनेनेति । द्वितीयार्थेनेत्यर्थः । स न प्रमाणान्तर्भूतः, वस्तु-

---

१ अयं-नेति कुं. कपु. न दृश्यते ।

शून्यत्वात् । नापि विपर्ययान्तर्भूतः, ज्ञानस्य याथार्थ्ये सति यादृशस्तद्याथार्थ्यानिबन्धनो व्यवहारः शब्दप्रयोगरूपस्तादृशव्यवहारस्यैतोऽपि दर्शनात् । विपर्ययस्तु नैवम् । बाधोत्तरम् "इदं रजतम्" इति शब्दप्रत्यययोरभावात् । एवंच "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" इतिविपर्ययलक्षणे शब्दज्ञानाननुपातित्वं विशेषणं देयमिति बोध्यम् । तदाह *विपर्यये त्विति । बौद्धसत्ताया: सत्त्वादाह *अत्यन्तेति । शब्दज्ञानेत्यस्योक्तार्थैकवाक्यतायै करोत्यपीत्यपिसमुच्चितमाह *ज्ञानमिति । करोति हीति पाठे हिरप्यर्थे । प्रथमहिरेवार्थे । एतेन—

"अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ।
प्रमाबाध्या ऽप्रमा तत्र ह्यतः प्रामाण्यनिर्णयः ॥ इति-

खण्डनकारोक्तेः।अत्यन्तासत्यपि, बाधितत्वेनावधारितेऽपि।अर्थे, विषये। हि, निश्चयेन। शब्दः ज्ञानं करोत्येव । द्वितीयहिशब्द एवकारार्थः । नन्वेवं तत्र प्रवृत्त्यापत्तिः। तज्जनकस्य विशिष्टज्ञानस्य सत्त्वादत आह अप्रमेत्यादि । तत्र, बाधितार्थे । प्रमाबाध्या, प्रमया योग्यताप्रमया बाध्याऽप्रमात्वेन ज्ञाप्या। अप्रमा, अप्रमात्मकशाब्दबुद्धिरेव। भवतीति शेषः । तावतापि किं जातमत आह अत इति । प्रवृत्तिप्रयोजक इति शेषः । तथाच प्रवृत्तिप्रयोजकप्रामाण्यनिर्णयाभावान्न तत्र प्रवृत्तिरित्यर्थ इति नव्यनैयायिकोक्तमपास्तम्। अन्यथा चितेरेव पुरुषत्वात् भेदनियतसम्बन्धरूपस्य षष्ठ्यर्थस्याप्रतीत्यापत्तिः। भवति च चैत्रस्य गौरिति यथार्थशब्दवदत्रापि षष्ठ्यर्थे वृत्तिः। तस्यास्ततो विवेकिनामपि बोधश्च तदाह *नहीति । नन्वेवं व्यपदेशिवदित्यस्य वैयर्थ्यम् अत आह *व्यपेति । विशिष्टो ऽपदेशो व्यपदेशो मुख्यव्यवहारः स यस्यास्तीति व्यपदेशी तेन तुल्यम् असहाये कार्यं भवतीति शाब्दोऽर्थस्तदाह *मुख्येति । एवं च तेनास्यैकवाक्यतैवेति भावः। नन्वेवं 'स्वर्णस्य कुण्डलम्' इत्यस्याप्येवमेवोपपत्त्या तद्व्यवहारात्कथं भेदस्य व्यावहारिकत्वसिद्धिः, अतो मतान्तरं प्रागुक्तमाह *स्वर्णेति । *तदिति । न्यूनाधिकमूल्येत्यर्थः ।

*कश्चिदिति । अरुचिबीजं तत्र रजतमूल्यस्य बाधोत्तरमसत्त्वेऽपि ततः प्राक्सत्त्वेन तदुत्तरमपि शुक्तिमूल्यस्य सत्त्वेन सर्वथा

मूल्याभावो ऽसिद्धः । तत्रापि भेदस्य तत्त्वे ऽप्यवयवसंस्थानकृतभेदेन तदुपपत्तिरिति न तत्रापि तदावश्यकत्वमिति ।

प्रागुक्तकैयटाद्युक्तिं खण्डयति *राहोरिति । *तत्त्वेन-राहुत्वेन । भाष्यसम्मतमपीदमित्याह *अतएवेति । उक्तरीत्या ऽनिर्वाहादेवेत्यर्थः । *लोकवदिति । ज्येष्ठकनिष्ठत्वादितद्व्यवहारवदित्यर्थः । विज्ञानशब्दार्थमाह *व्यवेति । नन्वयमपि 'राहोः शिर' इतिवत्कुतो नेति किमिति तद्भाष्यस्योक्तोऽर्थोऽत आह कैयटरीत्या *किञ्चेति । *अस्य—"एकाचो द्वे प्रथमस्य" इत्यस्य । *वस्तुसिद्धनेति । यथा च जजागारेत्यादौ द्वित्वासिद्ध्यभावापत्तिरित्यर्थः । 'प्रतिलक्ष्यं लक्षणभेद' इतिन्यायाङ्गीकारे तु तत्र न दोष इत्याह *विषयेति । लक्ष्यभेदेन शास्त्रविषयताऽङ्गीकारे तु *अन्त्यः-विकल्पप्रकार एवेत्यर्थः । अधिकं वक्तुमाह *केचित्त्विति । *शब्दाभेदेऽपि-आरोप्यमाणारोपाधिकरणप्रतिपादकशब्दाभेदेऽपि । कार्यादीति तात्पर्यमित्याहुरिति बोध्यमित्याहुरिति पाठः । तत्राद्यं केचित्त्वित्यन्वितं मध्यमं तु वस्तुत इत्यनेनान्वितमन्त्यं त्वन्येत्वित्यनेनान्वितमिति बोध्यम् ॥ १७ ॥

केचित्तु तदभिन्नाभिन्नस्य तदभिन्नत्वमित्याशयेन शङ्का। अयश्च न्यायो मूलकारणोपादानककार्योपादानके कार्ये मूलकारणोपादानकत्वस्यापि व्यवहारेण सिद्धः । यथा—तन्मात्राद्युपादानके ऽपि प्रकृत्युपादानकत्वम् ।

"गुणो नाम स" इत्युत्तराशयस्तु—यत्र स्वाभिन्नवस्तुद्वारकः स्वस्वरूपानुगमः तद्विषय एवोक्तन्यायः ।

स्वर्गनरकयोस्तु नैक्यम्, यदन्तःकरणावयवपरिणामः सुखम्, तदतिरिक्तावयवपरिणाम एव दुःखमित्यङ्गीकारात् ।

"येनोच्चारितेनं सास्नाखुरककुदविषाणिनां सम्प्र-

---

१ कारणाभेदस्यापिव्यवेतिपाठः कसंज्ञके केवलमूलपुस्तके ।

त्ययो भवति स शब्द" इतिभाष्याशयस्तु—यथा चिज्जडयोस्तादात्म्यावभासे ऽपि चित एव भासकत्वं जडस्यावभास्यत्वमेव, स्वभावात्, तथा स्वभावादेव शुद्धशब्दस्य भासकत्वमर्थस्यावभास्यतेति वदन्ति । तस्माद् बुद्ध्यवच्छिन्नाकाशधर्मोऽयमान्तरः स्फोटः ॥ १८ ॥

(कुं.टी.)*तदभिन्नेति । यथा कपालिकाऽभिन्नकपालाभिन्नघटस्य कपालिकाऽभिन्नत्वम् । *मूलकारणेति । यथा प्रकृत्युपादानकं यत् महत्तत्त्वं तदुपादानके ऽपि प्राकृतत्वव्यवहारः । *तन्मात्राः—भूतसूक्ष्माणि । *स्वाभिन्नेति । महत्तत्त्वजन्ये प्राकृतत्वव्यवहारवत् । *यदन्तःकरणेति । यादृशान्तःकरणावयवेत्यर्थः । सादिद्रव्यत्वेन तदपि सावयवमेव, तस्य परिणाम इति भावः । ननु भाष्याच्छब्दार्थयोर्भेदो लभ्यत इत्यत आह *भाष्याशयस्त्विति । *चिज्जडयोरिति । तयोस्तादात्म्याध्यासस्तु विवेकाख्यातिमूलः । यद्वशात्पुरुषस्यापि कर्तृत्वभोक्तृत्वव्यवहारः । *जडस्यावभास्यत्वमिति ।

नन्वेवं वृत्तिव्याप्यत्वं जडत्वमिति फलितम्, तथा च ब्रह्मणो ऽपि वेदान्तवाक्यजन्यज्ञानविषयत्वाद्व्यभिचारः ।

सत्यम् । वृत्त्युपहितमेव ब्रह्म वृत्तिविषयः । तच्च मिथ्यैव । शुद्धं तु स्वप्रकाशमेव । नच शुद्धस्यापि 'स्वप्रकाशम्' इत्यादिज्ञानविषयताऽस्त्येवेति वाच्यम् । तद्वाक्यस्य लक्षणया अशुद्धत्वमप्रकाशत्वव्यापकमित्यर्थात् । तथाचाशुद्धत्वव्यावृत्त्या शुद्धे स्वप्रकाशता पर्यवस्यति । स्फोटाख्यशब्दस्याप्याकाशदेशताया न्याय्यत्वादाह *बुद्ध्यवच्छिन्नेति । आभ्यन्तरेत्यर्थः । वेदान्तरीत्या अन्तःकरणविशेषस्य बुद्धेर्घटादि-

वद् द्रव्यतया आकाशावच्छेदकत्वं बोध्यम् ॥ १८ ॥

(क.टी.)गुणादीनां शब्दत्वाशङ्कादौ बीजं दीक्षिताद्युक्तमाह *केचित्त्विति।तथा सम्भवत्येवमुपपादनमनुचितमित्यरुचिरत्र।*तदभिन्नेति। शब्दाभिन्नगुणादीनां शब्दाभिन्नत्वमित्यर्थः । एतन्न्याये निर्मूलत्वमपाकरोति *अयञ्चेति । तमेव व्यवहारमाह *यथेति । नन्वेवमुत्तराशये कुण्डलकटकयोः कुण्डलारम्भकस्वर्णावयवानुगमस्य कटकेऽभावेनानैक्ये ऽपि सुखदुःखयोरन्तःकरणपरिणामत्वेनैक्यापत्तिरेव अत आह *स्वर्णेति । अन्तःकरणस्यापि सावयवत्वादिति भावः । वैपरीत्यशङ्कानिरासायाह *येनोच्चारीति । शारीरमारुताभिहतकण्ठादिस्थानैस्तदवयवद्वाराऽभिव्यक्तेन येनेत्यर्थः । अत्र विषयाणां तैरवयवैर्गुणादयो ऽप्युपलक्ष्यन्ते । *सम्प्रत्ययो—ज्ञानम् । परमप्रकृतमुपसंहरति *तस्मादिति ॥ १८ ॥

अर्थश्च बौद्ध एव ज्ञानविषयः शक्तिग्रहविषयश्च । ज्ञानं चवृत्तिरूपं बुद्धिधर्म एवेति एकदेशस्थत्वात्तेषामितरेतराध्यासः, "शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम्" इति योगसूत्रोक्त उपपन्नः । सचानादिवासनावशादनादिरेव । एवं शब्दार्थधर्मयोः,इति न कुतर्कावसरः॥१९॥

(कुं० टी०) *वृत्तिरूपमिति । अन्तःकरणमिन्द्रियद्वारा घटादिदेशं गत्वा घटाद्याकारेण परिणमते सा वृत्तिरित्युच्यते । *बुद्धिधर्म इति।अन्तःकरणमेव नैर्मल्यान्निश्चये जाते बुद्ध्याख्यां लभते । ब्रह्मात्मकज्ञानस्य बुद्धिधर्मत्वाभावादुक्तं वृत्तिरूपेति । *तेषाम्–शब्दार्थवृत्तीनाम् । *शब्दार्थप्रत्ययानामिति । एतच्च पातञ्जलसूत्रम् । गौरिति शब्दः, गौरित्यर्थः, गौरिति प्रत्ययः इत्येवं शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करः प्रसिद्धः। तेषां शास्त्रयुक्तिभ्यां विभागः सिद्धः । वर्णव्यङ्ग्यं पदं, पदव्य-

ज्ञ वाक्यमिति शब्दतत्त्वम्, अर्थो द्रव्यादिर्वाच्यो लक्ष्यश्चेत्यर्थतत्त्वम्, शब्दजन्याऽर्थविषया बुद्धिः प्रत्यय इति ज्ञानतत्त्वम्। तस्मिन् विभागे संयमात् सर्वशब्दादिवशीकारसूचकं सर्वभूतानां पश्वादीनां रुतस्य शब्दस्य ज्ञानं भवति 'अनेनाभिप्रायेणानेनेदमुच्चारितम्' इति । *उपपन्नइति। तेषामितरेतराध्यास इति पूर्वेणान्वयः। ननु 'शुक्लः पटः पटः शुक्ल' इति प्रमाया अप्यध्यासरूपत्वाद् भ्रमत्वापत्तिः । सत्यं, स्वरूपविवेकतिरस्कारेणाभेदधीरेवाध्यासः । *सच—अध्यासश्च। *शब्दार्थेति। शब्देऽर्थधर्मस्याप्यध्यासः। *कुतर्केति। अग्निशब्दोच्चारणे मुखदाहापत्तिरित्यादीत्यर्थः ॥ १९ ॥

(क. टी.) *योगसूत्रोक्त इति। संयमान्तरस्य सिद्ध्यन्तरमिदमुक्तं तत्र। *शब्देत्यादि। गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानं तेषां सङ्केतरूपाध्यासात्तत्रैवोक्तात्संङ्करो विवेकाग्रहणम् । वस्तुतस्तेषां भेद एव । अतस्तेषां प्रविभागे भेदे संयमात्साक्षात्कारपर्यन्तात्सर्वभूतानां रुतानि ज्ञायन्ते अयं काकादिरमुमर्थमनेन शब्देन कथयतीत्यर्थः । अन्यथा श्रोत्रग्राह्यैर्वर्णैर्बाह्यघटाद्यर्थानामत्यन्तभेदात्कथमध्यासः स्यात् । किमर्थं वा तज्ज्ञानाय योगोपदेशः स्यादिति भावः। नच तद्रीत्या सङ्करे कथं तेषां प्रविभागः। सङ्करस्यैकदेशस्थत्वोपाधिकत्वात्। वस्तुतस्तत्रापि तेषां भेद एवास्तीति न दोषः।

एतेनास्मदादीनां तद्भेदसाक्षात्कारे ऽपि योगजतत्साक्षात्काराभावान्न सर्वभूतरुतज्ञानमित्यपास्तम्, तत्सूत्रतद्भाष्यविरोधात् ।

एतत्सङ्करमूलक एव चायमयमित्यपि सङ्केतः। कार्यकारणभावोऽपि तदर्थविषयकशाब्दं प्रति तदर्थगृहीतशक्तिकतत्तद्रूपाभिव्यक्तस्फोटज्ञानत्वेन हेतुत्वमिति बोध्यम् ॥ १९ ॥

अतएव ।

निकारोऽग्रे पश्चाद्धनमहह भोस्तद्धि निधनम्।
रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः।

गर्वभङ्गो भार्गवस्य शौर्यभङ्गश्च वालिनः ॥

हिरण्यपूर्वं कशिपुं प्रचक्षते इत्यादि सङ्गच्छते । अन्त्ये हिरण्यकशिपुनामानामिति प्रतीतेरनुभवसिद्धत्वात् । अत एव "कथितपदत्वं दोषो ऽपि क्वचिन्न दोषः ।

उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥

इत्यत्र ताम्रपदं विना न तादृशो बोधः, पदप्रकारकबोधात्" इति प्रकाशकृतः ।

तदुक्तं हरिणा—

यदन्तःशब्दतत्त्वं तु नादैरेकं प्रकाशितम् ।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता ॥
अर्थभागैस्तथा तेषामान्तरोऽर्थः प्रकाशते । इति ।
एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ । इतिच ।

अन्तस्तथा स्थितावपि बहिर्भेदेन भासेते । तस्यैव शक्तिभेदात् । अक्रमे ऽपि तस्मिन् क्रमभासोऽपि तच्छक्तिवशादेवेत्यपि स्पष्टं तत्रैव ।

किञ्च बौद्धपदार्थानङ्गीकारे—

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ॥
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।

इतिस्मृतेः, "सभूरिति व्याहरत् स भूमिमसृजत" इतिश्रुतेश्च सृष्टेः प्राक् भूःशब्दादिभ्यस्तदर्थज्ञानपूर्वकं सृष्टिरिति लाभेन तदा बाह्याया भुवो ऽभावात् भूःशब्दस्य शक्तिग्रहपूर्वकं कस्यार्थ-

स्य बोधः स्यात्। नच जातेर्नित्यत्वात्तत्र शक्तिग्रह इति वाच्यम्। अद्वैतिनां जातेरप्यनित्यत्वेन तस्या अपि केनचिद्वैदिकशब्देनैव ज्ञानपूर्वं ब्रह्मणा निर्माणे तत्राप्यस्या एव दुरवस्थायाः सत्त्वात्। निराश्रयजातिसत्त्वे मानाभावाच्च। तत्तद्व्यक्तिसमवेतब्रह्मसत्ताया जातित्वे ऽप्यवच्छेदकाभावात्तस्यास्तदा जातित्वाभावात्। किञ्च¹ तत्तद्व्यक्त्यवच्छिन्ना ब्रह्मसत्ता जातिरिति गौरवान्न युक्तमित्यग्रे वक्ष्यते। "अपागादग्नेरग्नित्वम्" इति श्रुत्या तन्नाशस्यैव कथनाच्च। तस्मात्सर्वज्ञत्वाद्भगवदनुग्रहाच्च वेदलाभवत्तदैव स्वबुद्धिवर्त्तिपदार्थस्य स्थूलरूपेण भानम्, तत्र संबन्धग्रहो बोधश्च हिरण्यगर्भस्येति बोध्यम्॥ २०॥

(कुं० टी०) *निकार इति। निकारो ऽधिक्षेपो निशब्दश्च। निशब्दोत्तरधनशब्दनिधनशब्दार्थयोरभेदाध्यवसायः। कथितपदत्वं न दोष इत्येतदुदाहरति *उदेतीति। कथितपदत्वमेकस्यैव पदस्य पुनः प्रयोगः। *ताम्रपदंविनेति। 'अत्र यदि रक्त एवास्तमेतीति क्रियेत तदा पदान्तरप्रतिपादितः स एवार्थो भिन्न इव प्रतीयमानः प्रतीतिं व्यवदधीत'। पूर्वं बाह्यस्फोटं वाचकमाश्रित्य व्याख्यातम्, इदानीमान्तरमेवाह *यदन्तरिति। यदेकं निरवयवमन्तः शब्दतत्त्वं नादैर्बहिः प्रकाशितं तद् वाक्यमपरे आहुः, तस्य वाक्यस्य एकता निरंशतैव प्रतिपाद्यते। न केवलं

१ किञ्च—नाच्च पाठो ऽयं कुं० कख पु० मूले नोपलभ्यते।

वाक्यमेवाखण्डं किन्तु वाक्यार्थोऽपीत्याह *अर्थभागैरिति। तेषां मते पदार्थभागैरखण्डो वाक्यार्थ आन्तरो व्यज्यते। तौ-च शब्दार्थौ एकस्य तत्त्वस्य सम्बन्धिनौ अभिन्नावेव बहिः-स्थितौ भिन्नाविव प्रतिभासेते। *तथा-अभेदेन। *तस्यैव-आत्मन एव। शक्तेर्भेदः वैचित्र्यम्। *अक्रमे-वर्णादिक्रमशून्ये। *वेदशब्देभ्यइति। वैदिकशब्दान् स्मृत्वेत्यर्थः। *पृथक्-संस्थाः-भिन्नाकृतीन् पृथिव्यादीन्। स्पष्टश्चेदम् "एते असृग्रमिन्दवः" इतिश्रुतावपि। *तदर्थज्ञानेति। तत्तच्छब्दैः तं तं पदार्थं स्मृत्वा रचितवान्। बौद्धपदार्थाभावे तु तदानीं कस्य पदार्थस्य स्मरणं स्यादित्यर्थः। *अवच्छेदकाभावात्-उपधायकाभावात्। *तस्याः-ब्रह्मसत्तायाः। तदानीम्-व्यत्य-भावदशायाम्। *वेदलाभवदिति। "यो वै ब्रह्माणं विदधाति पूर्वं यस्मै वेदान्प्राहिणोति सर्वान्" इति। स्वमानेन वर्षशतान्ते ब्रह्मणोऽपि नाशादन्य एव हिरण्यगर्भ उत्पद्यते॥ २०॥

(क० टी०) *अत एव—शब्दार्थयोस्तादात्म्यादेव। निशब्दोऽग्रे पश्चाद्धनशब्द इति यत्तदेव, अहह खेदे, निधनं भोरित्यर्थः। एवं रामेति यत् द्व्यक्षरं नाम तदेव पिनाकिनो मानभङ्ग इत्याद्यर्थः। *प्रतीतेरिति। सा चाभेदं विनाऽनुपपन्नेति भावः। *अत-एव-शब्दार्थयोरभेदेन शब्दस्य प्रकारतया शाब्दबोधविषयत्वादेव। प्रकाशेत्यत्रान्वयः। *दोषोऽपीति।

तापेन राजते सूर्यः शूरश्चापेन राजते।

इत्यादाविति भावः। *तादृशः-एकरूपताबोधः। अत्र हरिसंमतिमप्याह *तदुक्तमिति। बुद्धिस्थयोरुभयोर्मिथो भिन्नयोरेव ज्ञान-विषयत्वमित्युक्तमित्यर्थः। *हरिणा-तेनापि। *नादैः-वर्णैः। *अपरे वैयाकरणाः। *शब्दं-वाचकम्। *तस्य-आन्तरस्य। *वाक्ये-बाह्ये। *अर्थभागैः-तद्रूपतदंशैः। एकताचेत्याहुः। *तथा-तथासति। *तेषा-म्-अपरेषाम्। *आत्मनः-अन्तःकरणस्य। बुद्धिस्थत्वेनाह *अपृथ-

गिति । नन्वेवं बाह्यप्रतीतिविरोधोऽत आह *अन्तरिति । *तथा-भेदेन । *तस्यैव-आत्मन एव । *तस्मिन्-आन्तरावभासे । *सः-हिरण्यगर्भः । *वेदशब्देभ्यः-वैदिकशब्देभ्य एव । *आदौ-सृष्टिप्रारम्भे । *पृथक्पृथक्-भिन्नभिन्नरूपतया । सर्वेषां नामानि कर्माणि च सर्वेषां संस्थाः व्यवस्थाश्च पृथक् निर्ममे इत्यर्थः । ज्ञानपूर्वमिति शेषः । अतएव श्रुतिमाह *सभूरिति । आदिपदार्थमाह *सृष्टिरिति । वेदेत्याद्यर्थमाह *भूरिति । श्रुतिलब्धमाह *तदर्थेति । अन्यथा वैपरीत्यस्याप्यापत्तिरिति भावः । *इति-इत्यस्य । *तदा—सृष्टेः प्राक् । *स्यादिति ।

किञ्च, तथा सति तत्र शक्तिग्रहस्य पुरुषसङ्केतसापेक्षत्वापत्त्या तत्र च दोषजन्यत्वसम्भावनया वेदप्रामाण्यभङ्गरूपः शब्दे विरोधः स्यादित्यपि बोध्यम् ।

यत्तु हिरण्यगर्भस्य भूरादिपदशक्तिग्रहानुपपत्त्या जातेर्नित्यत्वात्तत्र शक्तिग्रह इति "शब्दइति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्" इतिव्याससूत्रव्याख्यावसरे उक्तं देवताया विग्रहवत्त्वे ऽनित्यताऽऽपत्त्याऽनित्यस्याऽर्थस्येन्द्रादिशब्देनानित्यः सम्बन्धः स्यात् । तथा च शब्दे वैदिकशब्दे प्रामाण्यभङ्गरूपो विरोध इति चेन्न । अतः शब्दात् श्रौतशब्दादेव ज्ञानपूर्वकं हिरण्यगर्भादेः श्रुतिस्मृत्योः सर्वोत्पत्तिश्रवणेनोक्तभूरादिशब्दानां सम्बन्धानित्यत्वप्रयुक्तमप्रामाण्यं यथा परिहर्त्तव्यमेवं देवताविषयेऽपीति तदर्थ इति ।

तत्खण्डयति *नचेति । स्पष्टं तत्सूत्रव्याख्यायां गुरुचरणकृतायाम् । *निर्माणे-स्वीक्रियमाणे । *निराश्रयेति । प्रलये इत्यादिः । इदञ्चाविद्या वा आविद्यकधर्मविशेषो वा जातिरितिपक्षयोरुक्तम् । तृतीयपक्षे आह *तत्तादिति । *तदा-सृष्टेः प्राक् । इदं च तस्यास्तत्त्वमभ्युपेत्योक्तम् । वस्तुस्तदेव नेत्याह *किञ्चेति । *अग्रेइति । अत्रैव प्रकरणे जातिस्फोटनिष्कर्षोत्तरम् परेत्वितिमतेनेतिभावः । विशिष्टवेषायास्तस्या अपि अनित्यत्वमाह् *अपागादिति । "वाचारम्भणम्" इति श्रुतिवाक्यशेषोऽयम । अग्निस्तु ब्रह्मैवेत्यर्थादुक्तम् । किञ्चेत्याद्युक्तमुपसंहरति *तस्मादिति ॥ २० ॥

सचायं स्फोट आन्तरप्रणवरूप एव। "ओंकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इति श्रुतेः । बह्वी, वाक्यपदादिरूपा । नानारूपा, घटपदादिरूपा च। अकार एवेति श्रुत्यन्तरे पाठः । तत्राप्यवयवद्वारा प्रणवोपलक्षणत्वम् । द्वादश स्कन्धे भागवते प्रणवस्य स्फोटत्वं स्फुटमेवोक्तम् । तत्र हि—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥

हृद्गताकाशादित्यर्थः । यः कर्णपुटापिधानेन श्रोत्रवृत्तिनिरोधादस्माभिरपि विभाव्यते श्रूयते ।

ततोऽभूत्त्रिवृदोङ्कारो यो ऽव्यक्तप्रभवः स्वराट् ।
यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥

त्रिवृत्, त्रिमात्रः । अव्यक्त ईश्वरः प्रभवो यस्य सः । अत एवाह भगवतो लिङ्गं गमकः ॥ २१ ॥

(कुं० टी०) *प्रणवरूप इति । प्रणवश्च द्विविधः परोऽपरश्च । परो ब्रह्मात्मकः, अपरः शब्दात्मकः ।

तदुक्तं सूतसंहितायाम्—

परः परतरं ब्रह्म ज्ञानानन्दादिलक्षणम् ।
प्रकर्षेण नवं यस्मात्परं ब्रह्म स्वभावतः ॥
अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्मलः ।
प्रकर्षेण नवत्वस्य हेतुत्वात्प्रणवः स्मृतः ॥ इति ।

सत्यज्ञानानन्दादिरूपं ब्रह्म यतः प्रकर्षेण नवं निःशेषविकाररहित्येन कूटस्थं,तथा प्रकर्षेण नवः तत्प्राप्तिरूपो यस्मादिति

व्युत्पत्त्या शब्दो ऽपि प्रणव इति तदर्थः । *स्पर्शोष्मभिरिति । स्पर्शः ताल्वादेः । ऊष्मा वायुः । *समाहितात्मन इति । ब्रह्मणो हृदि य आकाशस्तस्मान्नादो ऽभूदित्यर्थः । स नादः क इत्याह *यइति । अव्यक्तप्रभवत्वेन सूक्ष्मत्वं दर्शितम् । अत एवाह *स्वराडिति । स्वत एव हृदि प्रकाशमान इत्यर्थः । *त्रिमात्रइति । अकारोकारमकाररूपमात्रात्रयात्मक इत्यर्थः । ईश्वरः प्रभवो यस्येति । ननु "य इच्छन्दसामृषभ" इति श्रुतौ ओंकारं प्रकृत्य "ब्रह्मणः कोशो ऽसि" इत्युक्तं तत्कथं ब्रह्मप्रभवत्वम् । सत्यम् । असेरिवोपलब्ध्यधिष्ठानत्वात्कोशत्वम् । *गमकइति । कार्येण लक्ष्यत इति भावः ॥ २१ ॥

(क०टी०)तत्र स्फोटस्वरूपमाह *सचेति । प्रणवस्यापि द्वैविध्यादाह *आन्तरेति । स्पर्शोष्मभिरित्युपलक्षणमन्येषामपि । पौनरुक्त्यभ्रमं निरस्यन् रूपपदार्थमाह *घटेति । घटपटादिरूपा चेति पाठः । श्रुत्यन्तराविरोधमाह *अकार एवेतीति ।

तदुक्तं "विशोका वा ज्योतिष्मती" इति पातञ्जलसूत्रभाष्यव्याख्याने प्रक्रियात्वेन वाचस्पतिमिश्रादिभिः–'उदरोरसोर्मध्ये ऽधोमुखमष्टदलं पद्मं तद्रेचकप्राणायामेनोर्ध्वमुखं कृत्वा तत्रालम्बने चित्तं धारयेत् । तन्मध्ये हि सूर्यमण्डलमकारो जागरितस्थानं, तदूर्ध्वं चन्द्रमण्डलमुकारः स्वप्नस्थानं, तदूर्ध्वं वह्निमण्डलं मकारः सुषुप्तस्थानं, तदूर्ध्वं ब्रह्म व्योमात्मकं नादस्तुरीयं स्थानं याऽर्धमात्रेति । योगिनां तत्कर्णिकायां विश्वव्यापिशाखासहस्रवत्या मनोवहनाड्या मूलं तिष्ठति, यस्या ऊर्ध्वमुखी एका शाखा सुषुम्नाख्याऽऽन्तरसूर्यादिमध्यगा वा तया च शाखारूपया ब्रह्मनाड्या बाह्यान्यपि सूर्यादिमण्डलानि प्रोतानि, सैव मनोवहा नाडी चित्तस्थानं तस्यां ध्यानधारणासमाधिभिश्चित्तसाक्षात्कारो भवति' इति ।

सोऽयं प्राणिमात्रस्य हृत्स्थः प्रणवस्तत्तुरीयोंऽशो ऽर्धमात्रारूपो नादो वा स्फोट इत्युच्यते ।

इदमेव मार्कण्डेयेनोक्तम्—

अर्धमात्रास्थिता नित्या याऽनुच्चार्या ऽविशेषतः ॥ इति ।

अविशेषतः, गत्वाद्यनालिङ्गिततया । तस्यैव प्रणवस्य श्रुत्या सर्ववाग्रूपत्वमुक्तमिति बोध्यम् । स्पष्टार्थमाह *द्वादशेति । *तत्र हीत्यस्येत्यर्थकमुक्तमित्यत्रान्वयः । *समाहितेति । नियतान्तःकरणस्य हृद्याकाशादित्यस्यार्थमाह *हृद्गतेति । तुरीयः सूचितः ॥ २१ ॥

कोऽसौ परमात्मा तत्राह—

शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक् ।
येन वाग् व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥

सुप्ते श्रोत्रे कर्णपिधानादिना अवृत्तिके । इमम्, प्रणवरूपम् । स्फोटम्, स्थूलरूपेण परिणतमपि यः शृणोति स परमात्मा । जीवस्य तु करणाधीनज्ञानत्वात् करणस्य चावृत्तिकत्वान्न तदा श्रोतृत्वम् । ईश्वरस्तु यतः शून्ये ऽपीन्द्रियवर्गे दृक् ज्ञानं यस्य तादृश इति श्रोतैव । जीवस्य तदुपलब्धिस्तु ईश्वरद्वारिकैव । यथा निद्राकाले लीनेन्द्रियमपि जीवं परमात्मैव शब्दं श्रुत्वा प्रबोधयति तद्वत् । येन प्रणवेन वाक् बृहती व्यज्यते । यस्य च हृदयाकाशे आत्मनः सकाशाद्व्यक्तिः ।

स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ।
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ॥

स्वधाम्नः, स्वकारणस्य । किञ्च, स तदंशभूतसमस्तदेवतावाचको ऽपीत्याह—स, प्रणवः । सर्वमन्त्राणामुपनिषद्रहस्यं सूक्ष्मरूपम्, यतो वेदकारणम् । तत्का-

रणत्वेऽपि न विकारित्वं, यतः सनातनम्, सदैकरूपम् ।

तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ।
धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ।

अकाराद्याः, अकारोकारमकाराः । तस्येत्यवयवावयविभावे षष्ठी॥यैः,अकाराद्यैः । त्रयः,त्रिसंख्यायुक्ताः। भावाः,धर्माः । धार्यन्ते तत्कारणत्वात् । गुणाः, सत्वरजस्तमांसि । नामानि, ऋग्यजुस्सामलक्षणानि । अर्थाः, भूर्भुवः स्वर्लोकाः । वृत्तयः, जाग्रत्स्वप्नसुषुप्तयः । अनेन तस्यैव सर्वप्रपञ्चकारणतोक्ता ।

ततोऽक्षरसमाम्नायमसृजद्भगवानजः ।
अन्तःस्थोष्मस्वरस्पर्शदीर्घह्रस्वादिलक्षणम् ॥ इति ।

ततः,अकारादिभ्यः । अन्तःस्थादयो लक्षणं यस्य तम् ।

तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ।
सव्याहृतिकान्सोंकारान् चातुर्होत्रविवक्षया ॥

असृजदित्यनुषज्यते । होत्रुपलक्षिताश्चत्वार ऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं हौत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षयेत्यर्थकमुक्तमिति ॥ २२ ॥

(कुं.टी.)ननु जीव एव श्रोताऽस्त्वित्यत आह *सुप्तेइति। पिहितेऽपि श्रोत्रे इत्यर्थः। *प्रणवरूपमिति। अव्यक्तमित्यर्थः।*श्रोतैवेति। इन्द्रियवर्गाभावेऽपि ज्ञातृत्वात्परमात्मैव श्रोतेत्यर्थः । *निद्रेति । प्रधानांशतमस्समुद्रेके सति जीवस्तमसा मग्नो भवति तदालम्बना जीवस्य वृत्तिर्निद्रा । उद्रेको दृढतरसंस्कारजनकत्वम् । जीवस्य श्रोतृत्वासम्भवं दर्शयति *लीनेन्द्रियमपीति । *तत्कारणत्वेऽपीति । वेदानां कारणीभूतोऽपि प्रणवो नित्य एवेत्यर्थः ।

त्रीन् भावान्प्रत्येकं दर्शयति *गुणेति। *अकारोकारेति। ननु समाहारद्वन्द्वे ऽव्ययत्वानापत्तिः, "अवतेष्टिलोपश्च" इति औणादिकस्य रूढस्यैव स्वरादिपाठेनाव्ययत्वादिति चेन्न। औणादिकस्य "कृन्मेजन्तः" इत्येव सिद्धे स्वरादिपाठस्यैतन्मात्रार्थत्वात्। तत्र ब्रह्मप्रतिपादकत्वं समुदायशक्त्या।

तदाहुः—

अकाराद्यास्त्रयो वर्णा ब्रह्मविष्णुमहेश्वराः।

अन्ते प्रतीयमानो यो ध्वनिर्ब्रह्मेति कीर्त्यते॥ इति।

*प्रपञ्चकारणतेति।

ननु समुद्रे ऽपि वाय्वाद्यभिघातं विना तरङ्गो नोत्पद्यते तत्कथं चिन्मात्रे ऽद्वितीये द्वितीयमज्ञानं सम्बध्यते यतोऽहङ्कारा-द्युत्पत्तिरिति चेत्।

सत्यम्, कार्यमात्रस्य कारणमविद्या। साचाहङ्कारादिदृष्ट्यैव चिदात्मनि कल्प्यते नतु चिदात्मनि तत्सम्बन्धो ऽस्ति।

*अन्तःस्थोष्मेति। यरलवा अन्तःस्थाः, शषसहा ऊष्माणः। *विभुः—चतुर्मुखरूपो भगवान्। *असृजत्—आविर्भावितवान्। "शिवाद्या ऋषिपर्यन्ताः स्मर्तारो ऽस्य न कारकाः" इति वचनात्। एतेन—"छन्दांसि जज्ञिरे तस्माद्" इति वचनेन वेदानां जन्यत्वमित्यपास्तम्। *होत्रुपलक्षितम्—होत्रा उपलक्षितम्। होताऽध्वर्युर्ब्रह्मा उद्गाता चेति चत्वार ऋत्विजः। तत्र हौत्रमृग्वेदस्य, आध्वर्यवं यजुषः, औद्गात्रं साम्नः॥ २२॥

(क० टी०) *कोऽसावित्यस्य नन्वित्यादिः। वस्तुतः स्वभावादाह *कर्णेति। तथा परिणतस्य सर्वसाधारण्यादाह *स्थूलेति। ननु स जीव एव भवतु अत आह *जीवस्यात्विति। *करणेति बहुव्रीहिः। *अवृत्तिकेति। उक्तरीत्येति भावः। *तदा—तत्प्रधाना-

दिकाले । नन्वेवमुक्तयुक्त्या ईश्वरस्यापि कथं श्रोतृत्वमत आह *ईश्वरस्त्विवति । हेतुगर्भमिदं विशेषणमित्याह *यत इति । *शून्ये ऽपि-तेनावृत्तिकेऽपि । भावप्रत्ययान्तत्वादाह *ज्ञानमिति । ननु तदा जीवस्याज्ञायमानोपलब्धिः कथमत आह *जीवस्येति । इदमावश्यकमित्याह *यथेति । स्पष्टं चेदं वेदान्तसूत्रव्याख्यायां गुरुचरणकृतायाम् । उत्तरार्धार्थमाह *येनेति । पूर्वार्धस्थस्य चात्र संबन्धेनाह *यस्य चेति । पूर्वोक्तत्वादाह *हृदयेति । *स इति । मध्यमणिन्यायेनान्वेति । साक्षादित्यनेनान्येषामपि परम्परया स एवार्थ इति सूचयति । उत्तरार्धेनान्यदुच्यते इत्याह *किंचेति । *तदिति । परमात्मेत्यर्थः । मन्त्राणां तत्तद्देवताप्रतिपादकत्वादिति भावः । *रहस्यम्-उपनिषदर्थः । तदर्थः *सूक्ष्ममिति । तत्र हेतुगर्भे विशेषणमाह *यत इति । एवमग्रेऽपि । *वेदेति । वेदस्य कारणमित्यर्थः । मृदादितुल्यत्वादाह *तत्कारेति । *तस्य-प्रणवस्य । लौकिकादिवर्णक्रमनिरासायाह *अकारोकेति । नेयञ्जन्यजनकभावे षष्ठी । तथा सति हि पञ्चमीमेव वदेद्, अत आह *तस्येत्यवेति । *भावाः-पदार्थाः । त एवोक्ताः *गुणेति । धारणं न घटभूतलादिवदित्याह *तत्कारेति । त्रित्वं प्रत्येकान्वयि न समुदितान्वयीत्याह *गुणा इत्यादि । फलितमाह *अनेनेति । *तस्यैव-आन्तरप्रणवरूपस्फोटस्यैव । *तत इति बहुवचनान्तात्तसिलित्याह *अकारादिभ्य इति । आदिना प्लुतादिपरिग्रहः । *स्वरः—उदात्तादिः । अन्यथा पौनरुक्त्यं स्पष्टमेव । *तेन—अक्षरसमाम्नायेन । बाह्यप्रणवाशयेनाह *सोङ्कारानिति । चतुर्णां होतृत्वाभावादाह *होत्रुपेति । छत्रिण इतिवच्चत्वारोप इति तत्त्वम् ॥ २२ ॥

निरुक्तभाष्ये ऽपि उक्तरीत्या पदसत्ताऽभावाशङ्कोत्तरभूतं "व्याप्तिमत्त्वात्तु शब्दस्य" इति प्रतीकमुपादायोक्तम्-'अभिधानाभिधेयरूपा बुद्धिर्हृदयाकाशप्रतिष्ठिता परबोधनेच्छया पुरुषेणोदीर्यमाणा कण्ठादिषु वर्णभावमापद्य बाह्याकाशस्थं शब्दं स्वस्वरूपं कृत्वा श्रोत्रद्वारेण तत्र स्थितां श्रो-

तुर्बुद्धिमनुप्रविश्य सर्वार्थसर्वाभिधानरूपां तत्तद्बुद्धिं व्याप्नोति । पुरुषयत्नजा वक्रोद्धाताः परं नश्यन्ति न शब्दः । स च तदनुरक्तो ऽर्थप्रत्ययं जनयति इति तत्रत्यपदत्वादिकं वक्रोद्धातेष्वारोपयन्ति, तद्गतनाशादि च तस्मिन् । पुरुषबुद्ध्यवस्थस्यैव चार्थस्य प्रत्ययमादधाति शब्दः । तेनैव तस्य संबन्धाद्' इति ।

स च शब्दो वस्तुत एको ऽपि तत्तद्वर्णसंस्कारैः प्रतिबिम्बिततत्तद्रूपो ऽनन्तपदरूपतामिवापन्न इति सर्वपदरूपः सर्वार्थाभिधानशक्तिः ।

सा शक्तिश्च योगिप्रत्यक्षगम्या नास्मज्ज्ञानगम्या । यत्रैव व्यवहारादिना तज्ज्ञानं तत्रैवास्माकं बोध इति मर्यादा । एवमेकैकवर्णो ऽपि सहकारिवर्णान्तरसंबन्धात् अनन्तपदरूप इति सो ऽपि तत्तच्छक्तिरिति गकारौकारविसर्जनीया गोर्वाचका इति लोकस्याविचारितरमणीये तत्समूहे वाचकत्वग्रहः । तादृशस्यैव शास्त्रेणान्वाख्यानं तदूदृष्ट्या बोध्यम्

तदुक्तं भाष्ये—"अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः" इति । लोके ऽर्थबोधकत्वेन गृहीतो ध्वनिर्वर्णात्मकः तत्समूहः शब्द इति तदर्थः । "अथ गौरित्यत्र कः शब्द" इति प्रश्ने इदमुत्तरम् ।

अखण्डो ऽपि स्फोटो गकाराद्यवस्थाभ्यो भिन्नो ऽभिन्नश्च चरमावस्थया विसर्जनीयादिरूपया पदादिरूपेण व्यज्यत इति वर्णेषु तत्त्वव्यवहारोपपत्तिर्लोकस्येति बोध्यम् ॥ २३ ॥

१ वर्णेष्वितिपा. कुं. टी. युतकखपु. ।

(कुं.टी.) *पदसत्ताऽभावेति। बाह्यपदसत्ता नास्तीत्याशङ्क्येत्यर्थः। बुद्धेरेव विषयाकारेण परिणामादाह * रूपाबुद्धिरिति। अभिधानम्-वाचकम्। *हृदयेति। हृदयस्थो य आकाशः तत्र स्थितमित्यर्थः। आभ्यन्तरार्थशब्दरूपा बुद्धिर्वक्त्राभिघातेन वाक्यार्थशब्दरूपवर्णात्मिका भूत्वा श्रोत्रद्वारेण परबुद्धिविषया भवतीत्यर्थः। *उदीर्यमाणा-प्रेर्यमाणा। *स्वस्वरूपमिति। आन्तरस्यैव बाह्यरूपताऽध्यवसायात्। *वक्त्रोद्घाताः-वक्त्रव्यापाराः। *सच-श्रोतृबुद्धिस्थश्च। ननु शब्दस्य नित्यत्वे सर्वदाऽर्थप्रत्ययापत्तिरत आह *तदनुरक्तइति। वक्त्रोद्घातव्यञ्जित इत्यर्थः। *तत्रत्येति। आभ्यन्तरशब्दगतेत्यर्थः। *तद्गतेति। वक्त्रोद्घातगतेत्यर्थः। *तस्मिन्-बुद्धिस्थे। *तेनैव-बुद्धिस्थेनैव। *तस्य-बुद्धिस्थस्य। *वर्णसंस्कारैरिति। प्रतिबिम्बितं यत्तत्तत्पदं तद्रूप इत्यर्थः। *यत्रैव-यस्मिन्पदे एव। *तज्ज्ञानम्-तादृशशक्तिज्ञानम्। *भिन्न इति। अखण्डत्वात्। अभिन्नस्तु प्रतिबिम्बवशात्। *तत्त्वेति। शब्दत्वेत्यर्थः॥ २३॥

(क० टी०) अयमुक्त एवार्थो निरुक्तभाष्यसंमतोऽपि इत्याह *निरुक्तेति। *उक्तरीत्येति। वर्णानामुत्पत्तेरभिव्यक्तेर्वा क्षणिकत्वादित्यर्थः। अभावेऽस्यान्वयः। अभावेनाशङ्केति समासः। *तेन-नामाख्यातादिभेदेन। तद्विभागकथनम्, तल्लक्षणकरणं, प्रकृतिप्रत्ययविभागेन तदन्वाख्यानं चेति सर्वमनुपपन्नमित्याशङ्क्येत्यर्थः। *अभिधानेति। शब्दार्थोभयरूपेत्यर्थः। उदीर्यमाणा-सती। *कण्ठादिषु-स्थानेषु। *बाह्येति। सर्वसमष्टेर्विराजः इत्यर्थः। *श्रोत्रेति। श्रोतुरित्यादिना। *तत्र-श्रोतुर्हृदयाकाशे। वक्तृबुद्धिवत् श्रोतृबुद्धिरपि उभयरूपेत्याह *सर्वार्थेति। *तद्बुद्धिम्-श्रोतृबुद्धिम। ननु तस्य नष्टत्वात्कथं तेन तद्यापनमत आह *पुरुषेति। वक्तृ-

१ हृदये-त्यर्थः कुं० कपु० नास्ति।

पुरुषेत्यर्थः । *वक्त्रोद्धाताः–वर्णरूपा ध्वनयः । तस्य सर्वार्थप्रत्यायकत्वनिरासायाह *सचेति । शब्देत्यर्थः । *तदनुरक्तः–वक्त्रोद्घातानुरक्तः । इतरेतराध्यासमाह *तत्रत्येति । शब्दनिष्ठेत्यर्थः । *तद्गेति । विनाशिवक्त्रोद्घातनिष्ठेत्यर्थः । आदिनोत्पत्त्यादि । पूर्वादिना वाक्यम् । *तस्मिन्–शब्दे । एवं बौद्धस्य वाचकत्वमुक्त्वा वाच्यत्वमपि बौद्धस्यैवेत्याह *पुरुषेति । एवं स्फोटादि निरूप्याथ वाक्यस्फोटस्यैव मुख्यत्वं सिद्धान्ततया प्रागुक्तं प्रतिपादयितुमन्यसिद्धान्तं तावदाह *सचेति । स्फोटरूप इत्यर्थः । तदभिव्यञ्जनमेव तत्संस्कारः । वस्तुतो ऽतत्त्वादाह *एवेति । *सर्वार्थेति । व्यधिकरणबहुव्रीहिः । नन्वेवमस्मदादीनामपि सर्वतः सर्वबोधापत्तिरत आह *साशक्तिश्चेति । एवं च यत्र शक्तिग्रहस्तत्रैव बोधो ऽस्माकं तत्सत्त्वेऽपि नान्यत्रेति नातिप्रसङ्गस्तदाह *यत्रैवेति । आदिना कोशादि । *तज्ज्ञानं–शक्तिग्रहः । एवं सिद्धान्तान्तरमुक्त्वा प्रक्रियासिद्धान्तमाह *एवमिति । तद्वदयमप्यनन्तपदरूप इत्यर्थः । न तु वास्तवत्वेन साम्यमिति भावः । *सम्बन्धात्–सर्वपदभवनशक्तिमत्त्वादिति शेषः । *तच्छक्तिः–सर्वपदार्थबोधनशक्तिकः । *विसर्जनीयाः–समुदिताः । तत्त्वतः प्रागुक्तयुक्त्याऽसत्त्वादाह *अविचारीति । अस्यावश्यकत्वमाह *तादृशेति । अन्यथा शास्त्रानर्थक्यमेवेति भावः ।

इदमपि भाष्यसंमतमित्याह *तदुक्तमिति । उक्तार्थलाभायाह *लोकेऽर्थबोधकत्वेनेति । *तत्समूहः–वर्णसमूहः । नन्वस्य भाष्ये प्रसिद्धमर्थान्तरमेव यथाश्रुतं कुतो नेति आह *अथगौरिति । एवञ्चार्थान्तरं नैव तात्पर्यविषयभूतं भगवत इति भावः । दृष्टान्तैकवाक्यतया वाचकत्वस्य तन्मात्रनिष्ठत्वादत्र तद्रूपत्वे ऽपि कथं तत्त्वमितिशङ्कानिरासायास्य भाष्यस्य तात्पर्यमाह *अखण्डोपीति । परिणामपरिणामिनोस्तादात्म्यादाह *गकाराद्येति । *चरमेति । पदादेरित्यादिः अग्रे आदिना द्रव्यादि ॥ २३ ॥

एवं सर्वपदेषु पदान्तरसहकारेण नानावाक्यभवनशक्तित्वं तत्तद्वाक्यार्थभवनशक्तिमत्त्वं च ।

यद्यपि परस्य बुभुत्सितार्थप्रत्यायनाय शब्दप्रयोगः, परस्य च प्रवृत्त्यादिविषय एव प्रायेण बुभुत्सितः स च वाक्यार्थ एवेति सर्वे शब्दाः तत्परा एव । यत्रापि केवलं 'वृक्ष' इति प्रयुज्यते तत्राप्याकाङ्क्षातात्पर्यादिवशाद् 'अस्ति, चलति, छिद्यते वा' इतिपदान्तरार्थानामध्याहारः । क्रियाविशेषतात्पर्यानवधारणेऽप्यस्तीत्यध्याहारः। बुद्धिसत्ताया बोधविषयबौद्धपदार्थेनाव्यभिचारात् । लोके ऽस्त्यर्थं विना शुद्धपदार्थानवगतेश्च। एवं क्रियापदादिमात्रप्रयोगे सर्वकारकाध्याहारः।'चैत्रोऽग्निना तण्डुलान्पचाति' इत्यादिप्रयोगस्तु कारकान्तरनिवृत्त्यर्थः क्रियान्तरनिवृत्त्यर्थो नियमायेति स्पष्टमर्थवत्सूत्रे भाष्ये, तथापि अन्वाख्यानलाघवाय पदानि,तत्र प्रकृतिप्रत्ययभागाः,तत्तदर्थाश्च कल्प्यन्ते । तद्द्वारा पदार्थबोधनं वाक्यार्थबोधनं च शास्त्रफलम् । केवलरूढेषु तु वर्णसाजात्यादिना ऽवयवकल्पनम् । स्पष्टं चेदं निरुक्ते ।

यत्र तु वाक्यस्यैव शास्त्रेण संस्कारः, तत्र नैव पदात्पदार्थबोधः । यथा षट्त्सन्त इत्यादौ । अत एव "ङःसि–" इति सूत्रे भाष्ये "धुडादयः पूर्वान्ता एव किं न क्रियन्ते" इत्याशङ्क्य पूर्वान्तत्वे ष्टुत्वापादनेन समाहितम् । अन्यथा तकारविशिष्टस्य सत्पदाद्यर्थबोधकत्वाय परादित्वमेवावश्यकमिति तद्विचारासङ्गतिः, निर्दलत्वात् । मम तु वाक्यार्थबोधे भेदाभावान्न दोषः । एतेन पदात्पदार्थज्ञानपूर्वक एव वाक्यार्थबोध इत्यपास्तम् ॥ २४ ॥

(कुं०टी०)*तत्परा एव-वाक्यार्थपरा एव। *बुद्धिसत्ताया इति।

अयं भावः-अस्तीत्यनेन साध्यावस्था प्रतीयते, सिद्धेन च साधनेन साध्यता भवति, सिद्धे च साधने साध्यक्रिया भवति।

तदुक्तं हरिणा—

प्राक् च सत्ताऽभिसम्बन्धान्मुख्या सत्ता कथं भवेत्।

असंश्च नास्तेः कर्ता स्यादुपचारस्तु पूर्ववद् ॥ इति।

तस्माद् बुद्धिसत्तासमाविष्टस्यैव बाह्यसत्तोपचार इत्याशयेनैवोक्तम्—

एतां सत्तां पदार्थो हि न कश्चिदतिवर्तते इति।

*अस्त्यर्थं विनेति। पदार्थमात्रे अस्त्यर्थस्यात्मधारणस्याव्यभिचारात्। *तथापि—सर्वत्र वाक्यार्थस्यैव विषयत्वे ऽपि। *पदानीति। कल्प्यन्त इत्यत्रान्वयः। *तद्द्वारा—प्रकृत्याद्यर्थद्वारा। ननु रूढेष्ववयवार्थाभावात्कथमवयवकल्पनमत आह *वर्णसाजात्यादिनेति। तदीयवर्णानामनर्थकत्वे ऽप्यर्थवत्सजातीयत्वमस्त्येव। *तत्रनैवेति। तकारविशिष्टस्यैव तसन्त इत्यस्य बोधकतया आवापोद्वापलभ्याया अर्थसत्ताया अत्र पदे असम्भवादिति भावः। *ष्टुत्वापादनेनेति। वाक्यार्थदोषाभावाद्रूपासिद्धिरेव दोष उक्त इत्यर्थः। *निर्दलत्वादिति। पूर्वान्तत्वे तकारान्तस्यैव बोधकत्वात्परादित्वे तकारादेर्बोधकत्वाद्विचारासङ्गतिरित्यर्थः। *वाक्यार्थेति। पदानां त्वर्थ एव नास्तीति भावः। *नदोषः-न भाष्यासङ्गतिः ॥ २४ ॥

(क० टी०) नन्वेवं सर्वोपादानं व्यर्थमत आह *चैत्रोऽग्नीति। तथाच सर्वत्र वाक्यस्यैव बोधकत्वेन किमर्थं व्याकरणेन पदानामन्वाख्यानम्। किञ्च पदवद्वाक्यमखण्डमेव

न सन्त्येव पदानीति तदन्वाख्यानमसम्भवीति पूर्वपक्षतात्पर्यम् । *केषु–वाक्येषु । तेषामानन्त्येनान्यथा तदसम्भवो गौरवं चेत्यत आह *अन्वाख्यानेति । तत्र पदेषु कल्पितान्वयव्यतिरेकाभ्यामाह * तत्तदर्थश्चेति । नन्वेवं शास्त्राप्रामाण्यमत आह *द्वारेति । यौगिकेष्वित्युक्तेः फलमाह *यत्र त्विति । इदं भाष्यसंमतमित्याह *अतएवेति । तत्र तत्र तदभावादेवेत्यर्थः । *अन्यथा–तथा तत्रापि तदङ्गीकारे । नैयायिकादिमतं खण्डयति *एतेनेति । उक्तभाष्यविरोधेनेत्यर्थः ॥ २४ ॥

वस्तुतः सर्वं वाक्यं अखण्डमेव । पदान्यसत्यान्येव । पदात्पदार्थबोध इत्यङ्गीकारे चैत्रादिपदानां सकलक्रियासाधारणे ऽर्थे गृहीतशक्तिकानां तत्तदर्थान्वितविशेषबोधाय लक्षणापत्तौ शक्त्या बोकत्वभङ्गः । 'सामान्यरूपेण विशेषबोधे ऽपि लक्षणा' इति स्पष्टं काव्यप्रकाशे ।

किञ्च पदानां सत्यत्वे 'राजा, राजानं, राज्ञा, राजनि' इत्यादौ राजरूपार्थप्रत्यायकस्यानियतत्वं न स्यात् । सत्यस्य नियतत्वात् । 'हे राजपुरुष' इत्यत्र राजेति क्रियापदार्थप्रतीत्यापत्तेश्च । अत एव भाष्ये "न लक्षणेन पदकारा अनुवर्त्याः" इत्यादिना "आशितः कर्त्ता" इत्यादौ पदानामसत्यत्वं दर्शितम् । सत्यत्वे तु लक्षणेन तदननुवर्तनासङ्गतिः । "पदप्रकृतिः संहिता" इत्यत्र तु षष्ठीसमासः ।

तथा च तत्रैव कैयटः–'संहितैवापौरुषेयी पदानि तु पौरुषेयाणि' इति ।

किञ्च तेषां सत्यत्वे अश्वकर्णादावश्वाद्यर्थप्रतीत्यापत्तिः । इदं रूढम्, इदं यौगिकम्, इदं योगरूढमित्याद्यपि शास्त्रकृत्कल्पनैव विशि-

ष्टार्थबोधार्था। बुद्धे च तत्र प्रयोजनसम्पत्तेरुपायपरित्यागः। अत एव व्याकरणभेदेनोपाया अनियताः। तदुक्तम्—

उपादायापि ये हेयास्तानुपायान्प्रचक्षते।
उपायानाञ्च नियमो नावश्यमवतिष्ठते॥ इति॥२८॥

(कुं०टी०)असत्यान्येवेति। कथं तर्हि "जनपदतदवध्योः" इत्यत्र तच्छब्देनावयवार्थपरामर्श इति चेत्। सत्यम्। प्रतिभाविशेष एवात्र वाक्यार्थः। तच्छब्दश्चात्र सर्वनामसदृश एव, नतु सर्वनाम। *चैत्रादिपदानामिति। क्रियासामान्यान्विते शक्ताच्चैत्रपदाद्विशेषबोधे लक्षणापत्तिरित्यर्थः। ननु विशेषोऽपि सामान्यान्तर्गतत्वाच्छक्य एवेत्यत आह *सामान्यरूपेणेति। *पदानां सत्यत्वे इति। पदानां सत्यत्वे 'राजानं, राज्ञा' इत्यादौ राजरूपार्थे एकरूपमेव पदं नियमतः स्यात्, सत्यस्य नियतत्वादित्यर्थः। *क्रियापदार्थेति। 'हे पुरुष भ्राजस्व' इत्यर्थः स्यादिति भावः। *न लक्षणेन पदकारा इति। "'ऊदनोर्देशे' इति दीर्घोच्चारणमवग्रहार्थम्" इति भाष्यं तु विरुध्यते।

एकदेश्युक्तिरियम्। "अनूपो गोमान्" इत्यादौ ऋग्वेदिनामवग्रहादर्शनादित्यन्ये।

*पदानामसत्यत्वमिति। पदविभागस्यासत्यत्वादेव हि तदनुरोधो न भवति। किञ्च पदानां सत्यत्वे तेषां स्वतः सिद्धत्वात्पदानि कुर्वन्तीति पदकारा इति समाख्याऽपि विरुध्येत।

ननु पदार्थानामभावे 'धवखदिरपलाशाः' इत्यत्र बहुवचनं कथमिति चेत्।

गर्गा इत्यत्र यथैक एव गर्गशब्दो बहुषु वर्त्तते, तथा शब्द-

शक्तिमहिम्ना द्वन्द्वस्यापि बहुषु वृत्तेः। एवं 'ब्राह्मणा भोज्यन्ताम्' इत्यादौ पदार्थव्यतिरेकेण वाक्यार्थाभावे ऽपि यथा प्रत्येकं भुजिक्रिया समाप्यते एवं द्वन्द्वावयवेष्वपि प्रत्येकं तत्संभवः।

ननु पदानामसत्यत्वमयुक्तं "पदप्रकृतिः संहिता" इति निरुक्तविरोधात्। तथाहि—पदानि प्रकृतिर्यस्याः सा संहिता। पदान्येव हि संहन्यमानानि संहिता भवति इत्यत आह *षष्ठीसमास इति। अयं भावः—पदानां या प्रकृतिः सा संहिता। संहितातो हि पदानि क्रियन्ते। तस्मात्संहितयैव मन्त्राणामध्ययनाद्विनियोगाच्च संहितैव प्रकृतिः। *संहितैवेति। संहितयैव पाठस्यानादित्वात्पदविभागस्याधुनिकत्वमेवेत्यर्थः। *अश्वकर्णः—ओषधिविशेषः। ननु पदानामसत्यत्वे यौगिकरूढादिविभागः कथमत आह *कल्पनैवेति। *बुद्धेचेति। विशिष्टार्थे ऽवगते चेत्यर्थः। *उपादायापीति। शब्दपरिज्ञाने शास्त्रमुपायः, ज्ञातेषु च तेषु प्रयोजनस्य सम्पन्नत्वात्तत्परित्यागः॥ २९॥

(क० टी०) तदेव मतमाह *वस्तुतस्त्वित्याद्यलमित्यन्तेन। *असत्यान्येव—कल्पितान्येव। विपक्षे बाधकमाह *पदादिति। यत इत्यादिः। नित्यसाकाङ्क्षत्वाद्विशेषगमकाभावाच्चाह *सकलेति। *तत्तदिति। वृद्ध्यादिक्रियारूपेत्यर्थः। तत्त्वादेव विशेषत्वमिति भावः। ननु सामान्यरूपेण शक्त्यैवास्तु विशेषबोधः, अत आह *सामान्येति। शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां समानप्रकारकत्वनियमवत्समानविशेष्यकत्वनियमस्याप्यङ्गीकारादिति भावः। *स्पष्टमिति। ननु केवलान्नैव तथा बोधः, वाक्यात्तु आकाङ्क्षाबलादिति नायं दोषः, अत आह *किञ्चेति। *सत्यत्वे—आपेक्षिकेत्यादिः। *प्रत्यायकस्य—प्रकृतिभागस्य। दोषान्तरमाह *हेराजेति। भाष्यसंमतिमाह *अतएवेति। दोषद्वयसत्त्वेनाखण्डवाक्यस्यैव सत्यत्वादेवेत्यर्थः। "पदकारैर्नाम लक्षणमनुवर्त्यम्" इति—आदिना संग्रहः। नन्वेवं प्रातिशाख्यविरोधस्तेन बहुव्रीहिणा पदानां सत्यत्वप्रतिपाद-

नादु अत आह *पदेति । अत्र संमतिमाह *तथाचेति । षष्ठीसमासे चेत्यर्थः । *तत्रैव-"आशितः कर्त्ता" इत्यत्रैव भाष्ये । दोषान्तरमाह *किञ्चेति । नन्वेवं रूढत्वादिविभागोच्छेदापत्तिः अत आह *इदं रूढमिति । आदिना 'इदं शक्तम्' 'इदं लाक्षणिकम्' इत्यादिसंग्रहः । अपिः पूर्वसमुच्चये । तत्फलमाह *विशिष्टेति । वाक्यार्थेत्यर्थः । युक्त्यन्तरमपि तत्र सूचयन्नाह *बुद्धेचेति । *तत्र—विशिष्टार्थे । *अतएव—काल्पनिकत्वेन अनन्तरत्यागादेव । *तदुक्तमिति हरिणेति शेषः । *हेयाइति । चामुण्डादिवत्पृषोदरादिरुपायशब्द इति भावः *च-किंच । अन्यस्यान्योपायत्वाभावादाह *नावश्यमिति ॥ २५ ॥

ननु पदानामसत्यत्वे प्रतिनिध्युच्छेदः । तथाहि "व्रीहिभिर्यजेत" इत्यादौ यागेन सकलद्रव्याक्षेपे व्रीहिश्रुतिर्नियमार्था—व्रीहिभिरेव नान्यैरिति । तत्र व्रीह्यभावे नित्यकर्मणः प्रारब्धकाम्यस्य च लोपो मा भूदिति प्रतिनिधिरुपादीयते । तत्र व्रीहित्वस्य शक्त्युपलक्षणत्वात्प्रतिनिधेरपि श्रौतत्वमित्यग्रे निरूपयिष्यामः ॥

तत्र प्रतिनिध्युपादाने ऽपि तद्वाक्यार्थाखण्डार्थस्याननुष्ठान्नित्यादेर्विलयः । नीवारकरणकक्रियाया अन्यत्वात् । एवं च 'क्रिया न प्रतिनिधीयते द्रव्यं तु प्रतिनिधीयत एव' इति न्यायोच्छेदः । किञ्च 'वनात्पिक आनीयताम्' इत्युक्ते 'कः पिकः' इति प्रश्नानुपपत्तिः । अपि च "श्वेतं छागमालभेत" इत्यादौ क्रियायाश्छागद्रव्येण श्रौतः सम्बन्धः । द्वितीयाश्रुत्या साक्षात्प्रापितत्वात् ।

श्वेतगुणस्य तु तत्सामानाधिकरण्याद्वाक्यीयः ।

निर्गुणद्रव्यस्य निरधिकरणगुणस्य चाभावात् तस्य च्छागेन सम्बन्धपूर्वकमेव क्रियया सम्बन्धात् । तत्र श्रुतिप्रापितद्रव्यात् वाक्यप्राप्तगुणस्य दुर्बलत्वात् । श्वेतच्छागाभावे ऽन्यवर्णश्छाग आलभ्यते नतु श्वेतगुणयुक्तो मेषः श्रुतिबाधापत्तेरिति सिद्धान्तः। अखण्डार्थत्वे सर्वस्यैकरूपत्वात्कस्य केन बाधः । अपि च पदार्थनिबन्धनवाक्यीयसकलमीमांसान्यायासिद्धिरिति चेद् । न । अखण्डादेव वाक्यात्तदर्थाच्च कल्पनया शास्त्रे पदपदार्थापोद्धारेण तमादाय सकलेष्टसिद्धेः । एवं च कल्पितपदपदार्थाश्रयैर्मीमांसान्यायैस्तादृशाखण्डार्थबोधनम् ।

किञ्च पदैः पदार्थबोधे हरेऽव दध्यानय इत्यादौ संहितया पदस्वरूपनाशादर्थबोधानापत्तिः ।

किञ्च राजपुरुष इत्यादौ पृथगुपस्थित्यपृथगुपस्थिती विरुद्धे आपद्येयाताम् । पदानां पृथगुपस्थापकत्वस्वभावत्वात् । वृत्तेस्तद्विपरीतत्वात् ।

वृत्तौ जहत्स्वार्थत्वादिविकल्पो ऽपि वाक्यादेव वृत्तिनिष्पत्तिरिति मन्यमानानबुधान्प्रति कल्पनैव ।

एवमुत्तरपदार्थप्राधान्याद्यपि ।

श्वेतो धावतीत्यादावखण्डमेव वाक्यं तन्त्रेणोभयार्थबोधकम् ।

एवं च सकलशास्त्रव्यवहारस्तदनुसारिलोकव्यवहारश्चापोद्धाराश्रयेणैव बोध्यः ॥ २६ ॥

(कुं. टी.) *पदानामसत्येवत्वे इति । वाक्यस्याखण्डत्व

इत्यर्थः । *यागेनेति । देवतोद्देश्यकद्रव्यत्यागो हि यागः । *नित्यकर्मणइति । नित्यं हि कर्माशक्याङ्गपरित्यागेनाप्यनुष्ठेयम् । काम्यं तु कर्म अङ्गपरित्यागे विगुणमेव स्यात् । प्रारब्धे तु काम्ये तत्रापि प्रतिनिधिर्भवति इतिसूचनाय प्रारब्धपदम् । 'प्रारब्धं काम्यमपि नित्यायते' इति षाष्ठन्यायात् । "दोषश्चासमाप्तौ स्याद्" इतिकात्यायनसूत्राच्च । ननु कथं प्रतिनिध्युपादानम्, अत आह *शक्त्युपलक्षणत्वादिति ।

'केषाञ्चित्साहचर्येण जातिः शक्त्युपलक्षणम्' । इति-

हरिरीत्या जातिशक्तिनये व्रीहित्वस्यैव व्यक्तिद्वारा क्रियासाधनत्वाद् व्रीहित्वसहचरितशक्तेश्च नीवारेऽपि सत्त्वात्सोऽपि गृह्यते । शक्तिः—अदृष्टविशेषसाधनत्वम् । *श्रौतत्वम्—श्रुतिविहितत्वम् । *वाक्यार्थस्याखण्डस्येति । व्रीहिकरणकयागस्यैव निरस्तावयवार्थस्य वाक्यार्थतया नीवारकरणकयागस्यानुष्ठाने विधिलोप इत्यर्थः । *नित्यादेरिति । आदिना प्रारब्धकाम्यस्य । *क्रिया न प्रतिनिधीयते इति । वाक्यार्थभूतायाः क्रियायाः प्रधानत्वेन तत्परित्यागे प्रकृतकर्मण एव वैगुण्यापत्तिः । द्रव्यस्य तु अप्रधानत्वाद्भवति प्रतिनिधिरिति भावः ।

अत एवोक्तं हरिणा—

अपूर्वस्य विधेयत्वात्प्राधान्यमवसीयते ।
विहितस्य पदार्थत्वाच्छेषभावः प्रतीयते ॥ इति ।

अपूर्वस्य विधेयत्वात्तद्बोधकक्रियाया अपि प्राधान्यं विहितस्य सिद्धस्य द्रव्यस्य तु परार्थत्वाद् गुणत्वमिति तदर्थः । *प्रश्नानुपपत्तिरिति । 'वनादानीयताम्' इति पदयोरर्थौ ज्ञातः पिकपदार्थस्तु न ज्ञात इति तद्विषयकः प्रश्नो भवति । वाक्य-

वाक्यार्थयोश्चाखण्डत्वे पिकपदस्य तदर्थस्य वाऽभावात् प्रश्नानुपपत्तिरिति भावः । *श्रौतः सम्बन्ध इति ।

अयं भावः-छागद्रव्यस्यालम्भनक्रियायाश्च सम्बन्धः श्रौतः, द्वितीयाश्रुत्या प्रापितत्वात् । सामानाधिकरण्यबलात् श्वेतगुणस्य सम्बन्धो वाक्यार्थबलाल्लभ्यमानो वाक्यीय इति दुर्बलः । तदुक्तं हरिणा—

क्रियया यो ऽभिसम्बन्धः स श्रुतिप्रापितस्तयोः ।
आश्रयाश्रयिणोर्वाक्यान्नियमस्त्ववतिष्ठते ॥ इति ।

आश्रयस्य छागस्य, आश्रयिणः श्वेतत्वस्य सम्बन्धस्तु वाक्याल्लभ्यत इति तदर्थः । वाक्यादखण्डस्य वाक्यार्थस्याभिव्यक्तौ तु अयं न्यायो नोपपद्यते । श्रौतवाक्यीययोर्भेदो हरिणा दर्शितः—

अप्राप्तो यस्तु शुक्लादिः संनिधानेन गम्यते ।
स यत्र प्रापितो वाक्ये श्रुतिधर्मविलक्षणः ॥ इति ।

"छागमालभेत" इत्यत्र द्रव्यस्य साक्षात्सम्बन्धः शुक्लादिगुणस्य तु सन्निधानवशात् वाक्यीयो यत्नादवगतः । सच श्रुतिधर्मात्साक्षात्सम्बन्धाद्विलक्षण इति तदर्थः ।

ननु जातिनये जातिक्रिययोरेव साक्षात्सम्बन्धः, द्रव्यं त्वाक्षिप्तं तेनापि स्वाधेयो गुण इति द्रव्यगुणयोस्तुल्यत्वाद् गुणान्तरस्य ग्रहणं भवति न तु द्रव्यान्तरस्येत्यत्र किं विनिगमकमिति चेत् । सत्यम् । द्रव्यस्यैव शक्तत्वात्साक्षाज्जातिसम्बन्धित्वाच्च क्रियायोग्यं द्रव्यम् । गुणास्तु तत्कालोत्तरभावित्वाद्विप्रकृष्टा इति गुणा एव विकल्प्यन्ते ।

तदुक्तं हरिणा—

साक्षाद्द्रव्यं क्रियायोगि गुणस्तस्माद्विकल्प्यते। इति।

गुणद्रव्ययोः सम्बन्धः पश्चात्प्रतीयत इत्याह *निर्गुणद्रव्यस्येति। *तस्य—गुणस्य। *सर्वस्येति। द्रव्यस्य गुणस्य चेत्यर्थः। *एकरूपत्वादिति। वाक्यवाक्यार्थयोरखण्डत्वेन श्रौतवाक्यीयविभागासम्भवाच्छागश्वेतयोरुभयोरपि श्रौतत्वमेवेति न कस्यापि बाधः स्यादिति भावः। *पदार्थनिबन्धनेति। "नानृतंव देद्" इत्यादौ नञः क्रियायामन्वये प्रसज्यप्रतिषेधः। 'अब्राह्मणमानय' इत्यादावुत्तरपदार्थान्वये पर्युदासोऽर्थः। "आदित्यो यूपः" इत्यत्र चाकचक्यादिगुणयोगाद्यूपे वर्तमान आदित्यशब्दो गौणः। "नक्षत्रं दृष्ट्वा वाचं विसृजेद्" इत्यत्र नियतकाले वाग्विसर्गः। "यत्किञ्चित्प्रागग्नीषोमीयात्तत्सर्वमुपांशु कर्तव्यम्" इत्येवं ये पदार्थनिबन्धना विशेषास्ते पदपदार्थयोरसत्यत्वे न व्यवतिष्ठेरन्नित्यर्थः। *अखण्डादेवेति। तदुक्तं हरिणा—

अविभक्तेऽपि वाक्यार्थे शक्तिभेदादपोद्धृते।
वाक्यान्तरविभागेन यथोक्तं न विरुध्यते॥ इति।

वाक्यार्थे आविभक्तेऽपि अखण्डेऽपि शक्तिभेदाश्रयेणापोद्धृते कल्पनाबुद्ध्या पृथक् कृते अवान्तरवाक्यार्थोपजननात्सिद्धमिति तदर्थः। एतेन गौर्वाहीक इतिवाक्यस्याखण्डत्वे पदपदार्थाभावाद्गौणमुख्यविभागानापत्तिरित्यपास्तम्। *पदैरिति। पदानामेवार्थवत्त्वे इत्यर्थः। *विरुद्धेइति। पदस्वभावात्पृथगुपस्थितिः वृत्तिस्वभावाच्चापृथगुपस्थितिः स्यादित्यर्थः। *एवमिति। कल्पनयैवेत्यर्थः। नन्वखण्डत्वे संहितावशात् 'श्वा'इति पदस्वरूपस्य नष्टत्वेन तदर्थासम्भवात् 'श्वा इतो

धावति' इत्यर्थान्तरस्य कथं गतिरत आह *उभयार्थकमिति ।

अयम्भावः—यथैको ऽपि ध्वनिर्नालिकाद्युपाधिवशान्नानाविधषड्जऋषभादिभेदवानुपजायते तथा तन्त्रेण श्वा इतः श्वेत इत्येवं भिन्नानामपि शब्दानां श्वेत इत्येकरूपता भवतीति ॥२६॥

(क०टी०) प्रागुक्तरीत्या आह *यागेनेति । तदनुपादानेऽपीत्यादिः । तत्र नियमे सति तेन काम्योपक्रमाभावादाह *प्रारब्धेति । ननु तस्याश्रौतत्वात्कथं ततो ऽदृष्टमत आह *तत्रेति । व्रीहिभिर्यजेत इत्यत्रेत्यर्थः । *शक्तीति । व्रीहिजन्यापूर्वसाधनत्वशक्तीत्यर्थः । *अग्रे-विधिवाद । एवं वस्तुस्थितिमुक्त्वा प्रतिज्ञातं वक्तुमाह *तत्रेति । व्रीह्यभावे इत्यर्थः । *अखण्डार्थस्य--व्रीहिकरणकक्रियारूपस्य । आदिना तत्समुच्चयः । तस्याश्रौतत्वेन ततः अपूर्वाभावेन तस्यापूर्वसाधनत्वाभाव एव तस्य लय इति भावः । तदाह *नीवारेति । तृणधान्यविशेषः । अयमेव तत्प्रतिनिधिः । *एवञ्च-तल्लये च । तथाच तदुच्छेद इति भावः । वाक्यीयत्वमुपपादयति *निर्गुणेति । एको ग्रन्थः ? । *तत्र-तथा सति । एवं वस्तुस्थितिमुक्त्वा प्रकृतमाह *अखण्डेति । वाक्यस्येत्यादिः । *सर्वस्य—द्रव्यगुणाभ्यां सम्बन्धस्य । *एकेति । वाक्यशक्त्यैव प्रतिपादितत्वादित्यर्थः । दोषान्तरगणमेकोक्त्याऽऽह *अपि चेति । श्रुतिलिङ्गाधिकरणोक्तेत्यर्थः । स्वरीत्या स्वशास्त्रवन्मीमांसोपयोगो, न परोक्तरीत्याऽऽह *एवञ्चेति । तया तदुपपत्तौ चेत्यर्थः । तत्र दोषान्तरमाह *किञ्चेति । पदज्ञानस्य त्वन्मते बोधकारणत्वादिति भावः । यौगपद्यादाह *विरुद्धे इति । नन्वेवं कथं जहत्स्वार्थत्वादिभेदो ऽत आह *वृत्ताविति । सिद्धान्ते तदप्यसम्भवीत्याह *वाक्यादेवेति । अतएवाह *अबुधानिति । उक्तकल्पनां तद्वते ऽन्यत्राप्यतिदिशति *एवमिति । नन्वेवं कथं श्वेत इत्यादित उभयार्थस्य युगपत् बोधो ऽत आह *श्वेत इति । अत्रोभयोरपि तन्त्रमेव । प्रसिद्धविरोधाभावायाह *एवञ्चेति । तेषामसत्यत्वे चेत्यर्थः ॥ २६ ॥

प्रकृतिप्रत्ययाविभागोऽप्येवमेव ।

तदुक्तम्—

धात्वादीनां विशुद्धानां लौकिको ऽर्थो न विद्यते ।
कृत्तद्धितानामर्थश्च केवलानामलौकिकः ॥
प्राग् विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते । इति ।

अत एव प्रकृतिप्रत्ययोभयार्थं क्वचिदन्यतर एवाभिधत्ते । यथा—इयानिति, अहन् इतिच । तथा क्वचित्प्रत्ययद्वयेन कर्त्राद्यर्थबोधः । यथा—पचतीति । क्वचिदेकेनैव । यथा—अत्तीति ।

किञ्च ये कस्मिंश्चिद् व्याकरणे प्रत्ययार्थत्वेनोक्तास्तेऽन्यत्र प्रकृत्यर्थत्वेनोक्ताः । तस्मात्पदपदार्थाद्यसत्यमेव । शास्त्रमप्यसत्यव्युत्पादकमेव ।

तदुक्तम्—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
उपायाः शिक्ष्यमाणानां बालानामुपलालनाः ॥
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते । इति ।

अनादिमिथ्याभूतशास्त्राभ्यासानुसारेणैव शब्दः शास्त्रज्ञलोकेनार्थप्रत्यायकतया गृह्यते केन चिद् । यथा घटादिकः सर्वोऽपि प्रपञ्चः परिच्छिन्नत्वेन गृह्यते । भावानामुत्पादं दृष्ट्वा च शाश्वतमपि ब्रह्मोत्पादवदिति मन्यते लोकेन तद्वत् ।

तदुक्तम्—

घटादिदर्शनाल्लोकः परिच्छिन्नो ऽवसीयते ।
समारम्भाच्च भावानामादिमद्ब्रह्म शाश्वतम् ॥ इति

लोको विश्वप्रपञ्चः । समारम्भ उत्पत्तिः ।

किञ्च 'त्वं ग्राममश्वः' 'अश्वो गच्छति' 'अजापयः

शत्रून्' 'अजापयः पिब' इत्यादौ नामाख्यातसारूप्ये वाक्यार्थादेव पश्चात्पदपदार्थनिर्णय इत्यखण्डमेव वाक्यं बोधकमखण्डार्थस्येत्युचितम् ।

तदुक्तम्—

यथैवानर्थकैर्वर्णैर्विशिष्टो ऽर्थो ऽभिधीयते ।
पदैरनर्थकैरेवं विशिष्टो ऽर्थो ऽभिधीयते ॥
नहि किञ्चित्पदं नाम रूपेण नियतं क्वचित् ।
पदानामर्थरूपं च वाक्यार्थादेव जायते ॥ इति ।

वाक्ये ऽखण्डत्वं चापृथगुपस्थितिजनकत्वम् । अपृथगुपस्थितिविषयत्वं चार्थे ऽखण्डत्वम् । पदानां केवलानां पृथगुपस्थापकत्वं वृत्तिघटकानामपृथगुपस्थापकत्वमिति तु शास्त्रकृत्कल्पनैव । यदपि केवलं पदं सदित्यादि प्रयुज्यते तदप्यन्ततो ऽस्तिक्रियाघटितार्थबोधकमिति तदपि वाक्यमेव । साधनस्य साध्यक्रियाऽऽकाङ्क्षत्वात् । साध्यक्रियायाश्च साधनाकाङ्क्षत्वात् ॥ २७ ॥

(कुं०टी०) ननु प्रकृत्यादीनामनर्थकत्वे "अर्थवन्तो वर्णा धात्वादीनामेकवर्णानां दर्शनाद्" इति भाष्यस्य का गतिस्तत्राह *धात्वादीनामिति । भाष्यं तु प्रक्रियाऽभिप्रायेण । *अत एव-प्रकृतिप्रत्ययतदर्थविभागस्याताात्त्विकत्वादेव । *पचतीति । अत्र शपा तिपा च कर्तुर्बोधः । *ये कस्मिंश्चिदिति । पदार्थविभागस्य तात्त्विकत्वे त्वसमञ्जसमेतत्स्यात् । *असत्यमेवेति । किञ्च अधिहरीत्यत्राधेः सत्यत्वे वाक्ये ऽप्यधिरधिकरणं बोधयेत् । प्रभुरित्यादाववयवार्थानुपलम्भाच्च । चित्रगुरित्यादौ च चित्रगो-

शब्दाभ्यामनुपाती देवदत्तादिः केन प्रत्याय्येत। नन्वसत्यत्वे कथं शास्त्रप्रवृत्तिरत आह *शास्त्रमपीति। अविद्यावर्णनं च तन्निरासद्वारा विद्योत्पत्त्यर्थमेव। *उपलालनाः-प्रतारणाः। *असत्ये इति। असत्यरूपे शास्त्रप्रक्रियामात्रेऽर्थे स्थितः अविद्यामुत्सृज्य सत्यं विद्यास्वरूपं ब्रह्म समीहते प्राप्नोति।

अयं भावः-नित्यमद्वयं ब्रह्म ये वदन्ति ते ब्रह्मण एवंविधानादिजीवात्मशक्तिं मन्यन्ते यद्वशात्तत्त्वं तिरोधाय अतत्त्वेन भेदेन व्यवहारः। स चाविद्याकृतः। यथाहि दण्डादिकारणं विलक्षणं घटादिकमुत्पादयति एवमविद्याऽपि विद्योत्पत्तौ हेतुः। *शब्दः-एकैकपदात्मकः। *समारम्भादिति। भावानामुत्पादं दृष्ट्वा ब्रह्म आदिमदिति व्यवह्रियते। *त्वंग्राममिति। त्वं ग्राममगम इत्यर्थः। *अश्वइति। श्वयतेर्लुङ् सिप्। *अजापयइति। "जै क्षये" णिजन्ताल्लुङ् सिप्। *अजापयइति। अत्र षष्ठीसमासः। *यथैवेति। यथा अनर्थकैर्वर्णैरभिव्यक्तः पदस्फोटो वाचकः तथा अनर्थकैः पदैरभिव्यक्तो वाक्यस्फोटो वाचक इत्यर्थः। *नहि किञ्चिदिति। पदं नाम किञ्चित्स्वरूपेण न नियतं किंतु वाक्यार्थादेव पदार्थविभागः। यथा अजापय इत्यत्र प्रागुक्तम्। *पदानां केवलानाम्-वृत्तिबहिर्भूतानाम्। ननु वाक्यार्थस्याखण्डत्वे एकार्थीभावव्यपेक्षाभेदासङ्गतिरत आह *शास्त्रकृत्कल्पनैवेति। ननु क्वचिदेकपदस्यापि वाचकत्वमस्तीत्याशङ्क्याह *यदपीति। यत्राप्येकमेव पदं निराकाङ्क्षं कृदन्तं सदित्यादि प्रयुज्यते तत्रापि तद् अभूदस्ति नास्तिवेत्यादिक्रियासम्बन्धं विना न परिसमाप्तार्थं भवति। एतदेवाह *अन्ततोऽस्तिक्रियेति। तथाच वाक्यार्थव्यतिरेकेण पदार्थो ऽसत्य एवेत्याशयः।

अयं भावः-उपगोरपत्यमित्यत्र जनिक्रियानिमित्तो ऽपत्या-

प्रत्ययवत्संबन्धः । राज्ञ इत्यादौ भरणादिक्रियानिमित्तः । घट-इत्यादौ तु पदार्थमात्रस्यैव बुद्धिसत्ताया अव्यभिचारात्सैव सत्ता प्रतीयत इति । एतदेवोपपादयति *साधनस्येति ।

अयं भावः—साध्यं साधनं च परस्परं नियतमेव । केवलमाकाङ्क्षादिवशादितरपदार्थसंनिधाने नियत एव प्रकाशते इति ॥ २७ ॥

(क० टी०) विशेषं वक्तुमुक्तमेवानुवदति *प्रकृतीति । *तदुक्तं-हरिणा । *विशुद्धानां-प्रत्ययासमभिव्याहृतानाम् । एवमग्रेपि । आदिपदार्थमाह *कृदिति । *अलौकिकः—शास्त्रकृतकल्पितः । नतु पारमार्थिकः । ननु कृदाद्यन्तानामर्थोऽस्त्वित्यत आह *प्रागिति । विभक्तेः प्राक् । *तदन्तस्य-कृत्तद्धितान्तस्येत्यर्थः । विशेषमेवाह * अत एवेति । तस्यापि काल्पनिकत्वादेवेत्यर्थः । *ये-अर्थाः । द्वितीयमुपसंहरति *तस्मादिति । शास्त्रमपि तथैवेत्याह *शास्त्रमपीति । *तदुक्तम्-हरिणा । *अविद्या-प्रकृत्यादिरूपाऽसत्यपदार्थ एव । अत्र बीजमाह *उपाया इति । *उपलालनाः । भवन्तीति शेषः । तदाह *असत्ये इति । असत्ये इत्यादेरर्थमाह *अनादीति । अयं त्वान्तस्यार्थः । *शब्दः-स्फोटब्रह्मरूपः । तत्रापि न सर्वेणेत्याह *केनचिदिति । तज्ज्ञानसामग्रीमता । दृष्टान्तान्तरमाह *भावानामिति । घटपटादीनामित्यर्थः । दृष्टान्तद्वयं हरिसंमतमित्याह *तदुक्तमिति । अवसीयतइत्यस्य मध्यमणिन्यायेनान्वयः । वाक्यतदर्थयोरखण्डत्वे युक्त्यन्तरमप्याह *किञ्चेति । आद्ये ऽश्व इति श्विधातोर्लुङ् । अन्तेऽजापय इति च जै क्षय इत्यस्य ण्यन्तस्य लङन्तम् । आदिना घटो भवति, भिक्षां देहीत्यादिपरिग्रहः । *सारूप्ये-तद्विषये । बहुव्रीहिणा वाक्यविशेषणम् । *वाक्यार्थादेव पश्चादिति । वाक्यार्थबोधादनन्तरमेवेत्यर्थः । न ततः प्राक् । तयोः सारूप्येण सन्देहेन क्रियाकारकान्यतरार्थत्वेनानिश्चयादिति भावः । *इतिर्हेतौ । *तदुक्तं-हरिणा । अव्यवहितोक्तम् । उक्तपदस्थले प्रक्रियायाः परीत्या वा आह *यथैवेति । *विशिष्टोऽर्थः-पदार्थः । *विशिष्टार्थः-वाक्यार्थः । अत्र हेतुमाह *नहीति । यतः

किञ्चिदपि पदं रूपेण स्वरूपेण नामावश्यं नियतं विभक्त्यादिभेदेन तेषां भेदादित्यर्थः । तत्सारूप्यविषयमाह *क्वचिदित्यादि । क्वचित् तत्सारूप्यविषयपदानामर्थरूपे तन्निर्णय इत्याद्यर्थः । नन्वस्तु एवमखण्डत्वं तयोः, परं तु खण्डशून्यत्वरूपं बाधितं यस्य वाक्यस्य सत्यत्वप्रक्रियासिद्धान्तस्तस्य सखण्डस्यैवानुभवादत आह *वाक्येइति । तुल्ययुक्त्यैवाह *अपृथगिति । परमतन्दूषयति *पदानामिति । *किञ्चपदैरिति । दोषाद्यभावायाह *केवलानामिति । *किञ्च राजेति । दोषाभावायाह *वृत्तीति । *कल्पनैवेति । प्रागुक्तान्यदोषाणां सत्त्वादिति भावः । प्रागुक्तमेव दार्ढ्यायाह *पदेऽपीति । प्रागुक्तगतिसम्भवादाह *अन्त इति ॥२७॥

एवमर्थेऽपि ये वादिनां नानापक्षास्तेऽपि तत्तच्छास्त्रवासनावशात्कल्पिता एव । यथा अभिहितान्वयः । अन्विताभिधानमिति । संसर्गो वाक्यार्थः, संसृष्टाः पदार्थाः स इति । जातिः पदार्थो व्यक्तिर्वेत्यादि । अत एव "घट" इति प्रयुक्ते वैशेषिकोऽतिरिक्तमवयविनं बुध्यते, साङ्ख्यो गुणसमूहम्, बौद्धादिः परमाणुसमूहम् ।

यद्यपि ऋषीणां दर्शनं तत्त्वविषयं भवति तथापि तत्त्वभूतेन वस्तुना व्यवहारासम्भवाद्व्यवहारकाले तेऽप्यदृष्टतत्त्वसदृशा नानाप्रकारैर्व्यवहरन्तीति न तद्वचसाऽपि पदपदार्थसत्यत्वं मन्तव्यम् ।

अत्र वाक्यार्थस्यापेक्षिकं सत्यत्वं द्रष्टव्यम् । सर्वव्यवहारस्यासत्याविषयत्वात् ॥ २८ ॥

(कु० टी०) *वासनेति । वासनावैचित्र्यमेव ज्ञानवैचित्र्ये हेतुर्नार्थवैचित्र्यमिति भावः । ननु वासनावैचित्र्यात् ज्ञानवैचित्र्यं ज्ञानवैचित्र्याच्च वासनावैचित्र्यमित्यन्योन्याश्रय इ-

तिचेन्न । वासनाऽभावे ऽप्यपूर्वपदार्थसंनिधाने ज्ञानवैचित्र्यदर्शनात् । *अभिहितान्वयइति ।

अयं भावः—लाघवात्पदानां पदार्थमात्रे शक्तिर्न त्वन्वयांशे ऽपि । गौरवात् । आकाङ्क्षादिलभ्यत्वेनान्यलभ्यत्वाच्च । एवञ्च पदेभ्यः प्रथमं पदार्थमात्रोपस्थितिः । पश्चात्पदार्थविशेषाणामन्वयरूपस्य वाक्यार्थस्योपस्थितिः । एवं च तात्पर्यवशादशक्य एवान्वय आकाङ्क्षादिवशात्प्रतीयते । अत एवोक्तं भाष्ये "यदत्राधिक्यं स वाक्यार्थ" इति ।

नचापदार्थस्यापि प्रतीतावतिप्रसङ्गः । स्वरूपसतः शक्यान्वयस्य नियामकत्वात् । एवंचाकाङ्क्षितादिपदसमुदायो वाक्यं संसर्गश्च वाक्यार्थ इति मीमांसकाः ।

एतच्चायुक्तम् । पदानामाशुविनाशित्वेन समुदायासम्भवात् । तेषां स्मरणकल्पने ऽपि सामान्ये ऽवस्थितानां पदानां विशेषे ऽवस्थानं दुरुपपादमेव । विशेषस्याशक्यत्वात् । अशक्यस्याप्युपस्थितौ शब्दार्थसम्बन्धस्यानित्यतापत्तिश्च । वाक्यार्थस्याशाब्दत्वे च पदार्थो ऽप्यशाब्द एव । वर्णानामप्याशुविनाशित्वात् । *अन्विताभिधानमिति ।

तथाहि—अन्वयरूपे वाक्यार्थे ऽपि पदानां शक्तिः । 'घटमानय' इति प्राथमिकव्यवहारेण विशिष्ट एव शक्तिग्रहात् । आनयनाद्यन्वितो घटादिरेव घटादिशब्दार्थः । तथाच सर्वभेदानुगुणसामान्यरूपो विशेषान्तरसंनिधानाद्विशेषविश्रान्तः पदार्थ एव वाक्यार्थः । आक्षिप्तपदान्तराणि पदान्येव च वाक्यम् । किञ्च अन्वयस्याशक्यत्वे शाब्दबोधविषयता न स्यात् । तत्र शक्तिग्रहस्य नियामकत्वात् । अशक्यस्याप्यनुभवविषयत्वे ऽतिप्रसङ्गात् ।

ननु पदार्थसामान्यान्वित एव शक्तिग्रहात् संसर्गविशेषो

ऽशक्य एव। अन्यथा 'घटमानय' इति पदं श्रुत्वा 'पटमानय' इति वाक्यं श्रुतवतः तदेवेदमानयेतिपदमिति प्रत्यभिज्ञा न स्यात्। पूर्ववाक्यस्य घटानयने शक्तस्य पटानयने ऽशक्ततया अर्थभेदेन शब्दभेदादिति चेन्न। पदार्थत्वेनैव रूपेण विशेषाणामन्वये शक्तिग्रहात्। अन्वितानां च विशेषरूपत्वादिति।

एतन्मते ऽपि अर्थान्तरसामान्यान्विते एव पदानां शक्तिः गवादिविशेषान्वितस्त्वशक्य एवेति। अभिहितान्वयवादिमते वाक्यार्थलक्षणं सूचयति। *संसर्गो वाक्यार्थ इति। अयं भावः—यथा बलवता प्रेरित इषुरेकेनैव वेगाख्येन व्यापारेण चर्मच्छेदमुरोभेदं प्राणहरणं च करोति एवमेकेनैवाभिधाऽऽख्येन व्यापारेण पदार्थस्मृतिं वाक्यार्थबोधं च करोति। "यत्परः शब्दः स शब्दार्थः" इति न्यायादिति। अन्विताभिधानमते वाक्यस्यार्थं दर्शयति *संसृष्ट इति। यथा "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इत्यत्र ऋत्विक्प्रचरणस्यान्यतः प्राप्तत्वाल्लोहितोष्णीषत्वमात्रं विधीयते तद्वदिति भावः। नन्वन्वयांशस्य शक्यसम्बन्धितया लक्षणया बोधः सिद्ध इति चेन्न। तत्सम्बन्धस्य तच्छब्दबोधानुपयोगितच्छाब्दबोधानुकूललक्षणायास्तत्राभावात्। मुख्यार्थबाधे सत्येव लक्ष्यार्थबोधात्। *सइति। संसृष्टः पदार्थ एव वाक्यार्थ इत्यर्थः। एकैकस्यैव पदस्य वाक्यार्थबोधकत्वे पदान्तरवैयर्थ्यापत्तेः। उत्तरपदानां व्यञ्जकत्वमिति चेत्। तर्हि आगतं समुदायस्य वाचकत्वमिति। *जातिः पदार्थ इति। तथाहि—वाजप्यायनमते जातिरेव शब्दार्थः। नित्याया अपि तस्या व्यक्तिद्वारकं साध्यत्वम्। जातेश्चानाश्रयाया अभावात्सामर्थ्याद्द्रव्यं प्रतीयते। तत्र द्रव्यगताया जातेरेकार्थसमवायेन क्रियान्वयित्वम्। गुणक्रियाशब्दानामपि गुणक्रियागतैव जातिर्वाच्या।

उपसर्गादिरपि नामाख्यातसहभावी तदर्थस्य विशेषद्योतकत्वा-ज्जातिपदार्थ एव। अर्थविशेषस्य विशिष्टविश्रान्तस्यैवावगमात् । कर्मप्रवचनीयो ऽपि सम्बन्धजातिनिष्ठ एवेति । ननु जाति-शक्तिवादे व्यक्तेरनुमानरूप आक्षेप एव, न शाब्दबोधविष-यत्वमिति शक्त्यनुभवशाब्दबोधयोः समानप्रकारकत्वेन कार्य-कारणभाव इतिप्रवादासङ्गतिरिति चेद् ।

अत्र केचित् । समानवित्तिवेद्यत्वस्यैवाक्षेपपदार्थतया व्यक्ते-रपि शाब्दबोधविषयत्वात् । व्याडिमते द्रव्यमेव पदार्थः । तस्यैव क्रियान्वयोपपत्तेः । जातेरुपलक्षणत्वाच्च व्यक्त्यन्तरे ऽपि शक्तिग्रहः । आख्याते ऽपि च क्रियाविशिष्टं द्रव्यमेव पदार्थः । देवदत्तः पचतीत्यादौ द्रव्यस्यैव साक्षात्साधनत्वोपपत्तेरिति । *अतिरि-क्तम्—परमाणुसमूहादतिरिक्तम् । *गुणसमूहं—रूपत्वादिगुण-समूहमिति । विशकलितेषु तु तेषु घट इतिव्यवहारो न भवति, विलक्षणसंयोगस्यैव तन्नियामकत्वात् । तत एव च घट उत्पन्न इत्यादिरपि व्यवहारः । *अदृष्टेति । अदृष्टं तत्त्वं यैस्तत्सदृशा इत्यर्थः । तदुक्तं हरिणा—

ऋषीणां दर्शनं यच्च तत्त्वे किञ्चिदवस्थितम् ।
न तेन व्यवहारो ऽस्ति न तच्छब्दनिबन्धनम् ॥ इति ।

*नानाप्रकारैरिति । शास्त्रवासनाभेदादिति भावः । ननु प-दपदार्थयोरिव वाक्यार्थस्याप्यसत्यत्वं न्याय्यमन्यथाऽद्वैतहा-निरत आह *आपेक्षिकमिति । व्यावहारिकमित्यर्थः । अत एव "पश्वादिभिश्चाविशेषाद्" इतिसूत्रयता व्यासेनापि व्यवहार-काले विवेकिनामपि पश्वादिवदविवेकित्वं दर्शितम् । किञ्च अबुधबोधनाय प्रवृत्तं शास्त्रं कथं तत्त्वं वक्तुं पारयेत् ॥ २८ ॥

*एवम्-प्रकृत्यादिशब्दवत् । *अर्थेऽपि-तद्विषयेऽपि । *अत एव-तत्तच्छास्त्रवासनावशात्कल्पितत्वेन तस्य तत्तदभ्यासादेव । ननु तत्तच्छास्त्रप्रणेतारः किं तत्त्वज्ञा उत न । आद्ये कथं तदुक्तपक्षाणामसत्यत्वम् । अन्त्ये पामरोक्तिवत्तेषामश्रद्धेयत्वापत्तिरत आह *यद्यपीति । *वस्तुना-ब्रह्मणा । तत एवाह *सदृशा इति । सन्त इति शेषः । नन्वेवं वाक्यार्थस्य सत्यत्वे द्वैतापत्तिरत आह *अत्रेति । प्रक्रियायामित्यर्थः ॥ २८ ॥

वाक्यार्थश्च प्रतिभामात्रविषयः । प्रतिभा च जन्मान्तरसंस्कारजाऽपि । यथा मधौ पिकस्य पञ्चमस्वरविरावो जन्मान्तरसंस्कारजः । अत एव शशशृङ्गमस्तीत्यादितो ऽपि सः । प्रतिभाविषयत्वाच्च प्रतिभा वाक्यार्थ इति व्यवहार इत्यलम् ।

ननु पदपदार्थकल्पनायामपि 'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यादौ क्रियाकारकभावसम्बन्धस्य विभक्त्यैवोक्तत्वेन को वाक्यार्थः । सम्बन्धसम्बन्धस्य तु भाने न मानम्, अनवस्था चेति चेन्न । पदार्थानां परस्परविशेष्यविशेषणभावरूपान्वयस्य वाक्यार्थत्वात् । यद्यपि विभक्तिप्रकृत्यर्थगतविशेषणत्वमपि विभक्तिशक्यमेव तथापि विशेष्यनिष्ठम् इतरपदार्थनिष्ठविशेषणतानिरूपितविशेष्यत्वं वाक्यशक्यमिति बोध्यम् । एतच्चोपपादयिष्यते ।

ननु उक्तान्वयरूपवाक्यार्थस्य तद्घटकपदानुपस्थितत्वात्तत्र शक्तिग्रहासम्भवः, तथोपस्थितत्तद्विषयकशक्तिग्रहे च तस्यापूर्वत्वहानिरिति चेन्न । वृद्धव्यवहारदर्शनसहकृतमनसोपस्थितविशिष्टे तद्ग्रह-

सम्भवात्। क्वचिदुपदेशेन तद्ग्रहसम्भवाच्च। क्वचिदाकाङ्क्षावशात्तदैव तत्र शक्तिग्रहो बोधश्च। पश्चाच्छास्त्रकृत्कल्पितान्वयव्यतिरेकाभ्यां तत्तत्पदशक्तौ व्यवस्थितायामर्थाद्वाक्ये उक्तान्वयविषया शक्तिरवतिष्ठते॥ २९॥

(कुं० टी०) ननु वाक्यस्याखण्डत्वे पदपदार्थयोरसत्यत्वात् क्रियाकारकभावो वाक्यार्थ इति प्रवादासङ्गतिः, अत आह *वाक्यार्थश्चेति। तदुक्तं हरिणा—

विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्॥ इति।

देवदत्तादिपदानां पृथग् अर्थे गृह्यमाणे अन्यैव प्रतिभा जायते, वाक्ये चान्यैवेति प्रतिभैव वाक्यार्थ इति तदर्थः।

ननु पदपदार्थयोरसत्यत्वे प्रतिभैव कथम्, अत आह *संस्कारजाऽपीति। यथा हि सर्वेषां प्राणिनामाहारादिक्रिया अनादिप्रतिभावशान्नियता एवमिहापीत्यर्थः। तत्र संस्कारस्य जनकोऽभ्यासः। बालानाञ्चाभ्यासाभावात्संस्काराभावे प्रवृत्तिर्न स्याद्, अत उक्तम् *जन्मान्तरेति। तदुक्तं हरिणा—

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः॥ इति।

मधुमासे कोकिलस्य पञ्चमस्वरविरावः केन शिक्षितः। लूतातन्तूनां कुलायरचना च प्रतिभावशादेव दृश्यत इति तदर्थः। तथाच अखण्ड एको ऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभा वाक्यार्थः, अध्यास एव सम्बन्धः। *पञ्चमेति।

वायुः समुत्थितो नाभेरोष्ठकण्ठशिरोहृदि।
पञ्चस्थानसमुद्भूतः पञ्चमस्तेन संमतः॥ इति।

*व्यवहारइति। हर्यादीनां सिद्धान्त इत्यर्थः। *सम्बन्धस्य त्विति।

अयं भावः—पदार्थसंसर्गो वाक्यार्थः। पदार्थत्वं पदजन्यप्रतीतिविषयत्वम्। विषयता च प्रकारताविशेष्यताऽन्यतररूपा। सा च न सम्बन्धे ऽस्तीति।

*वाक्यार्थत्वादिति।

अयं भावः— व्याडिमते भेदो वाक्यार्थः। पदवाच्यानां द्रव्यान्तरानिवृत्तितात्पर्यकत्वात्। जातिवादिमते तु संसर्गो वाक्यार्थः। सच सामान्ये ऽवस्थितानां पदार्थानां संश्लेषः।

यत्तु 'नीलो घटः' इत्यादौ घटादिपदसमभिव्याहृतो नीलादिशब्द एव अभेदरूपान्वयस्य बोधक इति। तन्न। केवलनीलपदस्य तत्र शक्त्यभावात्। समभिव्याहारस्य प्रयोजकत्वे तु वाक्यशक्तिर्दुर्वारा।

*शक्यमेवेति। प्रतीयमानस्य सर्वस्य शक्यत्वौचित्यात्। *उक्तान्वयेति। इतरपदार्थनिष्ठविशेषणतानिरूपितविशेष्यतेत्यर्थः। *एतद्घटकेति। वाक्यघटकेत्यर्थः। *अपूर्वत्वादिति। पदादनुपस्थितत्या तत्र शक्त्यभावादिति भावः। *तथोपस्थितेति। अन्विते शक्तिग्रहे चेत्यर्थः। *अपूर्वत्वहानिरिति। अन्वयांशे ऽपि पदशक्तिग्रहे तु वाक्यार्थत्वहानिरित्यर्थः। *तद्ग्रहेति। वाक्यार्थशक्तिग्रहेत्यर्थः। *पश्चादिति। प्रथमतो वाक्यार्थे ऽवगते कल्पितान्वव्ययतिरेकाभ्यां पदानां स्वार्थमात्रपरत्वावगमादन्वयरूपे वाक्यार्थे वाक्यशक्तिरवतिष्ठते इत्यर्थः॥ २९॥

(क० टी०) विशेषान्तरमाह *वाक्यार्थश्चेति । मात्रपदेन तस्य बाह्यरूपानावश्यकत्वं सूचितम् । आदिप्रतीत्युपपत्तये आह *प्रतिभेति । एवं क दृष्टमित्यत आह *यथेति । *मधौ—वसन्ते । *अतएव-तस्य तन्मात्रविषयत्वादेव । *सः—वाक्यार्थः । नन्वेवमत्र प्रतिभाऽतिरिक्तबाह्यस्वरूपाभावेन 'प्रतिभा वाक्यार्थः' इति जायमानो व्यवहारः कथमत आह *प्रतिभेति । तस्या अपि तत्त्वम्, अन्यथा बाह्यतदाकारासम्भव इति भावः । वाक्यत्वमपि कारकाद्यन्वितक्रियाबोधकत्वमेव नतु प्रसिद्धम्, अत एव प्रागुक्तसङ्गतिस्तदाह *इत्यलमिति । ततोऽन्यत्र तादृशतत्स्वरूपनिर्णयाय शङ्कते *नन्विति । *इत्यादाविति । परस्पराकाङ्क्षाजनकार्थबोधकपदघटितवाक्ये इत्यर्थः । समर्थसूत्रभाष्यमूलकमाह *क्रियेति । इदमग्रे स्फुटीभविष्यति । ननु तत्सम्बन्धः सोऽत आह *सम्बन्धेति । अन्यथाऽनुपपत्तेरेव तत्त्वे त्वाह *अनवेति । पदार्थानामितिसूचितमाशयं विशदयति *यद्यपीति । इदमपि तन्मूलकमग्रे स्फुटीभविष्यति । ननु तस्याप्यन्यथालाभेन कुतः शक्यत्वमत आह *एतच्चेति । अपूर्वो वाक्यार्थ इति प्रवादे अपूर्वत्वम् । तत्र पदार्थोपस्थितेः पूर्वं नियमतो वाक्यार्थांशे उद्बोधकासमवधानेन पदार्थोपस्थितिसमये वाक्यार्थोपस्थितेरभावेन शाब्दबोधप्राग्वर्त्तितज्जनकशब्दज्ञानजन्यज्ञानाविषयत्वं तदाह *तद्घटकेति । वाक्यघटकेत्यर्थः *तथोपस्थितेति । नियमेन ततः पूर्वं तत्कल्पनया तद्घटकपदादुपस्थितवाक्यार्थविषयकशक्तिग्रहे चेत्यर्थः । उक्तप्रकारस्यासार्वत्रिकत्वमाह *क्वचिदिति । 'अयमेतस्यार्थः' इत्युपदेशेन जाते इत्यर्थः । *कत्रचिदिति । प्रागविज्ञातहरिद्रानामकनदीविशेषेण पुंसा हरिद्रायां नद्यां घोष इति वाक्ये श्रुते नदीपदसमभिव्याहारेण हरिद्राशब्दस्य शक्तिग्रहपूर्वकं नदीलिङ्गात्तत्सम्बन्धित्वेनावगततीरप्रत्ययवत् पदैः पदार्थानामुपस्थितावाकाङ्क्षाज्ञानादिसाचिव्यात्तत एवोपस्थिते वाक्यार्थे तत्सम्भव इत्यर्थः । नन्वेवं संसर्गो वाक्यार्थ इति प्रवादभङ्गो ऽत आह *पश्चादिति । *शक्तिरिति । तथाच वाक्यस्य शक्तत्वव्यवहारो ऽप्युपपन्नः ॥ २९ ॥

सर्वथा अज्ञातस्य सम्बन्धस्य भानं त्वनुभवविरु-

द्धम् । इदं चार्थवत्सूत्रे भाष्ये स्पष्टम् । तथा प्रातिपदिकार्थसूत्रे "षष्ठीशेषे" इतिसूत्रेच भाष्ये । तत्राहि–वीरः पुरुष इत्यादौ "विशेषणविशेष्यभावरूपं यद् आधिक्यं स वाक्यार्थः" इत्युक्तम् । तत्राधिक्यमिति स्वार्थे ष्यञ् । तत्र नान्यत्प्रवृत्तिनिमित्तम् ।

तदुक्तम्—

वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्षया । इति ।

नन्वाकाङ्क्षादिसहकारेण पदैरेवोक्तसंसर्गस्यापि भानोपपत्तौ तत्र वाक्यस्य शक्तिकल्पने मानाभावो गौरवं च । आकाङ्क्षा च वक्ष्यते, इति चेन्न । तत्तत्समभिव्याहारे ऽर्थासंबद्धे बोधजनकत्वानुपपत्त्या सम्बन्धावच्छेदकत्वात् । पदेषु तत्तदर्थसम्बन्धवत् ।

तदुक्तं भट्टपादैः—

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थे ऽपि पदानि नः ।
वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैव च दृश्यते ॥ इति ।

हि, यतः । सर्वत्रैव, एकपदप्रयोगे ऽपि 'प्रविश' 'पिण्डीम्' इत्यादौ । एतदर्थश्चाग्रे वक्ष्यते । एवं च वाक्यार्थत्वं स्पष्टमेवोक्तम् । तत्र प्रत्येकं पदस्य सामर्थ्यमिति न युक्तम्, विनिगमनाविरहात् । पदानां तद्विषयसामर्थ्यात्यागे युक्त्यन्तरमप्युक्तं तैः—

साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् ।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले ॥
वाक्यार्थमितये तेषां प्रवृत्त्या नान्तरीयकम् ।
पाके ज्वाले च काष्ठानां पदार्थप्रतिपादनम् ॥ इति ।

एवं च पदतात्पर्यविषयता वाक्यसंबद्धत्वं च स्पष्ट-

मेव । एवं च पदवृत्तिः केवलपदार्थबोधिका वाक्यवृत्तिस्तु विशिष्टार्थस्यैव बोधिकेति बोध्यम् ॥ ३० ॥

(कुं.टी.)*पदाधिक्यमिति । इदंचाभिहितान्वयवादे । तत्र हि-पदानां परस्परान्वये पदार्थवशाद्यदाधिक्यं संसर्गः स वाक्यार्थः । *तत्र–वाक्ये । *अन्यत्–विशेष्यविशेषणभावातिरिक्तम् । यथा हि–घटादिशब्दानां घटाद्यर्थे प्रवृत्तौ घटत्वादिकं निमित्तं नैवं वाक्यस्य वाक्यार्थप्रवृत्तौ किञ्चिन्निमित्तमस्तीत्यत आधिक्यमित्यत्र स्वार्थ एव ष्यञित्यर्थः । *वाक्यरूपस्येति । न केवलं पदानां शब्दस्वरूपं प्रवृत्तिनिमित्तं, यावता वाक्यरूपस्यापि शब्दस्यार्थे वर्तमानस्य वृत्तिरन्यानपेक्षया स्वरूपेणैव बोद्धव्या न तु तत्र निमित्तान्तरापेक्षाऽस्तीति । *अर्थासम्बन्ध इति । असम्बद्धार्थबोधकत्वासम्भवाद्वाक्यस्यापि शक्तिरित्यर्थः । *लक्ष्यमाणः–प्रतीयमानः । प्रविशेत्यत्र गृहमिति गम्यते । पिण्डीमित्यत्र भुङ्क्ष्वेति । *नयुक्तमिति । कस्य पदस्य सामर्थ्यमित्यत्र नियामकाभावात्समुदायस्यैव युक्तमित्यर्थः । *तद्विषयेति । वाक्यार्थविषयेत्यर्थः । *साक्षादिति । वर्णा यद्यपि साक्षात्पदार्थमेव प्रतिपादयन्ति तथापि पदार्थस्य निष्फलत्वात् वाक्यार्थ एव पर्यवस्यन्तीत्यर्थः । वर्णैरेव पदार्थाभिव्यक्तेर्वर्णा इत्युक्तम् । *पाके काष्ठानां ज्वालेवेति दृष्टान्तः । *नान्तरीयकमिति । विनाऽर्थकेनान्तरेत्यनेन न–शब्दस्य "सुप्सुपा" इति समासः । ततो गहादित्वात् छः । येन विना न निष्पत्तिस्तन्नान्तरीयकमित्युच्यते । *पदतात्पर्येति । वाक्यार्थेऽपि पदानां तात्पर्यं वाक्यार्थस्य वाक्यसम्बद्धत्वञ्चेत्यर्थः ॥ ३० ॥

(क० टी०) अनुपस्थितस्यैव संसर्गस्य भानमिति इतरतान्त्रिकमतं दूषयति *सर्वथेति । प्रकारत्रयेऽपीत्यर्थः *स्पष्टमिति । तत्र हि—"एषां पदानां सामान्ये ऽर्थे वर्त्तमानानां यद्विशेषे ऽवस्थानं स वाक्यार्थः" इत्युक्तम् । विशेषे,पदार्थसंसर्गे रूपे । सचोक्तरूप एव । सम्बन्धान्तरस्य समर्थसूत्रभाष्ये विभक्तिवाच्यतोक्तेस्तत्र तच्छक्तिरप्याकाङ्क्षावशादेव । तद्ध्वनयन्नाह *यथेति । *तत्रहि । अर्थवत्सूत्रे हि । *इत्यादाविति । विशेषणविशेष्यभावस्याधिकस्य प्रतीत्या प्रातिपदिकार्थमात्राभावात्प्रथमा न प्राप्नोतीत्याशङ्क्येति शेषः । "वीरप्रातिपदिकात्पुरुष इति शब्दान्तरस्यार्थो यः पुरुषत्वं तत्संसर्गेण वीरः क इत्येवमाकाङ्क्षया प्रापितविशेषणभावमनपेक्ष्य स्वार्थमात्रनिष्ठात्प्रथमा विधीयते । पश्चात्स्वाकाङ्क्षावशाद्विशेषणविशेष्यभावावगतिरुपजायते" इति कैयटस्तदाह *विशेषणेति । पुरुषे ऽपि वीरनिष्ठविशेषणतानिरूपितविशेष्यत्वमधिकम् । तद्ध्वनयता तृतीयसूत्रमुक्तम् । तत्रहि—'राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्यम् इत्यधिकार्थत्वात्प्रथमा न प्राप्नोति' इत्याशङ्क्य 'यदत्र'—इत्याद्युक्तम् । तेन तस्यैव तत्त्वं स्पष्टमेवोक्तम् । तस्य तत्त्वायाह *तत्रेति । तस्य केनचिद्रूपेण भाने प्रागुक्तदोषापत्तेराह *तत्रेति ।* तदुक्तम्—हरिणा । नैयायिकमतं खण्डयति प्रतिज्ञातं प्रतिपादयन् *नन्विति । शाब्दत्वायाह *पैदरेवेति । नन्वाकाङ्क्षाया आत्मादिनिष्ठत्वेन कथं पदवृत्तित्वमत आह *आकाङ्क्षेति । अन्यथाऽतिप्रसङ्गापत्तेराह *बोधेति । परसंमतमपीदमित्याह *तदुक्तमिति । अपिना स्वार्थपरिग्रहः । पूर्वार्द्धोक्तार्थे हेतुमाह *वाक्यार्थे इति । तदेवाह *हि यतइति । नन्विदं लक्षणापरं न शक्तिपरमिति कथं प्रकृतसाधकमत आह *एतदिति । पर्यवसितं प्रकृतमाह *एवं चेति । तेषां तत्सामर्थ्यात्यागे चेत्यर्थः । वाक्यार्थत्वं संसर्गस्य तथा ऽनुवादात् । पदानामिति बहुवचनोक्त्या समभिव्याहृतानामित्यर्थो नतु प्रत्येकमिति तदाह *वाक्यार्थे इत्यर्थः । उत्तरार्द्धेनैव युक्तेरुक्तत्वादाह *युक्त्यन्तरमपीति । स्वार्थप्रतिपादनं निष्फलं नान्तरीयकमित्यर्थः । *वर्णाः—समभिव्याहृताः पदरूपाः । *मितये—ज्ञानाय । प्राग्वदाह *एवं चेति ॥ ३० ॥

यत्तु पदैःपदार्थोपस्थितौ पदार्थानां परस्पराका-

ङ्गादिवशादन्वयबोधो नतु स वाक्यसंबद्धः । वाक्यार्थ इत्यस्य च वाक्यप्रयोजनमित्यर्थः इति । तन्न । अन्वयस्य शब्दासंबद्धत्वे तद्विषयकबोधस्य 'शाब्दयामि' इत्यनुव्यवसायानापत्तेः । धूमपदोपस्थितधूमेन जातवह्न्यनुमितेरपि शाब्दत्वापत्तेश्च

किञ्च शब्दानामर्थद्वारकसंबन्धस्यैवाङ्गीकारेण वाक्यानां च तदभावात् परस्परमिमे वाक्ये संबद्धे इत्यादिव्यवहारानापत्तिः । नच प्रयोजनभूतवाक्यार्थद्वारक एव तयोः संबन्ध इति वाच्यम् । ईदृशस्यापि संबद्धव्यवहारप्रयोजकत्वे मथुरापाटलिपुत्रयोरपि संबद्धत्वव्यवहारापत्तेः । स्वसंयुक्तावयवकदेशसंबद्धत्वादित्यलम् ।

यत्तु बोधजनकत्वानुपपत्त्या न संबन्धकल्पना किंतु स्मृतिरूपपदार्थोपस्थित्यनुपपत्त्या । सा त्वेकसंबन्धिज्ञानादपरसंबन्धिस्मरणविधयेति तत्कल्पना । बालो ऽपि वाक्यार्थज्ञानकारणत्वेन पदार्थस्मृतिं कल्पयित्वा तदनुपपत्त्यैव शक्तिं कल्पयतीति ।

तन्न । पदार्थस्मृत्यनुपपत्त्या कल्प्यमानशक्तेः पदेष्वेव कल्पनौचित्येन प्राथमिकशक्तिग्रहस्यैव पदविषयत्वसिद्धावन्वयव्यतिरेकाभ्यां पश्चात्तत्तत्पदशक्तिग्रह इति सर्वतन्त्रसिद्धान्तविलयापत्तेः ।

किञ्च एवमितरान्विते शक्तिरित्यादिपक्षाणां विलय एव ।

किञ्च पदार्थोपस्थितेर्न स्मृतित्वम् तत्ताया अननुभवात् । तत्ता च पूर्वानुभूततैव ।

अत एव "अनुभवविषयासंप्रमोषः स्मृतिः" इति पातञ्जलसूत्रम् । अनुभवस्य यौ विषयौ वृत्तितदारूढविषयरूपौ तयोरसंप्रमोषोऽनपहरणं यत्र सा वृत्तिः स्मृतिरित्यर्थः । तदुक्तं पातञ्जलभाष्ये "वृत्तिग्राह्यविषयं ज्ञानं ग्राह्यविषयग्रहणवृत्त्युभयाकारप्रतिबिम्बवच्चैतन्यरूपं स्वबिम्बाश्रये तज्जातीयमेव संस्कारमारभते । तस्य च संस्कारस्य स्वाभिव्यञ्जककालाद्युद्बुद्धस्य स्वसमानाकारग्राह्यग्रहणोभयविषयकस्मृतिजनकत्वम्" इति । अनुभवसंस्कारस्मृतीनां समानाकारकत्वेनैव कार्यकारणभावादेवमेव युक्तम् । नच तत्तांशे उद्बोधकासमवधानात्तदभानम्, दृश्यते हि समूहालम्बनात्मकनानापदार्थानुभवेऽपि कस्य चिदेव स्मरणमिति वाच्यम् । तत्तद्विषयांशोद्बोधकस्यैव नियमेन तद्विषयकज्ञानांशोद्बोधकत्वेन तदंशे प्रमाणासम्भवात् । किन्तु ग्राह्यांशे एव सः । तत्तद्देशकालवृत्तित्वरूपतत्तायास्तु न भानम् स्मृतावुचितम् कालादेस्तदनुभवेऽभानात् । नच दोषवशात्तत्प्रमोषः । नियमतस्तादृशदोषकल्पने गौरवात् । क्लृप्तस्य भ्रमजनकदोषस्य तन्मोषकत्वे तु विनष्टरजतस्य रागान्धस्य शुक्त्यादिदर्शने 'तद्रजतत्वविशिष्टमिदं रजतम्' इति तत्तांशोल्लेखिभ्रमानापत्तिः, दोषस्य विद्यमानत्वात् ॥ ३१ ॥

(कुं० टी०) *नत्विति । वाक्यार्थे वाक्यसम्बद्धे इत्यर्थः । कथं तर्हि वाक्यार्थ इति व्यवहार अत आह *इत्यस्येति । ननु शब्दप्रयोगप्रयोज्यत्वात् शाब्दत्वमत आह

*धूमपदेति । *शब्दानामिति । यथा घटमानयेति पदयोः स्वार्थद्वारकः सम्बन्धः तथा द्वयोर्वाक्ययोरपि स्वार्थद्वारक एव सम्बन्धो वाच्य इत्यर्थः । *यत्तु बोधेति । पदात्पदार्थोपस्थितिः स्मरणरूपैव । तथाच स्मरणार्थमेव पदपदार्थयोः सम्बन्धः कल्प्यत इत्यर्थः । तथा च वाक्यासम्बद्धस्यापि वाक्यार्थस्य बोधे बाधकाभाव इति भावः । *तदनुपपत्त्यैव—स्मरणानुपपत्त्यैव । *शक्तिमिति । पदस्य पदार्थे इत्यादिः । *तन्नेति । पदार्थस्मरणार्थं कल्प्यमाना शक्तिः पदे प्रथमत एव स्यात् । तथाच वाक्यशक्तिग्रहानन्तरम् आवापोद्वापाभ्यां पदे शक्तिव्यवस्थापनासङ्गतिरित्यर्थः । *अन्वयव्यतिरेकाभ्याम्—आवापोद्वापाभ्याम् । *तत्तायाः इति । पूर्वानुभवजन्यसंस्कार एव स्मरणं प्रति हेतुः । नचेह तथाऽस्तीति भावः । *विलय एवेति अन्वयांशस्य पदार्थस्मरणोत्तरगम्यत्वेनान्वयांशमादाय पदशक्तेर्दुर्वचत्वादिति भावः । *पूर्वानुभूततैवेति । तथाचाऽऽकारभेदान्न पदार्थोपस्थितेः स्मृतित्वम् । 'मया पूर्वो ऽयमनुभूतः' इति बुद्ध्या विषयीकृत्यैव स्मरणादिति भावः । *अनुभूतविषयासम्प्रमोष इति । प्रमाणेनानुभूतानां पदार्थानां संस्कारवशाद् बुद्ध्यावारोहोऽसंप्रमोषः । अन्ये तु मोषशब्दः स्तेयवाची । स्मृतौ हि अनुभूतस्ततो न्यूनो वा विषयो विषयो भवतीति।अधिकग्रहणं स्तेयसादृश्यान्मोषः । तथाच असंप्रमोषोऽधिकाग्रहः । अनुभूतमात्रग्रह इति यावत् । सा स्मृतिरित्यर्थः । सर्वे प्रमाणादयोऽनधिगतमर्थमवगमयन्ति । स्मृतिस्तु पूर्वानुभवमर्यादां नातिक्रामतीति वृत्त्यन्तराद्विशेषः । स्वप्नेऽननुभूतानां पदार्थानां ज्ञानं तु विपर्यय एव न स्मृतिरिति भावः । *अनुभवस्येति । घटाद्याकारकश्चित्तपरिणामो वृत्तिः । साच घटादिश्चानुभवस्य

विषयावित्यर्थः। वृत्तिविषययोरुभयोरपि प्रकाशादनुभवविषयत्वम्। *वृत्तिग्राह्येति। वृत्तिर्ग्राह्यश्च तद्विषयं ज्ञानं चैतन्यरूपं तदेवानुभवरूपम्। तत्र ग्राह्यो यो विषयो या च ग्रहणहेतुर्वृत्तिस्तदुभयप्रतिबिम्बयुक्तेत्यर्थः। *बिम्बाश्रये–अनुभवाश्रये। ग्राह्यग्राहकोभयाकारकानुभवजन्यत्वात्संस्कारो ऽपि तदुभयाकारस्तस्माच्च स्मृतिरपि तादृशीति भावः। *समानाकारत्वेनैवेति। कथं तर्हि गोत्वविषयकशक्त्यनुभवानन्तरं गोव्यक्तिस्मरणमिति चेद्। सत्यम्। गोत्वशक्तिज्ञानत्वेन शाब्दबोधकारणतेत्येतावतैव जातेर्वाच्यत्वव्यवहारात्। *नच तत्तांशे इति। एवं च तदनुल्लेखे ऽपि स्मृतित्वमेवेति भावः। *तद्विषयांशेति। घटाद्युद्बोधस्यैव घटादिज्ञानोद्बोधकत्वमित्यर्थः। *तदंशे–तत्तांशे। *प्रमोषासम्भवादिति। तत्तांशप्रमोषे तद्विषयकज्ञानस्याप्युद्बोधासम्भवादित्यर्थः। *ग्राह्यांशे–अनुभूयमानांशे। *सः–प्रमोषः। तदंशस्य तु पूर्वमगृहीतत्वान्न प्रमोषसम्भवः। अत एवाह *तत्तद्देशेति। अनुभवेन तत्तद्देशत्वादिकं न विषयी क्रियते किन्तु पश्चात्तनस्मृत्या, तत्कथमननुभूतस्य तत्ताऽशस्य मोष इत्यर्थः। *विनष्टरजतस्येति–बहुव्रीहिः॥ ३१॥

(क० टी०) तदीयमतान्तरं खण्डयति *यत्त्विति। अर्थनिष्ठाऽऽकाङ्क्षामाह *पदार्थानामिति। *सः–अन्वयः। नन्वेवं भट्टसंमतवाक्यार्थव्यवहारः कथमत आह *वाक्यार्थ इति। अर्थशब्दः प्रयोजनवाची नाभिधेयवाचीति भावः। परम्परया तत्त्वमादाय तदुपपादने त्वतिप्रसङ्गमाह *धूमेति। एवञ्च तदुत्तरमपि तदनुव्यवसायापत्तिरिति भावः। नन्वाकाङ्क्षादिसत्त्वे एव तथा नान्यत्रेति चोक्तदोषद्वयमत आह *किञ्चेति। तदुक्तरीत्यैवाह *नचेति। *प्रयोजनेति। वाक्येत्यादिः। *बोधेति। तेषामाकाङ्क्षादिवशादित्यर्थः। *ईदृशस्य–परम्परासम्बन्धस्यापि। तत्रा-

ण्याकाङ्क्षादेर्नियामकत्वकल्पने तु ततो वरं शक्तिकल्पनेत्याह *इ-त्यलमिति । मानान्तरं स्वपरसाधारणं खण्डयति *यत्त्विति। ननु वृद्धव्यवहारात्प्रथमशक्तिग्रहे नैतत्सम्भवो ऽत आह *बालो-ऽपीति। तं पश्यन्निति शेषः। *पदेष्वेवेति । तद्विशेषणतया तेषा-मेवोपस्थितेः। इष्टापत्तावाह *किञ्चैवमिति। तथाऽङ्गीकारे इत्य र्थः। तदाऽन्वयस्यानुपस्थित्या तत्र तदसम्भवात् । इदमपि त-स्यास्तत्त्वमभ्युपेत्य । वस्तुतस्तदेव नेत्याह । *किञ्चेति। माना-न्तरनिरासस्य वक्ष्यमाणत्वायाह *तत्ताचेति । धर्मधर्म्य-भेदात्तद्वतीत्यर्थस्तदाह * यत्रेत। *सा-तदुभयविषया । एवं-च 'स देवदत्तः' इत्येव स्मरणाकारः। *वृत्तीति। बहुव्रीहिः। *वि-षयाज्ञानमिति । चैतन्यरूपान्वितम् । *ग्राह्येति। ग्राह्यविषयश्च, ग्रहणवृत्तिश्च तत्साधनवृत्तिश्चैतदुभयाकारेत्यर्थः । *तस्य च-ता-दृशस्य च । एतेन स्मृतिर्ग्राह्यविषयैव वृत्तिविषयसंस्कारे माना-भावादिति प्रलपितमपास्तम् । *इतिस्तद्ग्रन्थसमाप्तौ । ननु समानप्रकारकानुभवस्य स्मृतिं प्रति कारणत्वं प्रकृते च तव मते 'अयं घटः' 'घटमहं जानामि' इत्यनुभवो विषयप्रकारको ज्ञानवि-शेष्यकः स्मृतिस्तु 'अयं स घटः' इत्याकारा विषयविशेष्यिका ज्ञानप्रकारिकेति तादृशानुभवेन नेदृशस्मरणमिति चेन्न। लाघवेन समानाकारत्वेनैव कार्यकारणभावात् । ननु प्रकारतानिवेशो-ऽपि। गौरवात् । तदुक्तं भाष्ये "ग्रहणाकारपूर्वा बुद्धिर्ग्राह्याकारपू-र्वा स्मृतिः" इति । पूर्वशब्दो विशेष्यपरः । बुद्धिरनुभवः तदाह *अनुभवेति । आशयानभिज्ञः परः स्वमतसिद्धये आह *न-चेति । *तत्तांशे-वृत्त्यंशे । आशयमाह *तत्तदिति । अनुभव-बलाद्विषयांशप्रमोषाङ्गीकारेऽपि न वृत्त्यंशप्रमोष इति भावः । प-रमतं खण्डयति । *तत्तदिति अत्र घट इत्यादितु तत्तद्वृ-त्तित्वानुभवो न तदनुभव इत्याह *तदनुभवे इति । परः स्वमतं समर्थयन्नाह *न च दोषवशादिति ननु क्लृप्तेनैव नि-र्वाहे न गौरवमत आह *क्लृप्तस्येति ॥ ३१ ॥

किञ्च पदजपदार्थज्ञाने 'स्मरामि' इति नानुभवः। 'शाब्दयामि' इत्यनुभवश्च। पदजपदार्थज्ञाने उद्बुद्ध-

शक्तिग्रहजसंस्कारस्य हेतुत्वम्, फलबलात्। यथा तव वाक्यार्थबोधजनकत्वग्रहसंस्कारस्योद्बुद्धस्य वाक्यार्थबोधहेतुत्वम्।

किञ्च पदार्थानुभवस्य शक्तिग्रहात्मकतया तत्र च शक्तिविशेषणतयैव तद्भानेन तद्विशेषणकस्मृतिरेव स्यान्न तद्विशेष्यिका त्वदभिमता। किञ्च पदार्थोपस्थितिर्न शाब्दे कारणं किं तु पदज्ञानोद्बुद्धः पदार्थविषयकसंस्कार एव तत्र कारणम्। स शक्तिविषयोऽपीत्यन्यत्।

वाक्यशक्तिसत्त्वादेव 'समासग्रहणं वाक्ये प्रातिपदिकसंज्ञाऽतिव्याप्तिवारणार्थम्' इति भाष्यं सङ्गच्छते।

तत्र केषांचिद्विशिष्यैव तत्तद्वाक्यस्य तत्तद्वाक्यार्थे शक्तिग्रहः। अत एव समुदायतो विशिष्टबोधेऽपि पदविभागसामर्थ्याभावो दृश्यते तेषाम्।

एतेन विशिष्टशक्तिग्रहे पदशक्तिग्रहः कारणमित्यपास्तम्। कस्य चित्कारकत्वादि जानतः कारकपदधातुघटितपदयोर्विशिष्टयोः कारकविशिष्टक्रियाशक्तत्वमिति सामान्यत एव, ततः पदविशेषसमभिव्याहारज्ञाने सति तात्पर्यवशात्पदार्थविशेषविशिष्टक्रियाबोधः। सामान्यशक्तिग्रहोऽपि तत्तत्पदार्थनिष्ठप्रकारतानिरूपितसंसर्गनिरूपिता या तत्तत्पदार्थनिष्ठा विशेष्यता तद्वत्यर्थे समुदायः शक्त इत्येवं विशेष्यविशेषणभावापन्नेऽर्थे एवेति न विपरीतो विशेष्यविशेषणभावः।

यत्तु सर्वस्य सामान्यतः शक्तिग्रह एव बोधक इति ।

तन्न । कारकत्वधातुत्वाद्यजानतस्तथा शक्तिग्रहासम्भवात् ।

एतेन प्रातिपदिकार्थप्रकारकशाब्दबोधे तदर्थकपदोत्तरसार्थकप्रत्ययतदर्थबोधकपदानिपातान्यतमजन्योपस्थितिर्हेतुरित्याद्यपास्तम् । 'कर्मत्वं घटः' 'अम् घटः' इत्येतत्समभिहारव्युत्पन्नानां ततस्तथा बोधे व्यभिचाराच्च ।

नच स्वाव्यहितोत्तरोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबन्धेन तत्तद्व्युत्पत्तिविशिष्टबोधे तत्तद्व्युत्पत्तिः कारणमिति न दोष इति वाच्यम् । अनन्तकार्यकारणभावापत्तेः ।

यत्तु वाक्यशक्त्यङ्गीकारे पदार्थानामिव वाक्यार्थस्यापि स्मरणमेव स्यान्न त्वनुभवः । सम्बन्धिज्ञानतयैव पदज्ञानवत् तदुपयोगादिति । तन्न । पदार्थानामपि स्मरणाभावस्योपपादनात् । किञ्च वाक्यार्थप्रतीतेर्नानुभवत्वम् । स्वर्गनरकादिकं शृण्वतः तदनुभवामीत्यप्रतीतेः । तस्माच्छाब्दत्वं ज्ञानत्वव्याप्यजातिविशेष एव, नानुभवत्वव्याप्यमित्यलम् ॥ ३२ ॥

(कुं० टी०) 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्' इति न्यायात्पदेन पदार्थस्मरणमिति तार्किकमतं निराकरोति *किञ्चेति । ननु पदार्थोपस्थितेः स्मृत्यात्मकत्वाभावे ऽतिरिक्तहेतुकल्पनापत्तिरत आह

*पदजेति। *तज्ज्ञानेन—पदार्थभानेन। *स्मृतिरेव स्यादिति। घटपदस्य घटे शक्तिरित्यनुभवात् स्मृतिरपि तादृश्येव स्यादित्यर्थः। *न शाब्दकारणमिति। अन्यथाऽवान्तरवाक्यार्थबोधकाले पदार्थस्मरणस्य नष्टत्वान्महावाक्यार्थबोधो न स्यात्। मम तु संस्कारस्य सत्त्वाददोषः। अवान्तरस्मरणं तु न संस्कारनाशकम्, अत एव पुनः पुनः स्मरणात् दृढतरसंस्कार इति तत्सिद्धान्तः। *केषाञ्चित्—कारकत्वक्रियात्वाद्यजानताम्। *पदविभागेति। पदविभागमजानतामपि वाक्यार्थबोधदर्शनादित्यर्थः। *अपास्तमिति। हरेऽवेत्यादौ व्यभिचारात्। *कारकत्वादीति। कारकत्वादि जानतः कस्यचित्पुंस इत्यर्थः। *धातुघटितम्—तिङन्तादि। *विशिष्टयोः—समुदितयोः। *सामान्यतइति। कारकविशिष्टक्रियायां सामान्यतो वाक्यशक्तिग्रहः, विशेषबोधस्तु तात्पर्यवशादित्यर्थः। *तत्पदार्थेति। कारकादीत्यर्थः। *न विपरीतइति। सामान्यबोधोऽपि न क्रियाविशेषणकादिः। *अजानतइति। तस्मात्कारकत्वादि जानतः कस्यचिदेव सामान्यशक्तिग्रहो न सर्वस्येति भावः। *तदर्थकेति। प्रातिपदिकार्थस्य प्रत्ययार्थे प्रकारतेत्यर्थः। *तदर्थबोधकेति—प्रत्ययार्थबोधकसंबन्धादिपदेत्यर्थः। *अपास्तमिति। प्रातिपदिकार्थत्वाद्यजानतो बोधानापत्तेः। *स्वाऽव्यवहितेति। कालान्तरीयबोधे व्यभिचारवारणायाद्यदलम्। पुरुषान्तरीयबोधे व्यभिचारवारणाय द्वितीयदलम्। नत्वनुभव इति यदुक्तं तन्निराकरोति *नानुभवत्वमिति। अनुभवत्वं प्रत्यक्षवृत्त्येव न तु प्रत्यक्षादिचतुष्टयसाधारणमित्यर्थः॥ ३२॥

(क० टी०) तत्र दोषान्तरमाह *किञ्चेति। ननु सिद्धान्ते

शक्तिग्रहस्य ततः पूर्वमसत्त्वात्कथं तदुपस्थितिरत आह *पदजेति । तत्र दोषान्तरमाह *किञ्चेति । *तत्रच-शक्तिग्रहेच । *तदिति । अर्थेत्यर्थः । इदमपि पदार्थोपस्थितेः शाब्दबोधे हेतुत्वमभ्युपेत्य । वस्तुतस्तदेव नेत्याह । *किंचेति । अगृहीतशक्तिकस्य बोधवारणायाह *सशक्तीति । तस्य शक्तिग्रहात्मकत्वादिति भावः । प्रतिपादितमिदमादावेव मूले । वाक्यशक्तौ मानान्तरमप्याह *वाक्येति । *तत्र—वाक्यविषये । *केषां चित्—विशिष्यज्ञानवतां तदज्ञानवताम् । *अत एव—समुदितस्य समुदितरूपेण समुदितेऽर्थे शक्तिग्रहादेव।*एतेन—समुदायव्युत्पत्त्या समुदायार्थबोधेऽपि व्याकरणव्युत्पत्तिं विना पदविभागसामर्थ्याभावस्यानुभवसिद्धत्वेन । *कारणमिति । प्रत्येकपदशक्तिग्रहाभावे वाक्यार्थबोधस्याजायमानत्वात्तत्सत्त्वेऽपूर्ववाक्यश्रवणे ऽपि तस्य जायमानत्वाच्चेति तद्भावः । *अपास्तामिति । किञ्च वाक्यशक्त्यग्रहे तदभावादेवाघे तदभावोपपत्तेः । तत्सत्त्वे तु जायत एवेत्यपि बोध्यम् । विशेषाविषयसामान्यबुद्ध्यभावादाह *तत इति । तदादिवदुक्तसामान्यशक्तिग्रहानन्तरमित्यर्थः । *क्रियाबोधः-तद्विशेषबोधः । एवंचानियत एव स इति भावः । ननु स्वतन्त्रशक्तिज्ञानाद्विशृङ्खलपदार्थोपस्थितौ सत्यां विशेषणविशेष्यभावव्यत्यासेनाप्यन्वयबोधः स्यादत आह *सामान्येति । उक्तप्रकारेण । एवेनोक्तविशिष्यशक्तिग्रहव्यवच्छेदः । आदिना प्रातिपदिकत्वादि । *एतेन—प्रातिपादिकत्वाद्यजानतस्तथा शक्तिग्रहासम्भवेन । आदिना विभक्त्यर्थविशेष्यकशाब्दबोधे विभक्तिप्रकृतिजन्योपस्थितिर्हेतुरित्यादिसामान्यकार्यकारणभावपरिग्रहः । घटः कार्यत्वमित्यतो विपरीतव्युत्पन्नस्य तथा बोधात् व्यभिचारवारणाय तदर्थबोधकपदेत्युक्तम् । नचैवमपि पटादिलाक्षणिकघटपदघटितघटमानयेतिवाक्यात्तथाबोधवारणाय घटबोधकत्वं घटबोधफलोपहितत्वं निवेश्यम् एवं चान्योन्याश्रयात्तादृशकार्यकारणभावग्रहासम्भव इति वाच्यम् । तत्र घटस्य वृत्तिजन्योपस्थित्यभावादेव तथा बोधवारणेन स्वरूपयोग्यत्वनिवेशे ऽपि क्षत्यभावादिति तद्भावः । अतएव व्यभिचारान्तररूपदोषान्तरमाह *कर्मत्वमिति । प्रकृतदोषाभावायाह *स्वाद्यवेति । अ-

न्यस्य बोधवारणाय *स्वसामेति । एकसम्बन्धिज्ञानमिति न्याये-नाह *सम्बन्धीति । इदमपि तस्य तत्त्वमभ्युपेत्योक्तम् । व-स्तुतस्तदेव नेत्याह *किञ्चेति । किञ्च वाक्यज्ञानस्य तादृशवि-जातीयज्ञानत्वमेव कार्यतावच्छेदकमतो न स्मृतिस्ततः । अन्यथा तवापि वाक्येनाकाङ्क्षारूपसम्बन्धस्य सत्त्वात् स्मृतिजननाशङ्का दु-रुद्धरैव स्यात् तदाह *इत्यलमिति ॥ ३२ ॥

तत्र सम्बन्धस्य सम्बन्धिद्वयनिरूपितत्वेनैव बो-धाद्वाक्यतो न पृथक् तद्बोधः ।

तदुक्तं हरिणा—

नाभिधानं स्वधर्मेण सम्बन्धस्यास्ति वाचकम् ।
अत्यन्तपरतन्त्रत्वात् षष्ठ्येवास्य तु वाचिका ॥ इति ।

षष्ठ्येव सम्बन्धस्य वाचिका न तु सम्बन्धशब्दा-दीति तदर्थः । अभिधानम्, पदम् । सम्बन्धिनोः सं-घटनस्वभावत्वेन नित्यपरतन्त्रत्वात् । षष्ठीपदं विभक्तीनां वाक्यस्य चोपलक्षणम् । पदानां तु पृथक् स्वार्थबोधकत्वमपि ।

यत्तु मीमांसकैकदेशिनः—वाक्यार्थे वाक्यस्य लक्षणेति ।

तन्न । वाक्यबोध्यान्वयस्य सम्बन्धरूपत्वे-न तत्र वाक्यबोध्यस्य सम्बन्धस्य पदार्थस्य वा सम्बन्धग्रहाननुभवेन वाक्यबोध्यनिरूपितसम्बन्ध-मूलिकायास्तद्रूपाया वा तस्या असम्भवात् । अनु-पपत्तिप्रतिसन्धानं विनाऽपि तद्बोधेन तदप्रसरात् । नच तात्पर्यविषयीभूतवाक्यार्थानुपपत्तिस्तद्बीजम् । नियमतः पूर्वं तात्पर्यज्ञानस्यापि कल्पनाऽपेक्षया शक्तिकल्पनस्यैवौचित्यात ।

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थे ऽपि पदानि नः ।

इतिपूर्वार्धोक्तेऽर्थे हेतुत्वेनोपन्यस्तायाम्—

वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैव च दृश्यते । इति भट्टकारिकायां लक्ष्यमाण इत्यस्य प्रतीयमान इत्यर्थः । दृश्यत इत्यस्य प्रतीतिविषयत्वेनानुभूयत इत्यर्थः ।

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति च स्थितिः ।

इतिपाठे लक्ष्य इत्यस्य प्रतीतिविषय इत्यर्थकस्य अस्तीति शेषः । सर्वत्रैव हि वाक्यार्थः प्रतीयमानो ऽस्त्येवेति स्थितिः वक्ष्यमाणरीत्या वाक्यैकदेशन्यायेनेत्यर्थः । अत एव केवलपदप्रयोगे ऽपीत्यर्थकं सर्वत्रैवेति सार्थकमित्याहुः ॥ ३३ ॥

(कुं० टी०) ननु पदार्थसंसर्गस्यैव वाक्यार्थतया पदार्थानां च तत्तत्पदलभ्यत्वेन तत्र वाक्यशक्तौ केवलसम्बन्धस्य बोधापत्तिः, अत आह *तत्रेति । *वाक्यतोनेति । सम्बन्धस्य संबन्धिपरतन्त्रतया केवलसंबन्धबोधो नेत्यर्थः । *नाभिधानमिति ।

अस्यार्थः—स्वेन असाधारणेन धर्मेण उपलक्षितस्य संबन्धस्याभिधानं वाचकं षष्ठीव्यतिरिक्तं नास्ति । द्रव्याधीना अपि गुणाः कदाचित्प्राधान्येन शुक्लादिशब्देनोच्यन्ते नैवं संबन्धशब्देन इति सूचनायात्यन्तग्रहणम् । परतन्त्रो हि संबन्धः । एवंच संबन्धादिपदं न संबन्धस्य वाचकमिति । अभिधानमित्यस्याभिधायकमित्यर्थ इत्याह *पदमिति । *संबन्धिनोरिति । संबन्धिद्वयोन्मुख्यस्वभावत्वेन संबन्धस्य पदार्थान्तरसापेक्षत्वमेवेत्यर्थः । *विभक्तीनाम्—षष्ठ्यर्थे विहितविभक्ती-

नाम्। *वाक्यस्यचेति। तेनापि संबन्धप्रत्यायनात्। ननु पदार्थाभावे कथं तत्संसर्गरूपो वाक्यार्थ इत्यत आह *पदानां त्विति। संसर्ग एव तु वाक्यशक्य इति भावः। *लक्षणेति। पूर्वोत्तरपदयोः स्वार्थमात्रे शक्तिः तद्विशिष्टे ऽधिके ऽर्थे तु लक्षणेत्यर्थः। *तत्रेति।

अयं भावः—वाक्यबोध्यो यदि अन्वयस्तदा स एव सम्बन्ध इति पुनः संबन्धो नानुभवसिद्धः। अथ यदि पदार्था एव वाक्यबोध्यास्तदा तेषामपि सम्बन्धग्रहो नानुभवसिद्धः इति। लक्षणायां मतभेदस्य पूर्वमुपपादितत्वादाह *तद्रूपायावेति। *नविमुञ्चन्तीति। द्वारमित्याद्येकपदे ऽपि बोधदर्शनात्पदमपि वाक्यार्थबोधकमित्यर्थः। *प्रतीयमान इति। तेन तन्मते ऽपि लक्षणाऽभावो दर्शितः। *वाक्यैकदेशन्यायेनेति। यथा गृहमित्येव गृहं प्रविशेति समुदायार्थवाचकम्। *केवलपदेति। एकपदेत्यर्थः॥ ३३॥

(क०टी०) प्राग्वद्विशेषान्तरमाह *तत्रेति। वाक्याविषये। *तद्बोधः-संसर्गबोधः। *स्वधर्मेण-सम्बन्धत्वेन। *सम्बन्धस्येति। निषेधे विधौच मध्यमणिन्यायेनास्यान्वयः। यथाश्रुतस्य भाष्यविरुद्धत्वादाह *नत्विति। *आदिना संसर्गशब्दादि। अत एवाह *पदमिति। उक्तहेत्वर्थमाह *सम्बन्धिनोरिति। सम्बन्धस्येति शेषः। भट्टसंमतेः प्रागुक्तत्वादाह *मीमांसकैकेति। अयं भावस्तेषाम्-एवं च शक्तिकल्पना न। नचापूर्वत्वं प्रागविज्ञातहरिद्रानामकनदीविशेषेण पुंसा 'हरिद्रायां नद्यां घोषः' इति श्रुते वाक्ये नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषे शक्तिग्रहपूर्वकं नदीलिङ्गात्तत्सम्बन्धित्वेनावगततीरप्रत्ययवत् पदैः पदार्थानामुपस्थितौ आकाङ्क्षाज्ञानादिसाचिव्यात्तत एवोपस्थिते वाक्यार्थे तद्ग्रहसम्भवात्। तथोपस्थितस्यापि वृत्त्याऽनुपस्थितत्वान्न स बोधः शाब्द इति शाब्दत्वप्रकारकबोधानुभवान्मध्ये लक्षणाग्रहः।

सच स्वबोध्यसम्बन्धितया तदुपस्थितिः । स्वबोध्यसम्बन्धिनः स्वबोध्यस्योपस्थितेरेव प्राचीननये लक्षणात्वात् । यद्वा स्वसम्बन्धिपदार्थबोधकं वाक्यमिति तद्ग्रहः, तीरसम्बन्धिप्रवाहबोधकं गङ्गापदमितिवत् । लक्षकत्वं च स्वसम्बन्ध्यर्थबोधकत्वमेव । बोध्यसम्बन्ध एव च लक्षणा । पदजन्यपदार्थोपस्थित्याकाङ्क्षाद्यसहकृतप्रमाणबोध्यबोधकत्वं चाधिगतार्थगन्तृत्वमिति न वेदस्यानधिगतार्थगन्तृतारूपप्रामाण्यहानिरिति । *तत्र—अन्वये । *तस्याः—लक्षणायाः । ननु भट्टकारिकायामपि लक्ष्यमाण इत्युक्त्या तेषामपि लक्षणैव संमतेति कथमेकदेशिन इत्युक्तमतः प्राक् प्रतिज्ञातमाह *नविमुञ्चन्तीति । नन्वेवं दृश्यत इति व्यर्थमत आह *दृश्यत इति । पाठान्तरैकवाक्यतामाह *सर्वत्रैवहीति । *इत्यर्थकस्येति बहुव्रीहेः पूर्वविशेषणम् । *वक्ष्येति । अनुपदमित्यादिः । अस्यैव व्याख्या *वाक्यैकेति । अयमेव भट्टसंमतोऽर्थो नैकदेश्यभिमत इत्याह *अतएवेति । आहुरित्यरुचिबीजं तु समासंग्राहकतया तत्सार्थक्यमिति न तत एवमर्थः । किन्तु भाष्याद्येकवाक्यतयैवेति ॥ ३३ ॥

यत्तु पदानामेवान्विते शक्तिः पदैरेव तदर्थप्रतीत्युपपत्तौ वाक्येऽपि शक्तिकल्पने मानाभावात् । तदुक्तम्—'एवं हि सम्बन्धग्रहणम्—अयमर्थोऽनेन शब्देनाकाङ्क्षितसंनिहितयोग्येतरान्वितः सन्नभिधीयते' इति । पदानां सामान्यत इतरान्विते शक्तावपि विशेषाविषयसामान्यबुद्ध्यभावात्समभिव्याहारविशेषकारणत्वरूपाकाङ्क्षाज्ञानबलात्तत्तत्पदार्थविशेषनिरूपितान्वयविशेषबोधासिद्धिः । अत एव पदप्रयोगे ऽन्वयविशेषजिज्ञासोपपत्तिः । तस्या अन्वयसामान्यज्ञानपूर्वकत्वनियमात् । विशेषतः पदार्थान्तरघटितस्य तदन्वयविशेषरूपवा-

कयार्थस्य प्रागनुपस्थितावपि अन्वितत्वादिसामान्यधर्मप्रकारेणोपस्थिते शक्तिग्रहः सुलभः । इतरान्विते शक्तिरिति तु न युक्तम् । इतरस्य पदान्तरलभ्यत्वात् । पदान्तरसमभिव्याहार एव तच्छक्त्युद्बोध इति घट इत्येतन्मात्रान्नान्वयधीः । ततो घटमात्रबोधस्तु शक्तिभ्रमात् । विशिष्टविषयायाः शक्तेस्तन्मात्रविषयत्वमपीति भ्रमः ।

यद्वा पदैकदेशन्यायेन विशिष्टे एकदेशे च पदानां शक्तिग्रह इत्यदोषः ।

एतेन कार्यान्विते शक्तिः पदानामित्यपास्तम् । कार्यस्यापि लिङादिलभ्यत्वात् । लिङादिसमभिव्याहार एव तद्बोधानुभवात् । आनयनाद्यर्थकपदसमाभिव्याहार एवानयनादिबोधवदिति ।

तन्न । अन्वये शक्त्यभ्युपगमे ऽपि विशेषबोधाय समभिव्याहारस्य तद्बोधकारणत्वस्वीकारे, तथा कारणत्वाग्रहवतो बोधवारणाय तद्ग्रहस्यापि कारणत्वस्वीकारे, समभिव्याहारे तदसम्बद्धे तद्बोधजनकत्वानुपपत्त्या समभिव्याहारे ऽपि तत्सम्बन्धाङ्गीकारे विपरीतगौरवापत्तेः । अन्यलभ्यत्वरूपतर्केण कार्यत्वांशत्यागवदेतत्त्यागस्याप्युचितत्वाच्च । न चोपजीव्यविरोधः । उपजीव्यत्वे मानाभावात् । दैवाद्धि प्रथमं तद् वृत्तं न तु पदशक्तिग्रहे तस्य हेतुत्वम्, मातापित्रादिभिः 'चन्द्रः' 'गौः' इत्यादिशब्देषु चन्द्राद्यभिमुखाङ्गुलीदर्शनपूर्वकमुच्चार्यमाणेषु बालस्याद्यशक्तिग्रहे व्यभिचारात् ।

यत्र त्वनन्यथासिद्धतयोपजीव्यत्वं सिद्धम्,

यथा—यागस्य स्वर्गजनकतानिर्वाहाय कल्पितेऽपूर्वे, 'तत्र तदेव कारणमस्तु न यागः' इति शङ्कायां तद् दूषणम् । नचैवं प्रकृते । न च प्राथमिकत्वेन बलवत्त्वात्तेन पश्चात्तनस्य बाधः । यथा दर्पणे चैत्रमुखं नास्तीति पूर्वप्रत्यक्षेण चैत्रमुखसंनिधानानन्तरभाविनो दर्पणे चैत्रमुखप्रत्यक्षस्य भ्रमत्वकल्पनमिति वाच्यम् । 'इदं रजतम्' इतिग्रहस्य पाश्चात्त्येन 'नेदं रजतम्' इति ग्रहेण बाधात् । नच सर्वैः प्रथमं प्रतीयमानत्वेन बलवत्त्वम् । सर्वेषां शरीरात्मप्रत्यये चन्द्रताराल्पत्वप्रत्यये च व्यभिचारात् । उक्ते मात्रादिनिर्दिष्टे चन्द्रादौ बालीयाद्यशक्तिग्रहे व्यभिचाराच्च । तस्माल्लोके प्रवृत्तिसंवादादिना, वेदे तदर्थनिर्णायकन्यायेन यद्बलवत् तद्बाधकमितरद्बाध्यमिति व्यवस्था । तत्र परेण पूर्वस्य भ्रमत्वप्रत्यायनमेव बाधः । पूर्वेण तु परस्य सोपाधिकज्ञानस्थले भ्रमत्वप्रत्यायनम् । क्वचित्तूत्पत्तिप्रतिबन्धः । यथा—श्रौतविनियोगेन लैङ्गिकस्य तस्य बाधः । जिज्ञासाऽपि फलविशेषदर्शने रसविशेषजिज्ञासावदुपपन्ना ।

ननु तद्वदेव तत्त्वत्रापि जिज्ञासानियमो न स्यादिति चेद्, इष्टापत्तेः । नच 'अनयोः संसर्गविशेषज्ञानं मे भवतु' इतीच्छायां तादृशज्ञानधर्मिकेष्टसाधनताज्ञानस्य हेतुत्वेन तद्घटकतया विशेषज्ञानस्यापि सिद्ध्या जिज्ञासोच्छेद इति वाच्यम् । विशेषधर्मत्वेन ज्ञानेऽपि तत्तद्रूपेण जिज्ञासोपपत्तेः । किञ्च सिद्धिर्न स्वरूपतः प्रतिबन्धिका किन्तु सिद्धत्वप्रकारकज्ञानमेव

तथा । अत एव वस्त्वसिद्धावपि तत्सिद्धत्वज्ञानेनेच्छानिवृत्तिः । वस्तुतः पदज्ञाने तादृशजिज्ञासैवासिद्धा किन्त्वन्वयिजिज्ञासैवेत्यलम् ॥ ३४ ॥

(कुं.टी.) पदानां जातौ शक्तिः व्यक्तेस्त्वाक्षेपेण बोधः, अन्वयस्य तु आक्षेपेण लाभो न सम्भवति अशक्यबोधने चातिप्रसङ्गात् अन्वये ऽपि शक्तिरतो जातावन्विते वा शक्तिरिति भट्टमतं दूषयति *यत्तुपदानामेवेति ।*तदर्थप्रतीतीति । वाक्यार्थरूपान्वयप्रतीतीत्यर्थः । *मानाभावादिति । अन्वयविषयकशाब्दबोधे तत्तदानुपूर्वीज्ञानत्वेन हेतुतया तत एव तल्लाभात् । अन्वयविशेषभानार्थं तत्तदानुपूर्वीज्ञानहेतुतायास्तवाप्यावश्यकत्वादिति भावः । व्यवहारेण शक्तिग्रहो जायमानो ऽन्वित एव भवतीति तात्पर्यम् । *एवंहीति । सम्बन्धग्रहः शक्तिग्रह एतादृशो हीत्यर्थः । आकाङ्क्षितः संनिहितो योग्यश्च य इतरस्तदन्वितो ऽयमर्थोऽनेन शब्देनाभिधीयत इत्यन्वयः । *विशेषाविषयेति । निर्विशेषस्य सामान्यस्याभावादिति भावः । *अत एव–विशेषपूर्वकत्वादेव । *विशिष्टविषयायाः–अन्वितपदार्थविषयायाः । *तन्मात्रेति । घटादिमात्रेत्यर्थः । *पदैकदेशेति । भीमो भीमसेन इतिवत् ।

घटमानयेत्यादिवाक्यात्प्राथमिकशक्तिग्रहात् कार्यान्विते पदानां शक्तिः कृतिसाध्यानयनान्विते इत्यर्थः । नच कार्यतावाचकलिङादीनां कथं कार्यान्विते शक्तिरिति वाच्यम् । सर्वपदानामेव कार्यान्वयशालिगोचरज्ञानविषयत्वात् । एवं च लिङ्लोट्तव्याविषय एव शाब्दबोधः प्रवृत्त्यादिजनकत्वात् । वैदिकानामर्थवादवाक्यानां तु मूकत्वमेवेति प्राभाकर-

मतं निराकरोति *एतेनेति । एतन्मते कार्यान्विते शक्तिः भट्टमते इतरपदार्थान्विते इति भेदः। लिङादिलभ्यत्वमेवोपपादयति *समभिव्याहारएवेति । अनूदितं भट्टमतं निराकरोति *तन्नेति । *तद्बोधेति । विशेषबोधं प्रति समभिव्याहारस्य कारणत्वे कल्प्ये कारणत्वग्रहस्यापि कारणत्वं वाच्यम्, समभिव्याहारस्यापि शक्तिः कल्प्येति गौरवमिति भावः । *तत्त्यागस्य—अन्वयांशत्यागस्य । *मानाभावात् इति । यदि प्रथममन्वय एव शक्तिग्रहः स्यात्तदा तस्योपजीव्यत्वं स्यादिति भावः । *वृत्तम्—जातम् । *सः—उपजीव्यविरोधः । *दूषणमिति । आशुविनाशिनो यागस्य कालान्तरभाविस्वर्गजनकत्वासिद्धये ऽदृष्टं कल्प्यम्। तत्रच यद्यदृष्टस्यैव कारणता स्यात्तदोपजीव्यविरोधः स्यात् । अतएव व्यापारिणा व्यापारस्येव व्यापारेण व्यापारिणो ऽपि नान्यथासिद्धिरिति प्रवादः । अत एव व्यापारसम्बन्धावच्छिन्नं कारणत्वं करणत्वमिति वदन्ति । व्यापारवत्कारणं करणमिति तु न युक्तम्, नष्टस्यापि करणस्य व्यापारद्वारा कार्यजनकत्वात् । *बाधादिति । नन्वेवं 'घटोऽयम्' इति ज्ञानानन्तरं मुद्गरपातादिना चूर्णिते घटे 'नायं घटः' इति ज्ञानात्पूर्वज्ञानस्य भ्रमत्वापत्तिरिति चेन्न । उपस्थितिसामान्याभावप्रतियोगिन एव बाध्यत्वात् । इहतु सत्कार्यवादे सूक्ष्मरूपतया घटस्यावस्थानेनादोषात् । *चन्द्रतारेति । ननु चन्द्रतारादौ शास्त्रजन्यमहापरिमाणज्ञानेन स्वल्पपरिमाणज्ञाने ऽप्रामाण्यं कल्प्यते । प्रकृते तु प्राथमिकत्वात्कार्यान्विते एव शक्तिरास्त्वित्यस्वरसादाह *उक्तेमात्रादीति । *प्रवृत्तिसंवादादिनेति । यथा इदं प्रमा यथार्थप्रवृत्तिजनकत्वादिति । *सोपाधिकेति । दर्पणमुखादौ पूर्वेण परस्य भ्रमत्वम् । *श्रौतेति । "ऐन्द्र्या गार्हपत्यमुपातिष्ठते"

इत्यत्र इन्द्रोपस्थानस्य बाधः । सामान्यस्य विशेषपूर्वकत्वादिति प्रागुक्तं निराकरोति *फलविशेषेति । अपूर्वफलदर्शने 'कोऽस्य रसः' इतिवत् । *नचानयोरिति । संसर्गविशेषज्ञानेच्छां प्रति संसर्गविशेषज्ञाननिष्ठेष्टसाधनत्वज्ञानं हेतुः । अत एव संसर्गाविशेषस्य ज्ञातत्वे ऽपि जिज्ञासाऽनुपपत्तिरित्यर्थः । *तत्तद्रूपेणेति । विशेषस्य विशिष्यस्वरूपेण, नतु विशेषत्वेनेत्यर्थः । *सिद्धिर्नेति । पर्वते वह्निसत्त्वे ऽपि तदप्रत्यक्षे ऽनुमितिर्भवत्येवेति भावः । *तथा—प्रतिबन्धकम् ॥ ३४ ॥

(क० टी०) तृतीयमेव मतान्तरं खण्डयति *यत्त्वित्यादि । निराकाङ्क्षितादिवारणाय विशेषणत्रयमितरस्य । नन्वेवं कथं विशेषबोधोऽसमानप्रकारकत्वादत आह *पदानामिति । *अभावादिति । तत्तत्पदसामान्यशक्तिभिरेवेति शेषः । *सिद्धिरिति ।

एतेन पदानामेवान्विताभिधायकत्वे घटादिपदस्य तथाशक्तिग्रहवतो घटमानयेत्यानुपूर्वीज्ञानवतः प्रागुक्तकार्यकारणभावाग्रहवतो ऽपि घटपदात् घटकर्मकमानयनमितिबोधापत्तिः । किञ्च विशेष्यविशेषणभावे विनिगमनाविरहात्सामान्यतः शक्त्या इतरान्वितो घटः इतरान्वितं कर्मत्वं तथाऽऽनयनं तथा कृतिरित्येवं बोधचतुष्टयापत्तिः, न घटीयकर्मत्वामित्यादि । अपि च घटः कर्मत्वमानयनं कृतिरित्यतः अन्वितकर्मत्वादौ शक्तिग्रहवतस्तथा बोधापत्तिश्चेति परास्तम् ।

अस्यावश्यकतामाह *अतएवेति । शब्दस्यान्विताभिधायकत्वादेवेत्यर्थः । *पदेति । एकेत्यादिः । अपिना तत्समुदायसमुच्चयः । *अन्वयेति । नियमेनेत्यादिः । ननु कथं ततस्तदुपपत्तिरत आह *तस्याइति । तथाच तस्या नियमेन दर्शनात्तद्विनाऽसम्भवात्तस्य शब्दादन्यतो ऽसम्भवाच्छब्दस्यैव तत्त्वमावश्यकमिति भावः । नन्वपूर्वत्वात्कथं तत्त्वमत आह *विशेषइति । नन्वेवं केवलपदादपि बोधापत्तिरत आह *पदान्तरेति । नन्वेवं ततो घटमात्रबोधो ऽपि न स्यादत आह *तत इति । भ्रमत्वमेवाह

*विशिष्टेति। अनुपदं वक्ष्यमाणरीत्या भ्रमो नेत्याह *यद्वेति। शब्दवद् अर्थेऽपि युक्तेस्तुल्यत्वमिति भावः। गुरुमतं खण्डयति *एतेनेति। अस्यार्थमाह *कार्यस्यापीति। तदेव विध्यर्थ इति तन्मतम्। ननु तदसमभिव्याहारे ऽपि तद्बोधार्थं तत्र सा ऽत आह *लिङादीति। तदन्ते इत्यर्थः। *अन्वयेऽइति। त्वन्मते इत्यादिः। *कारणत्वेति। कार्यकारणभावेत्यर्थः। आदिनेतरत्वम्। *एतदिति। अन्वयेत्यर्थः। *नचोपेति। अन्वितत्वादिसामान्यधर्मप्रकारेणोपस्थिते एव शक्तिग्रहादिति भावः। विशेषतस्तु तत्रैव। सामान्यतो ऽपि असार्वत्रिकत्वादन्यथासिद्धमित्याशयेनाह *उपेति। तदुपपादयति *दैवाद्धीति। अपूर्वत्वपरिहारायेति भावः। उक्तदार्ढ्याय तद्विषयमाह *यत्रत्विति। अपूर्वे इत्यन्तं पूर्वान्वयि। *सः-उपजीव्यविरोधः। *नच-नहि। *पश्चात्तनस्य-वाक्यशक्तिग्रहस्य। बाधपदार्थमेवाह *भ्रमत्वेति। तद्व्यावृत्तमसाधारणं तत्प्रयोजकरूपमाह *नचसर्वैरिति। उक्त आशयः। तत्र परस्यैव प्राबल्यमित्याह *सर्वेषामिति। प्रागुक्तो ऽपि दोष इत्याह *उक्ते इति। नन्वेवं कथं बाधव्यवस्था, अत आह *तस्मादिति। आदिना निवृत्तिसंवादादि। *न्यायेन-श्रुतिलिङ्गादिना। सामान्योक्तं विशिष्याह *तत्रेति। तयोर्मध्ये इत्यर्थः। एवेनोत्पत्तिप्रतिबन्धनिरासः, तस्य जातत्वादिति भावः। इदं सार्वत्रिकम्। अन्यत्र तु नैवमित्याह *पूर्वेणत्विति। सोपाधिकेत्यनेनोक्तलौकिकसंग्रहः प्रकृतेष्टसिद्धिश्च सूचिता। अन्यथा शास्त्रद्वयप्रामाण्याद्विकल्पापपत्तेराह *उत्पत्तिप्रतिबन्ध इति। *तस्य-विनियोगस्य। "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इत्यादाविति भावः। नन्वेवं तदुक्तजिज्ञासाऽनुपपत्तिरत आह *जिज्ञासापीति। पदार्थवाक्यार्थयोर्नियमस्य पूर्वं ग्रहादिति भावः। इच्छामात्रे तस्य कारणत्वाद् अत्र विशेषमाह *अनयोरिति। *सिद्धेति। इच्छां प्रति सिद्धेः प्रतिबन्धकत्वादिति भावः। तत्र तथैव निवेशादाह *विशेषधर्मत्वेनेति। ननु संसर्गस्य न केनापि रूपेण भानमिति प्रागुक्तत्वेन तथाज्ञानेऽपि सिद्धिसत्त्वाज्जिज्ञासोच्छेद एव अत आह *किंचेति। एवं चात्र तत्सत्त्वे ऽपि तदभावान्न दोषः। *अत एव-तथा ज्ञानस्यैव प्रतिबन्धकत्वादेव। *वस्त्विति। 'चैत्रस्य ज्ञानं भवतु' इतीच्छायामजाते

च तस्य ज्ञाने 'तस्य ज्ञानं जातम्' इति सिद्धत्वज्ञानादिच्छानिवृत्तिरित्यर्थः । जिज्ञासापीत्यादिना यदुक्तं तदप्यभ्युपेत्यैव । वस्तुतः सैव नेत्याह *वस्तुत इति । यदि त्वन्वयसामान्ये ज्ञाते तेन विशेषान्वयस्यानुमानमित्युच्यते तर्ह्यन्वयसामान्यस्यापि तथैवोपस्थितिसम्भवात्प्रस्थितमन्वितशक्त्या । न चैवमनुमानेनैव संसर्गोपस्थितिसम्भवेन शब्दप्रामाण्योच्छेदः । 'नानुमितं, न साक्षात्कृतं किन्तु शब्दादेवावगतम्' इत्यनुभवेन तस्यातिरिक्तप्रमाणत्वात् । अधिकमन्यत्र द्रष्टव्यम् । तदाह* इत्यलमिति ॥ ३४ ॥

क्वचित्तु पदैरितरान्वितस्वार्थबोधनमस्त्येव । यथा 'प्रविश' 'पिण्डीम्' इत्यादौ । तथाहि–यथा भीमादयः पदैकदेशाः पदस्यार्थे प्रयुज्यन्ते । विशिष्टशक्तिग्रहकालेऽनुनिष्पाद्यवयवानामपि तत्र शक्तिग्रहात् । भीमसेनपदं, पृथक् प्रयुज्यमानं तदवयवपदं च भीमसेने शक्तमिति शक्तिग्रहः । नच सेनपदादपि तद्बोधापत्तिः । तत्तत्पदस्य तत्रार्थे शिष्टप्रयोगाभावेन शक्तिग्रहे तद्विषयकत्वांशे ऽप्रामाण्यकल्पनेन ततो बोधानुदयात् । अप्रामाण्यज्ञानानास्कन्दितशक्तिग्रहस्यैव बोधजनकत्वात् । शक्तिभ्रमाद्बोधो ऽपि भ्रमत्वेनाज्ञातादेव । एवं वाक्यस्यापि तत्तत्पदार्थालिङ्गिते विशेष्यविशेषणभावे शक्तिग्रहकाले तदवयवानां 'प्रविश' 'पिण्डीम्' इत्यादीनामपि तत्तद्वाक्यार्थे शक्तिग्रहेण प्रविशेत्यादिपदादेव तत्तद्वाक्यार्थबोधः । अनेककारकाणां क्रियाणां च सम्भवे ऽपि योग्यतावशात्तात्पर्यवशाच्च तत्तदर्थबोधः, तत्र तत्तत्पदाध्याहारवत् ।

तदुक्तं समर्थसूत्रे भाष्ये निष्कौशाम्ब्यादौ क्रान्तादिपदाभावेनासामर्थ्यात्समासाभावमाशङ्क्य

"तदर्थगतेःसिद्धम् । सोऽर्थस्तदर्थः तद्गतेः । यो ऽर्थः कौशाम्ब्या समर्थः स निसोच्यते" इति । उक्तरीत्या विशिष्टो ऽर्थो निसोच्यत इति तदाशयः ।

अतएव "लुपि युक्तवद्—" इतिसूत्रे "एकवचनाद्यवयववचनशब्दः पारिभाषिकः" इत्युक्तम् । तदुक्तम्—

वाक्यं तदपि मन्यन्ते यत्पदं चरितक्रियम् ।
आख्यातशब्दे नियतं साधनं यत्र गम्यते ॥
तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते । इति ।

ग्रामं प्रविश, पिण्डीम्भक्षयेत्यादि तु शब्दान्तराण्येव ।तान्यपि लौकिके प्रयोगे लाघवानादरात्प्रयुज्यन्ते एव ।

यत्तु–पदावयवेन पदस्मरणम्, एवं वाक्यैकदेशेनापि वाक्यस्मरणम्, अयमेवाध्याहार इति ।

तन्न ।भीमादिपदांशात्स्मरणाननुभवात् ।

किञ्चैवं सत्युच्चारितपदस्य वृत्त्याऽर्थबोधकत्वाभावेन प्रातिपदिकत्वाभावेन तदुत्तरं विभक्त्युत्पत्त्यनापत्तेः । किञ्चैकदेशेन भिन्नस्वरूपस्य सङ्घातस्य कथं स्मरणम्, सादृश्याभावात् । स्मृतस्यानुच्चारितत्वेन ततो बोधानापत्तेश्च ।

तदुक्तम्—

एकदेशात्स्मृतिर्भिन्ने सङ्घाते जायते कथम् ।
कथं प्रतीयमानः स्याच्छब्दोऽर्थस्याभिधायकः॥इति।

तदेतदभिप्रेत्योक्तम "इग्यणः सम्प्रसारणम्" इति सूत्रे भाष्ये-"दृश्यते हि वाक्येषु वाक्यैकदेशान्प्र-

युञ्जानाः पदेषु पदैकदेशान् । प्रविश, पिण्डीम्, प्रविश, तर्पणम्, देवदत्तः, दत्तः, सत्या, भामा, सत्यभामा" इति । वाक्येष्वित्यादेर्वाक्यार्थेष्वित्यादिरर्थः ।

नच पदैकदेशस्य तत्तत्पदार्थे लक्षणा । बाधप्रतिसन्धानाभावेऽपि शक्यसम्बन्धज्ञानाभावे ऽपि बोधानुभवात् । अणुदित्सूत्रभाष्ये चोच्चारितस्यैव शब्दस्य प्रत्यायकत्वमुक्तम् । अन्यथा ज्ञानमात्रे शब्दभानाच्छाब्दधाराऽऽपत्तिः । तत्र तन्निवृत्तये प्रतिबन्धककल्पने गौरवम् ।

नच लिपिस्मृतशब्दादर्थबोधानापत्तिः, अनुच्चारणादिति वाच्यम् । तत्र चेष्टावल्लिपेरेवार्थबोधकत्वेनाक्षतेः । अत एव लिपौ शब्दत्वभ्रमो बालानाम् । तच्छक्तिग्रहश्च शब्दसङ्केतग्रहाधीन इत्यन्यत् । लिपौ शब्दत्वभ्रमवतां तत्स्मरणानुपयोगाच्च । अत एव लिपौ 'अयं ककारः' इति व्यवहारः पण्डितानां लिपौ शब्दत्वबाधज्ञानवतामपि । अनादिसिद्धारोपात् । अन्तःकरणादावात्मप्रत्यये भ्रमत्वज्ञानवतां पण्डितानां व्यवहारानिर्वाहस्यैवमेवोपपाद्यत्वात् ।

यद्वा तत्रापि सूक्ष्मतरताल्वोष्ठपुटव्यापारात्सूक्ष्मतरमुच्चारणमेव, मानसजपस्थल इव । निरूपितं चैतत् प्राक् । तस्माच्छब्दसत्ताज्ञानं शाब्दबोधकारणम् । अतएवान्यस्मिन् शब्द उच्चारिते तत्रान्यशब्दत्वभ्रमदशायां तदर्थबोधानुभवः । "उच्चारितः

१ नच-भवात् अयं ग्रन्थः मूले ऽत्रोपलभ्यमानो ऽपि कलाऽसंमतः, प्रकृते तत्रानुपदं स्फुटीभविष्यतीति कथनात् ।

शब्दः" इत्यस्य उच्चारितत्वेन गृहीत इत्यर्थो बोध्यः ।

एतेन "प्रविश" "पिण्डीम्" इत्यादौ कारकक्रियाशब्दमनुमाय ततो बोध इति परास्तम् ।

किञ्च किं शब्देन शब्दस्याक्षेप उतार्थेन ? ।
नाद्यः । स्वार्थप्रतिपादनव्यग्रेण तेन अन्यानाक्षेपात् ।
नान्त्यः । तस्यार्थस्य शब्दान्तरेण सम्बन्धाभावात् ।

एतेन शब्देनार्थाक्षेप इत्यपास्तम् । अस्य शब्दस्य शब्दान्तरार्थेन सम्बन्धाभावात् । यथाकथं चित्परम्परासम्बन्धसत्त्वेऽपि तस्य नानुमितिप्रयोजकत्वं लक्षणाप्रयोजकत्वाभाववत् । अर्थेनार्थानुमाने ऽपि तस्य शाब्दत्वं न स्यात् । तस्मादर्थेनार्थान्तरस्यैतद्वाच्यत्वानुमानमेवोचितम् ।

नच पिण्डीमित्येतन्नाम सिद्धार्थकं कथं साध्यक्रियाबोधकमिति वाच्यम् । नामसरूपं भिन्नमेवेदमित्यदोषात् । नामसारूप्यादेव द्वितीयाद्यन्तताव्यवहारः । नचाख्यातलक्षणस्यात्रातिव्याप्तिः । शास्त्रबोधितक्रियार्थकघटितत्वे सतीतिविशेषणदानेनादोषात् । पिण्डीमित्यादेरनेकक्रियार्थत्वे ऽपि प्रकरणान्निर्णयः ॥३९॥

(कुं॰ टी॰) *अनुनिष्पादीति । नान्तरीयकेत्यर्थः । समुदायार्थे ऽवयवस्यापि शक्तिग्रह इति भावः । घकाराद्येकैकवर्णोच्चारणे तु घटादिबोधो न भवति । "चतुर्थादनजादौ च लोपः पूर्वपदस्यच" इतिलोपानुशासनबलाद्दत्तादिशब्दानामेवानुनिष्पादिनां संज्ञात्वोपगमात् । *निसोच्यतइति । निरादिभिरेव क्रान्ताद्यर्थावगमाद्वृत्तौ क्रान्तादीनामप्रयोग एवेति भावः । *एकवच-

नाद्यवयवेति । एकवचनशब्दान्तर्गतो वचनशब्दो ऽपि समुदायार्थे रूढः । तेन कटुबदर्या अदूरभवो ग्रामः कटुबदरी इत्यत्र युक्तवद्भावेन षष्ठ्या अतिदेशो न भवतीति भावः । *यत्पदमिति । गर्भीकृतक्रियं पिण्डीमिति यत् पदं तदपि वाक्यम्, तत एव निराकाङ्क्षार्थप्रतीतेः । अत एवोक्तं हरिणा–

अन्तरेण क्रियाशब्दं वाक्यादेर्द्वित्वदर्शनात् । इति ।

'माणवक माणवक त्वमभिरूपः' इत्यत्र क्रियाऽभावे ऽपि वाक्यादित्वाद् द्वित्वसिद्धिरिति तदर्थः । केवलाख्यातमपि वाक्यमित्याह *आख्यातेति । यत्र आख्यातशब्दे प्रविशेत्यादौ नियतं कारकं गम्यते तदपि समाप्तार्थं परिपूर्णार्थं वाक्यमित्यर्थः । अस्मिन् पक्षे आख्यातशब्दो वाक्यं क्रियाकारकभावश्च वाक्यार्थ इति सखण्डपक्षो दर्शितः । ननु प्रविशेत्यनेनैव गतार्थत्वात्कथं 'गृहे प्रविश' इति प्रयोगस्तत्राह *शब्दान्तराण्येवेति । *पदावयवेनेति । भीमसेनपदावयवभीमपदेनेत्यर्थः । ननु संबन्धिज्ञानमेव स्मरणे हेतुर्न सादृश्यज्ञानम्, दृश्यते च श्लोकादावेकदेशेन समुदायस्मरणमित्यस्वरसादाह *स्मृतस्येति । एकदेशेन संघातार्थः स्मर्यत इति मतं निराकरोति *एकदेशादिति । सदृशवस्तुदर्शनाभावात्स्मृतिर्न संभवति, नापि स्मृतस्य बोधकत्वमिति तदर्थः । *चेष्टावदिति । तत्र लिपेरेव सङ्केतग्रहो न तु शब्दकल्पनया बोधः । [2]एतेन लिपौ वर्णतादात्म्यारोपाद् बोध इत्यपास्तमिति भावः । *[3]अत एव-

---

१ अत—तदर्थः पाठोऽयं कुञ्जिकाक. पु. नोपलभ्यते ।

२ एतेन—भावः पाठो ऽयं कुं. कपु. नास्ति ।

३ अतः—देव पाठोऽयं कुं. कपु. नास्ति ।

लिपीनामप्यर्थबोधकत्वादेव । *शब्दसङ्केतेति । शब्दसङ्केतग्रहादेव लिपिसङ्केतस्यापि ग्रह इत्यर्थः । ननु परेषां लिपौ शब्दतादात्म्यारोपः किमर्थ इत्यत आह *अत एवेति । आरोपादेवेत्यर्थः । ननु भेदस्य निश्चितत्वे कथमारोप इत्यत आह *अनादीति । एतादृशारोपस्यानादित्वादित्यर्थः । पण्डितानां व्यवहार इत्यत्र हेतुमाह *अनादिसिद्धारोपादिति । *एवमेव—आरोपादेव । *शब्दसत्ताज्ञानमिति । ननु वस्तुतः शब्दसत्तेत्यर्थः । *तदर्थबोधेति । अन्यार्थबोधेत्यर्थः । *उच्चारित इति। "यस्येति च"इत्यादौ तु प्रत्याय्यप्रत्यायकयोरभेदादिकारादीनां ग्राहकत्वं हरिणा वर्णितम् । *परास्तमिति । अनुच्चारितस्य बोधकत्वाभावात् । *इत्येतन्नामेति । सिद्धार्थकं पिण्डीमिति नाम साध्यक्रियां कथं बोधयेदित्यन्वयः । 'सुबन्तमिह नामेष्टम्' इत्यभियुक्ताः । *नामसरूपम्—नामसदृशम् । ननु नामत्वाभावे द्वितीयान्तत्वव्यवहारः कथमत आह *सारूप्यादेवेति । द्वितीयान्तत्वमपि सारूप्यादेवेति भावः । *नचेति । 'क्रियाबोधकं यत्तदाख्यातम्' इति निरुक्तकारोक्तेः । *अतिव्याप्तिरिति । अत्रापि असत्त्वभूतक्रियोबाधादिति भावः । *शास्त्रेति । पिण्डीमित्यत्र तु शास्त्रबोधिता क्रियार्थकता यस्य तन्नास्ति ॥ ३९ ॥

(क० टी०) विशेषान्तरमाह *क्वचित्त्विति । अस्यार्थमाह *यथाप्रेति । एतेनातिप्रसङ्गो नेति सूचितम् । तत्रादौ सर्वसंमतं दृष्टान्तमाह *यथा भीमेति । कोशे पर्यायेष्वनुक्तत्वादाह *पदैकेति । तदाकारमाह *भीमेति । *पृथगित्युत्तरान्वयि । देवादिसंग्रहायाह *तत्तत्पदेति । वीप्सितस्य परामर्शादाह *तत्रार्थेति । त

१ ननु—त्वादित्यर्थः पाठोऽयं कुं. कपु. नास्ति ।

त्र तत्रार्थे इत्यर्थः । अनुदये हेतुमाह *अप्रामाण्येति । नन्वेवं कथमुक्तं-'शक्तिभ्रमाद्बोधः' इति अत आह *शक्तीति । दार्ष्टान्तिकमाह *एवमिति । तद्वदित्यर्थः । *भावे इति । वैयाकरणैस्तत्र तस्य शक्त्यङ्गीकारादिति भावः । नन्वेवं वाक्यभेदेन तावन्मात्रात्कथं विशेषबोधो ऽत आह *अनेकेति । क्रियायामपीदं विशेषणं बोध्यम् । *योग्यतेति । नन्वनेनायोग्यव्यावृत्तावपि योग्यानेकत्वादुक्तदोष एव अत आह *तात्पर्येति । इदं तवापि तुल्यमित्याह *तवेति । पक्षान्तरत्वेनाह *तदर्थेति । निस एवायं वृत्तिविषये क्रान्तलक्षणोऽर्थ इत्याशयेनाह तस्यार्थ इति भाष्ये । पक्षान्तरतयाऽऽह *सोर्थ इति । उच्यते इति वदता भगवतेति शेषः । *उक्तेति । वाक्यैकदेशन्यायेनेत्यर्थः । लक्षणा तु नेत्यनुपदमेव स्फुटीभविष्यति । पूर्वपदवदुत्तरपदे ऽपि तथेति सूचयन्नन्यदपि तत्र मानमाह *अत एवेति । उक्तरीत्यङ्गीकारादेवेत्यर्थः । *सूत्रे इति । भाष्ये इति शेषः । *तदुक्तमिति । हरिणापीति शेषः । अपिः प्रसिद्धसमुच्चये । *चरितेति । क्रियान्वयित्वेन स्वार्थबोधकमित्यर्थः । एवं पिण्डीमित्यस्य वाक्यत्वमुक्त्वा प्रविशेत्यस्यापि तत्त्वमाह *आख्यातेति । *नियतम्-नित्यसाकाङ्क्षम् । *तदपि-सामान्ये नपुंसकम् । आख्यातशब्दरूपम् । *एकम्-एकमपि । तत्त्वे मुख्यबीजं ध्वनयन् हेतुगर्भं विशेषणमाह *समाप्तार्थमिति । निराकाङ्क्षार्थबोधकमित्यर्थः । नन्वेवं विशिष्टयोगोऽफलो ऽत आह *ग्राममिति । ननु गौरवात्तदप्रयोगापत्तिरेव अत आह *तान्यपीति । अन्यथा कलशादिप्रयोगोच्छेदापत्तिरिति भावः । *अयमेव-स्मृत्यात्मकप्रत्यय एव । आद्ये दोषमाह *भीमादीति । *वृत्त्येति । तत्सूत्रे तथैव निवेशादिति भावः । *एकेति । यत इत्यादिः । *सादृश्येति । एकवर्णादिश्रुतितो बालकस्य समुदितप्रयोगे तु तथासंकेतादेवार्थबोधेनोपपत्तिर्नतु स्मृत्वेत्यग्रे स्फुटीभविष्यत्यनुपदमेव । अव्यवहितदोषद्वयेन हरिसम्मतिमाह *तदुक्तमिति । *उक्तमिति । उभयसंज्ञापक्षमुक्त्वा वाक्यार्थसंज्ञापक्षानुवादे दोषाभावाय संप्रसारणजन्ये उपचारात्संप्रसारणपदमित्येकं समाधिं कृत्वा ऽथवेत्यादिना मध्यमपक्षत्वेनोक्तमित्यर्थः । तथाच संप्रसारणनिर्वृत्तेत्यर्थस्य ततो लाभ इति न तत्र दोष इति भावः । वाक्योदाहरणमेतत् । अत एव "संप्रसारणनिर्वृत्तादित्यादेर्वाक्यस्यार्थे संप्रसा-

रणादित्यादिर्वाक्यैकदेशः प्रयुज्यते" इति भाष्ये उक्तम् । एवं समर्थसूत्रभाष्योक्तमपि । *लुपीतितु पदोदाहरणं बोध्यम् । *भामेतीति । इदं सत्याया अप्युपलक्षणम् । अनेन च तत्तदर्थशक्तत्वमेकदेशस्येत्युक्तमेव । एतदेवाभिप्रेत्येतरान्विते पदानां शक्तिरिति प्रवादो ऽपि । असङ्गतिं परिहरति *वाक्येष्विति ।

एतेन तत्तदर्थबोधाय वाक्येषु प्रयोक्तव्येषु तत्तदर्थे तत्तदेकदेशान् प्रयुञ्जते इत्यर्थो निरस्तः । अध्याहारापत्तेः । *भावेऽपि-तत्रापि । तत्रापि च उक्तार्थे भाष्यान्तरसम्मतिमप्युक्तदोषेपपत्तये आह *अणुदिदिति । *चोऽप्यर्थे । तत्समर्थयते *अन्यथेति । तदनङ्गीकारे इत्यर्थः । *मात्रं कार्त्स्न्ये । प्रतिपादितमिदं प्राक् । सकृदितिन्यायस्योच्चारितविषयत्वादाह *धारेति । *तत्र-अनुच्चारणस्थले । भाष्योपरि शङ्कते *नचेति । एवेन तत्स्मृतशब्दनिरासः । *अत एव-तस्याबोधकत्वादेव । शाब्दत्वस्य बोधकनिष्ठत्वादिति भावः । अवैरूप्यायाह *तच्छक्तीति । लिपिशक्तीत्यर्थः । तं विनाऽपि बोधमाह *लिपाविति । तन्निष्ठसर्वधर्माध्यासस्य ततो लाभेन बोधकत्वेन तदुच्चारणस्यापि लाभादिति भावः । *अत एव-तेन सर्वतद्धर्माध्यासादेव । ननु बालानां तद्व्यवहारोपपत्तावपि कथमन्येषाम्, भ्रमासंभवाद् । अत आह *पण्डितानामिति । ननु सोऽपि कथं तेषाम् अत आह *अन्तःकरणेति । अविद्यावशादिति भावः । एवं प्रक्रियायामुपपाद्यादोषं सिद्धान्ते आह *यद्वेति । *तत्रापि-लिपिदर्शनेऽपि । *सूक्ष्मतरम्-इतराज्ञेयम् । अनुमीयमानव्यापारकत्वाच्च तादृशस्थले मनसिजपव्यवहारः । *प्रागिति । शब्दनिरूपणोपक्रमे इत्यर्थः । उक्तभाष्यतात्पर्यमाह *तस्मादिति । प्रमां विहाय ज्ञाननिवेशफलमाह *अतएवेति । ज्ञानस्य कारणत्वादेवेत्यर्थः । तत्र तच्छब्दसत्ताभ्रमसत्त्वादिति भावः । अन्यथा तदसङ्गतिः स्पष्टैव । नन्वेवं भाष्यविरोधः तत्र स्वरूपसत्यास्तस्याः कारणत्वस्योक्तत्वाद् अत आह *उच्चारित इति । *एतेन-अणुदित्सूत्रभाष्यविरोधेन । आक्षेपो ऽध्याहारशब्दार्थ इति पक्षेऽप्याह *किञ्चेति । *अनाक्षेपात्-तदसम्भवात् अनुपपत्त्यभावात् । *तस्यार्थस्य-उच्चारितार्थस्य । एतेनेत्यस्यार्थमाह *अस्येति । ननु साक्षात्संबन्धाभावे ऽपि परंपरासंबन्धोऽस्त्येव अत आह *य-

थेति। *तस्येति। सामग्र्यन्तराभावादतिप्रसङ्गापत्तेश्चेति भावः। *लक्षणेति। प्रतिपादितमिदं प्राक्। साक्षात्संबन्धसत्त्वादाह *अर्थेनेति। *अपिना आक्षेपपरिग्रहः। किञ्चेत्युक्तमुपसंहरति *तस्मादिति। तथा च स्वेष्टसिद्धिरिति भावः। सिद्धान्ते *नचेति। *अत्र-पिण्डीमित्यादौ। प्रागुक्तमेव दार्ढ्यायाह *पिण्डीमिति ॥ ३५ ॥

पदानामानर्थक्येऽपि "क्रियाप्रधानमाख्यातं सत्त्वप्रधानानि नामानि" "चत्वारि पदजातानि" इत्यादि शास्त्रकृत्कल्पनामात्रमेव। यथा असत्येनाप्यर्थेन मरीचिकाजलेन 'इदं जलमानय' इत्यादिव्यवहारो लोकानां दृश्यते तद्वत् सर्वत्रापि पदेऽर्थव्यवहार इति स्पष्टम्—

न लोके प्रतिपत्तॄणामर्थयोगात्प्रसिद्धयः।

इत्यादिना हरिग्रन्थे। प्रसिद्धयः शास्त्रे इति शेषः। एतेनोच्चारितं पदममुकार्थान्वयित्वेन स्वार्थबोधेच्छया वक्त्रोच्चारितमिति तात्पर्यग्रहे कस्य चित्पदाध्याहारेण कस्य चिदर्थाध्याहारेण बोध इति यथाऽनुभवं व्यवस्था।

"शब्दं विनापि गुडादिशब्दैर्माधुर्यादिरूपार्थस्याक्षिनिकोचादिना चार्थस्य बोधस्य दर्शनाद्" इति स्पष्टम् "अन्नेनव्यञ्जनम्" इतिसूत्रे भाष्ये।

अर्थस्यापि तत्पदविशिष्टस्याध्याहारः।

एतेनार्थाध्याहारे 'चैत्र ओदनम्' इत्यत्र तृतीयापत्तिः। प्रत्ययेन कर्तुरनभिधानात्। "शब्दानुविद्धं सर्वं ज्ञानम्" इति नियमभङ्गश्चेति परास्तम्। "अनभिहिते" इत्यत्र कर्त्रादावनभिहितत्वस्य समभिव्याहृतेन पदेन समभिव्याहृतज्ञानाविषयी-

भूतार्थविशेषणीभूतपदेन वा ऽभिधानयोग्यत्वाभावरूपस्य विवक्षणेनादोषात् । उपस्थितपदात्पदार्थबोधानङ्गीकारेण चार्थाध्याहारव्यवहारो बोध्यः । अध्याहारश्च मानसं ज्ञानमित्यपास्तम् ॥ ३६ ॥

(कुं० टी०) *पदानामिति । पदानां वास्तविकार्थवत्त्वाभावेऽपि कल्पनयाऽर्थवत्त्वमित्यर्थः । *यथेति । असत्यमपि मरीचिकाजलमाश्रित्य यथा व्यवहार इत्यर्थः । ननु पदपदार्थविभागस्यासत्यत्वे कथं लोके तदाश्रया प्रवृत्तिरत आह *नलोकइति । न सत्यार्थसम्बन्धादेव लौकिकानां व्यवहारः, असत्येनापि मरीचिकाजलादिना व्यवहारदर्शनादिति तदर्थः । *मरीचिकाजलेनेति ।

अयं भावः-सत्यत्वं त्रिविधं पारमार्थिकम्,व्यावहारिकम्, प्रातिभासिकं चेति । तत्र शुक्तिरूप्यस्य व्यावहारिकत्वे संसारदशायां बाधो न स्यादिति प्रातिभासिकत्वम् । तत्र च आगन्तुकदोषः कारणम् । नन्वागन्तुकदोषजन्यत्वं न प्रातिभासिकत्वे प्रयोजकं काचादिध्वंसतत्संयोगादावतिव्याप्तेरिति चेन्न । दोषत्वेन जन्यताया विवक्षितत्वात् । नचैवमागन्तुकेति विशेषणवैयर्थ्यम् । घटादावतिव्याप्तिवारकत्वात् । घटो दोषजन्यः अध्यस्तत्वात् शुक्तिरूप्यवदित्यनुमानात् । *एतेनेति । द्वितीयेनापास्तमित्यनेनान्वयः । *उच्चारितम्-द्वारमित्यादिकम् । *अमुकार्थेति । पिधानादीत्यर्थः । *कस्यचिदिति । पुंस इत्यर्थः । अर्थाध्याहारे तृतीयाद्यापत्तिमाशङ्क्याह *तत्तत्पदविशिष्टेति । *प्रत्ययेनेति । तिङ्कृद्धितेतिपरिगणनात् । *अनभिहितत्वस्येति । रूपस्येत्यत्रास्यान्वयः । *समभिव्याहृतेति । समभिव्याहृतस्य यज्ज्ञानं तद्विष-

यीभूतोऽर्थः पचत्यादिपदार्थः तद्विशेषणं पचत्यादिरूपम् । पचत्यादिपदस्यात्राभावाद्योग्यत्वोक्तिः । *अपास्तमिति । अनुच्चारितस्य बोधकत्वासम्भवात् । स्वमते एकदेशस्यापि समुदायार्थवाचकत्वादध्याहारो नास्तीति भावः ॥ ३६ ॥

(कुं.टी.)विशेषं वक्तुं प्रागुक्तमेवाह *पदानामिति। तमेव विशेष-
माह *यथेति । *सर्वत्रापीति ।वाक्यघटके इत्यर्थः। *एतेन-उक्तरीत्या
भाष्यादिसंमत्या तस्यैव बोधकत्वेनाध्याहारकथाया एवायुक्तत्वेन ।
अपास्तमित्यत्रान्वयः। अव्युत्पन्नोऽदःशब्दपर्यायोऽमुकशब्दः । पदज-
न्यपदार्थोपस्थितिः शाब्दबोधे कारणमिति मतेनाह *कस्याचि-
त्पदेति । तदन्यमतेनाह *कस्यचिदर्थेति । ननु द्वितीये तद्वाच-
कशब्दं विना कथं तदर्थप्रतीतिरत आह *शब्दमिति । त-
द्वाचकशब्दमित्यर्थः । *गुडादीति । प्रतिपादितमिदमादौ । *अ-
क्षीति । तदुक्तं समर्थसूत्रे भाष्ये "अन्तरेण खल्वपि शब्दप्रयोगं
बहवोऽर्था गम्यन्ते आक्षिनिकोचैः पाणिविहारैश्च" इति । "यथैते
वृद्धव्यवहारवशादर्था गम्यन्ते तथा शब्दैरिति भावः" इति कैयटः।
*अर्थस्य बोधस्येति । व्यस्तः पाठः। *बोधस्य-ज्ञानस्य । आद्ये सं-
मतिमाह *स्पष्टमिति । तत्रहि दध्योदनादौ कथं सामर्थ्यमिति
शङ्कायां "युक्तार्थसम्प्रत्ययाच्च सामर्थ्यम् । दध्ना युक्तार्थता संप्रतीय-
ते । अन्यथा दधीत्युक्ते बहवोऽर्था गम्यन्त इति लोपपक्षे ऽनवस्था
स्याद्" इत्युक्तम् । दध्नेति पदवाच्येन युक्तो यो ऽर्थ उपसेकक्रियादि-
रूपस्तदर्थता तस्य प्रतीयते इत्यर्थः । विशेषमाह * अर्थस्या-
पीति । एतेनेत्यस्यार्थमाह *अनभीति । तस्यापि तद्विशि-
ष्टस्याध्याहाराङ्गीकारेणेत्यादिः । तत्र प्रसिद्धार्थमाह *समभीति ।
तत्तत्त्वस्य तत्रैव सत्त्वादाह *पदेनेति । प्रकृतनिर्वाहायाह *स
मभीति । एतदर्थमेव योग्यत्वनिवेशः । नन्वेवं कथमर्थाध्याहार
अत एवाह *अपेति । अत एव द्वितीयदोषोऽपि नेति भावः ।
स्मृतित्वादेरसम्भवस्योक्तत्वादाह *मानसमिति ॥ ३६ ॥

"क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इत्येतदु-

दाहरणे 'फलेभ्यो याति' इत्यादौ तुमुनन्ताप्रयोगे तादृशवाक्यैकदेशप्रयोग एव चतुर्थी साधुर्नतु तत्प्रयोगे। स्थानिन इत्युक्तेः। "स्पृहेरीप्सित" इत्युदाहरणे 'पुष्पेभ्यः स्पृहयति' इति सम्पूर्णवाक्यप्रयोगे तदेकदेशप्रयोगे च चतुर्थ्याः साधुत्वम्। "ल्यब्लोप" इत्यादि च ल्यबन्तरहितवाक्यैकदेशप्रयोगे एव प्रवर्तते। शास्त्रबलाल्लोकव्यवहाराच्च अस्य पञ्चम्यन्तघटितवाक्यैकदेशस्यैव विशिष्टेऽर्थे शक्तिकल्पनमिति बोध्यम्। "युष्मद्युपपदे" इति सूत्रे "स्थानिन्यपि" इति तु उपपदग्रहणात्तत्पदसत्ताया एव निमित्तत्वभ्रमवारणाय। "स्थानिनि" इत्युक्ते तत्प्रयोगे न स्यादतः "अपि" इति। "उपपदे" इति तु वैचित्र्यायैव। "आचार्याः कृत्वा न निवर्तन्ते" इति न्यायात्।

एतेनैतत्पदबलात् स्थानिपदमज्ञायमानार्थकम्। तेन युष्मदाद्यर्थाध्याहारेऽपिनोपपदोच्चारणे तदध्याहारे च मध्यमादि। 'फलेभ्यो याति' इत्यादि चार्थाध्याहार एव साधु न पदाध्याहारे। 'पुष्पेभ्यः' इत्यादि पदाध्याहारे एव साधु नार्थाध्याहारे इत्यपास्तम्।

एकस्यैव पक्षभेदेन साधुत्वासाधुत्वयोः "न वा" इति सूत्रे भाष्ये तिरस्कारात्।

किञ्च एतत्पदाज्ञानं पदज्ञानं च वक्तृनिष्ठं साधुत्वानियामकं श्रोतृनिष्ठं वा ?। नाद्यः। अर्थस्य बुद्धिस्थत्वे तद्वाचकपदस्यापि तद्बुद्धिस्थताया आवश्यकत्वात्। नान्त्यः। "इग्यणः" इति सूत्र-

भाष्योक्तन्यायेन 'पुष्पेभ्यः' इत्येकदेशस्यापि तादृशवाक्यार्थे शक्तिग्रहसत्त्वे ततः पदज्ञानं विनापि बोधेन तत्र पदज्ञानस्य दुर्लभत्वात् । पदानालिङ्गितार्थाध्याहारासम्भवेन 'फलेभ्यो याति' इत्यादावपि श्रोतुः पदाज्ञानस्य दुर्लभत्वाच्च । "परः सन्निकर्षः" इति सूत्रभाष्योक्तरीत्या वक्तृज्ञानस्यैव साधुत्वनियामकत्वाच्च । वाक्यत्वं कारकाद्यन्विताक्रियाबोधकत्वमेवेति वक्ष्यते ॥ ३७ ॥

(कुं० टी०) ननु वाक्यैकदेशन्यायाश्रयणे, 'फलेभ्यः आहर्तुम्' इत्यपि प्रयोगापत्तिरत आह *फलेभ्य इति । अत्रार्थाध्याहारः, पुष्पेभ्य इत्यत्र शब्दाध्याहारः इति व्यवहार उक्तयुक्तिमूलकः । ननु "स्पृहेरीप्सितः" इत्यादाविव वाक्यैकदेशन्यायेन युष्मदर्थस्य लाभात्स्थानिन्यपीति व्यर्थमत आह *स्थानिन्यपीति त्विति । अपि शब्दस्य फलमाह *नस्यादिति । *वैचित्र्यार्थेति । तस्मिन्निितीति परिभाषा तु व्याख्यानान्न प्रवर्तिष्यत इति भावः । *एतद्बलात्–उपपद इति वचनात् । ननु उपपदत्वे सति अप्रयुज्यमानत्वमसम्भवीत्यतस्तदर्थमाह *अज्ञायमानार्थकमिति । तेन युष्मत्पदाप्रयोगे तदर्थाध्याहारे युष्मत्पदाज्ञाने मध्यम इत्यर्थः । अपिशब्दार्थमाह *अपिनेति । *तदध्याहारे–युष्मत्पदाध्याहारे । *पक्षभेदेनेति । शब्दाध्याहाररूपार्थाध्याहाररूपभेदेन । *न्यायेनेति । "ष्यङः सम्प्रसारणम्" इत्यादिविधिप्रदेशे ऽप्यन्योन्याश्रयवारणाय 'यणः स्थाने इग् भवति' इति वाक्यार्थः संज्ञी । हल इत्याद्यनुवादे तु सम्प्रसारणनिर्वृत्ते सम्प्रसारणशब्दो वर्तत इति स्पष्टं तत्र । *भाष्योक्तरीत्येति । तत्र बौद्धपौर्वापर्याश्रयणे शब्दादर्थमवगत्य परबोधाय श-

ब्दः प्रयोक्तव्य इति स्पष्टम् । ननु एकदेशस्यापि समुदायार्थवाचकत्वे 'आख्यातं सविशेषणं वाक्यम्' इत्यादिवाक्यलक्षणाव्याप्तिरतआह *वाक्यत्वमिति ॥ ३७ ॥

(क० टी०) परमतं खण्डयितुं सिद्धान्ते स्वशास्त्रप्रक्रियाव्यवस्थामाह *क्रियार्थोपेति । *उदेति । जातावेकवचनम् । एवमग्रेऽपि । *तादृशेति । उक्तभाष्यसिद्धेत्यर्थः । तादृशवाक्यार्थे इतिपाठस्तु सुगम एव । पूर्ववदत्र विनिगमकाभावादाह *सम्पूर्णेति । आद्यवदत्र विशिष्टाप्रयोगेण भेदात्तदेकदेशत्वाभावेन कथमुक्तन्यायसञ्चारः, मल्लग्रामादिवद्भूयसा व्यवहारेऽपि कदाचित् द्विभक्तिविशिष्टैकदेशस्यापि तत्र प्रयोगापत्तिरत आह *शास्त्रेति । लोके तदप्रयोगादेवाह *लोकेति । एवेन तद्व्यवच्छेदः । एवं फलेभ्यो यातीत्यादावपि बोध्यम् । स्वरूपसती शब्दसत्ता शाब्दबोधकारणमिति पाणिनिसम्मतमिति निरासायाह *युष्मदीति । *उपेति । आदौ तथाऽननुसन्धानेन तदुक्तत्वादित्यर्थः । अनन्तरं तदनुसन्धानादिति भावः । एवं सत्यादिमं स्पष्टार्थमेवेत्याह— *उपेति । एतेन स्थानिन्यपीत्यस्यापि तत्त्वमेव सूचितम् ।

एतेन युष्मदिति सूत्रे स्थानिन्यपीति व्यर्थं तदभावे ऽपि "स्पृहेरीप्सितः" इतिवत्तस्यापि युष्मदः प्रयोगे ऽप्रयोगे च प्रवृत्त्युपपत्तेरित्यपि परास्तम् । तद्वत्तस्यापि तत्त्वात् । तदेव खण्डयति *एतेनेति । *एतदिति । उपपदे इतीत्यर्थः । सूत्रे ऽपिनाऽज्ञायमानसमुच्चयः । उभयफलमाह *तेनेति । *अर्थेति । शुद्धार्थेत्यर्थः । *तदिति । शुद्धपदेत्यर्थः । *चस्त्वर्थे । स्थानिन इत्युक्तेः । *नार्थेति । प्रयोगे इत्युक्तेः । आद्ये उक्तदोषस्य स्फुटत्वात् द्वितीयादौ दोषमेतेनेत्युक्तमाह *एकस्यैवेति । *एतदिति । अन्यथापि तदुपपत्त्या प्रयोग इत्यस्य निर्मूलत्वाच्चेत्यपि बोध्यम् । तथैव पाणिनेराशयो स्त्विति भ्रमनिरासायाद्यसाधारणदोषमाह *किञ्चैतदिति । अध्याहारविषयभूतेत्यर्थः । इदमग्रेऽपि विशेषणं बोध्यम् । *तदिति । वक्त्रित्यर्थः । तथाच पदानालिङ्गितार्थबुद्धेरभावेन तदज्ञानासम्भवात्सर्वत्र दोष इति भावः । *ततः–पुष्पेभ्य इत्यतः । *पदज्ञानम्–स्पृहयतीति पदज्ञानम् । *तत्र–तत्रापि । उक्तदोषत आह *पदेति । *पर इति

तत्रहि, "पौर्वापर्यमकालव्यवेतं संहिता" इतिन्यासान्तरे एकैक-वर्णवृत्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानाम्" इति तेषां पौर्वाप-र्याभावमाशङ्क्य "एवं तर्हि बुद्धौ कृत्वा" इत्याद्युक्त्वा "बुद्धिविषयमेव शब्दानां पौर्वापर्यम्" इति व्याख्याय वक्तृबुद्धिस्थत्वमुपपादितम्-"य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थे ऽयं शब्दः प्रयोक्तव्यः, अस्मिंस्तावच्छब्देऽयन्तावद्वर्णस्ततोऽयं ततोऽयम्" इति । प्रतिपादितमिदमधस्तात् । ननु सिद्धान्ते एकपदस्य कथं द्वर्याद्युक्तवाक्यत्वव्यवहारः, परसंमतवाक्यलक्षणानाक्रान्तत्वादित्यत आह *वाक्यत्वमिति । एवेन परकीयव्यवच्छेदः ।

अत एव चन्द्रालोके जयदेवेनोक्तम्—

वाक्यं च खण्डवाक्यं च पदमेकमपि क्वचित् ।
धूमवत्त्वादिति यथा देवेत्यामन्त्रणं यथा ॥ इति ।

वाक्याध्याहार इति पस्पशास्थभाष्येणापि वार्तिककृद्वाक्यानां सूत्रकृत्तात्पर्यविषयता वाक्यैकदेशन्यायेन सूचिता । एतेनाध्याहा-रस्यैवाभावे तद्भाष्यविरोध इत्यपास्तम् ॥ ३७ ॥

तत्र "प्रकृतिप्रत्ययनिपातानामेकवर्णानामर्थवत्त्व-दर्शनाद्" इत्यादिना प्रत्याहाराह्निके भाष्ये उक्तः प्रकृ-तिप्रत्यययोर्वाचकत्वमित्येवंरूपो वर्णस्फोटः शास्त्री-यप्रक्रियोपयोग्येव न वास्तवः । वस्तुतत्त्वे विकल्पा-योगेन प्रातिपदिकार्थविषये एकम्, द्विकम्, त्रिकम्, चतुष्कम्, पञ्चकमित्यादिवादिविकल्पानुपपत्तेः । का-ल्पनिके तु यथेष्टमिति तत्संभवः ।

अत एव "अतिशायने तमप्" इति सूत्रे शुक्लादयो गुणा एके, नच शुक्लतर इतिप्रकर्षप्रत्ययानुपपत्तिः । तेषां सावयवत्वेनाल्पत्वमहत्त्वकृतविशेषेण तदुपप-त्तेः । अथवा एके निरवयवाः नैर्मल्यादिगुणान्तरमिश्र-

णात् प्रकर्षः। यथा जात्युत्पलादिवासितायाा मल्लिकाया गन्धप्रकर्षः। अथवा नाना शौक्ल्यादि इति भाष्ये उक्तम्। अनेन एकत्र वस्तुनि अनेकपक्षोपन्यासेन व्यवहारोपपादकपदार्थानामवास्तवत्वं सूचितम्।

किञ्च अस्यैव वास्तवत्वे "कर्तरि कृद्" इत्यस्यास्मदादीन्प्रत्यबोधकत्वापत्तिः। कर्तृपदस्याप्यवयवशक्त्यैव बोधकत्वेनैतद्वाक्यार्थबोधात्प्राक् तत्र शक्तिग्रहासम्भवेनात्माश्रयापत्तेः। यदि तस्य मानान्तरेण शक्तिग्रहस्तदाऽन्येषामपि तेनैव शक्तिग्रहसम्भवेनास्य वैयर्थ्यापत्तिः। शक्तिग्रहाभावे शक्यसंबन्धरूपा तन्मूलिका वा लक्षणा वक्तुमशक्या। एवञ्चेदृशे विषये समुदायशक्त्यैव बोधकत्वम् अस्मदादीन्प्रत्यावश्यकम्।

गौतमोऽपि प्रकृतिप्रत्ययार्थस्यावास्तवत्वं ध्वनयन् "ते विभक्त्यन्ताः पदम्" इति पदपदार्थमुक्त्वा "जात्याकृतिव्यक्तयस्तु पदार्थः" इत्याह। विभक्तिपदेन सुप्तिङाविति तद्वार्तिककारः।

तत्र जातिः प्रवृत्तिनिमित्तोपलक्षणम्। आकृतिपदेन रूपक्रियादिविशिष्टमवयवसंस्थानं जातिलिङ्गमेव।

अतएव च गां लिखेत्यादौ लेखनकर्मत्वोपपत्तिः।

अत एव 'गौः' इति विज्ञाने प्रतिभासमानेषु वस्तुषु "कः शब्दः" इति प्रश्ने सास्नादिविशिष्टस्यार्थस्य क्रियायाः, गुणस्य, जातेश्च शब्दत्वं "किंयत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः, यत्तर्हि तदिङ्गितं चेष्टितं निमिषितं स शब्दः, यत्तर्हि तद्

शुक्लो नीलः कपिलः कपोत इति स शब्दः, यत्तर्हि भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्द" इत्येतद्ग्रन्थेन इतिशब्दबलात्, तदिति नपुंसकवशाच्च शुक्लसुरभ्यादिविशेषशब्दैर्व्यवह्रियमाणं वस्तुरूपं गन्धस्पर्शादिकं लिङ्गसंख्यादिकं च शब्द इत्याद्यर्थकेनाशङ्क्य "नेत्याह—वक्ष्यमाणगुणाश्रयं द्रव्यं नाम तत्, क्रिया नाम सा, उक्तद्रव्यवृत्तिर्गुणो नाम सः, आकृतिर्नाम सा" इत्येवं तेषां तत्त्वाभावमुपपाद्य "येनोच्चारितेन सास्नालाङ्गूलखुरककुदविषाणिनां संप्रत्ययो भवति स शब्दः" इत्युत्तारितं पतञ्जलिना।

अतएव कैयटेन "अथ गौरित्यत्र कः शब्द" इतिप्रश्नस्य गौरिति विज्ञातेषु वस्तुषु कः शब्द इत्याशयमुक्त्वा तान्येव वस्तूनि क्रमेण निर्दिशतीति किंयत्सास्नेत्यादिभाष्यमवतारितम्।

येनेत्यादिसिद्धान्तभाष्ये विषाणस्योपलक्षणत्वात् गुणक्रियाजातिग्रहणम्। अतएवचाम्रफलादौ श्रुते रसविशेषादिजिज्ञासा। विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात्। चक्षुरादिभिरपि सामान्यतो रसादिग्रहणं भवत्येव। विशेषस्तु रसनादितत्तदिन्द्रियग्राह्य एव। अतएवाम्रफले दृष्टे रसविशेषादिजिज्ञासा। "अथ गौरित्यत्र" इत्यत्र गौरित्यनेनाविशेषात ज्ञानमात्रस्य ग्रहणेन ज्ञानमात्रे शब्दगुणक्रियादिसामान्यभानस्य भाष्यकृता ध्वननात्। अतएव 'कम्बुग्रीवादिमान्नास्ति' इत्यादितो घटत्वावच्छिन्नाभावप्रतीतिः उक्ता न्यायविद्भिः। जातेरपि तत्पदार्थत्वात्। आकृते-

घटपदार्थत्ववत् ॥ ३८ ॥

(कुं० टी०) *भाष्ये उक्तइति । वर्णस्फोट इत्यत्रान्वयः । *न वास्तवः-न लौकिकव्यवहारोपयोगी । *अतिशायनेतमबिति । द्रव्यस्य स्वतः प्रकर्षाभावेन संसर्गिधर्मनिमित्तक एव प्रकर्षः । *शुक्लतरः पटइति । शुक्लगुणनिमित्तको द्रव्यप्रकर्षः । यथा हि निरुपाधिनो द्रव्यस्य प्रकर्षो नास्ति तथा द्रव्यान्निष्कृष्टस्य गुणस्यापि शुक्लतरं रूपमिति स्वतः प्रकर्षो नास्ति । ननु-

संसर्गिभेदकं यद्यत्सव्यापारं प्रतीयते ।

गुणत्वं परतन्त्रत्वात्तस्य शास्त्रे उदाहृतम् ।

इत्युक्तं हरिणा । अस्यार्थः-संसर्गिण आधारस्य यद्यद् भेदकं सव्यापारमवच्छेदकरूपेण प्रतीयते तस्य सर्वस्य गुणत्वम् । परतन्त्रो हि गुण इत्युच्यते । एवञ्च परतन्त्रत्वाज्जातेरपि गुणत्वं न्याय्यम् । भाष्यकारोऽप्याह "अन्यो हि वीरत्वं गुणः अन्यः पुरुषत्वम्" इति । तथा च जातिप्रकर्षेऽपि तरबापत्तिः । यथा हि शुक्लो नील इत्यादौ आश्रयान्तरव्यवच्छेदः एवं गौरश्वः इत्यादावप्याश्रयान्तरव्यवच्छेदः प्रतीयते इति चेत् । सत्यम् । शुक्लादिगुणैरेव व्यक्तीनां भेदनात्तत्प्रकर्षे एव तरप् । नहि गोत्वेन गोषु प्रकर्षापकर्षौ भवतः । कथं तर्हि गोतर इति प्रयोग इति चेत् । तत्र प्रकृष्टवाहदोहा गौः गोतरेत्युच्यते । एवं निकृष्टतरः प्रकृष्टतरः इत्यत्र निकर्षप्रकर्षातिशय एव तरप् । नतरामित्यत्र निषेधस्य प्रकर्षोऽत्यन्तमयुक्तत्वं गमनादेः सूचनाय । द्योत्यार्थप्रकर्ष एव तरबिति तु प्रायिकम् । एवं गुणप्रकर्षे तरपं व्युत्पाद्य गुणानामेकत्वादि निरूपयति *शुक्लादय इति । *प्रकर्षप्रत्यय इति । नह्येकत्वे स्वस्य स्वप्रतियो-

गिकः प्रकर्षः सम्भवति इति भावः । रूपादि सावयवमिति साङ्ख्यमतेनेदम् । अतएवाह*अल्पत्वेत्यादि । *नैर्मल्यादीति । एतेन रूपादिचतुर्विंशतिसाधारणगुणत्वजातौ मानाभाव इति सूचितम् । तथाहि न तावत्तत्र प्रत्यक्षं प्रमाणम् । धर्मादीनामप्रत्यक्षात् । यथाहि तुरगादौ गत्यादिनिष्ठोत्कर्षमादाय गुणव्यवहारः, ब्राह्मणादेश्च द्वेषाद्यभावे गुणव्यवहारः, तथा रूपादिष्वपि उत्कर्षादिकमादायैव गुणव्यवहारः । *यथेति । जाती मालत्यपरपर्यायः पुष्पप्रधानो वल्लीविशेषः । *अथवा नानेति । नत्वास्मिन्पक्षे कृष्णावधिकशुक्लप्रकर्षे तरबापत्तिः शङ्क्या । समानजातीये एव प्रकर्षप्रतीतेरिति भावः । *किञ्चास्यैवेति । कल्पितस्य प्रकृत्याद्यर्थस्यैवेत्यर्थः । अबोधकत्वमुपपादयति *कर्तृपदस्येति । *तेनैव—मानान्तरेणैव । *तेविभक्त्यन्ताइति । ते एव वर्णा एव । विभक्त्यन्ताः इति वर्णाभिप्रायं बहुत्वं जात्याभिप्रायं पदमित्येकत्वम् । तथाच पूर्वपूर्ववर्णस्मृतिसाहितो ऽन्त्यवर्णो नश्यदवस्थानुभवविषयीक्रियमाणः पदम् । पूर्वपदस्मृतिसहितम् अन्त्यपदं नश्यदवस्थानुभवविषयीक्रियमाणं वाक्यम्, पूर्वपदार्थस्मरणसहितेनान्त्यपदेन जायमाना प्रतीतिर्वाक्यार्थः । *पदपदार्थम्—पदशब्दार्थम् । *जात्याकृतिव्यक्तयस्त्विवति । अत्र त्रयाणामेकपदार्थत्वसूचनाय पदार्थ इत्येकवचनम् । जातौ व्यक्तौ तद्वैशिष्ट्ये चेत्यर्थाच्च गोत्वं व्यक्तिश्चेति न बोधप्रसङ्गः । एवमवयवसंयोगरूपाकृतौ तद्वैशिष्ट्ये च शक्तिः । जात्याकृतिविशिष्टाया एव व्यक्तेर्बोधात् । अत एवोक्तं हरिणा—

अनुप्रवृत्तिधर्मा वा जातिः स्यात्सर्वजातिषु । इति ।

अयं भावः—यथा गोत्वादिजातिः सर्वा व्यक्तीर्व्याप्नोति तथा विषाणादयो ऽपीति जात्या तुल्यरूपत्वाज्जातिकार्याय क-

ल्पते । नन्वेवं गोपिण्डेषु सास्नाविषाणाद्यवयवस्य तुल्यत्वात्सैव जातिरस्तु । नैवम् । सास्नादिमानिति प्रत्ययो जन्यते नतु गौरिति । *नसुप्तिङ्गाविति । विभक्तिरन्तःसंबन्धः ।तेन वाचकत्वं पदत्वमित्यर्थ इति भावः । *आकृतिपदेनेति । इदं पररीत्या । वस्तुतस्तु गवादिषु य आकारविशेषावसायः स नान्तरीयकः, अन्यथा देवताऽपूर्वादिशब्देऽप्याकारविशेषप्रथनापत्तेः ।

तदुक्तं हरिणा--

प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ।
न स शब्दस्य विषयः सहि यत्नान्तराश्रयः ॥ इति ।

*कःशब्दइति । कः शब्दपदार्थ इत्यर्थः । *शब्दत्वमिति । आशङ्क्येत्यत्रान्वयः । *यदिति । उद्दिश्यमानप्रतिनिर्दिश्यमानयोः पर्यायेण परामर्शात् यत्सा इत्युभयलिङ्गेन परामर्शः । यथा शैत्यं हि यत्सा प्रकृतिर्जलस्येति । *इङ्गितम्—अभिप्रायसूचकः शरीरव्यापारः।*चेष्टितम्–कायपरिस्पन्दः।*निमिषितम्–अक्षिव्यापारः ।*शुक्लइति । अत्र शुक्लादिशब्दा गुणवाचकाः ।*भिन्नेष्वभिन्नमिति । आश्रयभेदेऽप्येकम् । अनेन सामान्यस्यैकत्वं प्रतिपादितम्।छिन्नेष्वाच्छिन्नमित्यनेन तु नित्यत्वम्।*तत्त्वाभावम्-शब्दत्वाभावम् । *चक्षुरादिभिरपीति । यद्यपि चाक्षुषप्रत्यक्षे एव चक्षुस्संयोगादेर्हेतुता तथापि सामान्यत इन्द्रियसंयोगादेरपि हेतुत्वमावश्यकम् । अन्यथा प्रत्यक्षसामान्याभावे तत्तद्विशेषाभावस्य हेतुत्वे गौरवादिति भावः । किञ्च चक्षुस्संयुक्तसमवायरूपकारणबलाद्रूपादीनामपि ग्रहणे बाधकाभावः । प्रतिबन्धकताकल्पने गौरवात् । *अविशेषादिति । गौरित्यादि ज्ञानमात्रोपलक्षणमित्यर्थः । *अतएव–सामान्यस्य भानादेव । *घटत्वाव-

च्छिन्नेति । *कम्बुग्रीवात्वं संस्थानगता जातिः । तस्याः परंपरया घटवृत्तित्वाद् गुरुत्वम् । स्वरूपतस्तु द्वयोरपि जातित्वान्न गुरुत्वम् । तथाच कम्बुग्रीवादिमत्त्वस्य गुरुधर्मतया प्रतियोगितावच्छेदकत्वाभावादिति भावः । वस्तुतो गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वमनुभवसिद्धम् । प्रतियोगितायां कम्बुग्रीवादिमत्त्वावच्छिन्नत्वं भ्रम इति मतं त्वनादेयमेव । अबाधितप्रतीतिबलाद्वस्तुसिद्धौ गौरवस्याकिञ्चित्करत्वात् । अतएव नीलधूमत्वादीनां व्याप्यतावच्छेदकत्वं हेत्वाभासे दीधितिकृता स्वीकृतमिति । यत्तु घटत्वावच्छिन्नप्रतियोगितासंबन्धेन कम्बुग्रीवादिमत्त्वावच्छिन्नप्रकारतानिरूपिताभावविषयताशाली बोध इति। तन्न । उक्ताभावप्रतीतौ घटत्वावच्छिन्नप्रकारताया अस्वीकारे तादृशाभावबोधं प्रति घटत्वावच्छिन्नप्रकारताशालिज्ञानस्य हेतुतायां व्यभिचारापत्तेः । तस्य हेतुत्वे घटत्वादिनिर्विकल्पकानन्तरमपि तादृशाभावप्रत्यक्षापत्तेः ॥ ३८ ॥

(क. टी.) विशेषान्तरं वक्तुमुक्तमाह *तत्रेति । अखण्डवाक्यस्याखण्डवाक्यार्थबोधकत्वे सतीत्यर्थः । अर्थवन्तो वर्णा अनर्थका वेति संदेहे आद्ये हेतुमुक्तमाह *प्रकृतीति । यत्तु प्राञ्चः पदादिघटकवर्णानां प्रत्येकं वाचकत्वमिति । तन्न । दोषगणस्योक्तत्वात्तद्धनयन्नाह *प्रकृतीति । ननु वास्तव एवास्तु सोऽपीत्यत आह *वस्तुतस्त्वइति । आद्यार्थं स्पष्टयन्नाह *अतएवेति । तस्यावास्तवत्वादेवेत्यर्थः । उक्तःमित्यत्रान्वयः । *निरवयवाः–निरवयवाश्च । अत्र पक्षे उक्तशङ्कां समाधत्ते *नैर्मल्येति । तत्तात्पर्यमाह *अनेनेति । भाष्येणेत्यर्थः । *हि–यतः । *तस्यैव–वर्णस्फोटस्यैव । एतत् "कर्त्तरि" इति सूत्रम् । एवमग्रेऽपि। *तत्र–तृचि। *तस्य–तृचः। *अन्येषाम्–तदाभिन्नानां ण्वुलादीनाम्। तत्र लक्षणया ऽनिर्वाहमाह *शक्तीति । *बोधकत्वमिति । एवंचावास्तवत्वमेवोचितमिति भावः। परसंमतमपीदमित्याह *गौतमोऽपीति । प्रकृतयश्च प्रत्ययाश्चार्थाश्चेति समाहारद्वन्द्वः । *ते–शब्दाः । प्रस्तावात् ।

यदि उक्तवर्णस्फोटस्तदभिमतो भवेत्तर्हि प्राथमिकत्वात्तमेव व्याहरेत् त्तमपि वा । तस्मान्न्यायनये पदस्फोट एव । आधुनिकन्यायग्रन्थेषु सुबर्थादिविचारस्तु व्याकरणवासनावासितान्तःकरणतयेति बोध्यम् । शक्तं पदमिति तदेकदेशिमतनिरासायाह *विभक्तीति । अथ तदुपदेशक्रमेणाह *तत्रेति । तत्सूत्रे इत्यर्थः । न्यूनतानिरासायाह *प्रवृत्तीति । *आदिना गन्धादि । जातिलिङ्गमित्यत्र षष्ठीतत्पुरुषः । *अतएव-तस्याः पदार्थत्वाङ्गीकारादेव । *आदिना–लिङ्गादि । परोक्तं भाष्यसंमतमपीत्याह *अतएवेति । तासां विशिष्टानां पदार्थत्वादेवेत्यर्थः । एवमग्रेऽपि । प्रश्नादावुत्तरितनाम् इत्यन्तेन्वयः । *इतिप्रश्ने इति । इत्याशयके"अथ गौः इत्यत्र कः शब्द"इति प्रश्ने इत्यर्थः । ग्रन्थविशेषणं तत्तात्पर्यबोधकमाह *इतिशब्दबलादिति । आद्यादिना रसादि । द्वितीयादिना शक्तिः । तृतीयादिना क्रिया । *वक्ष्यमाणेति । अत्रैवेति भावः । एवमग्रेऽपि । *तत्त्वेति । शब्दत्वेत्यर्थः । प्रागुक्तार्थे कैयटसंमतिमाह *अतएवेति । उक्तोऽर्थः । तत्रादौ प्रागुक्तमेवाह *अथेतिक्त्वान्तेन । नन्वेवमपि सिद्धान्तविरोधो न्यूनत्वादित्यत आह *येनेत्यादीति । *अतएव च-शब्दजन्यबोधे गुणादिभानादेव च । आदिना रूपविशेषादि । ननु कथं श्रोत्रेण तद्ग्रहणमत आह *चक्षुरादीति । आदिना श्रोत्रादि । नन्वेवमितरवैयर्थ्यादीत्यत आह *विशेषस्त्विति । *अतएव—तस्य सामान्यतश्चक्षुर्ग्राह्यत्वादेव । आदिना गन्धविशेषादि । ननु भाष्यस्य शाब्दबोधविषयत्वेन तत्र तस्य तथा भाने ऽपि चाक्षुषे तस्य तथा भाने मानाभावो ऽत आह *अथेति । अतएवेत्यस्यार्थमाह *जातेरपीति ॥ ३८ ॥

तत्र जातिरनुगताकारप्रतीत्या स्वरूपत एकत्वेन च सिद्धा । अत एव सरूपसूत्रे भाष्ये "कथं पुनर्ज्ञायते एकाकृतिरिति, प्रख्याऽविशेषात् । नहि गौरित्युक्ते विशेषः प्रख्यायते शुक्लो नील" इत्यादि । 'प्रख्या बुद्धिः तस्या अविशेष एकरूपता' इति कैयटः । इयमेवानुगताकारप्रतीतिशब्देनोच्यते । एकाकारप्रतीति-

शब्देन च ।

अत एव प्राणप्रदत्वं जातेरुक्तं प्रकाशे। 'यावत्स्थितिसंबन्धित्वं च तत्त्वम्' इति तद्व्याख्यातारः । यावत्स्थिति एकाकारप्रतीतिर्हि प्राणः । तत्प्रदत्वं च जातेरेव न पाचकत्वादेरिति स्पष्टमेव । पाकक्रियाणामाश्रयभेदेन भेदात् । स्वगतजात्यैव तासामेकाकारप्रतीतिजनकत्वमित्यन्ये ।

अत एव कणादेनापि "सामान्यं विशेष इति बुद्ध्यपेक्षम्" इत्युक्तम् । 'अनुवृत्तिबुद्धिजनकत्वं सामान्यलक्षणं व्यावृत्तिबुद्धिजनकत्वं विशेषलक्षणम्' इति तद्व्याख्यातारः । तथा 'सदिति यतो द्रव्यगुणकर्मसु सा सत्ता' इत्युक्तम् । इतीत्यस्य व्यवहारप्रत्ययाविति शेषः । अनेन इदमेव सर्वजातिषु मानामिति सूचितम् । तथा "भावोऽनुवृत्तेरेव हेतुरिति सामान्यमेव" । 'भावः सत्ताऽनुवृत्तेरेव हेतुरिति सामान्यमेव । द्रव्यत्वादि तु अनुवृत्तेरितरव्यावृत्तेश्च हेतुरिति सामान्यं विशेषश्च । यावत्स्थिति एकाकारप्रतीतिरनुवृत्तिः' इति तद्व्याख्यातारः । यावत्स्थितीत्यस्याभावे पाचकत्वादेरपि जातित्वापत्तिः । कादाचित्कैकाकारप्रत्ययहेतुत्वात् । "भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नम्" इत्यनेनोपलक्षितनित्यत्वेनापीदं सूचितम् ।

गौतमो[1]ऽपि "समानप्रसवात्मिका जातिः" इत्याह । यावत्स्थिति एकाकारबुद्धिजननस्वभावेत्यर्थः । "आकृतिर्जातिलिङ्गाख्या" इति चाह । जातिलिङ्गमि-

१ गौत-हीतेति पाठो ऽयं कुञ्जिकायुतमूलपुस्तके नोपलभ्यते ।

त्याख्या यस्या इत्यर्थः । रूपादिष्वपि रूपत्वादिजातिव्यञ्जकं यत् साऽऽकृतिर्जातिरिति तदाशयः । व्यक्तिस्तु आकारविशिष्टं समवायिकारणमेव । "मृत् कयाचिद् आकृत्या युक्ता पिण्डो भवति, सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति" इति पस्पशायां पतञ्जल्युक्तेः । तत्राकृतेरनित्यत्वाद्विशिष्टेऽनित्यत्वम् । विशेष्यांशमादाय नित्यत्वमपि । तमादाय गौतमीये व्यक्तिः पृथग्गृहीतेति ॥ ३९ ॥

(कुं० टी०) *मणो हानोपादानव्यवहारः स्वज्ञानेन तत्प्रदः । *यावत्स्थितीति । नन्वेवं परमाण्वादिशब्दानामपि जातिशब्दत्वं स्यात् न गुणशब्दत्वमिति चेत् । सत्यम् । परमाणुत्वमपि जातिरेव । तार्किकनयानुसारेण तु गुणशब्दत्वव्यवहारः । *अनुवृत्तीति । अस्ति हि सर्वेषु घटेष्वनुस्यूतस्य घटत्वस्य प्रतीतिस्तदेव सामान्यम् । एवंच जातिष्वपि सर्वासु जातिरित्येकाकारप्रत्ययजननाज्जातित्वमपि सामान्यमेव । *सदितीति । द्रव्यादिषु सदिति प्रतीतिर्यतः सा सत्तेत्यर्थः । सामान्यादिष्वपि सदिति प्रतीतेर्नोक्तयुक्त्या द्रव्यादित्रयसाधारणी सत्ता जातिः । धर्मादिष्वतीन्द्रियेषु सत्तायाः प्रत्यक्षासम्भवाच्च । न च घटः सन्निति प्रतीतिबलात्सत्तासिद्धौ तस्या एकार्थसमवायेन जातौ भानमिति वाच्यम् । वर्तमानत्वस्यैव सन्निति प्रतीतिविषयत्वात् । वर्तमानत्वं च भावत्वमेवेति नाननुगम इत्यन्ये । *इदमेवेति । एकाकारबुद्धिजननमेव । तथा च गौतमसूत्रे "समानप्रसवात्मिका जातिः" इति । समानाकारः प्रसवो बुद्धिजननं स्वरूपं यस्याः सेति तदर्थः । *भावोऽनुवृत्ते-

रिति । सत्ताऽनुवृत्तेरेव हेतुरित्यतः सामान्यमेव, नतु विशेष इत्यर्थः । कणादसूत्रस्थभावपदस्यार्थमाह *सत्तेति । *द्रव्यत्वादित्विति । सर्वेषु द्रव्येष्वनुवृत्तत्वात्सामान्यं, गुणादिभ्यो व्यावृत्तत्वाद्विशेषोऽपीत्यर्थः । एवञ्चैकत्वमनेकवृत्तित्वं नित्यत्वं च लभ्यते । अनुवृत्तेरेवेत्येवकारव्यावर्त्यमाह *यावत्स्थितीति। आश्रयस्थितिपर्यन्तमित्यर्थः । *कादाचित्केति । पाककालिकेत्यर्थः । *इदंसूचितामिति । पाचकत्वादीनामनित्यत्वाज्जातित्वं नेति सूचितमित्यर्थः ॥ ३९ ॥

(कु०टी०)*तत्र-तासां मध्ये । तया स्वरूपतः सिद्धावपि भेदे वैयर्थ्यमेव, अत आह *एकत्वेनचेति । अभेदेनेत्यर्थः । *अतएव-तया तस्या एकत्वेन सिद्धेरेव । भाष्ये उक्तमिति शेषः । आकृतिरत्र जातिः। अवयवसंस्थानस्य भिन्नत्वात् । *आदिना कपिला कपोतिकेति । *तेन—तदविशेषेण । *इयमेव—तदेकरूपतैव । *अत एव-तस्या एकत्वादेव । *तत्त्वम-प्राणप्रदत्वम। सामान्ये तत्र नपुंसकम् । ननु इदं कथं गुणादिव्यावृत्ततया तैरुक्तमत आह *यावदिति । लक्षणया । *हि—यतः एकत्वेन । तदेवाह *पाकेति। मतान्तरमाह *स्वगतेति । *अतएव—तस्यास्तत एकाकारप्रतीतिजनकत्वादेव । बुद्धिशब्देन तद्विशेष इत्याह *अनुवृत्तीति । तदुक्तिमेवाह *तथेति । *यतः-यस्माद्धर्मात । *इदमेव-व्यवहारप्रत्ययोभयरूपमेव । तदुक्तिमेवाह *तथेति । तदर्थमाह *सामान्यामिति । योग्यतयेति भावः । "तस्य भावस्त्वतलौ" इतिवत् । सर्वत्र तदुक्तिफलमाह *यावदिति । *इदम्-यावत्स्थितिसम्बन्धित्वम् । ननु वास्तवं तत्त्वमिति न विरोध इति भावः। तदुक्तिमेवाह *आकृतिरिति । नन्वेवं रूपादावाकृत्यभावेन तत्सिद्धिर्न स्याद-

---

१ वस्तुतस्तु इदं अर्थकथनपरत्वेन सामान्यमेवेत्यस्य व्याख्यानं चिन्त्यम् । सामान्यमेवेत्यन्तस्य वैशेषिकसूत्रत्वात् । अग्रे भावः सत्तेत्यस्य व्याख्यातृग्रन्थस्थत्वाद् । अतएव भाव इत्यादेरेवार्थकथनपरत्वमाश्रित्य कुञ्जिकाकारो व्याख्यत् ।

त आह *रूपादिष्वपीति । *आकृतिविशेषम्–तदुयुक्तम् । आकारविशिष्टमिति पाठान्तरं सुगमम । *तत्र–तयोर्मध्ये । यावद्व्यवहारं समवायिकारणस्य नित्यत्वादाह *विशेष्यांशेति । *तमिति । विशेष्यांशमादायैवेत्यर्थः । जात्याकृतीति सूत्रे इत्यर्थः ॥ ३९ ॥

चरकेऽप्युक्तम्—

सामान्यमेकत्वकरं विशेषस्तु पृथक्त्वकृद् । इति । एकत्वकरत्वमेकत्वबुद्धिकरत्वम् । यदनेकासु गवादिव्यक्तिषु 'अयं गौः अयं गौः' इत्येवमाद्येकाकारबुद्धिरेकं सामान्यं विना नाभ्रान्ता भवति । एवं च तदेकत्वालम्बना सत्यपि व्यक्तिभेदे एकत्वबुद्धिर्युक्तैव । तदेव गोत्वमश्वादिभ्यो व्यावृत्तिबुद्धिजनकतया विशेष इति तदर्थः । एतद्बीजमप्युक्तं तत्रैव–

"तुल्यार्थता हि सामान्यं विशेषश्च विपर्ययः" इति ।

'तुल्यार्थता तुल्यानामर्थानां भावः । अर्थेषु तुल्यत्वं च एकाकारप्रतीतिजनकधर्मवत्त्वम् । एवंच तेषां भावः स धर्म एव । एवंच एकाकारप्रतीतिजनकं यतः सामान्यमतः तत् तदेकत्वकरम् । यथा सकलगवीनां गोत्वम् । विपर्ययः अतुल्यार्थता, अनेकाकारप्रतीतिजनको धर्मः स यतो विशेषोऽतः पृथक्त्वकृत्सः । यथा गवाश्वयोर्गोत्वाश्वत्वे इति तदर्थः' इति तद्व्याख्यातारः । एवं च पाचकत्वमपि सामान्यं भवत्येव । जातित्वं तु यथा न तथोक्तम् । "अतिशायने तमब्" इति सूत्रे भाष्ये "जननेन यत्प्राप्यते सा जातिः" इत्युक्तम् । अनेनापि तस्या नित्यत्वं बोधितम् । एतच्च लक्षणमद्वैतिमते । ब्रह्मातिरिक्तस्य

सर्वस्य तन्मते जन्यत्वात्।अविद्यादेरपि जन्यत्वमुक्तम्। जीवानामप्युपाधीनां जन्यत्वेन विशिष्टानां जन्यत्वमेव। ब्रह्मणस्तु निर्धर्मकत्वात्तत्र जात्यभाव एव। अन्यथा न्यायादिनये परमाण्वादीनामजन्यत्वेन परमाणुत्वादिजात्यव्यापकत्वमस्य लक्षणस्य स्यात। सरूपसूत्रे भाष्ये तु "भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जातिः" इत्युक्तम्। तन्निष्कर्षस्तूक्तः।

एतेन कारणतावच्छेदकत्वादिनैव जातिसिद्धिरित्यपास्तम्।

सखण्डोपाधावपि तत्तद्रोगनाशत्वादौ तत्तच्चूर्णत्वादौ च तस्य सत्त्वेन कारणतावच्छेदकत्वादिना जातेरन्वयव्यतिरेकयोरुभयोरपि व्यभिचारेण कारणतावच्छेदकत्वादिना जातिसाधनासम्भवात्। बाधकाभावे इत्यादिविशेषणदाने तु गौरवम्।

किञ्च घटत्वशरावत्वाद्यनेकधर्मपुरस्कारेणानेककार्यकारणभावस्वीकारापेक्षया सर्वानुगतं यं कंचित्सखण्डधर्ममवच्छेदकीकृत्यैककार्यकारणभावे लाघवेन कार्यतावच्छेदकत्वादिना न जातिसिद्धिरित्यलम्॥४०॥

(कुं० टी०) *तदेकत्वालम्बना—जात्येकत्वाश्रया। *अर्थेषु—व्यक्तिषु। *वाचकत्वमपीति। सकलपक्तृधर्मत्वात्। *यथानेति। अनित्यत्वात्। *जननेति। सूक्ष्मरूपेषु कारणेषु सूक्ष्मरूपेण स्थिता जातिर्जननकालसम्बन्धादिभिरभिव्यक्ता भवतीत्यर्थः।

अयं भावः—जात्यात्मना कारणेषु कार्याणामवस्थानात्तत्र

साधनप्रवृत्तौ कार्यकारणयोरभेदात्तत्समवेतजात्याभिव्यक्तिः । यथैकस्मिन्घटे नष्टे ऽपि व्यक्त्यन्तरे घटत्वादिजातिरवतिष्ठते । एवमुत्पन्ने घटे घटत्वादिजातिरभिव्यज्यते इति ।

ननु प्रलये अनित्यानां सर्वेषां विनाशान्निराश्रया जातिः कथमवतिष्ठते इति चेत् । युगपत्सर्वेषां भावानां प्रलयो नास्तीति मते परमाण्वादावेव जातयः । अथवा ब्रह्माण्डान्तरविनाशे ऽपि ब्रह्माण्डान्तराणां प्रलयो नास्ति ।

तदाहुः—

अण्डानामीदृशानान्तु परिसंख्या न विद्यते। इति ।

ये महाप्रलयमिच्छन्ति तन्मते विशेषेषु प्रकृतौ लीनेषु प्रधाने च ब्रह्मणि वा मूलकारणे लय एव प्रलय इति शक्तिरूपेषु पदार्थेषु जातियोगस्तदानीमप्यविरुद्धः। द्रव्यात्मना जातीनामवस्थानात्। ब्रह्मात्मकद्रव्यरूपत्वात् । *अनेनापीति । एतद्भाष्येणापीत्यर्थः । जन्यकालमभिव्यक्तत्वान्नित्यत्वमेवेत्यर्थः । ननु परमाण्वादीनां जन्यत्वाभावात् तत्र जात्यनापत्तिरत आह *एतच्चेति । तथाच परमाणूनामपि जन्यत्वमेव । परमाणुरनित्यः पृथिवीत्वादित्यनुमानाच्च । ननु सर्वस्य जन्यत्वमयुक्तम् । अविद्याया अनादित्वप्रवादादत आह *अविद्यादेरपीति । नन्वात्मभूतानां जीवानां कथं जन्यत्वमत आह *उपाधीनामिति । अन्तःकरणानां जन्यत्वात्तद्विशिष्टानां जीवानामपि विशेषणद्वारा जन्यत्वमेवेत्यर्थः । यद्यप्यग्निविस्फुलिङ्गोदाहरणेन जीवस्योत्पत्तिः श्रूयते ।

निस्सरन्ति यथा लोहपिण्डात्तप्तात् स्फुलिङ्गकाः ।
सकाशादात्मनस्तस्मादात्मानः प्रभवन्ति हि ॥ इति—

स्मृतिश्च । तथापि स्थूलशरीरग्रहणमेव प्रभवशब्दार्थः। *अ-

न्यथा-पदार्थमात्रस्य जन्यत्वाभावे। तप्तायःपिण्डनिक्षिप्तानां निश्शेषं नाशस्यानुभवसिद्धत्वान्न परमाणूनां नित्यत्वमिति भावः। *अस्य लक्षणस्य-जननेन यत्प्राप्यत इत्यस्य। *तस्य सत्त्वेनेति। रोगनाशत्वे कार्यतावच्छेदकत्वस्य, चूर्णत्वे कारणतावच्छेदकत्वस्य च सत्त्वेनेत्यर्थः। अत्र जात्यस्वीकारादन्वयव्यभिचारः। क्वचिच्छक्यतावच्छेदकत्वादिनापि स्वीकाराद्व्यतिरेकव्यभिचारः। कार्यतावच्छेदकतयाच घटत्वं जातिरिति मतं दूषयति *किञ्चेति ॥ ४० ॥

(क०टी०) कणादोक्ते ऽर्थे भाष्यसंमतिमप्याह *चरके ऽपीति। यथाश्रुतार्थासम्भवादाह *एकत्वेति। *यत्-यतः। विषयबाधकृतं भ्रान्तत्वं तदभावाय तदिति भावः। तदेवाह *एवञ्चेति। तद्विना तस्याः भ्रान्तत्वापत्तौ चेत्यर्थः। *तदेकत्वेति। जात्येकत्वाश्रयिकेत्यर्थः। *तदेव-सामान्यमेव। *विशेषःसोऽपि। *एतदिति। एतत्करत्वबीजमित्यर्थः। *तत्रैव-चरके एव। उभयशेषमाह *तद्व्याख्येति। *एवं च-चरकोक्तसामान्यलक्षणे यावत्स्थितीत्यस्यानिवेशे च।*पाचकत्वमपि-पाचकत्वादिकमपि।कणादाद्युक्तजातिलक्षणे तन्निवेशादाह *जातित्वंत्विति। इदमेव द्रढयन्नाह *आतिशायनेति। तत्र हि-जातेर्नेति वार्त्तिकप्रत्याख्यानायेदमुक्तम्। "नचैतस्य प्रकर्षापकर्षौ स्त" इति एतच्छेषस्तत्र। *अनेनापि-जननेन प्राप्यत्वकथनेनापि। अपिना भिन्नेष्विति प्रागुक्तभाष्यसमुच्चयः। *नित्यत्वमित्युपलक्षणमेकत्वानेकवृत्तित्वयोरपि। नित्यगतजातेर्जननेनाप्राप्यत्वादयत्नलभ्यपरमेतादिति तत्रत्यकैयटासांगत्यं ध्वनयन्नाह *एतच्चेति। नन्वविद्यादेरनादित्वादतत्त्वेन कथं तज्जातावेतल्लक्षणाक्रान्तताऽत आह *अविद्यादेरपीति। इदमप्युक्तमेव। वक्ष्यते इत्यपपाठः। *अन्यथा-अस्य सर्वमतसाधारणत्वे। *न्यायादिपरमाण्वादीत्यादिभ्यां सांख्यादिमतप्रधानावयवसत्त्वादिपरमाणुपरिग्रहः। सर्वमतसाधारणं भाष्योक्तं तल्लक्षणमाह *सरूपेति। अत एव तुः। तत्र हि सरूपसूत्रप्रत्याख्यानाय

"आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायन" इतिवार्त्तिकमुपक्रम्य तस्या एकत्वं वाच्यत्वं च प्रख्याऽविशेषाव्यपवर्गगतिभ्यामुक्त्वा "इतीन्द्रवद्" इत्यनेनानेकवृत्तित्वमुक्त्वा अनाश्रितत्वेनानैकात्म्येन च नित्यत्वमुक्त्वा नानार्थेष्वपि क्रियासामान्यात् सिद्धमित्युक्तं भगवता । तदर्थं कैयटोक्तमाह *भिन्नेष्विति । अभिन्नत्वमुभयविशेषणम् । तत्त्वं चेकाकारवत्त्वम् । *अभिधानं-शब्दः । *प्रत्ययः-ज्ञानम् । *आदिना कार्यतावच्छेदकत्वम् । *एवेनानुगताकारप्रतीत्यादिव्यवच्छेदः । एतेनंत्यस्यार्थमाह *सखण्डोपेति। अखण्डोपाधेरपिना समुच्चयः । *तस्य-कारणतावच्छेदकत्वादेः। तदाद्योरपि मिथः कार्यकारणभावात् । *आदिना-सहेति शेषः । *जातेः-जातित्वस्य । क्वचित्तथा पाठ एव । नान्यतरव्यभिचार इत्याह *उभयोरपीति । *आदिना अनेकवृत्तित्व इत्यस्य परिग्रहः । इदमप्यनेककार्यकारणभावस्वीकारेण । वस्तुतः स एव नेत्याह *किञ्चेति । कार्यतावच्छेदकं साध्यमृद्विकारत्वादि कारणतावच्छेदकं पञ्चतन्मात्रपरिणामविशेषत्वमनुगतं सखण्डम् । किञ्च प्रागुक्तभाष्यादिसकलविरोधस्तदाह *अलमिति ॥ ४० ॥

शतशो ऽपि गौरित्युक्ते शुक्लत्वादिविशेषानवगमपूर्वं सामान्यस्य शब्दतो ऽवगतेः सा शब्दशक्या । द्रव्यस्यैव शक्यत्वे तु तस्य गुणसमूहरूपत्वेन शुक्लत्वादिविशेषावगतिप्रसङ्गः । अतिरिक्तद्रव्यवादेऽपि द्रव्यस्य विशेषानालिङ्गितस्य बोधाभावेन स एव दोषः । उक्ताकृतेरपि शब्दवाच्यत्वाच्च । तत्र रूपक्रियादि सामान्यरूपेणैव भासते ।

यद्यपि प्राथमिकशक्तिग्रहो विशेषालिङ्गितव्यक्तिविशेषे एव, तथापि आवापोद्वापन्यायेन पुरुषान्तरात् गामानयेत्येतच्छ्रवणोत्तरमेव व्यक्त्यन्तराण्यानयतो दृष्ट्वा विशेषे गृहीतामपि शक्तिं

तज्जात्याश्रयमात्रे व्यवस्थापयति । कारणत्वादिग्रहस्थले ऽप्येवमेवेति न कश्चित्सामान्यलक्षणोपयोगः। यथा गोसदृशो गवय इति शक्तिग्रहे न व्यक्तिविशेषभानं तद्वत्।

तदुक्तं सरूपसूत्रे भाष्ये—

"अव्यपवर्गगतेश्च मन्यामहे आकृतिरभिधीयते, नहि गौरित्युक्ते व्यपवर्गो गम्यते शुक्लो नील इत्यादि" इति। व्यपवर्गो विशेषः तस्य गतिः प्रतीतिरित्यर्थः। ननु प्रख्याऽविशेषाव्यपवर्गगत्योः को विशेष इति चेत्—

शृणु।'अनभिधीयमानाऽपि जातिः संनिधिमात्रेण प्रख्याया अविशेषे निमित्तं भवति। प्रख्याया अविशेषः 'तदेवेदं ज्ञानम्' इतिप्रत्यभिज्ञाविषयत्वम्। तेनैकत्वे जातिपदार्थे च सिद्धेऽपि अभिधानासिद्धिः। तथा वनमिति सर्वविशेषाभ्यन्तरीकरणेनाव्यपवर्गगतावपि प्रख्याया अविशेषो नास्ति। भिन्नवृक्षालम्बनत्वाद्धनमिति प्रत्ययस्य। यथाऽऽम्रवनं पलाशवनमित्यादिज्ञानेषु तदेवेदं ज्ञानमितिप्रत्यभिज्ञाऽभावाद्' इति कैयटेनैव समाधानात्।

अत एव 'सामान्यशक्तात् शब्दाद्विशेषव्यक्तिबोधे लक्षणा' इति वृद्धाः। सा च शब्दतन्मात्रस्यैव परिणामविशेष आकाशवद्विभुः॥ ४१॥

(कुं० टी०) *विशेषानवगमेति। व्यक्तेः शक्यत्वे तु विशेषो ऽपि प्रतीयेतेति भावः। *सा—जातिः। ननु गुणसमूहो द्रव्यमित्ययुक्तं, द्रव्यपदार्थवादिव्याडिमते आख्याते ऽपि क्रि-

याविशिष्टद्रव्याभिधानादतिरिक्तमेव द्रव्यम् । अत एव शुक्लादीनामपि द्रव्यपदार्थता सिद्धा । 'इदं' 'तद्' इतिसर्वनामपरामर्शयोग्यं वा द्रव्यम्, तत्तदुपाध्यवच्छिन्नं ब्रह्म वा द्रव्यमित्यत आह *अतिरिक्तेति । *स एव—शुक्लत्वादिभानप्रसङ्ग एव । *उक्ताकृतेरिति । जातिशक्तिवादे तु जात्या स्वाश्रयव्यक्तीनामाक्षेपे सामान्यरूपेणैव गुणादीनां भानमित्यर्थः । *यद्यपीति । बालानां शक्तिग्रहो यद्यपि व्यक्तिविशेष एव, तथापि व्यक्त्यन्तरे ऽपि आनयनादिदर्शनाज्जात्याश्रयमात्रे शक्तिव्यवस्थितिरित्यर्थः । *कारणत्वादीति । दण्डत्वाश्रये घटकारणताग्रहाद्व्यक्त्यन्तरे ऽपि तत्संभवोऽस्त्येवेति सामान्यलक्षणाया नोपयोग इत्यर्थः । अत एवोक्तं हरिणा—

निर्वर्त्यमानं यत्कर्म जातिस्तत्रापि साधनम् ।
स्वाश्रयस्याभिनिष्पत्त्यै सा क्रियायाः प्रयोजिका ॥ इति ।

अस्यार्थः—यद्यपि घटं करोतीत्यादावसतः क्रियासाधनता न सम्भवति, तथापि जातिरूपाश्रयेण सा साधनता, व्यक्तिरूपाश्रयेण निर्वर्त्यतेति । एवमेकत्र घटत्वाश्रये चक्षुस्संयोगाद्देशान्तरस्थघटस्यापि बोधसम्भवे तदर्थमपि सामान्यलक्षणा न स्वीकार्या ।

यत्तु अतीतघटादेर्वर्त्तमानकालानवच्छेदकतया तत्प्रत्यक्षानापत्तिः, अतः सामान्यज्ञानस्य प्रत्यासत्तित्वमावश्यकम् । एतेन कार्याव्यवहितप्राक्क्षणावच्छेदेन कारणाभाव एव व्यभिचारः । अतीतघटादेश्च कारणऽभावस्याभावेऽप्यवच्छेदकभावान्न व्यभिचार इत्यपास्तमिति ।

तन्न । अतीतघटादावपि बुद्ध्या विषयीकृत्य घटात्वाश्रयत्वेन ज्ञानसत्त्वात् ।

*तद्वदिति। यत्तु पर्वतीयधूमे व्याप्तिग्रहो न स्यादिति। तन्न। धूमत्वेनैव रूपेण महानसीयधूमे व्याप्तिग्रहात्।

ननु प्रसिद्धधूमे व्याप्तिरेव गृहीता अप्रसिद्धस्य चाऽनुपस्थितत्या 'धूमो वह्निव्याभिचारी न वा' इति संशयो न स्यादिति चेन्न। प्रसिद्धधूमे तत्तद्धूमत्वेन व्याप्तिनिश्चये ऽपि धूमत्वेन तत्संशयसम्भवात्। *अव्यपवर्गगतेश्चेति। विशेषानवगमादित्यर्थः।

अयं भावः—शुक्लादिभेदेन भिन्नास्वपि व्यक्तिषु एकाकारप्रतीत्या जातिसिद्धौ तत्रैव शक्तिग्रहः। नापि शुद्धव्यक्तीनां बोधोऽस्ति। व्यक्तीनां विशेषरूपत्वेन विशेषावगतिप्रसङ्गात्। जातेः शक्यत्वे तु तदाक्षिप्तव्यक्तौ सामान्येन भानमिति। *को विशेष इति भाष्ये किमर्थमनयोरुपन्यास इत्यर्थः। *अनभिधीयमानाऽपीति। वाच्यत्वेनास्वीकृताऽपीत्यर्थः। *सन्निधिमात्रेणेति। शक्तिग्रहे व्यक्तावुपलक्षणतामात्रेणेत्यर्थः। तथाचानेन बुद्ध्यैक्यमूलकजात्यैक्ये सिद्धे ऽपि वाच्यत्वं नोपपादितमतो ऽव्यपवर्गगतेश्चेत्ययुक्तमिति भावः। *तदेवेदं ज्ञानमिति। तदुच्चारितगोशब्दाद्यादृशं ज्ञानं तादृशमेतदुच्चारितादित्याकारकमित्यर्थः। *तेनैकत्वे इति। उक्तयुक्त्या जातिपदार्थे सिद्धे तस्या एकत्वे च सिद्धे ऽपि तस्या वाच्यत्वं न सिद्धमित्यर्थः। द्वितीयहेतुना त्वेकत्वं न सिद्धमित्याह *तथेति। *अविशेषइति। एकरूपत्वमित्यर्थः। वनशब्देन कदाचिदाम्रसमुदायस्य कदाचित्खदिरसमुदायस्य प्रतीतेर्न बुद्ध्यैक्यमित्याह *भिन्नेति। *आलम्बनत्वात्—विषयत्वात्। *कैयटेनेति। उक्तविभागस्य कैयटेन प्रदर्शितत्वादित्यर्थः। कथं तर्हि सर्वनामनि न लक्षणेति

१ अपि शब्दो भिन्नक्रमः बोधपदोत्तरं द्रष्टव्यः।

प्रवादः, विशेषबोधार्थं लक्षणाया आवश्यकत्वात्, इति चेत् । तदादिन्यायेन सामान्ये शक्तस्य विशेषरूपेणोपस्थापकत्वमिति मते तथा संवादात् ॥ ४१ ॥

(कृ०टी०)सैव वाच्येति सिद्धान्तमाह *शतशोऽपीति । अनन्तवचनोऽयं शतशब्दः । *सा–साऽपि।विषयभेदेन । अत एवाह *द्रव्येति । सर्वत्रेति भावः । एवेन तद्व्यवच्छेदः । व्यवहारस्य तत्रैव सम्भवात् । सिद्धान्तमतेनाह *गुणेति । परमतेनाह *अतिरिक्तेति । गुणाद्याश्रयस्यैव द्रव्यत्वात् । एवांशे दूषणमाह *उक्तेति । 'गां लिख'इत्यादाविति भावः । *तत्र–आकृतिमति । जातेः शक्यत्वमप्रमाणमिति शङ्कते *यद्यपीति । *पुरुषान्तरात्–प्रयोज्यवृद्धभिन्नात् । *बालः–यो व्युत्पित्सुः । विशेषशक्तिग्रहानन्तरमिति शेषः । *श्रवणोत्तरमेव–नतु वाक्यान्तरश्रवणोत्तरम् । *मात्रङ्गत्स्न्यैं । आदिना कार्यत्वम् । इदं परसंमतमपि स्थलविशेषे इत्याह *यथेति । *शक्तिग्रहे–बहुव्रीहिणा यथा तत्र तत्त्वेन सर्वोपस्थितिस्तथाऽत्र तत्त्वेन तदुपस्थितिरिति न तदुपयोगः । एतेन तासां नैतत्संभव इत्यपास्तम् । *इत्यादीत्यादिना-कपिला कपोतिकेति । *अप्रतीतिरिति । विशेषानवगतिपूर्वं सामान्यस्य शब्दतोऽवगतिरित्यर्थः ।

अयं भावः—गुणादिभिन्नेष्वनुस्यूतैकाकारप्रतीत्या जातिसिद्धौ तत्र शक्तिग्रहः शब्दात्तस्या बोधश्च । व्यक्तीनां त्वानन्त्यात्तासु न शक्तिग्रहो नापि शुद्धानान्तासां बोधः । तासां विशेषरूपात्वेन विशेषावगतिप्रसङ्गात् । यथा आकृतिरूपादिकं शाब्दबोधे भासते सामान्येन तथा विशेषोऽपि भासेत । जातेः शक्यत्वे तु तदाश्रयत्वेनाक्षेपादिना सामान्याकृतिरूपादेरेव ग्रहणमिति न दोष इति

*कोविशेषइति । एकेनैव हेतुना एकत्वाभिधानयोः सिद्धत्वादिति भावः । *संनिधिमात्रेण—शक्तिग्रहे व्यक्तावुपलक्षणतामात्रेण । *प्रत्यभिज्ञेति । तदुच्चरितगोशब्दाद्यादृशः प्रत्ययः तादृश एवैतदुच्चरितादित्येवं प्रत्यभिज्ञाविषयता । साचैकाकारतां वि-

१ तद् सामान्यम् । २ एवो द्रव्यस्यैवेत्येतद्घटकः ।

नाऽनुपपन्नेत्यर्थः । द्वितीयहेतुनाऽभिधाने सिद्धेऽप्येकत्वं न सिध्यतीत्याह *तथावनमिति । *अविशेष इति । एकरूपत्वमित्यर्थः । वनशब्देन कदाचिदाम्रसमुदायस्य, कदाचित्पलाशसमुदायस्य, कदाचित् खदिरसमुदायस्य, कदाचिदाम्रादिसमुदायस्य प्रतीतेरिति तात्पर्यम् । तदाह *भिन्नेति । *अतएव-विशेषे शक्त्यभावादेव । *सा च-जातिः ॥ ४१ ॥

साच जातिः सर्वत्र । आकाशजातिसमवायादेरप्यौपाधिकानेकत्वात् ।

तदुक्तं हरिणा—

संयोगिद्रव्यभेदेन देशे च परिकल्पिते ।
तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥ इति ।

आकाशेत्युपलक्षणम् ।

अर्थजात्यभिधानेऽपि सर्वे जात्यभिधायिनः ।
व्यापारलक्षणा यस्मात्पदार्थाः समवस्थिताः ॥ इतिच ।

जात्यभिधायिनः, जातिविशिष्टवाचकाः । व्यापारलक्षणाः, प्रयोजनज्ञाप्याः । शब्दस्यान्वयिरूपमनवच्छेदकीकृत्य अप्रत्यायकत्वात् । एवं च 'निस्सामान्यानि सामान्यानि' इत्यनादेयम् । सामान्यानीत्यस्य शब्दस्याबोधकत्वात् ।

किञ्च ब्रह्मण एव प्रमाणसिद्धतया सर्वे भावा ब्रह्मणः शक्तिभूता नतु ततो भिन्नाः । तत्र यथा-व्यवहारं शक्तिकल्पनेति सर्वत्र जातिद्रव्यविभागः । आकाशत्वं, घटत्वमिति व्यवहारस्य तुल्यत्वात् । तत्तत्कर्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रत्वमिति मते श्रोत्रत्वस्य जातित्ववत् ।

सा च जातिरुत्पत्तेः प्राक् नाशे च सूक्ष्मरूपेण्वाश्रये-

व्यवातिष्ठते इति नित्यत्वं तस्याः।अनुगताकारज्ञानजनकं व्यक्तीनां यत्किञ्चिद्रूपं तत्सर्वं जातिः। एवं च जातिः, उपाधिरिति पर्यायाविति हेलाराजः।

सर्वजातीनां व्यापकत्वेऽपि पदार्थानां विचित्रशक्तित्वात् कां चिदेव जातिं कश्चित्पदार्थोऽभिव्यनक्ति न सर्वां सर्वः। सा च कदाचित्स्त्रीत्वयुक्तेन पिण्डेन व्यज्यते, कदाचित्पुंस्त्वयुक्तेन, कदाचिदेकाधारस्था, कदाचिदनेकाधारस्थेति बोध्यम्।

'तस्याः प्राधान्येऽपि स्वाश्रयसमवेतत्वेन संख्यादेस्तत्र बोधात् तत्तल्लिङ्गवचनोपपत्तिर्गुणवचनशब्दवद्' इति सरूपसूत्रभाष्ये स्पष्टम्। सा च नित्येत्युक्तम्।

अत एव भाष्ये "सिद्धे शब्दार्थसबन्धे" इति वार्तिके "सिद्धे शब्देऽर्थे सम्बन्धेचेति विग्रहः कं पदार्थं मत्वा" इति प्रश्ने "आकृतिमित्याह। आकृतिर्हि नित्या द्रव्यमनित्यम्"। अत्राकृतिपदेन जातिः संस्थानं च। उभयमपि नित्यम्। अनयोर्यथा नित्यत्वं तथा वक्ष्यते। "अथवा द्रव्ये एव पदार्थे एष विग्रहो न्याय्यः–सिद्धे शब्दे ऽर्थे सम्बन्धेचेति। द्रव्यं हि नित्यमाकृतिरनित्या। एवं हि दृश्यते लोके मृत् कया चिदाकृत्या युक्ता पिण्डो भवति पिण्डाकृतिमुपमृद्य घटिकाः" इत्यादि ॥ ४२ ॥

*सर्वत्रेति। पदार्थमात्रे इत्यर्थः। ननु आकाशादीनामेकव्यक्तिकतया कथं तत्र जातिरत आह *आकाशेति। आकाशजातिसमवायानां सर्वेषामनेकत्वमित्यर्थः।

एतेनाकाशपदान्निर्विकल्पक एव बोध इति, शब्दाश्रयत्वमेवाकाशपदशक्यतावच्छेदकमिति चापास्तम् ।

*संयोगिद्रव्यभेदेनेति । अयं भावः—सर्वभूतानामधिकरणमाकाशम्, अवकाशदानाद्ध्याकाशम् । तथाच इह देशे घटसंयोग इति व्यवहारात्संयोगिनां घटादीनां यो भेदस्तद्वशादाकाशस्यापि भवत्यौपाधिको भेदः । एवंच प्रतिदेशमाकाशमिदमित्यभिन्नप्रत्ययलक्षणमस्त्याकाशसामान्यम् । एवं कालस्यापि युधिष्ठिरादिसंयोगवशादनेकत्वम् । एवं दिक्पालादिसंयोगवशाद्दिशोऽप्यनेकत्वम् । एवं समवायस्यापि सबन्धिभेदादेनकत्वोपचारः । सर्वत्रेहबुद्ध्यनुवृत्तेर्जातिकल्पनम् । *उपलक्षणमिति । जातिसमवायबुद्धेरपीत्यादिः । अत्र सर्वैर्गवादिशब्दैः स्वरूपपरैरर्थपरैश्च प्रथमं गोशब्दत्वादिजातिरेवाभिधीयते पश्चात् शब्दार्थयोरभेदारोपाद्गोत्वादिरूपार्थजातिषु अध्यासकल्पना ।

तदुक्तं हरिणा—

स्वजातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते ।

ततोऽर्थजातिरूपेषु तदध्यारोपकल्पना ॥ इति ।

इत्थं स्वसिद्धान्तमुपपाद्य भर्तृहरिर्मतान्तरमप्युपपादयति *अर्थजात्यभिधानेऽपीति । यदा विशुद्धा एवाऽर्थजातयः शब्दैरभिधीयन्त इत्याश्रीयते तदा सर्वे जात्यभिधायिनो ऽपि शब्दा जातिवाचिन एव । ननु निस्सामान्यानि सामान्यानीति सिद्धान्तात्कथं जात्यादिशब्दा जात्याधारे जातिमभिदध्युरत आह *व्यापारलक्षणा इति । व्यापारः प्रयोजनं तदेव लक्षणं हेतुर्येषाम् । अभिधारूपव्यापारवशाद्धि शब्दार्थकल्पनम् । यथा द्रव्यादिशब्दानामनुगमकधर्मस्वीकारः । एवं गोत्वाश्वत्वे सामान्ये इत्याद्यनुभवात्तत्राप्यनुगमकधर्म आवश्यक इति ।

*अवच्छेदकीकृत्येति । यथाहि घटादिशब्देषु घटत्वादिकमवच्छेदकीकृत्य शक्तिग्रह एवं जात्यादिशब्देऽपि जातित्वसामान्यमवच्छेदकमित्यर्थः । किञ्च जात्यादिषु सामान्याभावे "जात्याकृतिव्यक्तयस्तु पदार्थः" इति गौतमसूत्रस्यापि विरोधः । *अबोधकत्वादिति । अन्वयितावच्छेदकरूपास्वीकारे गोत्वाश्वत्वादीनि सामान्यानीति शब्दस्य बोधकत्वासम्भवादित्यर्थः । *ब्रह्मण एवेति । ननु ब्रह्मातिरिक्तस्याताचिवकत्वे तदन्तर्गतश्रुतेरपि तथात्वान्नेष्टसिद्धिरिति चेत् । श्रुत्यर्थस्य ब्रह्मणः "सत्यं ज्ञानम्" इत्यादिना ताच्विकत्वदृष्टेस्तस्यास्ताच्विकप्रामाण्यात् । *ब्रह्मणः शक्तिभूता इति ।

अयं भावः–अविद्याकल्पितस्य भावभेदस्यापारमार्थिकत्वादेकस्य नानात्वोन्नीयमानशक्तिभेद एव युक्त इति । अविद्यावृत्तिरूपस्य भेदस्य सर्वपदार्थानुयायिनो ऽसत्यत्वाद्व्यक्तिरिति व्यवहारः । भेदप्रत्यये सत्यप्यन्वयि रूपं जातिः । यथाच रुचकस्वास्तिककुण्डलादिविकारभेदे ऽपि सुवर्णमित्येव सर्वत्रानुयायि रूपं सत्यम् । एवंचैकैव जातिर्महासत्ताख्या ब्रह्मस्वभावा । तस्या एव गोत्वाश्वत्वजातिविवर्तः ।

तदुक्तम्–

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।

जातिरित्युच्यते । इति ।

आश्रयैर्भिद्यमाना उपचरितभेदा गवादिषु महासत्तैव गोत्वादिजातिः । तस्यामेव शब्दा वाचकत्वेन वर्तन्ते । एवंचाभावस्यापि बुद्ध्या निरूपणात् महासत्ताया अवियोगात्प्रातिपदिकमात्रवाच्या सा । अतएव 'प्रातिपादकार्थः सत्ता' इति प्राहुः । धातुरपि क्रियाव्यक्तिषु समवेतामुपाध्यनु-

गृहीतनानात्वां सत्तामेवाभिधत्ते । उपाधिभेदादेव च न सर्वेषां नानार्थत्वम् ।

अत्र सर्वे भावा इत्युक्त्या मायाया अपि शक्तित्वेन पराश्रयत्वात्पारतन्त्र्यं सूचितं न तु सांख्याभिमतं प्रधानत्वम् ।

नन्वेवं गोत्वमिति प्रकृतिप्रत्यययोरानर्थक्यप्रसङ्ग इति चेन्न। प्रातिपदिकेन गवाश्रयायाः सत्ताया अभिधानं प्रत्ययेन तु निष्कृष्टाश्रयस्य सामान्यस्येत्यदोषात् । जातिपदार्थे सर्वत्रान्वयिरूपं जात्यात्मना ब्रह्म विवक्षितम् । द्रव्यपदार्थनये परिनिष्ठितरूपं परमार्थतयेति दर्शनविकल्पः ।

ननु सत्यासत्यात्मकरूपद्वयस्वीकारे अद्वैतहानिरिति चेत् । सत्यम् । अविद्यावशान्नानात्वम् । तत्र योऽप्रकाशस्साऽविद्या । नचाप्रकाशो नाम प्रकाशाभावरूपोऽधिकरणादतिरिक्तोऽस्तीति दिक् ।

*यथाव्यवहारमिति । गोत्वजातिर्गोव्यक्तावेवेत्यादि । *जातिद्रव्येति । द्रव्यशब्देनात्र व्यक्तिरुच्यते । *सूक्ष्मरूपेषु-परमाणुषु । "सर्वं जातिः" इति जातिशब्देन धर्ममात्रमुच्यते नातः पश्वादिशब्देऽपि तत्प्राप्तिरिति गौतमसूत्रव्याख्यातारः । *व्यापकत्वेऽपीति । ब्रह्मसत्तारूपाया गोत्वजातेरश्वेऽपि सत्त्वात् । *विचित्रशक्तित्वादिति । उपाधिस्वभावादिति भावः । ननु जातेर्वाच्यत्वे लिङ्गसंख्याद्यनन्वयप्रसङ्ग इत्यत आह *प्राधान्येऽपीति । तथा च सामानाधिकरण्येन संख्याद्यन्वय इति भावः । *गुणवचनशब्दवदिति । तत्राप्येकार्थसमवायेनैव लिङ्गसंख्यान्वयोपपत्तेः ।

केचित्तु एकं रूपं द्वे रूपे इति अबाधितप्रतीतेः संख्या अ-

तिरिक्तपदार्थ एव । नहि तत्र स्वाश्रयसमवायादीनां सम्बन्धत्वसम्भवः । सर्वत्र प्रतीतीनामविलक्षणत्वात् । किञ्च एकार्थसमवायेन घटत्वादौ द्वित्वसत्त्वात्तद्बोधापत्तिः इत्याहुः ।

*कंपदार्थमिति । कं पदार्थं मत्वा सिद्धत्वमुच्यते इति प्रश्नार्थः । *संस्थानम्—कम्बुग्रीवादिमत्त्वादि । *तथा-वक्ष्यत इति । प्रवाहाविच्छेदात् । *द्रव्यं हि नित्यमिति । एकस्मिन्नेव द्रव्ये अनेकाकृतियोगाद् द्रव्यं नित्यमित्यर्थः ।

अयं भावः-उपाधीनां वस्तुतो व्यतिरिक्तत्वाभावेनोपधेयरूपतया उपाधिमद्द्रव्यमेव नित्यत्वात् शब्दार्थ इति ॥ ४२ ॥

(क.टी.) *साचेति । उक्तरूपा, उक्तरीत्या सिद्धाचेत्यर्थः । नन्वाकाशत्वादेरेकव्यक्तिवृत्तित्वात्कथं तत्त्वमत आह *आकाशेति । *आदिना कालादि । *देशे-प्रदेशे । *तेषु-तावत्प्रदेशोपश्लिष्टस्याकाशस्यापि । प्रतिज्ञाऽविरोधायाह *आकाशेत्युपेति । हर्यन्तरमत एवाह *अर्थेति । तन्निष्ठजात्यभिधानेऽपीत्यर्थः । पूर्वार्द्धोक्ते ऽर्थे हेतुमाह *व्यापारेति । यथाश्रुतासङ्गतेराह जातिविशिष्टेति । *व्यापारः-प्रतीतिरूपः । व्यापारलक्षणा इति बहुव्रीहिः । तदाह *प्रयोजनेति । सत्त्वमेवाह *शब्दस्येति । एवञ्चेत्यस्यार्थमाह *सामान्येति । गोत्वाश्वत्वादीनि सामान्यानीत्यस्यावोधकत्वापत्तेरित्यर्थः । सिद्धान्तरीत्या दोषमाह *किञ्चेति । एवेन प्रपञ्चव्यवच्छेदः । अग्नेर्दाहकत्वादिवदाह *शक्तीति । *तत्र-ब्रह्मणि । इदं परस्यापि क्वचिदावश्यकमित्याह *तत्तदिति । ननु जातेराकाशवद् व्यापकत्वे सर्वं गोभूतं स्याज्जातिसंकरप्रसङ्गश्चात आह *सर्वेति । सङ्करोऽपि न, परस्परपरिहारेण भिन्नवस्तुनिष्ठानामेवैकत्र स्थितेः सङ्करत्वाद्, स न गोत्वादीनामिति भावः । *न सर्वामिति । यथा आत्मनां व्यापकत्वेऽपि क्वचिच्छरीरे कश्चिदेवात्मा स्फुरति नतु सर्वः सर्वत्र तद्वदित्यर्थः । ननु जातेः प्राधान्ये तस्यां स्वतो लिङ्गाद्यभावात्कथं तदुपपत्तिरत आह *तस्या इति ।

१ सामान्यमस्तीति मूलेन योजना ।

*सरूपेति। तत्रहि "लिङ्गवचनासिद्धिर्गुणस्यानित्यत्वाद्" इत्युक्तम्। गुणाः सत्त्वादिगुणाः स्त्रीत्वादयः, एकत्वादीनि च। तेन च जातौ तदारोप इति तात्पर्यम्। विशेषं वक्तुमनुवदति *साचेति। प्रकृतोपयुक्तमात्रमाह *अर्थेचेति। चेन सम्बन्धोऽपि बोध्यः। कैयटसूचितमाह *अत्राकृतीति। पूर्वञ्जातिमात्रस्य नित्यत्वोक्तावपि वस्तुतस्तत्त्वस्याभावादाह *अनयोर्यथेति। जातिसंस्थानयोर्येन प्रकारेणेत्यर्थः। तथाच पूर्वं तत्प्रकारो नोक्तो ऽनुपदमेव वक्ष्यत इत्यर्थो बोध्यः। *अथवेति। "अथ द्रव्ये पदार्थे कथं विग्रहः, सिद्धे शब्देऽर्थसम्बन्धेचेति–नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः" इति तत्रत्योऽस्यादिः। *इत्यादीत्यादिना–"घटिकाकृतिमुपमृद्य कुण्डिका" इत्यादिपरिग्रहः॥ ४२॥

अत्र कैयटः–तत्तदाकारं तत्तद्व्यङ्ग्यजातिरूपं वाऽसत्यमुपाधिमाश्रित्य तदवच्छिन्नं ब्रह्मैव द्रव्यम्।

एतेन मृदो ऽप्यनित्यत्वाद् "द्रव्यं नित्यम्" इत्ययुक्तमित्यपास्तम्। मृदो ऽप्याकारमात्रतया ब्रह्मण्येव पर्यवसानात्। "वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इतिश्रुतिवत्।

आकृतिः संस्थानं[1] तस्या अनित्यत्वे तद्व्यङ्ग्यजातिरप्यनित्येति एतत्तात्पर्यम्।

"यद्वा आकृतावपि पदार्थे एष विग्रहो न्याय्यः। ननु चोक्तमाकृतिरनित्येति। नैतत्। नित्या आकृतिः। कथम्। न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्था तूपलभ्यते" इति। अत्राकृतिपदेन जातिः। उपरमो ऽनभिव्यक्तिः।

---

१ अत्र खसञ्ज्ञके मूलपुस्तके–ब्रह्मदर्शने जातेरप्याविद्यकत्वेनासत्यत्वादनित्यत्वमिति। अनेन अत्र प्रकरणे व्यङ्ग्यव्यञ्जकयोरुभयोरप्याकृतिपदेन ग्रहणं सूचयति–इति पाठो ऽधिकः।

आविद्यकः पदार्थो जातिः यावद्व्यवहारं ध्रुवत्वात्कूटस्थत्वादविचालित्वादनपायोपजनविकारित्वाद्वारंवारमुत्पत्त्याद्यभावेनानुत्पत्त्यवृद्ध्यव्यययोगित्वेन नित्येति एतद्भावः । एतदभिप्रेत्य "भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नम्" इति सामान्यलक्षणमुक्तम् । अथावयवसंस्थानरूपाया आकृतेरुक्तहेत्वभावेन प्रकारान्तरेण नित्यत्वमाह "अथवा यस्मिंस्तत्त्वं न विहन्यते तदपि नित्यम् । तस्य भावः तत्त्वम् । आकृतावपि तत्त्वं न विहन्यते" इति[1] । अवयवसंस्थानरूपाया आकृतेराश्रयप्रवाहाविच्छेदात्तद्धर्मस्याविघात इत्याशयकेनानेन प्रवाहनित्यतोक्ता ॥ ४३ ॥

(कुं.टी.)*ब्रह्मैव द्रव्यमिति । सर्वेषां धर्माणां ब्रह्मण्यध्यस्तत्वेन सर्वत्राधिष्ठानभूतं ब्रह्मैव । विशेष्यमेव च द्रव्यम् । शुक्तिरजतादिज्ञाने शुक्त्यादीनां विशेष्यत्वात् । तथाहि—व्याडिमते सर्वे शब्दा द्रव्याभिधायिनः । तद्यथा आत्माद्वैतवादिभिरात्मशब्देन द्रव्यमुच्यते । आत्मैवहि बुद्ध्युपाधिभिन्नं प्रतिभासमानं द्रव्यं पदानामर्थः । अत एव स्वभाव आत्मभूता सत्तेति वदन्ति । अत एवोक्तं हरिणा—

---

१ यस्मिन्विहते नष्टेऽपि तद्धर्मो न विहन्यत इत्यर्थः । आकृतिव्यक्त्योश्च परम्परं भावत्वं घटत्वादिघटादिरूपमेव । जातेराकृतेश्चाविद्यकत्वेऽपि तत्तदुपाध्यवच्छिन्नं ब्रह्मैव द्रव्यम् । तस्याविद्यकत्वे तदवच्छिन्नं ब्रह्मेव आकृतिर्जातिश्चेति बोध्यम् । तत्त्वपदेन च तद्व्यवहारो लक्ष्यते । निर्धर्मकव्यवहाराभावाच्च धर्मव्यवहार इत्युक्तम । इति पाठोऽधिको पुस्तके खसंज्ञके ।

आत्मा वस्तुस्वभावश्च शरीरं सत्त्वमित्यपि ।
द्रव्यमित्यस्य पर्यायास्तत्त्वमित्यपि हि स्मृतम् ॥ इति–

इति भावः। एवञ्चाधिष्ठानसत्ताभिप्रायेणैव घटः सन्निति प्रयोगः । नहि सत्ता जातिस्तत्र निमित्तम् । अभावेऽपि सन्निति व्यवहारात् । अत एव स्वरूपसत्त्वमपि न तत्र हेतुः । अभावे ऽनुगतधर्माभावेनानुगतप्रतीत्यनापत्तेः । *वाचारम्भणमिति । आरभ्यते स्पृश्यते इत्यारम्भणं वाचा वागिन्द्रियेण नामभेदकल्पनम्। यथा घटः शराव इत्यादि, वस्तुतस्तु मृत्तिकैवेति तदर्थः। नित्या आकृतिरित्यत्र हेतुं भाष्यकारः पृच्छति *कथमिति।समाधत्ते *क्वचिदिति। क्वचिद्व्यक्तावनभिव्यक्ता नैतावता सर्वत्रानभिव्यक्ता भवति। तस्मान्नित्यत्वं जातेरित्यर्थः। अनित्यता त्रिविधा–संसर्गानित्यता यथा–स्फटिकस्य जपाद्युपधानेन स्वरूपतिरोधानम् । परिणामानित्यता यथा–बदरफलस्य श्यामतातिरोधाने लौहित्याविर्भावः । प्रध्वंसानित्यता सर्वात्मना विनाशः । एतत्त्रिविधव्यत्यासेन नित्यतां समर्थयति *ध्रुवेति । *कूटस्थत्वादिति संसर्गानित्यता परिहृता। कूटमयोघनस्तद्वत्तिष्ठति । संसर्गिनाशे ऽपि स्वयमनष्टा, इत्यर्थः । *अविचालिभिरिति । परिणामा ऽनित्यता । *अनपायेत्यादिना प्रध्वंसानित्यता परिहृता । उत्पत्तेः सत्तापर्यन्तत्वादनुत्पत्तीत्यनेन जन्मसत्तारूपौ विकारौ निरस्तौ । *अवृद्धीति । वृद्धिरूपविकाररहितम् । *अव्ययमिति । विनाशः परिहृतः । *यस्मिंस्तत्त्वमिति । प्रवाहनित्यताऽनेनोक्ता । तन्नाशे ऽपि तद्धर्मो न नश्यति । आश्रयप्रवाहाविच्छेदादिति भावः । तत्त्वमित्यस्यार्थमाह *तस्य भाव इति । *संप्रदायाविच्छेदादिति । अयं नित्यत्वे हेतुः ॥ ४३ ॥

(क.टी.) ननु घटादिद्रव्यस्य कथं नित्यता, अत आह *अत्रेति। कैयटोक्तासत्यपदार्थमाह *तत्तदिति । कम्बुग्रीवादिमृदादिरूपमित्यर्थः । *तद्व्यङ्ग्येति । तत्तदाकारव्यङ्ग्यघटत्वादिजातिरूपमित्यर्थः । एतेनेत्यस्यार्थमाह *मृदोऽपीति । *श्रुतिवदिति । श्रुतेर्यथा तत्त्वेन तत्र पर्यवसानन्तद्वदित्यर्थः । ननु जातेरनित्यत्वे सिद्धान्तविरोधो ऽत आह *आकृतिरिति । तथाचाविरोधायैव मध्ये इदं लिखितम् । एतेन पूर्वोक्तार्थानुपपादकत्वादिदमत्रायुक्तमित्यपास्तम् । तदाह *एतदिति । द्वितीयमते इत्यर्थः । अथाद्यमतं समर्थयते *आकृतावपीति । *न क्वचिदिति । क्वचिदुपरतेतिं कृत्वा न सर्वत्रोपरतेत्यन्वयः । ननूपरमो नाशश्चेत्तत्काले एवान्यत्र सत्त्वं विरुद्धमत आह *अनभीति । अविद्याया जातित्वे मानाभावात्तावन्मात्रेणानिर्वाहादाह *आविद्यक इति । तृतीयमतं तु अग्रे एव खण्डनीयमिति भावः । ननु परमार्थदृष्ट्या सर्वमनित्यमत आह *यावदिति । अद्वैतेन लौकिकव्यवहाराभावाद्व्यवहारे च जातेरेकाकारपरामर्शहेतुत्वात्सर्वदा एकाकारपरामर्शदर्शनेन यावद्व्यवहारकालमित्यर्थः । *कूटस्थत्वादिति ध्रुवत्वादित्यस्य व्याख्यानन्तद्व्याख्यानम् *अविचालित्वादिति । रूपान्तरापत्तिर्विचालः । यथा पयसो दध्यादिरूपता । अनेन परिणामानित्यता परास्ता । अपायोपजनरूपविकारद्वयशून्यत्वादित्यर्थः । तत्र *अनपायेति पञ्चमापचयनिरासः । *अनुपजनेति चतुर्थपरिणामनिरासः । उत्पत्तेः सत्तापर्यन्तत्वादनुत्पत्तीत्यनेन जन्मसत्तारूपौ भावविकारौ निरस्तौ । *अवृद्धीत्यनेन तृतीयो वृद्धिलक्षणो निरस्तः । *अव्ययेति षष्ठो विनाशो निरस्तः । एतद्रूपविकाररहितं नित्यम् । इदं च भाष्ये मुख्यत्वेनादौ नित्यत्वं ब्रह्मविषयं यावद्व्यवहारमेकरूपस्थितपदार्थविषयं चोक्तं तदाह *नित्येत्येतदिति । द्वितीयविषयत्वे भाष्यान्तरसंमतिमप्याह *तदेवेति । जातिरूपसामान्यलक्षणमुक्तामिति पाठः । *भाष्ये—पस्पशायामेवेति भावः । *रूपायाइति । जातिव्यञ्जिकाया इत्यर्थः । *उक्तहेत्विति । यावद्व्यवहारकालं मध्ये मध्ये उत्पत्तिनाशयोः सत्त्वेन तदभावरूपोक्तहेत्वभावादित्यर्थः । न प्रागुक्त एव नित्यशब्दार्थः । प्रवाहाविच्छेदेऽतादृश्यपि नित्यत्वव्यवहारादित्याह *तदपीति । ननु किं तत्त्वमत आह *तस्ये-

ति । यस्मिन्विहते नष्टे ऽपि तद्वृत्तिधर्मो न विहन्यते न नश्यति आश्रयप्रवाहाविच्छेदादित्यर्थः । तत्त्वपदेन तद्व्यवहारो लक्ष्यते । निर्धर्मकव्यवहाराभावान्नष्टव्यक्तेर्व्यवहाराभावाच्च तद्धर्मव्यवहार इत्युक्तः । आश्रयप्रवाहानुच्छेदाच्च तद्धर्मव्यवहाराविघात इति तात्पर्यम् । तदाह *अवयवेति । *उक्तेति । इत्युक्तमिति शेषः । भाष्ये इत्यस्यात्रान्वयः । तस्यभाव इत्यादिहेलाराजइत्यन्तं ग्रन्थे पाठान्तरं क्वचित्पुस्तके दृश्यते तदयुक्तम् । प्रागुक्तत्वादिति बोध्यम् ॥ ४३ ॥

प्रवाहानित्यतां न्यायवार्तिककारो ऽप्याह— "नित्या वर्णाः नित्या वेदा इति च सम्प्रदायाविच्छेदात् । नित्या पृथिवी नित्याः पर्वता इतिवत् । तान्येव वेदवाक्यानि मन्वन्तरचतुर्युगान्तरेष्वपि सम्प्रदायाविच्छेदेन प्रवर्त्तन्ते । एतत् मन्वादिवाक्येष्वपि तुल्यम्" इति ।

व्याससूत्रमपि "समाननामरूपत्वाच्चावृत्तावप्यविरोधः" इति । वेदस्य तदर्थानां च नामरूपप्रवाहानुच्छेद एव नित्यत्वमिति तदर्थः । उपाधिसंनिवेशादिशब्दैश्चोपाधीनामपि तदात्मकत्वात् ब्रह्मैव वाच्यम् ।

यत्तु अविद्याशब्देनापि विच्छिन्नप्रकाशं ब्रह्मैव । विच्छेदो ऽपि तद्रूप एवेति नाद्वैतहानिरिति ।

अत्र वदन्ति । विच्छेदस्य ब्रह्मरूपत्वे तत्त्वज्ञाननिवर्त्यतानापत्तिरिति ।

वस्तुतस्तु विच्छेदो ऽसत्य एव । रज्जूरगवत् । सर्वोऽपि प्रपञ्च एवमेव । तत्तद्भोगप्रापकप्राण्यदृष्टैश्च ब्रह्मणस्तथा विवर्तः । एवञ्च तन्नाश्यतोपपन्नेति

परमार्थसारविवरणे प्रपञ्चितमस्माभिः । 'यथा स्वप्ने एकस्यैवान्तःकरणस्य विरुद्धानेकपदार्थरूपत्वं तथा जागरे मायासहकारेण ब्रह्मणस्तथात्वम् । यथाच जागरे अप्रतीयमानत्वात्स्वाप्नस्य मिथ्यात्वं तथा तुरीयदशायामननुवृत्तेरस्य प्रपञ्चस्य मिथ्यात्वं संविदश्च सत्यत्वम् । उपाधिवैशिष्ट्येन तदेव व्यवहारास्पदम् । निरुपाधिकं तु सर्वव्यवहाराविषय' इति हेलाराजः ।

आकृतिस्तु यत्र सम्भवति तत्रैव । गौतमीये "जात्याकृतिव्यक्तयः पदार्थ" इतिसूत्रे व्यक्तिपदेनच संख्यादिविशिष्टा व्यक्तिः, पिष्टकमय्यो गाव इत्यादावाकृतिरेव । वस्तुतस्तत्रापि जातिः । प्राण्याश्रितत्वेनाभिव्यक्ता तु पुण्यपापसाधनम् । तदुक्तं हरिणा—

चित्रादिष्वप्यभिव्यक्तिर्जातीनां कैश्चिदिष्यते ।
प्राण्याश्रितास्तु ताः प्राप्तौ निमित्तं पुण्यपापयोः ॥ इति ।

चित्रादीत्यादिना प्रतिमाः । प्राण्याश्रिता इति प्राणपदं कृतदेवताऽऽवाहनप्रतिमोपलक्षणम् । विसर्जने तु कृते ता न पुण्यपापसाधनम् ।

ब्राह्मणत्वादयो भावाः सर्वत्रैव च ते स्थिताः ।
अभिव्यक्ताः स्वकार्याणां साधका इति च स्मृतिः ॥ इतिच

यत्रैवोपदेशादिनाभिव्यक्तास्तत्रैव स्वकार्यसाधकाः । प्रतिनियतव्यञ्जकव्यङ्ग्यत्वादिति भावः । सरूपसूत्रे भाष्ये ध्वनितं सर्वमेतत् । स्वर्गापूर्वदेवताशब्दादौ नाकृतिर्बोध्या । दर्शनाभ्याससहकारेणैव त-

द्बोधात् । नव्यनैयायिकग्रन्थे प्रकृतिप्रत्ययार्थविचारस्तु व्याकरणवासनावासितान्तःकरणतया तत्रैव वास्तवत्वभ्रमेणेति बोध्यम् ॥ ४४ ॥

*तुल्यमितीत्यन्तं वार्तिकोक्तिः। *समानेति। सृष्ट्यन्तरेऽपि नामरूपसाम्यान्नित्यत्वस्याविरोध इत्यर्थः। तथाच श्रुतिः "यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्" इति। यज्ञेन पुण्येन कर्मणा वाचो वेदस्य पदवीयं मार्गमायन प्राप्तवन्तः । *तदात्मकत्वात्—ब्रह्मात्मकत्वात् । *विच्छेदोऽपीति । तन्मते अभावस्याधिकरणस्वरूपत्वात् । भूतलादेः स्वरूपेण भावत्वेऽपि रूपान्तरेणाभावत्वाभ्युपगमात् । तदाहुः—

भावान्तरमभावो हि कया चित्तु व्यपेक्षया । इति ।

*असत्य एवेति । अयं भावः—यद्यपि विच्छेदो नाम प्रतिबन्धः, तथाच स्वाकारातिरिक्तस्य प्रतिबन्धकस्य स्वीकारेऽद्वैतहानिः प्राप्ता, तथापि अज्ञानस्यैव प्रतिबन्धकत्वस्वीकारेण वास्तविकप्रतिबन्धाभाव इति । अविद्या च अनादिभावरूपत्वे सति ज्ञाननिवर्त्या। नच सादिशुक्त्याद्यवच्छिन्नचैतन्यावरकाज्ञानेष्वव्याप्तिः । रूप्योपादानाज्ञानस्याप्यनादिचैतन्याश्रितत्वेनानादित्वात् । *एवमेव—असत्य एव । असत्यस्यापि व्यावहारिकसत्यत्वं दर्शयति *तत्तद्योगेति। *विवर्त इति। उपादानसमसत्ताककार्यापत्तिः परिणामः। उपादानविषमसत्ताककार्यापत्तिर्विवर्त्तः। *यथा स्वप्नेइति। अयं भावः—स्वप्नावस्थागतः प्रपञ्चो जाग्रद्दशया बाध्यमानत्वादसत्य इति सर्वानुमतं, तेनैव दृष्टान्तेन जागरायां यो भावभेदस्तस्य तुरीयदशायामननुवृत्तत्वादसत्यत्वम् । सर्वावस्थास्वनुगतं संविन्मात्रं सत्यम् । चिच्छक्तेरावरको

मोह एव निद्रा नाम । तस्य चाविद्यावृत्तिरूपत्वान्मिथ्यात्वम् । एवं जाग्रत्स्वप्नावस्थागतमूर्तक्रियाविवर्तरूपमसदेवेति । *अनेकपदार्थरूपत्वमेवेति । अविद्यावृत्तिभेदात् । *तथात्वम्—अनेकरूपत्वम् । जाग्रदादिभिन्नत्वं तुरीयत्वम् । *तदेव—ब्रह्मैव । *सर्वव्यवहाराविषय इति । "यद्वाचाऽनभ्युदितम्" इत्यादिश्रुतिभिर्व्यवहाराविषयत्वस्यैवोपपादनात् । नन्वेवं "तं त्वेवमौपनिषदं पुरुषं पृच्छामि" इतिश्रुतिविरोधः । सत्यम् । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इतिश्रुत्या वाङ्मनसातीतत्वमेव तस्य । औपनिषदत्वं तु उपनिषज्जन्यान्तःकरणवृत्त्या स्वात्मानमप्यविषयीकुर्वत्या प्रतिबन्धकाज्ञाननिवृत्तौ स स्फुरतीत्यभिप्रेत्य । ननु घटादीनामाकारविशेषस्य सर्वत्र व्यक्तिषु नियतत्वाभावात्कथमाकृतेर्वाच्यत्वं गौतमेनोक्तमत आह *आकृतिस्त्विति । यत्राकृतिरेव नियमतः पदेन प्रत्याय्यते तत्रैवाकृतिर्गौतमसूत्रे वाच्यत्वेन विवक्षितेत्यर्थः । ननु घटत्वमित्यादौ जातिरपि व्यक्तिरेवेत्यतो व्यक्तिपदेन गतार्थतां निराकरोति *व्यक्तिपदेनचेति । *संख्यादीति । संख्याकारकाविशिष्टेत्यर्थः । कुत्र आकृतिमात्रप्रतीतिस्तत्राह *पिष्टकमय्यइति । स्वमतमाह *वस्तुत इति । अचेतनजातीनामपि सर्वगतत्वमुपपादयति *चित्रादिष्विति । आलेख्यलिखितेऽपि ब्राह्मणे सादृश्यात्तदाकारानुकारप्रत्ययोदयात्तत्रापि जातिप्रकाशः । चित्रस्योपघाते त्वधर्मो न भवति । एवं चित्रस्थब्राह्मणपूजायां धर्मोऽपि न भवति । कैश्चिदित्यरुचिबीजं तु मुख्यसादृश्यात्तत्प्रतिकृतिषु तत्प्रत्ययो भवति न तु तद्वशात्तत्र जातिसमवाय इति । *कृतदेवतेति । तत्र हि प्रतिष्ठाविधिना देवतानां प्रतिमायाम् अहङ्कारो भ-

वति । चण्डालादिस्पर्शे च तदभिमानाभावः । ननु प्रतिमायां देवताबुद्धेरध्यासे भ्रान्त्यापत्तिः । सत्यम् । अन्योन्यस्मिन्नन्योन्यबुद्धिरध्यासः । प्रतिमायामेव हि देवतादृष्टिर्न देवतायां प्रतिमादृष्टिः । *आवाहनम्—अभिव्यक्त्यनुसन्धानम् । *विसर्जनम्—निजरूपेणावस्थानचिन्तनम् । पूर्वं व्यक्तिसर्वगतत्वं सामान्यानामुक्तम्, इदानीं सर्वगतत्वनये ऽप्याह *ब्राह्मणत्वादय इति । भवन्ति सर्वत्रेति भावा ब्राह्मणत्वादयः । ते प्राणिषु क्षत्रियादिष्ववस्थितत्वात्सर्वगताः । तथापि "ब्राह्मणमालभेत" इत्यादौ नाव्यवस्थाप्रसङ्गः । यत्रैव हि उपदेशादिनाऽभिव्यक्तिमासादयन्ति तत्रैव स्वकार्यं साधयन्तीति पारम्पर्येण स्मर्यते । एवं च घटत्वादिजातयः प्रलये परमाण्वादिष्ववस्थिताः । *स्मृतिरित्यनेन जातिवादिवाजप्यायनमते स्मरणं सूचितम् । *प्रतिनियतेति । तच्च ब्राह्मणत्वं विशुद्धमातापित्रोर्योनिजत्वव्यङ्ग्यम् । ननु गवादिशब्दोच्चारणे आकारविशेषस्यापि प्रतीतेरस्त्वाकृतेरपि शब्दार्थत्वमत आह *स्वर्गापूर्वेति । यदि हि आकृतिरपि शब्दार्थः स्यात् तदा स्वर्गादिशब्दे ऽपि तत्प्रतीत्यापत्तिः । तस्मान्निष्कृष्टो ऽर्थमात्र एव शब्दार्थः । ननु कथमाकारविशेषस्य प्रतीतिस्तत्राह *दर्शनाभ्यासेति । सास्नादिमत्स्वेव गोशब्दप्रयोगं पश्यतां तद्दर्शनाभ्यासादाकारविशेषप्रत्ययो नान्तरीयको न शाब्द इत्यर्थः ॥ ४४ ॥

(क० टी०) आद्यस्य परसंमतत्वं प्रसिद्धमेवेति द्वितीये परसंमतिमपि तदीयानामज्ञाननिरासायाह *प्रवाहेति । अद्वैतिसंमतिमप्याह *व्यासेति । प्रथमाध्यायतृतीयपादस्थदेवताधिकरणस्थम् । ननु जगत्कारणत्वादेव देवस्य नित्यत्वमित्यर्थकेन "अत एव च नित्यत्वम्" इतिपूर्वसूत्रेणोक्तं नित्यत्वमयुक्तम्, सृष्टिप्रलययोरुत्पत्ति-

प्रलयदर्शनाद्, अत आह *समानेति । "दर्शनात् स्मृतेश्च" इति सूत्रशेषः । आवृत्तौ पुनःपुनरुत्पत्तावपि समाननामरूपत्वात् समानशब्दार्थत्वाद् विवक्षितस्यैकरूपप्रवाहाविच्छेदरूपानित्यत्वस्याविरोधः । श्वासप्रश्वासवत् पुरुषबुद्ध्यजन्यत्वेन च वेदे नाप्रामाण्यशङ्का । समाननामरूपत्वे प्रमाणं च—

"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" ॥ इति,
"सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो सुवः" ॥ इति च श्रुतिः,
"यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ इति च-

स्मृतिश्चेत्यर्थः । एवं च ब्रह्मणः स्वयंभूत्ववद्वेदस्यापि तत्त्वम् । सृष्ट्याद्यकाले प्रादुर्भावः प्रलये च लयो न तु मध्ये मध्ये घटादिवदिति नित्यत्वव्यवहारस्तस्येति भावः । तदाह *वेदस्येति । ननु तत्तदाकारादिरूपोपाधेर्द्रव्यनित्यतापक्षे उक्तत्वेन तस्य च ततो भेदलाभेन प्राक्सिद्धान्तिताद्वैतहानिरितिशङ्कानिरासाय प्रागुक्तमपि कंचिद्विशेषं प्रागनुक्तमत्रैव प्रसङ्गाद्वक्तुमनुवदति *उपाधीति । *संनिवेशः—संस्थानम् । *ब्रह्मैवेति । पूर्वपूर्ववासनावशात्परमात्मन एवोपाध्यादिरूपेण तद्वैशिष्ट्येन च भानादित्युक्तं प्राक् । तथा च न तद्धानिः । तमेवाह *यत्त्वित्यादि । *विच्छेदोऽपीति । स्वकल्पितेत्यादिः । अत्र परोक्तदोषमाह *अत्रेति । विच्छेदांशे । तदुभयासांगत्यं प्रकटयन् सिद्धान्तमाह *वस्तुतास्त्वित्याद्युपपन्नेत्यन्तेन । *एवमेव—असत्य एव । प्राण्यदृष्टवासनासहकारेणेति पाठः । प्राण्यदृष्टैश्चेति पाठान्तरम् । *तथा—प्रपञ्चरूपतया । *एवं च—तस्यासत्यत्वेच । *तन्नाश्यता—तत्त्वज्ञाननाश्यता, सर्वप्रपञ्चवद् विच्छेदस्यापि । *इतीति । प्रपञ्चितं पूर्वत्र परमार्थसारविवरणे चास्माभिरिति पाठः । ननु कथमेकस्य युगपत्तथात्वमतस्तत्राह प्रच्युतस्येत्यादिप्रागुक्तहरिव्याख्यानस्थहेलाराजम् *यथेत्यादि । *तथात्वम्—विरुद्धानेकपदार्थरूपत्वम् । *संविदश्च—ब्रह्मणश्च । *उपाधीत्यग्रिमान्वयि । *तदेवब्रह्मैव । मायाया अपि दुग्धस्य दधिभावेनेव न प्रपञ्चरूपः परिणामः

किन्तु स्वर्णस्य कुण्डलरूपेणेव । एवंविधपरिणामो विवर्त्तपदेनोच्यते । अतएव प्रलये पुनरविद्यारूपेण सर्वावस्थानम् । यदि दाधेवत्परिणमे- त्तदा तस्य पुनर्दुग्धरूपत्ववत्प्रपञ्चस्य मायारूपेणावस्थानं भज्येत । तस्या यत् संस्काररूपेणावस्थानं तदेव ब्रह्मणि सर्वलयत्वेन व्यवह्रि- यते इति बोध्यम् । गौतमीये आकृतेः पदार्थत्वं सम्भवाभिप्रायं न तु सार्वत्रिकमित्याह *आकृतिस्त्विति । विशेषं वक्तु प्रागुक्तमपि पौ- नरुक्त्यपरिहारमनुवदति *गौतमीये इति । जातिव्यक्त्योरपि तत्त्व- मौत्सर्गिकं नतु सार्वत्रिकमित्याह *पष्टकेति । एवेनोभयव्यव- च्छेदः । *जातिः—सापि । तेनाकृतिसमुच्चयः । पूर्वेवन तु व्यक्तिमात्र- व्यवच्छेद इति भावः । नन्वेवं तन्नाशादौ प्रायश्चित्ताद्यापत्तिरत आह *प्राणीति । तदाश्रितत्वेनाश्रयोत्पत्त्यनन्तरं तत्रावयवसंस्थानाभि- व्यङ्ग्या सती स्वरूपसतीत्यर्थः । नतु ज्ञानमेव तत्साधनम्, अज्ञाने ऽपि प्रायश्चित्ताद्युपदेशात् । *अपिना प्राणिसमुच्चयः । *कैश्चित्—तत्त्वज्ञैः । उत्तरार्धवैयर्थ्यं परिहरन् शास्त्राविरोधमाह *प्राण्याश्रितेति । प्रति- मादीत्यर्थः । तेन चित्रसंग्रहः । प्राणिषु तु तथा स्पष्टमेवेति न तत्रास्योपयोग इति नापिरुक्तः । विशेषणफलमाह *विसर्जन इति । नन्वेवमपि शालग्रामाद्यसंग्रहस्तत्रावाहनाद्यभावात् । तत्त्वं तु तत्रापि शास्त्रसंमतमत आह हर्यन्तरम् *ब्राह्मणत्वेति । चार्थो ये इत्यादिः । *भावाः—जातयः । *चैः स्थितिसमुच्चये । *स्मृतिः—स्मरणम् । *चैः—पू- र्वहरिसमुच्चये । अभीत्यस्य साकाङ्क्षत्वादाह *यत्रैवोपदेशेति । श्रेयश्च शास्त्रीयः । आदिना स्वप्ने फललाभादिः । *प्रातिनियतेति । विशेषेत्य- र्थः । *सर्वमेतदिति । सर्वत्र जातिसत्त्वम्, तदेकत्वम्, तस्या वाच्यत्वञ्चाङ्गी- रीकृत्य नानार्थेष्वपि तथा स्वीकृत्य सरूपसूत्रं प्रत्याख्यातम् । सर्वत्र त- दसत्त्वादौ तु तदर्थन्तदावश्यकत्वेन तदसङ्गतिः स्पष्टैव । आकृतिस्त्व- त्युक्तफलमाह *स्वर्गेति । शब्दार्थभूताया आकृतेरवयवसंस्थानेऽ-

१ अपिर्नोक्तइति योजना ।

२ यत्तदोर्नित्यसाकांक्षत्वेनापेक्षितानुक्तयेइत्यस्य सङ्ग्रहोऽनु- क्तसमुच्चयार्थेन चेनेत्यर्थः ।

३ साधकाइतिचेत्यत्रत्यः । ४ श्लोकबाह्य इतिचेत्यत्रत्यः ।

५ उपदेश इत्यर्थः ।

पत्वस्योक्तभाष्योक्तत्वादिति भावः । एवञ्च तथा सूत्रयता गौतमेन पदलक्षणादिकरणान्न्यायमते पदस्फोट एव । तदु ध्वनयन्नाह *नव्येति । अत्रापि वाक्यस्फोटस्यैव तत्त्वादाह *भ्रमेणेति ॥ ४४ ॥

अनन्ता वर्णा उत्पादविनाशशालिनस्तत्समूहश्च पदं बोधकमिति पक्षे तु पदानामानन्त्याच्छक्तिग्रहासम्भवेनानुगताकारप्रतीत्या सिद्धायास्तत्तत्पदगतघटपदत्वादिजातेर्वाचकत्वम्। अर्थगतजातेः शक्यत्ववत् यथा च भ्रमणत्वादिजातिश्चरमक्रियाप्रत्यक्षव्यङ्ग्या एवमेषा ऽपि चरमवर्णप्रत्यक्षव्यङ्ग्या । क्रियासमुदाये बौद्धे भ्रमणत्ववदेषाऽपि तादृशे वर्णसमुदाये व्यासज्यवृत्तिः । तदुक्तम्—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता । इति ।

यद्वा शक्यतावच्छेदके शक्तेरिव शक्ततावच्छेदकेऽपि तस्याः सत्त्वमिति तस्याः स्फोटत्वव्यवहारः ॥ ४५ ॥

इति जातिस्फोटनिष्कर्षः ।

(कु० टी०) जातिस्फोटं व्युत्पादयति *अनन्ताइति । एतन्मते वर्णानामनित्यत्वात्तद्गता जातिरेव नित्येति सैव स्फोटशब्देनोच्यते। तदाश्रया एव तु ध्वनय उच्यन्ते। *चरमक्रियेति। विशिष्टप्रयत्नजनितेन विक्षेपविशेषेणाभिव्यक्ता भ्रमणत्वादिजातिः प्रत्येकसमाप्ताऽपि न गृह्यते भ्रमणानामन्त्यवृत्तौतु गृह्यते इत्यर्थः। *एषा—पदजातिः । *बौद्धे इति । व्यापाराणां समुदायासम्भवेन तत्समूहरूपक्रियाया अपि प्रत्यक्षासम्भवात् बौद्धे समुदाये जातिर्व्यज्यते इत्यर्थः । वर्णानामाशुविनाशित्वादाह *तादृशे इति । बौद्धे इत्यर्थः । *व्यासज्यवृत्तिरिति । तेन नैकवर्णो-

धारणे ऽर्थाभिव्यक्तिः । अतएवोक्तम् *अनेकव्यक्तीति । अनेकवर्णव्यक्तीत्यर्थः । तथा च भिन्नप्रयत्नोदीरितध्वन्यभिव्यक्तो जातिस्फोटोऽयं विलक्षण एव । *यद्वेति । यथा घटत्वादिकं वाच्यतावच्छेदकं तथा घटपदत्वादिकं शक्ततावच्छेदकमित्यर्थः ॥ ४५ ॥

(क० टी०) एवं वाक्यव्यक्तिस्फोटं सिद्धान्तभूतमुक्त्वा प्राचोक्तं जातिस्फोटं तत्सिद्धान्तभूतमेकदेशिमतेनाह *अनन्ता इति । सिद्धान्तरीत्याऽऽह *अनुगतेति । इदं घटपदमिदं घटपदमित्यादीत्यर्थः । असम्भवनिरासायाह *अर्थेति । ननु तद्व्यञ्जकत्वस्य प्रतिवर्णं सत्त्वे प्राचोक्तवर्णस्फोटपक्षोक्तदोषाः, सरो रस इत्यादौ बोधाविशेषापत्तिश्चात आह *यथाचेति । *चरमवर्णेति । पूर्वपूर्ववर्णानुभवसहकृतेत्यादिः । एवंच नोक्तदोषः । नन्वेवमपि प्रत्येकं तत्सत्त्वे आद्यदोषाभाव एवात आह *क्रियेति । ननु क्रमिकवर्णसमुदायस्य यौगपद्यासम्भवेनानारब्धे तु गोशब्दे गोशब्दत्वं कथं भवेदिति तत्र जातिर्दुरुपपादैवात आह *बौद्धे इति । उभयत्र हरिसंमतिमाह *तदुक्तमिति । अनेकाभिर्वर्णव्यक्तिभिरभिव्यङ्ग्या जातिः स्फोटो वाचिका ऽभिमतेत्यर्थः । स्फोटपदस्य च स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या वाचक इत्यर्थः । एवंच ज्ञाताया एव तस्या वाचकत्वमिति स्फोटस्य सदातनत्वात्सर्वदाऽर्थापत्तिरिति निरस्तम् । इदं चाकृत्यधिकरणन्यायेनोक्तम् । न्यायादिमतेनाप्याह *यद्वेति । *इतिजातीति । इत्येवं प्राचोक्तजातिस्फोटनिष्कर्ष इत्यर्थः ॥ ४५ ॥

परे तु यथाऽद्वैतिनामात्मभेद औपाधिको मायाकृतः चेतनस्यैकत्वे ऽप्यस्त्येव, तत्रानुगमार्थं जातिकल्पना च दृश्यते, तथैकस्यैव तत्तत्कालतत्तद्वर्णानुरागरूपोपाधिभेदेनानन्त्यात्तत्पक्षे ऽपि अनुगतव्यक्तिग्रहाय जातिरावश्यकी । परं तेषां तत्तदुपाध्यवच्छिन्नः स्फोटो व्यक्तिपदभाक् । तत्तदुपाध्युपल-

क्षितश्च जातिपदभाक् । पूर्वमते तु जातिः पदार्थान्तरम् ।

यत्तु सर्वत्र व्यक्तिरनित्या तत्तद्व्यक्त्युपाहितं ब्रह्मैव जातिरिति ।

तन्न । आविद्यकानन्तव्यक्तिकल्पनापेक्षया जात्यादेरेव हेतुत्वकल्पने लाघवात् । अत एव "अग्नेरग्नित्वमपागाद्" इत्यादिश्रुतौ धर्मस्यैव नाश उक्तः । अत एव "सिद्धे शब्दार्थसम्बन्धे" इति वार्त्तिके आविद्यकः पदार्थो जातिर्वा व्यवहारं नित्या प्रवाहनित्या वेति द्वेधैवाकृतेर्नित्यत्वमुक्तम् । तच्चोपपादितमित्याहुः ॥ ४६ ॥

इति वाच्यवाचकशक्तीनां निर्णयः ।

(कुं० टी०) *आत्मभेद इति । अन्तःकरणावच्छिन्नं चैतन्यं जीवः । जीवाकाराहंत्वप्रकारकाविद्यावृत्तिपरिणतो जीवोऽन्तःकरणेनाभिव्यज्यते । मायावच्छिन्नं चैतन्यं परमेश्वरः । अन्तःकरणभेदाज्जीवानां भेदः । तदुक्तम्-

तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।

*यथाऽग्न्युत्था विस्फुलिङ्गा वारिराशेरिवोदकम् ॥ इति

*औपाधिक इति । ननु चिन्मात्रस्याज्ञानं न स्वाभाविकिन्त्वौपाधिकम्, तत्र स्वस्यैवोपाधित्वे आत्माश्रय इति चेन्न । येकस्य स्वभेदकत्वनतस्त्रस्यैवोपाधित्वात् । चेतनस्यैकत्वेऽपि आत्मभेदोऽस्त्येवेत्यन्वयः । *अनुगमार्थमिति । नियतशब्दव्यवहारार्थमित्यर्थः ॥ ४६ ॥

इति श्रीमदाचार्यकृष्णमित्रकृतायां कुञ्चिकायां वाच्यवाचकशक्तीनां निर्णयः ॥

---

*अङ्गारकितमुत्पाति इति पाठान्तरम् ।